6·1

नाट्यशास्त्रम्

श्रीमदभिनवगुप्तविरचितविवृतिसमेतम् ।

NĀTYAŚĀSTRA

with the commentary of

ABHINAVAGUPTA

Edited with a preface, Appendix and Index by

MANAVALLI RAMAKRISHNA KAVI, M. A.,

Author of "The Deccan in a thousand years (400 to 1400 A.D),"
Joint-Editor of "Dakshinabharati Sanskrit Series," and

Editor of "The Lythic Records in Hyderabad" and
"The Forgotten Poets' Series" (Telugu), etc.

In Four Volumes

VOL. I

1926
CENTRAL LIBRARY
BARODA

nted by Messrs. R. Venkateshwar & Co., at the Ananda Press, Madras,
and published on behalf of the Government of His Highness the
Maharaja Gaekwad of Baroda at the Central Library, Baroda,
by Newton Mohun Dutt, Curator of Libraries, Baroda.

Price Rs. 6

PREFACE.

The first instalment of long-announced Nāṭyaśāstra with its exceedingly interesting commentary, entitled the Abhinavabhāratī of the Kashmirian author, Abhinavagupta, is now presented to the public as No. XXXVI of the Gaekwad's Oriental Series of Baroda. The whole work comprises thirty seven chapters out of which only seven are represented in the present volume. The commentary unfortunately being incomplete Chapter VII in this volume and the Chapter VIII in the next one had to be printed without it. I earnestly appeal to scholars all over India to supply us with information leading to the discovery of the commentary on the missing portion in order to enable me to print it later on as an appendix with due acknowledgments.

The Nāṭyaśāstra deals with the rules relating to theatrical performances—in fact to the science of stage. The term '*theatrics*' is perhaps the most appropriate word to represent its Sanskrit denotation in preference to any accepted terminology which would not be free from the ideas suggested by the European theatre. The science is intended as a guide alike to the poet and the player. The author of this work was Bharata or simply *muni*,[1] the sage. It is known as 'sūtra'[2] as it embodies principles set out in a very concise form. The work is also known as 'Ṣaṭsahasrī'[3], meaning 6000 (granthas). This appears to be an epitome of an earlier work called Dvādaśasahasrī,"[4] which means 12000 (granthas). This larger work is now

---

1 तण्डुमुनिशब्दौ नन्दिभरतयोरपरनामनी. (Page 90-17)

2 (a) "षट्त्रिंशकं भरतसूत्रमिदं". (Page 1-10)

(b) "कलानामानि सूत्रकृदुक्तानि यथा ...." (Nanyadeva's Bharatabhāṣya 20)

3 (a) अपि तु महावाक्यात्मना षट्सहस्रीरूपेण प्रधानतया प्रश्नपञ्चकनिरूपणपरेण शास्त्रेण निर्णीयते. (Page 8-24)

(b) "सूत्रणं सकलाङ्गानां ज्ञेयमङ्कमुखं बुधैः" इति षट्सहस्रीकारः. (Bahurūpamiśra in his commentary on Daśarūpa I-61)

(c) "षट्सहस्रीकृताप्युक्तम् ......": Daśarūpāvaloke (4-2)

4 (a) "समाप्यते हि नाट्यज्ञैरङ्कावतर इष्यते" इति द्वादशसहस्रीकारः. (Bahurūpamiśra I-62)

(b) नाट्यवेदाच्च भरताः सारमुद्धृत्य सर्वतः ।
संग्रहं संप्रयोगार्हं मनुना प्रार्थितं व्यधुः ॥
एकं द्वादशसाहस्रैः श्लोकैरेकं तदर्धतः ।
षड्भिः श्लोकसहस्रैर्यो नाट्यवेदस्य संभवः ॥ (Bhāvaprakāśana X-34, 35)

only in part available. Both these works seem to have been based upon a still older one called Nāṭyaveda, which forms one of the four Upavedas,[1] extending over 36000 slokas written by Brahma himself. Abhinava, the commentator of the present work, clearly says that it represents three different schools of opinion, viz., of Brahman, Sadāśiva and lastly Bharata, *i. e.*, the author's own views.[2] *Dvādaśasahasrī* is simply called *Ādibharata* and is in the form of a dialogue between Pārvatī and Śiva. This may be the work referred to as Sadāśiva's by Abhinava. We have fragments of both *Brahmabharata* and *Sadāśivabharata*.

The present work consists of 37 chapters according to the northern or later recension but only 36 according to the southern or earlier texts. The difference lies in the numbering of the chapters, as the southern or older texts combined the 37th with the 36th. Abhinava, the commentator, appears to be the author of this numerical extension of the text, though he himself states that the work consists of 36 chapters.[3] He actually comments upon the 37th chapter also. Should one be tempted to call the excess a copyist's error, it would be an error; for the commentator begins each chapter with a verse in praise of Śiva as incorporate of one of the 36 *tattvas* of the *Śaiva Siddhānta* in some order while the 37th chapter is headed with a verse indicating *anuttarah* (nothing beyond) a doctrine in Kashmirian Śaivaism propounded by Utpaladeva, the commentator's *paramaguru* (Teacher's teacher). The reason for this extension of the text is not mere fanciful device for introducing his Śaiva *tattvas*. The subject matter thus separated from the rest was probably composed by one of the *Vārtikakāras*, either Rāhulaka, Śinī, or Śrīharṣa. But he himself says in two places that Bharata's work consists of

---

1 गान्धर्ववेदः षट्त्रिंशत्सहस्रग्रन्थसंमितः ।
यत्र सप्तस्वरोत्पत्तिकथनं परिकीर्त्यते ।
वीणातन्त्रं कलातन्त्रं रागतन्त्रमनुत्तमम् ।
मिश्रतन्त्रं तालतन्त्रं गीतिकातन्त्रमेव च ॥
लासिकोल्लासिकातन्त्रं मेलतन्त्रं मृहत्तरम् ।
जातिग्रहलयस्थानं मार्गाङ्गप्रक्रिया क्रिया ॥
कालज्ञानं वाद्यवल्लीत्रिभिन्नाध्याय एव च ।
तुरङ्गरतिसारङ्गसिंहलीलाविजृम्भणम् ॥
अङ्गहारप्रविक्षेपाध्यायः संक्षोभणक्रिया ।
एवमादीनि गान्धर्ववेदे सन्ति सहस्रशः ॥ (Yāmalāṣṭakatantra in describing Upavedas)

2 एतेन सदाशिवब्रह्मभरतमतत्रयविवेचनेन ब्रह्ममतसारताप्रतिपादनाय मतत्रयीसारविवेचनं तद्ग्रन्थरूपेण विहितमिदं शास्त्रम् (Page 8-16)

3 (a) षट्त्रिंशकं भरतसूत्रमिदम् (Psge 1-10)
(b) मध्येऽत्र षट्त्रिंशदध्याय्याम् (Page 8-12)

36 chapters and hence the 37th must be according to him an interpolation by one of the *Vārtikakāras*.

Bharata divides the work broadly into four sections based on *abhinayas* or modes of conveyance of the theatrical pleasure to the audience, which pleasure, called *rasa*, is pure and differs from the pleasure we derive from the actual contact with the objects of the world which is always mingled with pain. These modes or *abhinayas* are four, viz., (1) *Sāttvika* (conveyed) by the effort of the mind, (2) *Āngika* or the natural movement of the organs when any thought is expressed or conveyed, (3) *Vācika*, the delivery through expression and (4) Āhārya, the dress, deportment, and *Mise-en-scene*. The sage attaches great importance to the first of these modes and deals with it in chapters 6 and 7. Expression of feeling is conveyed to a stranger only by gestures or through the organs of speech. Hence *āṅgika-abhinaya* comes next and is dealt with in chapters 8th to 13th. Then delivery or *vācika* is taken up which extends over chapters 14 to 20. Then comes *āhārya, i.e.* dress and scenic appliances and mutual conduct or movements on the stage along with the musical auxiliaries behind the stage to intensify the emotional effect produced on the stage. To this four-fold division of the subject are added chapters on the origin and greatness of the theatrics, the forms of the stage and rules for their construction, and the auspicious ceremonial on the foundation and the opening days. The fourth and fifth chapters treat of *pūrvaranga*, preliminaries before the commencement of the actual drama. These include music and dancing in praise of Gods and in averting the evil influence of the demons. The postures recommended in dancing to please the *daityas* are numberless and a selected list of 108 of them called *Karanas* or single postures and 32 selected *Angahāras*, (combinations of two or more of these *Karaṇas*) are fully described in the fouth chapter. The fifth chapter gives details about the preliminaries. Chapters of 35 and 36 are supplementary and deal with the qualifications and behaviour of the actors and actresses on the stage and how the theatrics descended from Heaven to the earth. Thus excluding the preliminary and supplementary chapters the science proper is dealt with in 29 sections (6 to 34).

Regarding the text our edition is based on 40 copies obtained from different parts of India, most of which are fairly complete. Though no two of them taken at random fully coincide in their readings, an examination of all of them convinces us that there are two recensions of the text. For the sake of convenience we may call them A and B. A recension seems to be of later origin, closely fostered by the *sphoṭa* School of Kashmere critics, to which Abhinavagupta and his preceptors, Tota, Utpala Deva, and Bhaṭṭenduraja belong. The earlier recension which we call B seems to have been followed by the Mīmāmsā and Nyāya school of literary critics, represented by Śankuka and his predecessors, Lollaṭa, Udbhaṭa etc. All the copies obtained in the Telugu, Tamil, Kanarese and Malayalam districts, with the

exception of two in the last named country, represent the earlier recension, while the edition of Kāvyamālā, (probably based on the two copies of the text in the Bhandarkar's Institute), their original copy which is our च manuscript, obtained from Ujjain by the Baroda State, and the two copies in the Library of Maharaja of Bikanir, represent A recension. One may call the earlier recension southern and the later northern. But we have obtained two copies from Malabar of the A recension while the two copies in the Durbar Library of Nepal represent B recension. Our Almorah transcript stands mid-way between the two recensions. Both the recensions seem to have been used according to the commentaries available. But the older recension was studied where no commentaries guided the reader. Dhananjaya used A set when he quoted from Bharata in his Daśarūpa but Bhoja of the same court used B text in quoting the same passage in his Śringāraprakāśa.

In this edition we have to give the A recension, because the commentator follows it. B recension seems to be more ancient but in it several portions according to the different schools of Nandin and Kohala have been interpolated here and there long before Abhinavagupta.

The chief tests that differentiate the two recensions are that:

(1) in A sets about 40 verses are omitted as mere interpolation at the end of the fifth chapter, while B sets give them ;

(2) the ninth chapter in A sets is divided into two chapters (9th and 10th) in B and thus the numbering differs thenceforth ;

(3) the 14th and 15th in A dealing with prosody for the stage introduce later terminology of Pingala (as *ra, ja, ta, bha, sa*, etc). while the B sets merely equate the measure of a line in short and long syllables of *laghu* and *guru* ;

(4) the definitions in the sixteenth chapter are given in Upajāti metres and in a certain order in A but they are given in Anuṣṭubh metre and in a reverse order in the 17th chapter of the B sets ;

(5) the subject matter of the 26th chapter in A is found in the 35th chapter in B sets ;

(6) 36th chapter in B sets is divided into two chapters 36 and 37 in A sets, or even as 38th in one of the copies of the A recension.

The edition in Kāvyamālā series represents A set while the French Edition (1 to 14) has combined the two sets by adding the excess from B to the A recension of Poona and Bikanir MSS. Chapters published by Hall and other European scholars represent the older or B recension.

Reconciliation of the two recensions was tried by the owner of the Ujjain MS. (which is the original for the Poona and Bikanir MSS.) by introducing the readings from one of the B set as far as the 13th chapter and when he found his task too stupendous he abandoned it, while the same difficulty seems to have caused the French Editors to break the volume at the end of the 13th which according to B set is the 14th. It is the next three chapters that greatly diverge from each other in the two sets.

Though on broad principles the MSS. have been divided into two recensions yet no two MSS. taken at random agree with each other fully and I have followed a system of grouping a number of MSS. most akin to each other into one set. My *ka* MSS. represent the Kāvyamālā and Poona copies. *Kha* represents the French edition with all its train of variants if not found in any of our MSS. *Ga* refers to the Bikanir MSS. *C* (च) represents my Ujjain MS. with two sets of variants in it. *Ja* represents three MSS. in the Palace Library at Tanjore and two Mss. of Mysore Library. *Ta* (ट) to *dha* (ढ) stand for ten Malayalam MSS, six of which are in the Government Library at Madras and in the Adyar Library and the remaining are in my possession. *Pa* is the MS. prepared for the press by my father which contains a number of variants sources not named. Thus the MSS. *ka* to *ca* (च) purely follow A recension and those from *ja* to *pa* diverge more and more till *pa* totally differs from *ca* and all these represent the B recension. *Da* (द) stands for the Almorah MS. *ma*, and *na* are two Malabar MSS. of the reconciliation class. About ten MSS. acquired in the Telugu and Tamil districts are incomplete and follow B recension.

In preparing the press copy great difficulty was felt in fixing the recension used by the commentator. He gives only the beginnings of important sentences or words as *pratīkas* and quotes occasionally from other parts of the text. No single manuscript follows the commentator throughout according to his *pratīkas*, but A recension follows more closely till the end of the 13th chapter, then the *ma* MS. follows it till the end of the 20th and then *ta* MSS. as far as the 23rd chapter, *ma* and *na* from the 24th to 27th chapters, *ja* 28, 29, and 30 and *bha* and *ma* in 31 and 32 chapers and *ca* from 33 to 37 chapters.

The greatest dismay was experienced in the 32nd chapter where the older or southern texts follow a different order and the *prākrit* verses given as examples are found much altered ; but the A or northern MSS. except *ma* and *na* (obtained from Malabar) are so corrupt in script and full of lacunae that we can scarcely identify the *pratīkas* of the single lines given by the commentator as examples of various metres. Here Nānyadeva's quotations illustrating various *dhruvas* in his *Sarasvatī-hrdayālankāra* or *Bharatabhāṣya* fortunately agreed with the readings of Abhinava gupta

Bharata s work has undergone such variations at every part of the work that every verse really requires half a printed page to show its variants

whether found or not in every one of the available MSS. Of course that would be an ideal method. But we could name only one MS. for a certain reading and not all those which contain it or not. Limitations of time, purse and space prevented us from doing more. We also omitted all glaring errors of scribes. However we have not left out any important variant unnoticed, and at the end of the work an appendix containing all the missing variants and those that may be found in the MSS. that may be obtained meanwhile will be included.

Commentary.—No complete copy of the commentary in a single volume has been hitherto discovered. The commentary is available in several places in part only and these make up two continuous sets almost complete excepting the commentary on chapters 7 and 8. These two sets differ in readings, but the differences are due to the erroneous deciphering of a scribe or to an intelligent suggestion of a missing word or letter where insects had damaged the leaf. However the set A closely follows Hemacandra, who quoted *in extenso* from this work in his *Kavyānuśāsana* and B set differs in several places and is generally less correct. There is an epitome for this commentary from the beginning to the middle of the sixth chapter, which was probably written by Pūrṇasarasvatī, the well-known commentator on Megha-sandeśa and Mālatīmādhava and also the author of a poem and a drama. But unhappily he used the more erroneous copy and wherever he did not understand the passage he omitted it altogether. A set though fairly correct badly blundered in the fourth chapter where the scribe quietly copied leaves which had been arranged in incorrect sequence. In Malabar we frequently come across old MSS. with unnumbered leaves and if the thread gives way and the leaves get misplaced even a good scholar would feel the work of re-arrangement an arduous task. Thus for eight leaves or in 16 places the commentary breaks off and the corresponding portion is a lacuna in the other set and also in the epitome. It is here that I experienced the greatest difficulty. With the aid of Nṛttaratnāvali and Saṅgītaratnākara which closely follow Abhinavagupta the proper connection of the missing links in the commentary was traced and some lacunæ were filled up by my own commentary based upon the two works mentioned above. The editorial additions are throughout enclosed in semicircular brackets without a question mark. I give below my own additions to the commentary :—

Chapter IV (i) page 133 from योगात्तन्नाम to प्रयोगः

(ii) page 143 lines 7 to 11 करमावृत्त to पर्यस्तक:

(iii) from page 147 line 24 to page 152 line 20

Chapter V from page 253 line 12 to page 261.

There are about 40 verses in the fifth chapter which are really spurious and found only in the B recension. That portion indicates Kohala's or Nandin's additional mode of *pūrvaranga* which Bharata probably did not

recognise. A gloss was added for the difficult technical words and for four musical terms an explanatory quotation from a kindred work was introduced. Besides these alterations the commentary has not been touched except when I was fully convinced that the author must have intended the form I preferred to the incorrect one found in the MSS. Wherever corrections are only suggested the letters are enclosed in brackets with a question-mark following the incorrect letters or words and wherever letters or words are thought to be understood they are merely enclosed in brackets so that the reader may read along ignoring the paranthesis. This distinction between the suggestion of a correction and the supplying of the ellipses has been strictly followed only after 100 pages have been printed off. The square brackets indicate that the portion which they enclose is redundant. Pūrṇasarasvati's epitome was only a condensation of the commentary in a handy readable manner and nowhere did he use his own sentences or words. His MS. of Abhinvabhāratī had not so many ellipses as our copies show to-day. In that way his copy has been useful to the present editor in several places where letters were missing. In spite of the editor's endeavours the distance between him and the printer has marred the publication with a number of unpardonable errors which any ordinary edition would naturally avoid. Most of these are given in the errata. The errors of spaces have not been pointed out. श्रु for श्र is one of those bad errors committed by the printer for which apologies are due to the reader.

Nevertheless the preparation of the press copy especially for the first and the last volumes has taxed all my resources. The originals are so incorrect that a scholar friend of mine is probably justified in saying that even if Abhinavagupta descended from Heaven and saw the MSS. he would not easily restore his original reading. It is in fact an impenetrable jungle through which a rough path now has been traced.

The commentary on the seventh and eighth chapters is still missing and I hope to get a copy of it somewhere in India before the whole work passes through the press. If I am not fortunate in securing it anywhere I will however publish my own commentary for that portion at the end of the last volume. This seems to be necessary in as much as the eighth chapter, the first of the *angābhinaya* badly requires some elucidation here and there and the editor's comments will be strictly based on the Nṛttaratnāvali and Saṅgītaratnākara which have simply versified the commentary of Abhinavagupta.

In the present volume illustrations for *karaṇas* alone have been included. In the compartments of the east and wests gopuras in the Naṭarāja temple at Chidambaram in South India these *karaṇas* were cut on rocks with appropriate verses from the Nāṭyaśāstra underneath each of the postures. But unhappily only 93 of the postures were recovered ; the remaining fifteen were either damaged or the compartments altered during the repairs

These postures are found in Bharata's order for about 60 numbers and then owing to masons' or supervisors' ignorance or on account of some subsequent alteration in the construction the remaining 48 are not in the order followed by Bharata.

Kopperunjingadeva (Rājasimhadeva, the Great ?) who set up an independent kingdom against the Cholas between 1243 and 1273 A.D. was the patron of the above decorative sculptures. The Government Epigraphical Department discovered their existence and reported this with the illustrations in the Madras Report for 1914. Rai Saheb M.R.Ry. H. Krishna Sastri Garu, formerly the Government Epigraphist for India, was so kind as to allow the use of their blocks for this work besides lending a copy of Abhinavabhāratī containing chapters 1 to 19. The editor's cordial thanks are also due to M. R. Ry. G. Venkoba Row garu, the Superintendent of Archaeology for the Southern Circle, for the prompt lending of the blocks for printing. Full acknowledgment of our indebtedness to a number of scholars and gentlemen will find place in our extensive introduction coming at the end of the work.

RAJAHMUNDRY,
November 1926.

M. RAMAKRISHNA KAVI,

विषयानुक्रमणिका ॥

LIST OF ILLUSTRATIONS.

चित्रसूची

करणनाम	फलकसङ्ख्या.	अभिमुखपृष्ठसङ्ख्या.
३३ ललितम्	VI	११३
३४ दण्डपक्षम्	"	"
३५ भुजङ्गत्रस्तरेचितम्	"	"
३६ नूपुरम्	"	"
३७ वैशाखरेचितम्	"	"
३८ भ्रमरकम्	"	"
३९ चतुरम्	VII	११६
४० भुजङ्गाञ्चितम्	"	"
४१ दण्डरेचितकम्	"	"
४२ वृश्चिककुट्टितम्	"	"
४३ कटिभ्रान्तम्	"	"
४४ लतावृश्चिकम्	"	"
४५ छिन्नम्	VIII	११७
४६ वृश्चिकरेचितम्	"	"
४७ वृश्चिकम्	"	"
४८ व्यंसितम्	"	"
४९ पार्श्वनिकुट्टकम्	"	"
५० ललाटतिलकम्	"	"
५१ क्रान्तकम्	IX	१२०
५२ कुञ्चितम्	"	"
५३ चक्रमण्डलम्	"	"
५४ उरोमण्डलिकम्	"	"
५५ आक्षिप्तम्	"	"
५७ अर्गलम्	"	"
५८ विक्षिप्तम्	X	१२१
५९ आवर्तम्	"	"
६० डोलापादम्	"	"
६१ निवृत्तम्	"	"
६३ पार्श्वक्रान्तम्	"	"
६५ विद्युद्भ्रान्तम्	"	"
६६ अतिक्रान्तम्	XI	१२६
६७ विवर्तितकम्	"	"
६९ तलसंस्फोटितम्	"	"
७३ पार्श्वजानु	"	"
७४ गृध्रावलीनकम्	"	"
७५ संनतम्	"	"
	"	"

करणनाम	फलकसङ्ख्या.	अभिमुखपृष्ठसङ्ख्या.
७६ सूची	XII	१२७
७७ अर्धसूची	”	”
७८ सूचीविद्धम्	”	”
८१ सर्पितम्	”	”
८२ दण्डपादम्	”	”
८३ हरिणप्लुतम्	”	”
८४ प्रेङ्खोलितम्	XIII	१३२
८५ नितम्बम्	”	”
८६ स्खलितम्	”	”
८७ करिहस्तकम्	”	”
८९ सिंहविक्रीडितम्	”	”
९० सिंहाकर्षितकम्	”	”
९१ उद्वृत्तम्	XIV	१३३
९२ उपसृतकम्	”	”
९४ जनितम्	”	”
९६ निवेशम्	”	”
९७ एलकाक्रीडितम्	”	”
९८ ऊरूद्वृत्तम्	”	”
९९ मदस्खलितकम्	XV	१३७
१०० विष्णुक्रान्तम्	”	”
१०१ सम्भ्रान्तम्	”	”
१०३ उद्घट्टितम्	”	”
१०४ वृषभक्रीडितम्	”	”
१०५ लोलितम्	”	”
१०६ नागापसर्पितम्	XVI	१३८
१०७ शकटास्यम्	”	”
१०८ गङ्गावतरणम्	”	”

श्रीरस्तु

ना ट्य शा स्त्र म्

भरतमुनिप्रणीतम्

प्रथमोऽध्यायः

प्रणम्य शिरसा देवौ पितामहमहेश्वरौ ।
नाट्यशास्त्रं प्रवक्ष्यामि ब्रह्मणा [1]यदुदाहृतम् ॥ १

नाट्यवेदविवृतिः—अभिनवभारती

यस्तन्मयान्हृदयसंवदनक्रमेण
द्राक्चित्रशक्तिगणभूमिविभागभागी ।
हर्षोल्लसत्परविकारजुषः करोति
वन्देतमां तमहमिन्दुकलावतंसम् ॥

षट्त्रिंश(षड्विंश)कात्मकजगद्गगनावभास-
संविन्मरीचिचयचुम्बित[1]बिम्बशोभम् ।
षट्त्रिंशकं भरतसूत्रमिदं विवृण्व-
न्वन्दे शिवं श्रुतितदर्थ[2]विवेकि धाम ॥

विश्वबीजप्ररोहार्थं मूलाधारतया स्थितम् ।
[3]धर्तृशक्तिमयं वन्दे धरणीरूपमीश्वरम् ॥

सद्विप्रतोतवदनोदितनाट्यवेद-
तत्त्वार्थमर्थिजनवाञ्छितसिद्धिहेतोः ।
माहेश्वराभिनवगुप्तपदप्रतिष्ठः
संक्षिप्तवृत्तिविधिना विशदीकरोति ॥

उपादेयस्य सम्पाठस्तदन्यस्य प्रतीकनम् ।
स्फुट[4]व्याख्या विरोधानां परिहारः सुपूर्णता ॥
लक्ष्यानुसरणं श्लिष्ट[5]वक्तव्यांशविवेचनम् ॥

1. प—यदुदीरितम्

1. चुम्बि 2. विवेक 3. क—सर्वं, ख—धातृ 4. वाक्य 5. वक्तव्याङ्क

सङ्गतिः पौनरुक्त्यानां समाधानसमाकुलम् ॥
सङ्ग्रहश्चेत्ययं व्याख्याप्रकारोऽत्र समाश्रितः ॥

भरतमुनिरुचितदेवतानमस्कारपूर्वकमभिधेयगुणीभावेन प्रयोजनं मुख्यया वृत्त्या प्रतिजानानो विशेषणद्वारेण गुरुपर्वक्रममर्थाक्षिप्ततया चाभिधेयप्रयोजनतत्सम्बन्धान्दर्शयति प्रणम्येत्यादिना—पितामहोऽत्र न पितुः पिता, महेश्वरश्च न राजादिरिति देवशब्दः । एतच्च नाशङ्कनीयम् प्रसिद्धेः। एको विजिगीषुर्नाट्यप्रवर्तयितेति देवो भगवांस्त्वानन्दनिर्भरतया क्रीडाशीलः सन्ध्यादौ नृत्यतीति नाट्ये तदुपस्कारिणि च नृत्ते तदुपज्ञं [1]प्रवृत्तिरिति तावेवात्राधिदैवतं गुरू चेति नमस्कार्यौ । लक्ष्मीपतिस्तु यद्यपि वृत्तीनां निर्माता तथापि पितामहादिवदसौ [2]स्वकर्तव्यमात्रनिष्ठस्तथाचरन्नात्र नाट्येऽलोकवदुपजीवितइति गुरुत्वाभावान्न नमस्कृतः। एतदपि नमस्कारहेतुनिरूपणस्यानुचितत्वादसत्। तस्मात्प्रणमनं प्रह्वीभावः कायेन वाचा मनसा च । आद्यः शिरसेति दर्शितः [3]द्वितीयो देवावित्यनेन। प्रणम्यस्य निरुपपदनामग्रहणानौचित्यात् तेन प्रथमं देवावित्युक्तम् । अभिनेयप्राधान्याच्चाङ्गिकः शिरसेति वाचिकश्च देवावित्यादिना च वाक्याभिनयो दर्शितः । लोकसिद्धो ह्ययमभिनयो, न च नाट्यधर्मी, रूपश्चतुर इव भुजादावूर्ध्वादिभिन्न [4]इत्यभिनेयोऽपि दर्शनीय एव। मानसी तु प्रह्वता वाक्कायव्यापारगम्येति नासौ पृथगुक्ता । [5]संस्कारस्य पूर्वं बुद्धौ [6]निपतनाच्चरमसंस्कारस्य पितामहमहेश्वराविति क्रम आश्रितः, छेकानुप्रासपरिपोषेण सालङ्कारस्य च वाक्याभिनयतां दर्शयितुम् । यद्वक्ष्यति—

चेक्रीडितप्रभृतिभिर्विकृतैश्च शब्दै-
र्युक्ता न भान्ति ललिता भरतप्रयोगाः। (१६-अध्या)

इति सालङ्कारस्य च देवतापरितोषहेतुत्वं दर्शितं भवति । प्रजाः प्रति हितैषित्वेन नाट्यप्रवर्तकत्वं कर्तव्यान्तरवैकल्येन [7]पूर्णतायां च ततस्तद्गतत्वमिति नाम्नोरभिप्रायः। तत्र नाट्यस्य नटवृत्तस्य शास्त्रं शासनोपायं ग्रन्थं प्रवक्ष्यामीति। नैतदित्यन्ये। नाट्यवेदो नाट्यशास्त्रमिति हि पर्यायौ, तत्र नाट्यशास्त्रशब्देन चेदिह ग्रन्थस्तद्ग्रन्थस्येदानीं करणम्, न तु प्रवचनम्। तद्धि व्याख्यानरूपं करणाद्भिन्नम्, कठेन प्रोक्तमिति यथा, ग्रन्थस्य च नाट्यवेदत्वे उत्पत्त्यादिपञ्चकस्य तद्गतस्यान्यग्रन्थसाधारण्यात् प्रश्नासङ्गतिरुत्तरग्रन्थस्य चानुपपत्तिः-'दृश्यं श्राव्यं

1. सा— ताण्डवप्रवृत्ति, क—भाण्डप्रवृत्ति, 2. कर्तव्य, 3. कायिकः, 4. अनभिनेयोऽपि, 5. संस्कार्यस्य, 6. निपातनात्, 7. पूर्णतां.

च यद्भवेत्, 'जग्राह पाठ्यमृग्वेदात्' इत्यादेर्ग्रन्थं प्रत्यसङ्गत्वात्। तस्मान्नाट्यं च तच्छास्त्रं व्युत्पत्तिप्रदत्वात्प्रवक्ष्यामि व्याख्यास्ये,नाट्याख्यं वेदं लक्षणतो निरूपयिष्य इत्यर्थः। एतदप्यमनोहरम्, [1]शब्दात्मताव्यतिरेकेण प्रवचनायोगान्नाट्यस्य चाशब्दात्मकत्वात्, निरूपणमात्रे च प्रवचने ग्रन्थस्यापि प्रवचनोपपत्तेः, नाट्यस्य च प्रोच्यमानतयैवालाक्षणिकवाह्यस्वरूपनिरासलाभे शास्त्रशब्दानर्थक्यप्रसङ्गात्, "य इमं शृणुयात्प्रोक्तं नाट्यवेद" मिति शास्त्रान्ते यद्वक्ष्यते तस्यासङ्गत्यापत्तेः, शब्दविषयतातिरेकेण शृणुयादित्यस्यावाचकत्वात्।

तस्मादित्थमेतदिति मद्गुरवः। सकलहितकरणप्रवृत्तेरुत्साहसम्पदोपेतस्तदभिवृद्ध्ये तत्प्रत्यूहापसिसारयिषया स्वविज्ञानक्रमोपारूढगुरुरूप[2]सर्वब्रह्माधिपतिपरमेश्वरविषयां स्मृत्यौत्सुक्यधृतिमत्यादिलक्षणां व्यभिचारिसरणिं बाह्यकरणीयविषयं च जडतावहित्थप्रभृतिभावगणं पुरस्सरीकृत्य धर्मवीरानुप्रविष्टस्तदुचिताङ्गिकवाचिकानुभावप्रकटनपूर्वं स्वप्रवृत्तिप्रयोजनमेव निरूपयति, प्रयोजनस्यैव प्रवर्तकत्वात्, यदाहुः "[3]यमर्थमधिकृत्य प्रवर्तते तत्प्रयोजन' मिति। तत्र नाट्यं नाम लौकिकपदार्थव्यतिरिक्तं तदनुकारप्रतिबिम्बालेख्यसादृश्यारोपा[4]ध्यवसायोत्प्रेक्षास्वप्नमायेन्द्रजालादिविलक्षणं तद्ग्राहकस्य सम्यग्ज्ञानभ्रान्तिसंशयानवधारणा[4]नध्यवसायविज्ञानभिन्नवृत्तान्तास्वादनरूपसंवेदनसंवेद्यं वस्तु रस[5]स्वभावमिति वक्ष्यामः। तस्य शास्त्रं शासनं बाह्यभाण्डनाट्यादिवैलक्षण्येन सम्यक्तत्स्वरूपावगमोपायं प्रकर्षेणापरब्रह्मशिष्योदीरितानुपयोगि [6]विकासभावसाधनेन वक्ष्यामि। [7]यद्वक्ष्यति—

य इमं शृणुयात्प्रोक्तं नाट्यवेदं स्वयम्भुवा।
कुर्यात्प्रयोगं यश्चैनं तथाधीयीत वा नरः।
या गतिर्वेदविदुषां या गति[8]र्यज्ञवेदिनाम्।
या गतिर्दानशीलानां तां गतिं प्राप्नुयात्तु सः॥ इति॥ (३७-अ.)

एतेन "कामजो [9]दशको गणः" इति वर्जनीयत्वेन नाट्यस्यानुपादेयतेति यत्केचिदाशशङ्किरे, तदयुक्तीकृतम्, याज्ञवल्क्यस्मृतिपुराणादौ चास्य प्रशंसाभूयस्त्वश्रवणात्, न चागमादृते धर्मोऽनुमानगम्य इति न्यायात्। एतत्तु वृथैवास्थानभीरुन्प्रति शङ्काशमनार्थमभिधीयते नाम। तथा हि [10]नटानां तावदेतत्स्वध-

1. शब्दात्म 2. सर्वाधिपति 3. यमधिकृत्य 4. अध्यवसाय 5. स्वभावेति 6. विकासावधानेन 7. यत्पठिष्यति 8. यज्ञयाजिनाम् 9 सा - देशको गुणः 10. नटस्य

र्माम्नायरूपतयानुष्ठेयमेव। न चास्माकं तच्चेष्टितं विचार्यम्, सोमक्रयोपदेशिनो हि [1]वाक्यस्य न [2]तद्विक्रयिब्राह्मणान्तरगतकृत्याकृत्यविचारणोद्योगो युक्तः। न चाप्यस्योपदिश्यते गायेन्नृत्येदिति; किन्तु प्रथमनाट्यावसरक्रमप्रवृत्तविरिञ्चवचनप्रवर्तकभरतमुनिशासनानुवर्तिशिष्यपरम्परापरिचयागताद्यतनकालावधिमहानटजनस्वकप्रवृत्तिविशेषोपदेशपरम्, अत एव तद्गत सिद्धसदुपायोपदेशनपरमिदं शास्त्रमिति नटस्य तावन्नानेन किञ्चिदुपदिश्यते तं प्रत्युपकाराहृते, कवेरपि स्वहृदयायतनसततोदितप्रतिभाभिधानपरवाग्देवतानुग्रहोत्थितविचित्रा[4]पूर्वार्थनिर्माणशक्तिशालिनः प्रजापतेरिव कामजनितजगतः। परं प्रत्याशङ्का यदि, परमत्रावशिष्यते [5]व्युत्पाद्योपकारः। तस्यापि तु नेह गायेन्नृत्येद्वादयेत्वन्निरतो वा भवेदित्युपदेशः क्रियते। अपि तु स्वरसत एव तावन्मनोज्ञविषयास्वादप्रवृत्तस्यात एव वेदशास्त्रपुराणादिभीरुहृदयस्य तन्मनोज्ञवस्तुमध्ये तादृगिदं वस्त्वनुप्रवेशितम्, यद्बलादेव पुमर्थोपायावगतिं करोतीति वक्ष्यामः। उत्पत्त्यादिप्रश्नास्तु ये भविष्यन्ति ते नाट्याख्यवेदविषयाः, न तु नाट्यवेदशास्त्रविषयाः; यतो "नाट्यवेदः कथं ब्रह्म"न्नित्यत्र नाट्यमेव वेद इति व्याख्यास्यामः। एतच्च [6]नाट्यशास्त्रं ब्रह्मणोदाहृतं मह्यमुक्तम्। यद्वक्ष्यते "आज्ञापितो विदित्वाहं नाट्यवेदं पितामहात्। पुत्रानध्यापयामास"ति। अत्र तु नाट्यस्य वेदः शास्त्रमिति समासः, अन्यथाध्यापनासम्भवात्। तेन ब्रह्मप्रोक्तमेव मया यथा परिपाटि निरूप्यत इति यावत्। नाट्यं च ब्रह्मणो[7]द्धृत्य वेदाङ्गान्याहृतमिति तद्विषयं शास्त्रमप्युदाहृतमित्युक्तम्। यदि हि नाट्यस्य वेदनं सत्ता लाभो विचारश्च यत्र तन्नाट्यवेदशब्देन नाट्याश्रय[8]रूपं दशरूपमित्युच्यते, यद्वक्ष्यति "इतिहासो मया दृष्टः" इति, अत्र पक्षे ब्रह्मणोदाहृतं प्रदर्शितोदाहरणं कृतनिर्देशनमित्यर्थः। अन्ये तु नटनीयमनुकरणं दश[9]रूपकमेव नाट्यं तस्येदं शास्त्रम्, दशरूपकलक्षणमेव हीदम्, एवं च नटनीयमिति ग्रन्थतात्पर्याद्रसादीनां तत्रैव पर्यवसानात्। तच्च ब्रह्मणोदाहृतं कृतनिदर्शनम्। अन्ये तु ब्रह्मणा वेदाख्येन भगवता शब्दराशिनोदाहृतं निरूपितं त्याज्यानुष्ठेयरूपं ब्रह्मणा आयदागच्छद् व्युत्पाद्यतया स्वीकुर्वन्नाट्यशास्त्रं प्रवक्ष्यामीति प्रयोजनमनेनैव स्वीकृतमित्याहुः। भट्टनायकस्तु "ब्रह्मणा परमात्मना यदुदाहृतमविद्याविरचितं निस्सारभेदग्रहे[10]यदुदाहरणी-

---

1. विधिवाक्यस्य 2. तद्विक्रेष्यद्ब्राह्मणान्तर, 3. सिद्धि 4. अपूर्वनिर्माण
5. व्युत्पाद्यो वराकः 6. नाट्यवेदशास्त्रं 7. उद्धृत्योद्धृत्य, वेदाङ्गनीत्याहृतं—सा.
8. रूपत्वं दशरूपकं 9. रूपमेव. 10. यदुदाहरणीयं नाट्यं.

समाप्तजप्यं व्रतिनं [1]स्वसुतैः परिवारितम् ।
अनध्याये कदाचि[2]त्तु भरतं नाट्यकोविदम् ॥ २
मुनयः पर्युपास्यैनमात्रेयप्रमुखाः पुरा ।
पप्रच्छु[3]स्ते महात्मानो [4]नियतेन्द्रियबुद्धयः ॥ ३

कृतं तन्नाट्यं तद्वक्ष्यामि। यथा हि कल्पनामात्रसारं तत एवानवस्थितैकरूपं क्षणेन कल्पनाशतसहस्रसहं स्वप्नादिविलक्षणमपि सुष्ठुतरां हृदयग्रहनिदानमत्यक्तस्वालम्बनब्रह्मकल्पनटोपरचितं रामरावणादिचेष्टितं कुतो[1]ऽप्यभूताद्भुतवृत्त्या भाति, तथा भासमानमपि च [2]पुमर्थोपायतामेति । तथा तादृगेव विश्वमिदमसत्यनामरूपप्रपञ्चात्मकमथ च श्रवणमननादिवशेन परमपुमर्थप्रापकमिति लोकोत्तरपरमपुरुषार्थसूचनेन शान्तरसोपक्षेपोऽयं भविष्यति,

स्वं स्वं निमित्तमादाय [3]शान्तादुत्पद्यते रसः। इति।

तदनेन पारमार्थिकं प्रयोजनमुक्त"मिति व्याख्यानं सहृदयदर्पणे पर्यग्रहीत्। यदाह

'नमस्त्रैलोक्यनिर्माणकवये शम्भवे यतः।
प्रतिक्षणं जगन्नाट्यप्रयोगरसिको जनः॥' इति।

एवं नाट्यशास्त्रप्रवचनं प्रयोजनम्। तत्प्रयोजनन्तु दर्शितमेव। अभिधेयश्च नाट्यवेदः। व्युत्पाद्यव्युत्पादकभावलक्षणश्च संबन्धः। यच्च शास्त्रं यो जिज्ञासते स तावत्तदवसरे तच्छास्त्रप्रणेतरि प्रसिद्धे [4]सिद्धवदेव [5]प्रामाण्यमभिमन्यत इति [6]तद्वचनोक्ताय सम्बन्धाभिधेयप्रयोजनाय तदैव निर्विशङ्कः प्रवर्तते। परस्त्वधिगतसकलशास्त्रार्थो बहुमन्यते न वेति तदिद[7]मन्यत्। प्रथमं तावत्प्रवृत्तमादिवाक्यं [8]प्रयुक्तमेवेति स्वानुभवप्रसिद्धं तेनार्थसंशयतर्ककौतुकजनादिवाक्यं प्रवर्तकमिति किमनेन।

अथ मुनिरात्मानमेव परत्वेन कल्पयन्ब्रह्मणा यदुदाहृतमित्येतदेव पुराकल्पप्रदर्शनेन निश्चाययति समाप्तजप्य मित्यादिना श्लोकद्वयेन। अनुरागित्वं नाट्यवेदयोग्यता नाट्यस्यादृष्टता विनोदहेतुता सुज्ञानत्वं प्रश्नावसरलाभयोगःप्रसिद्धत्वं चाचार्ययोग्यता शिष्टप्रामाणिकत्वं नियमपूर्वशास्त्रग्रहणं प्रसिद्धा-

1 प - स्वशिष्यैः 2 ग - त्तं - ज - त्तं 4 न - नाट्यवेदसमुद्भवम्

1. अकृतात्कृतवृत्त्या 2. पुरुषार्थो 3. शान्तमुत्पद्यते 4 सिद्धमेव 5 प्रमाणं 6 तद्वचनोकात् 7 असत् 8 प्रवृत्तं.

योऽयं भगवता सम्य[1]ग्ग्रथितो वेदसम्मितः[2] ।
नाट्यवेदः कथं ब्रह्मन्नुत्पन्नः कस्य वा कृते ॥ ४
[4]कत्यंगः किम्प्रमाणश्च प्रयोगश्चास्य कीदृशः ।
सर्वमेतद्यथातत्त्वं भगवन्वक्तुमर्हसि ॥ ५

दरणानुमेयोपादेयत्वप्रकटनमिदम्प्राथम्यप्रवृत्तता शिष्याणामूहापोहपाटवं ग्रहणयोग्यता चेति क्रमेण पदानां तात्पर्यमपुनरुक्तम् ।

भगवता तत्रभवता गुरुणेति भरतमुनिरेवैवमुक्तः । तेन भरतमुनिना यो ग्रथितः सुन्दरतमवस्तुसमाहरणयोजनया [1]गुम्फितः कोऽप्ययं वस्तुविशेषः स तावत्प्रयोगसमयेऽस्माभिर्दृष्ट इति प्रत्यक्षत्वेनायमिति परामर्शः । अविदितान्तस्सारतया चास्माकं प्रत्यक्षोऽप्यप्रत्यक्षकल्प इति यच्छब्देनानिर्वाच्यविशेषत्वमुक्तम् । अत एव न तच्छब्दसङ्गतिरत्र मृग्यते यथा यत्किञ्चिद्वदतीति । स चायं परीक्षणीयतत्त्वो, यतो वेदैः सम्मितः तुल्यः । तथा हि—धीरोदात्तधीरललितधीरोद्धतधीरप्रशान्तानां पूर्णोपायप्रवृत्तत्वेन नायकानाम[2]तादृगुपायाश्रयेण प्रतिनायकानां च चरितं सफलत्वाफलत्वेन साक्षात्क्रियमाणं वीराद्भुताभ्यां वीरशृङ्गारहास्यैः वीररौद्रभयानककरुणैः वीरबीभत्सशान्तैश्च प्रतिनायकगतरसान्तरसान्तरतया सातिशयचमत्कारगोचरीभूतैर्हृदयानुप्रवेशं विदधद्धर्मादिचतुष्कोपायोपादेयधियमधर्मादिभ्यश्च निवृत्तिं [3]निश्शङ्कां विधत्त इत्यस्माकमधिगतश्रुतितत्त्वानामपि प्रत्यक्षसिद्धमेवैतत् । प्रसिद्धा चास्य नाट्यवेदसंज्ञा विदिता । अत एवोपदेशहेतुत्वाद्वेदः । एवं च जिज्ञास्यतत्त्व एवायम् । स कथमुत्पन्नः केन प्रयोजनप्रकारेणोत्पन्नः, तत्प्रयोजनस्य वेदेभ्य एव सिद्धेः । उत्पन्न इति यदि पूर्वमेव वेदवदप[4]दार्थः स्यात्तत्कथं नामायं पर्यनुयुज्येत, श्रुतिचतुष्टयवदेवेत्यर्थः । अथ यस्य वेदेभ्यो नोपदेशः सिद्धः, स कस्तादृगित्याह, कस्याधिकारिणः कृते, प्रयोजनकरणाय किं वेदाधिकृत एवात्राधिकारी उत तदन्योऽपीत्यधिकारिविषयोऽयं प्रश्नः । पूर्वस्तु सिद्धसाध्यतया निष्प्रयोजनत्वे[5]नाक्षेपाय प्रश्नः । कत्यङ्ग इति यद्यस्य सुबहून्यङ्गानि तद्दुरवधारतयाशक्यनिर्णयस्तथा परि-

1. क - कथितो. ज - ग्रथितो, 2. न - विस्तरः. प - सम्मतः, 3. - चायमु, 4. ज - कत्यंशः

1. उम्भितः 2. तदुपाया 3. निर्विशङ्कं 4. अपदार्थस्य तत्तथ कथमेनं पर्यनुयुञ्जीत 5. आक्षेपोऽयं 6. तदवधारणतया.

दृश्यमानगीतातोद्याभिनयादिमध्ये कत्यस्याङ्गानि, किञ्च तदङ्गिरूपमुताङ्गसमुदायमात्रं नाट्यमिति तृतीयः प्रश्नः । किंप्रमाणश्चेति । ननु प्रत्यक्षप्रमाणसिद्धत्वं तावन्नाट्यस्य ; यद्वक्ष्यति—दृश्यं श्रव्यं च यदिति। श्रेयःप्राप्त्युपायज्ञापकत्वमपि मुनीनां स्वसंवेदनासिद्धम् ; अन्यथा तु विचार्यत्वमेवास्य न स्यादित्युक्तम् । तत्कोऽयं प्रश्नः ? सत्यम् । किन्तु यान्यङ्गानि कानि चित्तानि यदि विज्ञेयानि, केन प्रमाणेन किमङ्गता ज्ञायते? तेन किं प्रमाणाङ्ग इति। तथा केन प्रमाणेन,प्रमाणेनाङ्गाङ्गिभावानियमोऽत्र ज्ञेयः । प्रमाणमत्र निश्चयजनकम् । अन्ये तु नाट्यगतानां रूपकादीनां पाठ्याभिनयरसगीतानां च किं प्रमाणं का संख्येति विभागविषयोऽ[2]यं प्रश्न इत्याचक्षते । अस्येति नाट्यस्य कीदृक्प्रयोगः । यदि युगपदङ्गानि प्रयुज्यन्ते तद्भिन्नाक्षग्राह्येषु युगपत्संवेदनाभावात् कथमेकं नाट्यमिति प्रतिपत्तिः । क्रमप्रयोगेऽपि नितराम् । तस्मात्कथं प्रयोग इति। तथा किं नियतेनैवाङ्गाङ्गिभावेन प्रयोग उतानियतेनेति नाट्याङ्गप्रयोगद्वारेण सामान्याभिनयचित्राभिनयनाटकादिरूपकविषयवैचित्र्यविषयः प्रश्नः पञ्चमः । एवं प्रश्न[3]पञ्चकात् कविप्रयोक्त्रोरुपदेशपरं शास्त्रमिति लक्ष्यते। तेन यदिह (यदि हि) तस्मात्कर्तुर्द्रष्टुः प्रयोक्तुरुपदेशपरामिदं शास्त्रम्—इति, तत्र द्रष्टुरित्यसत्; न ह्यनेन सामाजिको विनीयते, अयोग्यत्वात् । श्रुतिस्मृतीतिहासादिष्विवात्रापि न च तदुपदेशोऽत्र श्रूयते। द्रष्टा तु यदि प्रेक्षाप्रवर्तक उच्यते तदा तस्यापि न प्रबन्धेनोपदेशोऽपि तु क्वचिदेव नर्तकोऽर्थपतिर्वेत्यादौ, एवं चोपदेश्यत्वे स्थपतिमालाकारप्रभृति विश्वमपीहोपदेश्यं स्यादित्यलमनेन । यथातत्त्वमिति । नात्र क्रमं प्रति भरोऽस्माकम् , नापीयत्तां प्रति। अज्ञा हि वयमत्र प्रष्टारः। अत एवोपेयपरत्वेनैव[4]मुख्यतया प्रश्नो,यथा बालक आह दुःखं मे शमयेति, तद्वस्तूपायं प्रश्नयाति, कुतोऽन्नं लभ्यत इति। तेनोपेयमुखेन प्रवृत्तमिदंशास्त्रम्। उत्तरदानोपनतवस्त्वन्तरोपेयप्रश्नक्रमेण तदुपेयोपायादिप्रबन्धेन स्थितमिति मन्तव्यम् । तेन यादृशा क्रमेण रूपयोग्यं तथाप्यप्रश्नितमपि यदि किञ्चिदस्ति तदपि स्वयमेव निरूपयेति तत्त्वानतिक्रमेण तत्तद्योग्यं तत्त्वं च निरूपणीयम् । एतदिति लक्षणपरीक्षापर्यन्तमेतत्। यदि त एवं पप्रच्छुः भरतमुनिः किमकार्षीदित्याह तेषा मिति ।

1. तेन 2. विषयो वायं 3. पञ्चकाय 4. उपायपरत्वेन

तेषां तु वचनं श्रुत्वा मुनीनां भरतो मुनिः ।
प्रत्युवाच ततो वाक्यं नाट्यवेदकथां प्रति ॥ ६
भवद्भिः शुचिभिर्भूत्वा तथावहितमानसैः ।
श्रूयतां नाट्यवेदस्य [3]सम्भवो ब्रह्मनिर्मितः ॥ ७

तुरवधारणे; श्रुत्वैव न तु विलम्ब्येति, पौर्वकाल्यमात्रे क्त्वाल्यपोर्विधानात्। तत इति। यतः स तत्त्ववित्मुनिः ते च तदुपदेशयोग्याः तस्माद्धेतोः। कथाग्रहणं यथातत्त्वमित्येतस्यैवार्थं स्फुटीकरोति। यत्तु प्रयोगप्रश्ने प्रत्यक्षेण प्रयोगप्रकटनमुत्तरं स्यादित्याशङ्कां परिहर्तुं कथाग्रहणमिति, तत्त्वसत्; वक्तुमर्हसीत्युक्ते तस्याः कोऽवसरः? एवं भरतमुनिः परवदात्मानं प्रकल्प्येयन्तं ग्रन्थमभिहितवान्।

अन्ये त्वियन्तं ग्रन्थं कश्चिच्छिष्यो व्यरीरचत्। तत्र ब्रह्मणेति भरतमुनिः प्रथमश्लोके निर्दिष्टः, कथं ब्रह्मन्नुत्पन्न इत्येतदेवमेकवाक्यत्वेन निर्वहति, तदनन्तरन्तु भवद्भिः शुचिभिरित्यादिभिर्भरतमुनिरचितो ग्रन्थो, मध्येऽत्र षट्त्रिंशदध्याय्यां यानि प्रश्नप्रतिवचनप्रयोजनवचनानि तानि तच्छिष्यवचनान्येवेत्याहुः। तच्चासत्। एकस्य ग्रन्थस्यानेकवक्तृवचनसन्दर्भमयत्वे प्रमाणाभावात्, स्वपरव्यवहारेण पूर्वपक्षोत्तरपक्षादीनां श्रुतिस्मृतिव्याकरणतर्कादिशास्त्रेष्वेकविरचितेष्वपि दर्शनात्। एतेन सदाशिवब्रह्मभरतमतत्रयविवेचनेन ब्रह्ममतसारताप्रतिपादनाय मतत्रयीसारासारविवेचनं तद्ग्रन्थखण्डप्रक्षेपेण विहितमिदं शास्त्रम्, न तु मुनिविरचितमिति यदाहुर्नास्तिकधुर्योपाध्यायास्तत्प्रत्युक्तम्, सर्वानपह्नवनीयाबाधितशब्दलोकप्रसिद्धिविरोधाच्च।

अत्र केचिदाहुः—प्रश्नपञ्चक[1]मत्रैवाध्याये तावन्निर्णीयते, उद्देशस्थित्या तद्विभागलक्षणपरीक्षापराणि चाध्यायान्तराणीति। अन्ये त्वाहुः, पञ्चभिरध्यायैः पूर्वरङ्गविधानपर्यन्तैः प्रश्नद्वयं निर्णीतम्। सामान्याभिनयचित्राभिनयान्तैः शिष्टैस्तु प्रश्न[2]त्रयमिति। वयं तु ब्रूमः—नात्र क्रमः कश्चित्। अपि तु यथावसरं महावाक्यात्मना षट्सहस्रीरूपेण प्रधानतया प्रश्नपञ्चकनिरूपणपरेण शास्त्रेण तत्त्वं निर्णीयते। न तु क्रमः कश्चित्। एतच्च ग्रन्थव्याख्यानप्रसङ्ग एव स्फुटीकरिष्यामः।

---

1 क - तद्वचनं. 2 प - प्रद्यावाप? 3. ध - संक्षेपो.

---

1 अत्रैव तावन्न 2 द्वयमिति.

[1]पूर्वं कृतयुगे विप्रा वृत्ते स्वायम्भुवेऽन्तरे ।
[2]त्रेतायुगेऽथ सम्प्राप्ते मनोर्वैवस्वतस्य तु[3] ॥ ८ ॥
ग्राम्य[4]धर्मप्रवृत्ते तु [5]कामलोभवशं गते ।
ईर्ष्याक्रोधा[6]दिसंमूढे लोके सुखितदुःखिते ॥ ९ ॥
देवदानव[7]गन्धर्वयक्षरक्षोमहोरगैः ।
जम्बूद्वीपे समाक्रान्ते लोक[8]पालप्रतिष्ठिते ॥ १० ॥
महेन्द्रप्रमुखैर्देवैरुक्तः किलपितामहः ।
क्रीडनीयकमिच्छामो दृश्यं [9]श्रव्यं च [10]यद्भवेत् ।११।

तत्र कथं कस्य वेत्यमुमर्थं निर्णिनीषुराह भवद्भि [1]रित्यादि । घटादीनामुत्पत्तिर्व्यवहारसिद्धैव कुलालादिभिरनुगम्यत इति घटः क्रियत इति युक्तम् । नत्वेवं नाट्यस्य । तस्य तूत्पत्तिरेव विरिञ्चोपज्ञतया स्थितेति सम्भवो ब्रह्मनिर्मित इत्युक्तम् । केचिदत्रानादित्वं वेदवन्नाट्यस्याचक्षाणाः उत्पत्त्यादिशब्दान् स्मरणाभिव्यञ्जनादावुपचरन्ति । तत्र सम्भूतेः कारणमुखेनाभिधाने कर्तव्ये कालस्य सर्वत्र पूर्वकारणत्वादुचितकालपरिग्रहेण तद्विधाधिकारिविषयतां दर्शयितुमाह पूर्व मित्यादिना श्लोकपञ्चकेन । अस्मिन्नवसरे पितामहो देवैरिदमुक्त इति महावाक्यस्य सङ्गतिः, कस्मिन्नवसरे पूर्वमिति । नास्मिन्नेव कल्पेऽपि तु पूर्वकल्पेष्वपीत्यर्थः । मन्वन्तराणि चतुर्दश तावत्कल्पो यत्तद्ब्राह्मं दिनम् । तत्र स्वायम्भुवं नाम यत्कल्पस्य प्रथमं मन्वन्तरम् । वैवस्वतमन्वन्तरन्तु सप्तमम्, यत्राद्य वर्तामहे । तत्र सर्वेष्वेव मन्वन्तरेषु त्रेतावसरे ब्रह्मणा नाट्यवेदः प्रवर्तितः कृतयुगे तु नेति तात्पर्यम् । योजना तु स्वायम्भुवे आद्ये मन्वन्तरे यत्कृतयुगं तस्मिन् सम्यक्सन्ध्यातिक्रमेण स्फुटतरं प्रवृत्ते, न केवलं तत्रैव मन्वन्तरे । तु शब्दो यावच्छब्दार्थे । यावद्वैवस्वतस्य

---

1 प - पुरा 2 न - त्रेतायुगे तु. ज - त्रेतायुगे च. ग - त्रेतायुगे सम्प्रवृत्ते 3 ग - च 4 ग - धर्मे 5 त - लोभ मोहवश 6 ठ - भि 7 ग- गन्धर्वै रक्षोयक्ष 8 ड - पालैः 9 ठ - श्राव्यं 10 न - यद्विभो.

---

1 रिति 2 तस्मिन् वृत्ते सति यत्त्रेतायुगं तस्मिन् (सा) 3 तत्र प्रवर्तमानत्वात् ।

मनोरन्तरे समये यत्त्रेतायुगं तस्मिन्प्रवृत्तेऽपि। तेनाद्यन्तनिरूपणेन सर्वेषां [1]मध्य-मन्वन्तराणां सङ्ग्रहः। तेन सर्वेषु त्रेतायुगेषु नाट्यप्रवृत्तिरित्युक्तं भवति। अस्मिन्नवसरे किमसावुक्तः ? आह—जम्बूद्वीपे कर्मभूमिस्थाने यो लोकः सुखितो दुःखितश्च [2]तद्विषयकं क्रीडनीयकं क्रीड्यते चित्तं विक्षिप्यते विह्रियते येन तदिच्छामः। करणे कृत्यो बाहुलकात्। चित्तं चेतोऽमुतश्च नीयमानं मार्गेऽपि विनियोज्यते। यदि वा क्रीडनाय हितं क्रीडनीयकम्। उभयत्राज्ञाताद्यर्थे कः। इदमस्माकं गुडप्रच्छन्नकटुकौषधकल्पं चित्तविक्षेपमात्रफलमिति। यन्नज्ञायते तच्च क्रीडनीयकं सुखितदुःखित एव भवति। न ह्येकान्तसुखिते काले देशे वा क्रीडया किञ्चित्, नाप्येकान्तदुःखिते। तेन कृतयुगे कलिप्रान्ते वा इलावृतादि-निवासिनि जने नारके वा न क्रीडोपपत्तिः। *उत्तरपदार्थप्रधानस्तत्पुरुषः दुःखस्य बाहुल्यमाह। कथं ज्ञायते सुखितदुःखितो लोक इति। यत ईर्ष्याक्रो-धादिभिः संमूढोऽधिवासितहृदयः। आदिग्रहणादनुरागतृष्णादिभिः। तत्र क्रमेण कारणमाह, कामवशगतत्वादीर्ष्यादयो, राज्यलोभादिना क्रोधादयः। कि-मित्यधिकौ कामलोभौ + यतो ग्राम्योऽश्रुतशास्त्रार्थजनाकीर्णदेशोचितो धर्मः स्वधर्माननुपालनलक्षणस्तद्विषये यतोऽसौ लोकः प्रवृत्तः।

नन्वेवं सत्यधर्मबाहुल्यात् सुखमेषां कुत इत्याह देवैः श्रीमद्विजयाविमुक्तादिरुद्रावतारैः तथा राजसतामसहृदयकल्प्यमानसपर्याकैर्दानवादिभिराक्रान्ते जम्बूद्वीपे, देवादिभिश्चाक्रान्ते स्ववशीक्रियमाणे। नन्वेवं सत्स्वपि शुद्ध-व्यामिश्रधर्मसाधनेषु कथं धर्मस्तेषां [3]तत्राप्रवर्तमानत्वात्। सत्यम्। किन्तु लोकपालैः लोकपालांशसंविभागसमुत्पादितैः नरपतिभिः प्रतिष्ठिते स्वधर्मसाधनं प्रति नियोजिते लोके। दृश्यं श्राव्यं चेति द्रष्टुं श्रोतुं चार्हं न धर्मसाधनं, शक्यं च, न तु दुर्भगपुरुषप्रायम्, लोक इत्येकवचनेन सर्वसाधारणतयैव यद्योग्यं(गं?) तच्च स्पृश्यादिरूपं न भवति। दृश्यश्रव्य-योस्तु बहुतरसाधारण्योपपत्तिः। असाधारणे चेर्ष्याक्रोधादय एव प्रवर्तन्ते। एतदुक्तं भवति। कृतयुगे सत्त्वप्रधाने स्वधर्ममात्रनिष्ठो लोको न सुखदुःखे प्रति हेयोपादेयधिया प्रयस्यति। त्रेतायान्तु राजसत्वाद्दुःखं जिहासति सुखं

1 मध्यम 2 तद्विषयं 3 स्वधर्मबाहुल्यात्. सा - स्वधर्मबाहुल्यात्. पुरुष.

---

* सुखितदुःखितस्य कारणं कामादीनां हेतु ग्राम्यधर्मप्रवृत्तत्वं। ग्राम्योऽश्रुत शास्त्रार्थजनाकीर्णदेशोचितो धर्मानुपालनलक्षणः स ग्राम्यधर्मः (अभिनवभारती सारः)

न वेदव्यवहारोऽयं संश्राव्यः शूद्रजातिषु ।
तस्मात्सृजापरं वेदं पञ्चमं सार्ववर्णिकम् ॥ १२ ॥

च प्रेप्सति रजसश्चलत्वात् । तदसौ शास्त्रीयेषु राजनियन्त्रणया प्रवर्त्यते । तत्र च तादृगुपायो निरूप्यो येन स्वयमेषां भवति प्रवृत्तिः । तच्च नाट्यमेवेति । चकारेणेदमाह, तादृशा केन चिदुपायेन सम्बन्धस्तत्कुरुते, येन भिन्नेन्द्रियग्राह्ये अपि दृश्यश्रव्ये एकानुसन्धानविषयत्वं न विजहीत इति सामान्याभिनय[1]काल[?]भाणत्वं प्रयोगस्य सूचितम् । दृश्यमिति हृद्यं श्रव्यमिति व्युत्पत्तिप्रदमिति प्रीतिव्युत्पत्तिदमित्यर्थः । इत्यनेन [2]त्विन्द्राादीनां क एतावता स्वार्थः? आह । लोकपालप्रतिष्ठिता यतो जम्बूद्वीपगता लोकाः । ते हि स्वधर्मावस्थिता इज्यादिना नाकमाप्याययन्ति । अत एवेच्छाम इति सर्वेषामैकमत्यमाह । अतोऽन्योन्योपकारवृत्त्या च दैवमानुषसर्गौ निरूपितौ विन्ध्ववासि प्रभृतिभिः । अन्ये तु स्वप्रयोजनमेव क्रीडा महेन्द्रादीनामित्याहुः । त्रेतायुगे प्रवृत्ते एवम्भूते च लोक इत्यनेनेदमुक्तम् भवति । स्वर्गेऽपि हि तदा तदा [4]मानुषगतराजसधर्माभिसम्बन्धाचिन्तितयागादियोगसरजसीकृतहृदयत्वाद्देवा अपि क्रीडनीयकमभिलेषुरिति । एवं शास्त्राधिकृतोऽपि जनः नाट्येन सुखं विनीयत इति प्रयोजनप्रयोजनमुक्त्वा प्रयोजनान्तरमप्याह न वेदव्यवहार इत्यादिना । कृतयुगे सत्त्वोत्कर्षबलादेव सर्वः स्वधर्ममनुपालयति । [5]अन्यत्र तु राजसत्वात् शूद्रप्रकाराः करणादिजातीयाः सर्वेऽखर्वगर्वाक्रान्ता वर्णतयानुवृत्तिं न विदधते । शास्त्रं भवद्भ्य एवमादिशतीति च ते वचनमात्रेण नाद्रियन्ते । न च ते वेदशास्त्रोपदेशयोग्याः । अत एवमाह, [6]सम्यगिति स्थाने श्रुत्या भवतामेतदुपादिष्टमिति ना(सं)श्राव्याः सर्वे वर्णाः, प्रयोजनं [7]विनेयत्वेन, यस्येत्यनेन पूर्वोक्तस्याधुनोक्तस्य च समस्तस्योपसंहारः । अन्ये तु पौनरुक्त्यं परिहर्तुमाहुः । सर्वेषां वर्णानां सरससुकुमारेण नयेन स्वकर्तव्यनिरूपणं यत्र काव्ये तस्मिन् भवं तदाश्रितं येन [8]सर्वो जनः सरससुकुमारानुरञ्ज्यदाशयः तदुपभोगनान्तरीयकतयैव कार्याकार्यज्ञानमप्युपयुङ्क्ते क्षीरमध्यावस्थितौषधोप-

1 तालप्राणत्वं, कालप्रमाणत्वं 2 न्विन्द्रादीनां, एतावता क इन्द्रादीनां स्वार्थ इत्याह 3 सर्गौचित्यनुरूपितो 4 सा - मानुषगता राजानः सुधर्मादिसंबन्धचिन्तित 5 अंद्यत्वे 6 सम्यगिह 7 विना यत्नेन प्रयस्यति । अनेन 8 सवसो

एवमस्त्विति तानुक्त्वा देवराजं विसृज्य च ।
[1]सस्मार चतुरो वेदान्योगमास्थाय [2]तत्त्ववित् ॥ १३ ॥
(नेमे वेदा यतः श्राव्याः स्त्रीशूद्राद्यासु जातिषु ।
वेदमन्यत्ततः स्त्रक्ष्ये सर्वश्राव्यं तु पञ्चमम् ॥)
[3]धर्म्यमर्थ्यं यशस्यं [4]च सोपदेशं ससंग्रहम् ।
भविष्यतश्च [5]लोकस्य सर्वकर्मानुदर्शकम् ॥ १४ ॥

योगवत् । [1]तेनानधिकृतानामपि सुकुमाराणां व्युत्पत्तिदायि [2]नाट्यं श्रुतशास्त्राणामपि संवादादविचलकार्याकार्यविवेकसिद्धिरिति ।

एवमस्त्विति तानिति । देवराजमिति तानुक्त्वा तान्विसृज्य देवराजं विसृज्येति [3]प्राधान्यादुपादानम् । योगमिति येन सर्ववेदानां युगपदवभासो भवति । तत्त्वविदिति समस्तलोकवेदज्ञ इत्यर्थः ।

ततः किं चकारेत्याह श्लोकत्रयेणधर्म्य मित्यादिना। एवमिति(१-१६)धर्म्य मित्यादि [4]युगलोक्तमर्थं सङ्कल्प्य चतुर्वेदस्मरणेन हेतुना, तत इति चतुर्भ्यो नाट्यवेदं चक्रे । हेतौ शता । धर्म्यमिति धर्मे साधूपदेशाय, एवमर्थेऽपि । अन्ये तु धर्मार्थाभ्यामनपेतं [5]यशः प्रयोजनमस्येति। अत्र व्याख्यानद्वये [6]पुरुषार्थान्तरसंग्रहः स्यात्। नाट्योत्पत्तिगर्भाधानकल्पे चास्मिन् सङ्कल्पे यत्त्यक्तं,तत्त्यक्तमेव। यशसश्च धर्मफलत्वात् पुथगुपादानं किमर्थम्, सोपदेशमित्यादेश्च पौनरुक्त्यम् । तस्मादयमत्रार्थः—धर्मशब्देन चत्वारोऽपि पुरुषार्थास्तेषु साधु साधकं। ननु किं साक्षात्, नेत्याह, [7]सोपदेश्यं सहोपदिश्यमानैरुपायैर्यद्वर्तते, चतुर्वर्गोपाय[8]प्रवर्तकमित्यर्थः। ननु वेदादयोऽप्येवं, नैतत् । [9]सम्यग्ग्रहणं सङ्ग्रहः । यतः परं निर्विशङ्कप्रतीत्यर्थं प्रमाणान्तरं नाभ्यर्थ्यते, तच्च साक्षात्काररूपमेव, यदाहुः,

1 ड - सस्मारेदं तदा ब्रह्मा 2 ढ - योगवित् 3 ड - धमकामार्थसंयुक्तं 4 ड - सोपदेश्यम् 5 न - कालस्य. ठ - लोकेऽस्य 6 प - दर्शनम्. प - कर्मप्रदर्शकम्.

1 तेनाधिकृतानामनधि 2 नाट्यमश्रुत 3 प्रधान्यादुक्तम् । इन्द्रादीन् विसृज्येत्यर्थः (सा) 4 युकलकोक्त 5 यत् 6 परपुरुषार्थसंग्रहः 7 सोपदेशं 8 प्रदर्शक. 9 संग्रहं सम्यग्ग्रहः ग्रहणं प्रमाणं तेन युक्तम् (सा)

सर्वशास्त्रार्थसम्पन्नं सर्व[1]शिल्प[2]प्रवर्तकम् ।
[3]नाट्याख्यं पञ्चमं वेदं सेतिहासं करोम्यहम् ॥ १५॥

"सर्वा च प्रमा प्रत्यक्षपरे" ति । तेन सहेति ससंग्रहम् । एवमपि प्रत्यक्षेण [1]सदाचारयज्ञादिदर्शनात्कोऽस्य भेदः। आह, सर्वेषां कर्मणां क्रियमाणानामनु पश्चादचिरेणैव कालेन दर्शकं पञ्चषादिभिरेव दिवसैः शुभाशुभकर्मतत्फल-सम्बन्धसाक्षात्कारो यत्रेत्यर्थः । कस्येत्याह, यो यः कश्चिदस्मात्क्षणादूर्ध्वं भविष्यति लोकस्तस्योपदेशस्येत्यर्थः। [2]अनुकार्याभिप्रायेणात्र भविष्यत इति व्याख्यातम् । न च शब्देन भूतवर्तमानग्रहणमित्यधरोत्तरीभूतम् । वृत्तराजर्षि-वंशकीर्तनाद्देर्हि प्रधानतया स्वकण्ठेनाभिधानं युक्तम्, न तु भविष्यत इत्या-स्तामेतत् । तस्माद्व्युत्पाद्याभिप्रायेणैव लोकस्येति व्याख्येयम् । एवमपि तत्रैव केन लोकः प्रवर्त्यत इत्याह, अर्थ्यं हृद्यतया सर्वजनानामपि नानाधि-कारत्वेनाभिलषणीयमित्यर्थः । ननु प्रथममज्ञातपरमार्थे कथमभिलषणम्, आह, यशस्यं सर्वत्र हृद्यतया प्रथितम् । न केवलं प्रधानपुरुषार्थोपायदर्शकं यावत्सर्वेषां शास्त्राणां कलाप्रधानानां येऽर्था गीतनृत्तवाद्यादयस्तैः सम्पन्नं युक्तम्। तथा सर्वाणि शिल्पानि चित्रपुस्तादीनि प्रवर्तयति। [3]सोपयोगत्वेना-क्षिपतीत्येवमेकेन यत्नेन समस्तवस्तुसिद्धिर्यतो भवति, तन्नाट्य मित्युक्तं भवति । तच्च सेतिहास मितिहासोपदेशकरूपं सप्रभेदम् । इतिरेवमर्थे, प्रत्यक्षनिर्देशं द्योतयति; हः इहशब्द आगमः, आसनमासः, एवम्प्रकाराः प्रत्यक्षपरिदृश्यमाना [4]आगमिकार्थाः कर्मफलसम्बन्धस्वभावा यत्रासते तेनेतिहासेनेतिपाठे मत्वर्थीयोऽकारः, इतिर्ज्ञानं, तस्य हासो हर्षपूर्वको विकासो, यत इति केचित् । इतिहासश्च तल्लक्षणमित्थं किलासनत्रयरूपक-भेदानां [5]भण्यते । उपदेशशब्देन च दशरूपक[6]तदुपयोगवदेव द्विहस्तादिलक्षण-नाट्यवेदशास्त्रं, तत्सहितस्यैव करणीयत्वेन सङ्कल्पः। अन्यथा बुध्याकलि-तस्यापि नाट्यस्य कथमन्यत्र सङ्क्रमणम्, तेन च विना कथं प्रयोगः । पञ्चममिति य एकोऽपि चतुरो वेदानतिशेत इत्यर्थः । अहमिति यस्य

1 न - शील॰ ग - शिष्य 2 ठ - दर्शकम्॰ म - समन्वितम् 3 प , नाट्यसंज्ञमिमं वेदं॰

1 सदाचारादि 2 अनुकार्याश्रयत्वेनात्र 3 स्वोपयोग 4 आगतिकार्थाः 5 दृश्यते 6 तदुपयोगादेवः

[1]एवं संकल्प्य भगवान् [2]सर्ववेदान[3]नुस्मरन् ।
नाट्यवेदं ततश्चक्रे चतुर्वेदांगसम्भवम् ॥ १६ ॥
जग्राह पाठ्यमृग्वेदा[4]त्सामभ्यो गीतमेव च ।
यजुर्वेदादभिनयान् रसानाथर्वणादपि ॥ १७ ॥

सर्वलोककृत्योद्वहनमेव परं कृत्यम् । एवं सङ्कल्प्येति सङ्कल्पव्यापार एवायं बुध्या वेदाङ्गैकीकारलक्षणो ब्रह्मणो नाट्यवेदोत्पादनम् ।

ननु वेदस्मरणेन तत्र कथं हेतुता लब्धा । चतुर्वेदाङ्गसम्भव मिति, चत्वारो वेदाः चतुर्भ्यो वेदेभ्यः अङ्गानां पाठ्यादीनां सम्भवो यस्य, सम्भवत्यस्मादिति सम्भवः । अत एव वेदचतुष्टयमपि यत्राङ्गानि प्रत्युपकरणीभूतमिति (स तथोक्तः) । कुत्राङ्गे कस्य वेदस्योपयोग इति दर्शयति जग्राह पाठ्यमृग्वेदादिति [1]पठ व्यक्तायां वाचीत्युक्तम्, व्यक्तत्वं विवक्षाविशिष्टस्वार्थार्पणक्षमत्वम्, तच्च काक्वध्यायवक्ष्यमाणस्वरालङ्कारादिसामग्रीयोजनेन भवतीति तयोपस्कृतं पाठ्यमुच्यते । तच्च प्राधान्यात्प्रथममुपात्तम् । तथा हि वक्ष्यति,

वाचि यत्नस्तु कर्तव्यो नाट्यस्यैषा तनूः स्मृता ।
अङ्गनैपथ्यसत्त्वानि वाक्यार्थं व्यञ्जयन्ति हि ॥ इति (१४-२)

अत एवाभिनयान्तर्भूतत्वेऽपि पृथगुपात्तम् । तदृग्वेदाद्गृहीतम् । तस्य त्रैस्वर्यप्रधानस्य [2]स्तोत्रद्वारेण [3]यागोपकारित्वात् पाठ्यमपि च त्रैस्वर्योपेतम् । ऐकस्वर्ये काक्वभावाभ्यां च स्व[4]स्वादौ गीतरूपापत्तेरिति हि वक्ष्यामः । पाठ्यगतस्वरप्रसङ्गात् तदनन्तरं सामभ्यो गीतं जग्राहेत्युक्तम् । उपरञ्जकत्वेन हि पश्चात्तस्याभिधानं न्याय्यमिति केचित् । गीतं प्राणाः प्रयोगस्येति वक्ष्यमाणत्वात् । तदायत्तत्वाद्रसचर्वणायाः समुचितमस्यात्रैवाभिधानमित्यस्मदुपाध्यायाः । चकारेणैतत्तुल्यकक्ष्यतामाह । एवकारेण गीतमात्रं ततो गृहीतम् गीतिषु सामाख्येति न्यायात् तदाधारध्रुवापदयोजनमृग्वेदादेवेति दर्शयति, तत एव ध्रुवाध्याये वचनादत्रैव संगृहीतम् ।

---

1 न - प्रोक्त्वा तु भगवानेवं वेदान् सर्वान् । प - स्मृत्वा तु भगवानेवं । ग - सङ्कल्प्य भगवानेवं । ड - ततः स भगवान् ब्रह्मा वेदान् सर्वाननुस्मरन् 2 ज - सर्वान् वेदान् 3 झ - पितामहः 4 न - सामतो ।

1 तत्र 2 स्तोत्रशब्दद्वारेण 3 योगोप 4 स्वर्यादौ, स्वरस्यादौ, स्वस्त्रियादौ (सा) 5 एकतुल्य ।

[1]वेदोपवेदैः [2]सम्बद्धो नाट्यवेदो महात्मना ।
एवं भगवता सृष्टो [3]ब्रह्मणा सर्ववेदिना ॥ १८ ॥
उत्पाद्य नाट्यवेदं तु [4]ब्रह्मोवाच सुरेश्वरम् ।
इतिहासो मया [5]सृष्टः स सुरेषु नियुज्यताम् ॥१९॥

घनावनद्धरूपिसामगानक्रियाप्राणभूतकलपसाम्यात्मकतालसामान्य - स्वीकृतमत्रैव प्रविष्टम् । आध्वर्यवकर्मप्रधाने तु यजुर्वेदेऽङ्गकर्मणां प्रदक्षिणगमनादिक्रम एव प्रथमं पठिष्यति 'या ऋचः पाणिका' (३२-२) इत्यादि, ततसुषिरात्मकं चाप्यातोद्यं स्वरप्राधान्यात् । आथर्वणवेदे तु शान्तिकमारणादिकर्मसु नटस्येव तस्यर्त्विजः प्राड्वदवैषुणाद्यनुभावानां प्रजा-शत्रुप्रभृतिनावधानग्रहणादिना लोहितोष्णीषादेर्नेपथ्यस्य तेषु तेषु च कर्मसु विशिष्टप्रयत्नपुरुषसम्पाद्यमानोपष्टम्भात्मनः सत्त्वस्य सम्भवात् ततोऽभिनया-नामग्रहणम् । वाचिकस्त्वभिनयः पूर्वमेवोक्तः । प्राधान्यविभावानां धृति-प्रमोदादिव्यभिचारिणां च परमार्थसतां समाहरणं प्रधानमिति विभावादि-सामग्रीरूपरसात्मकचर्वणासम्भव इति ततस्तद्ग्रहणमुक्तमिति, न तटस्था एवै-ते, अत एव रस्यन्ते तत्रैव च रस्यन्त इति हि वक्ष्यामः । तदेवं नाट्यादिरूपको-पक्रमं गीतातोद्यप्राणाभिनयवर्गपरिपुष्यद्रसचर्वणात्मकं परप्रीतिमयमेव नाट्यं, ततस्तद्व्युत्पत्तिरिति नाट्यमेव वेद इति क्रमेण प्रदर्शितम् । तेनाक्रम्य योज-नात्मकनियोगात्मकशासनप्राणशास्त्रवैलक्षण्येन स्वयमुपारूढज्ञानाभिधान-विदः प्राणवेदरूपता नाट्यस्यैवेति सिद्धम्[1] ।

एतदुपसंहरति वे[2]दोपवेदै रित्यादि । वेदा व्याख्याताः । वेदार्था-नामुपकारकोऽर्थो वेद्यते येन स उपवेदात्मा । तद्यथा ऋग्वेदस्य मन्त्रार्थवादा-दिव्याख्यानोपनयनप्रजारक्षणप्रदर्शक आयुर्वेदः । यतो महात्मा ततः सर्ववेदी सर्ववित्त्वाच्च तथाविधसृष्टिशक्तः । एव मित्युपसंहरन् प्रश्नत्रयं कृतोत्तरमिति दर्शयति, प्रयोजनस्याधिकारिणामङ्गानामङ्गाङ्गिभावस्य च निर्णीतत्वात् । एवं पितामहसदृशेन सर्वदा नाट्यवेदशरीररूपकनिर्माणे

1 ठ - वेदोपवेदः 2 न - संपन्नो ब्रह्मणा ललितात्मकम् । 3 ठ - ब्रह्मणा लसितात्मना 4 ज - ब्रह्मावोचत्सुरेश्वरम् । ड - प्राह शक्रं पितामहः 5 ठ - दृष्टः

1 स्थितम् 2 वेदोपवेदैरिति ।

कुशला ये विदग्धाश्च प्रगल्भाश्च [1]जितश्रमाः ।
तेष्वयं नाट्यसंज्ञो[2] हि वेदः संक्राम्यतां त्वया॥ २०
तच्छ्रुत्वा भगवाञ्छक्रो[3] ब्रह्मणा यदुदाहृतम्[4] ।
प्राञ्जलिः प्रणतो[5] भूत्वा प्रत्युवाच पितामहम् ॥ २१
ग्रहणे धारणे ज्ञाने प्रयोगे चास्य सत्तम ।
अशक्ता भगवन्देवा[6] अयोग्या नाट्यकर्मणि[7] ॥ २२

कविना भाव्यमिति प्रदर्श्य तत्र विभवयुक्तो विधेयनटजनश्च राजा प्रयोजयिता, भरतमुनिसदृशश्च सम्पन्नपरिवारः सर्ववित्प्रयोक्ता, [1]प्रयोजयितृमहोत्सवप्रायः प्रयोगकालः क्रीडाप्रस्तावव्याजोपदेशकाः, विगतरागद्वेषा मध्यस्थवृत्तयः निर्मलहृदयमुकुरे सति तन्मयीभवनयोग्यतोपेता आहितरसास्वादाः सामाजिका इत्येतत् पुराकल्पमुखेन दर्शयत्यध्यापनग्रन्थेन उत्पाद्य नाट्यवेदं त्वित्यादिना । राजैव प्रयोजयितुं शक्त इति तु शब्दः । इतिहासो दशरूपकम् । कुशला ग्रहणधारणयोग्याः । विदग्धा ऊहापोहसमर्थाः । प्रगल्भाः परिषद्यभीरवः । जितश्रमा योग्याः समुचितदेहा अखिन्नकायाश्च । ग्रहण इति पूर्वं गुरुमुखाद्ग्रहणं, तस्याविस्मरणं धारणम् । ज्ञानमूहापोहविचारः । प्रयोगः पर्षदि प्रकटीकरणम् । चकारेण च तदुपयोगिगुणनिका व्यायामाभ्यासादिः । देवाः सुखभूयिष्ठत्वात् स्वाम्यादेशात्कथमपि यदि प्रवर्तेरन् तत्पूर्णपर्यवसानत्वं दुर्लभमेतैरित्यर्थः ॥

तर्हि किं क्रियतामित्याह य इम इति । वेदज्ञा इति ग्रहणधारणसामर्थ्यं गुह्यत्वेनाध्यात्मोपनिषदर्थवेदनधारणकौशलेन रसाद्युपयोगिसात्त्विकसंपादितसामर्थ्यम्, यद्वक्ष्यति—"सत्त्वं मनःप्रयत्ननिर्वर्त्य"मित्यादि । तेन—

1 प - जितक्लमाः 2 न - नाट्यसंज्ञस्तु 3 न - वचनं शक्रो 4 न - समुदाहृतम् 5 न - विनयात्प्राञ्जलिः 6 ब - चैव 7 प - कर्मसु·

1 प्रयोजन.

य इमे वेदगुह्यज्ञा [1]ऋषयः [2]संशितव्रताः ।
[3]एतेऽस्य ग्रहणे शक्ताः प्रयोगे धारणे तथा ॥ २३
[4]श्रुत्वा तु शक्रवचनं मामाहाम्बुजसम्भवः ।
त्वं पुत्रशतसंयुक्तः[5] प्रयोक्तास्य भवानघ ॥ २४
आज्ञापितो विदित्वाहं नाट्यवेदं पितामहात् ।
[6]पुत्रानध्यापयामास प्रयोगं चापि तत्त्वतः ॥ २५

न्यस्येत्प्राणं भ्रुवोर्मध्ये स्तम्भो वाष्पश्च चाक्षुषः ।
स्वेदो हृदि गुदे कम्पः पुलको मूर्ध्नि वक्त्रतः ॥
वैवर्ण्यं स्वरितं कण्ठे प्रलयो नासिकान्तरे ॥

इत्यादियोग्यत्वं तेषाम् । अत एवानुषङ्गतो नटस्यापि परमपुरुषार्थलाभो धारणादिवशात् । ऋषय इति दर्शाद्दषिरिति ऊहापोहयोग्याः । संशितव्रता इति अभ्यासे शक्ताः । तथेति ग्रहणादीनामर्थक्रमः प्रदर्शनीय इत्यर्थः । य इम इति प्रत्यक्षेणैव दृष्टमेषां तदिति दर्शयति ।

श्रुत्वा त्विति । मां त्विति तु शब्देन ऋषिभ्योऽप्यन्येभ्योऽस्य विशेषमाह । ब्रह्मैव मामाहेत्यादरातिशयः, पुत्रशतयोगाद्यन्योन्यप्रवर्तितबहुतरपरिवारयोगः । अनघेत्यध्येषणया सोत्साहपरिषदा कृतसंमानस्य सम्यक्प्रयोगनिष्पत्तिरिति सूचितम् । आज्ञापित इत्यनुल्लङ्घनीयवचनतास्योक्ता । पितामहादित्यनाचार्योषि तत्वाशङ्कां व्युदस्यति । प्रयुज्यत इति प्रयोगो दशरूपकम्, प्रयुज्यते निर्वर्त्यतेऽनेनेति प्रयोगः । नाट्यलक्षणशास्त्रं तदहं पुत्रान्पाठयाञ्चकार । प्रयुक्तिश्च प्रयोगः । तमध्यवसायपर्यन्तमहं पुत्रानध्यापयामास । तथाहं चकार यथा प्रयुक्तिं ते पुत्राः सम्यक्प्राप्तवन्त इत्यर्थः । चापिशब्दाभ्यां सूचिते द्वे द्वे आवृत्ती । मुनिसमुचितकर्तव्यान्तरव्यासङ्गोऽपि लिटा सूचितः । तत्त्वत इति नाट्याचार्यस्य सम्यगाप्तत्वं गम्यते ।

---

1 ज - मुनयः 2 न - ब्रह्मवादिनः, प - ब्रह्मसंभवाः, ख - शंसितव्रताः, 3 ड - एते संग्रहणे, प - तेह्यस्य, ज - एतस्य 4 ठ - श्रुत्वेमं, न - शक्रस्य वचनं श्रुत्वा 5 ख - संपन्नः

6 प - नान्येऽन्ये धारणे योग्याः प्रयोगे वापि सत्तम ।
इत्युक्तोऽस्य प्रयोगस्य कुरु यत्नमतन्द्रितः ।
आज्ञां विभोर्विदित्वाहं नाट्यवेदं पितामहात्
सुतानध्यापयामास प्रयोगार्थी तदाज्ञया ॥
न - सुतानध्यापयामास प्रयोगे वापि सत्तम, ठ - पुत्रानध्यापयं योग्यान्

शाण्डिल्यं [1]चैव [2]वात्स्यं च कोहलं [3]दत्तिलं [4]तथा ।
[5]जटिलाम्बष्ठकौ चैव [6]तण्डुमग्निं [7]शिखं तथा ॥ २६
सैन्धवं [8]सपुलोमानं [9]शाड्वलिं [10]विपुलं तथा ।
[11]कपिञ्जलिं [12]बादिरं च यमधूम्रायणौ तथा ॥ २७
[13]जम्बुध्वजं [14]काकजङ्घं [15]स्वर्णकं तापसं तथा ।
[16]कैदारिं शालिकर्णं च दीर्घगात्रं च शालिकम् ॥
[17]कौत्सं [18]ताण्डायनिं चैव [19]पिङ्गलं [20]चित्रकं तथा ।
[21]बन्धुलं [22]भल्लुकं चैव मुष्टिकं सैन्धवायनम् ॥ २८
[23]तैतिलं भार्गवं चैव शुचिं बहुलमेव च ।
[24]अबुधं बुधसेनं च [25]पाण्डुकर्णं [26]सुकेरलम् ॥ ३०
[27]ऋजुकं मण्डकं चैव [28]शम्बरं [29]वञ्जुलं तथा ।
मागधं [30]सरलं [31]चैव कर्तारं [32]चोग्रमेव च ॥ ३१
[33]तुषारं [34]पार्षदं चैव गौतमं [35]बादरायणम् ।
[36]विशालं शबलं चैव सुनाभं मेषमेव च ॥ ३२
[37]कालियं भ्रमरं चैव तथा पीठमुखं मुनिम् ।
[38]नखकुट्टाश्मकुट्टौ च षट्पदं [39]सोत्तमं तथा ॥ ३३

---

1 ठ - चापि, ड - जीव 2 न - वाद्यं 3 प - धूर्तिलं 4 ड - मुनिम् 5 ठ - जटुला प - यडिला 6 ज - ताण्ड्य, फ - दण्ड ठ - ताण्डु, 7 प - मुखं 8 ज - पुंसलो 9 ज - शाश्वलिं, प - वालिकं, न - पाडालिं 10 न - विघुधं 11 न - यमं धूम्रायणं चैव कपिंजलमथापि च ज - कपिञ्जलं, 12 ठ - वादरिं, ड - वादिरं 13 प - जम्व, न - वाष्कलं, फ - जम्बूकं ख - जङ्गं च 14 ख - कोकमुस्तं च 15 ज - स्वर्णकृत्तापसौ· ख - पूर्णकं तापसं तथा 16 ठ - केदारं, - ज केदरिं, 17 ज - कोत्सं 18 ज - तान्यासिनं, प - ताण्ड्यायनि 19 ज - पिण्ड 20 ठ - छत्रकं, न - छत्रमेव च 21 ख - बल्लुकं, भाल्लुकं 22 प - वाष्कलं 23 ख - तिन्तिलं 24 ज - अम्बुधं 25 ज - पारकर्णं प - पाण्डुकर्णिं 26 ज - सकेरलम्, च - सुरेक्षलम् 27 ज - मिश्रकं, ड - ऋज्जु कमण्डलुं 28 प - शाम्बकं 29 ज - वञ्चुलं 30 प - सुरलं, फ - सारणं, सुकलं 31 ः - चैक 32 न - चात्रिमेवच 33 ठ - तुषादं 34 भ - पांशलं 35 न - वादरायणिम् 36 ख - उदारिं वरुणं चैव वरणिं हंसमेव च 37 ज - कालेयं 38 ठ - तरुकुट्टा· 39 ड - चोत्तमं

[1]पादुकोपानहौ चैव [2]श्रुतिं चाषस्वरं तथा।
अग्निकुण्डाज्यकुण्डौ[3] च [4]वितण्डयं ताण्डयमेव च॥
[5]कर्तराक्षं हिरण्याक्षं [6]कुशलं दुःसृहं तथा। स्स
[7]लाजं भयानकं चैव बीभत्सं [8]सविचक्षणम्॥ ३५
[9]पुण्ड्राक्षं पुण्ड्रनासं च [10]असितं सितमेव च।
विद्युज्जिह्वं महाजिह्वं [11]शालङ्कायनमेव च॥ ३६
[12]श्यामायनं माठरं च लोहिताङ्गं तथैव च।
संवर्तकं [13]पञ्चशिखं त्रिशिखं [14]शिखमेव च॥ ३७
शंखवर्णमुखं [15]षण्डं शंकुकर्णमथापि च।
शक्रनेमिं गभस्तिं चाप्यंशुमालिं शठं तथा॥ ३८

पुत्रान्नामभिर्दर्शयति शाण्डिल्यमित्यादिना। अत्र [1]प्रसिद्धत्वान्नटानामादरकारणमिति तावन्मुख्यं नामग्रहणे प्रयोजनमानुषङ्गिकं त्वन्यदपि। तद्यथा विदूषकतापसादिनाम्नां (तत्राकर्मीनां) (तथाकर्मिणां) निर्वचनलब्धार्थयुक्त्या भूमिकाविशेषोपयोग इति। अन्यस्त्वाह—शतमेवेह पठितम्। कश्चनाभिनेयानां स्थाय्युत्पादनरसनवकतद्गतव्यभिचारित्रयस्त्रिंशत्साच्चिकाष्टकानुरूपाणां पञ्चाशतोऽर्थानां न्याय्यान्याय्यभेदेन नायकप्रतिनायकविषयतया प्राधान्याभिप्रायेणेति। तत्र तु कैशिक्यपि प्रयुक्ता स्यादित्युत्तरग्रन्थावकाशाभाव इत्यलमाभिरसहृदयाभिनिवेशव्याख्याभिः।

---

1 ड - पादुकौपा 2 ज - सश्रुतं षट्स्वरं न - श्रुतिं च स्वरमेव च 3 ख - अश्मकुण्हैच 4 ज - विताण्डय तण्डय 5 न - केकराक्षं 6 न - नकुलं दुःसहं तथा 7 न - जालं प - जलं 8 फ - सुविचक्षणम् 9 ठ - पुण्ड्राक्षं पूर्णनासं च 10 प - असितासितमेव च 11 ख - सालं 12 ज - श्यामायसं प - त्यामायसं 13 ठ - पञ्चसखं 14 ज - शिखिमेव, ठ - शिखरमेव च 15 ज - खण्डं

---

1 प्रसिद्धत्वं नटानां

विद्युतं शातजङ्घं च [1]रौद्रं वीरमथापि च । [2]
पितामहाज्ञयास्माभिर्लोकस्य च गुणेप्सया ॥ ३९
[3]प्रयोजितं पुत्रशतं [4]यथाभूमिविभागशः ।
यो यस्मिन्कर्मणि [5]यथा [6]योग्यस्तस्मिन् स योजित ॥
भारतीं सात्त्वतीं चैव वृत्तिमारभटीं तथा ।
समाश्रितः प्रयोगस्तु प्रयुक्तो वै मया द्विजाः ॥ ४१
परिगृह्य प्रणम्याथ ब्रह्मा विज्ञापितो मया ।
अथाह मां सुरगुरुः कैशिकीमपि योजय ॥ ४२

यस्मिन्निति उत्तमप्रकृतिविचेष्टितादौ । यथेति कश्चित् तदीयहृदयहर्षप्रदर्शनप्रकारेण योग्योऽन्यस्तदीयशोकप्रकटीकरणेनेति ।

अथ सकलप्रयोगप्राणभूतकैशिक्युपयुज्यमानोपकरणान्तरसंभरणा[1]योपक्रमं दर्शयति भारतीमित्यादि । वृत्तिमिति धर्मादिपुरुषार्थचतुष्टये साध्ये वागङ्गसत्त्वचेष्टासामान्यं तच्च संक्षिप्तेनावान्तरभेदेन चतुर्धा, यद्यत्किल कर्मारभ्यते तत्र वाङ्मनःकायव्यापारस्तावदस्ति, तत्र कस्यचिल्लालित्यवैचित्र्यक्रमस्यानुप्रवेशो, यत उत्तमप्रकृतीनां सौष्ठवमय एव सर्वो व्यापारः, तदेव तद्वृत्तिचतुष्टयम्। भारती वाग्वृत्तिः,मनोव्यापाररूपा सात्त्विकी सात्त्वती, सदिति प्रख्यारूपं संवेदनं,तद्यत्रास्ति तत्सत्त्वं मनस्तस्येयमिति। इयतीत्यरा भटाः सोत्साहा अनलसास्तेषामियमारभटी, कायवृत्तिः, केशाः किञ्चिदप्यर्थक्रियाजातमकुर्वन्तो देहशोभोपयोगिनः तद्वत्सौन्दर्योपयोगी व्यापारःकैशिकीवृत्तिरिति तावन्मुख्यः क्रमः। अन्यस्य तु यस्तद्व्यपदेशः स तत्प्रधानत्वादनेकरसप्रधानं पानकरीत्या कैशिकीत्यादि मधुरव्यपदेशवत् । एतच्च [2]प्राग्रे वितनिष्यामः। एवं [3]यत्किञ्चिल्ला-

---

1 प .. रौद्रवीर,
2 प - किरीटिनं च पाशं च तथा धन्विनमेव च
शिलापट्टं स्वर्णगं च सिलागिलकमेव च,
अग्निवेश्यं शिवं चैव ध्यानं जप्यं सुमङ्गळम्
जैगीसव्यं कुटिलं च तथा कलशमेव च
3 न - एवमादि शतं पूर्णं समग्रं भूमिभागशः ।
ड - एवमाद्यं पुत्रशतं समग्रं भूमिभागशः ।
4 ख - साग्रं भूमिभागशः 5 प - तथा 6 न - योग्योऽसौ तत्र,योजितः

1 संहरणाय 2 प्रागेवा 3 अशक्या पुरुषैरिति

यच्च तस्याः क्षमं द्रव्यं तद्ब्रूहि द्विजसत्तम।
एवं तेनास्म्यभिहितः प्रत्युक्तश्च मया[1] प्रभुः॥ ४३
[2]दीयतां भगवन्द्रव्यं कैशिक्याः सम्प्रयोजकम्।
[3]नृत्ताङ्गहार[4]संपन्ना [5]रसभावक्रियात्मिका॥ ४४
[6]दृष्टा मया भगवतो [7]नीलकण्ठस्य नृत्यतः।
कैशिकी श्लक्ष्णनैपथ्या[8] शृंगाररससम्भवा॥ ४५
[9]अशक्या पुरुषैः [10]सा तु प्रयोक्तुं [11]स्त्रीजनादृते।
ततोऽसृजन्महातेजा मनसाप्सरसो विभुः॥ ४६

लित्यं तत्सर्वं कैशिकीविजृम्भितं। सा च तैः प्रयोक्तुमशक्येति तुशब्देनोक्तम्। तेन दशरूपं सर्वं वैचित्र्यशून्यं तान्प्रति योजितम्। अत एव तादृशे प्रयोगेऽवज्ञां वै शब्देन द्योतयति। प्रयुक्त इति तेषामभ्यासभूमौ योजित इत्यर्थः। क्षममिति। प्रयोगसमर्थं सादराविचित प्रयुङ्क्तेऽत एवाह द्रव्यं, सुन्दरं यतः सौन्दर्यप्राणैव सा। एवमिति बुद्धिकौशलं मदीयं ज्ञातुं तेनाहमेतत्पृष्टः। चकारेण प्रत्युत्पन्नप्रतिभानत्वं दर्शयति। अनेन झटिति कविहृदयग्रहणयोग्यत्वं नाट्याचार्यगुण इति सूचयति। न चात्यन्तापरिदृष्टे वस्तुनि उपकरणमुन्नेतुं शक्यम्। ब्रह्मणा तूपदेशसमये वचनमात्रेणोक्तम्। एतन्मध्ये हृदयहारिवैचित्र्यं योजनीयमित्यनेनाभिप्रायेण कैशिकीसाक्षात्करणं वर्णयति नृत्तांगहारेत्यादिना युगलकेन। नर्तनं नृत्तं गात्राणामङ्गोपाङ्गानां विलासेन क्षेपो, न तु केन चित्कर्तव्यांशेन, लोकोऽप्येवंविधे विषय एवमेवाह नृत्यतीव गच्छतीत्यादि। तत्र येऽङ्गहारा अङ्गानां हरणानीति अत्रुटितरूपतया समुचितस्थान[1]प्राप्तास्तैः सम्पन्ना।[2]शङ्करस्यैव भगवतः परिपूर्णानन्दनिर्भरी[3]भूतदेहोच्चलदान्तरनिर्वारसुन्दराकारस्यात एव नृत्यत इति कर्तव्यान्तरवैकल्यादानन्दनृत्तमात्रस्थितस्य प्रयोज्यत्वेन मया दृष्टा। ननु सा नाट्योपयो-

1 प - तेनान्वभिहितः 2 न - क्रियतां 3 ठ - मृदङ्ग 4 ज - संयुक्ता 5 ख - ललिताभिनयात्मिका 6 ज - दृष्टोमया 7 न - नीलवर्णस्य प - नृत्यतः शङ्करस्य तु 8 न - नैपथ्य 9 ड - न शक्या 10 न - साधु 11 ठ - स्त्रीजनैर्विना।

1 प्राप्तयस्तै क - प्रावृत्तिः ख - प्रायस्तैः 2 शङ्करस्यैव 3 देहाचल

नाट्यालंकारचतुराः प्रादान्मह्यं प्रयोगतः ।
मञ्जुकेशीं सुकेशीं च मिश्रकेशीं सुलोचनाम् ॥ ४७

गिनी कथम् । आह, सैव यदि श्लक्ष्णेन श्लिष्यलोचितेन नेपथ्येन सहिता भवति । यद्वक्ष्यति—"शृङ्गार उज्ज्वलवेषात्मक" (अ. ६-४६) इति, तन्नाट्योक्तशृङ्गाररसः संभवति, नान्यथा । नेपथ्यग्रहणं सुकुमारस्याङ्गिकादेरप्युपलक्षणम् । तेन शृङ्गाराभिव्यक्तिहेतौ सुकुमारे चतुर्विधेऽप्यभिनये योजिते मधुरमन्थरवलनावर्तनाभ्रूक्षेपकटाक्षादिना विना शृङ्गाररसास्वादस्य नामापि न भवति। किमतैव सोपयोगेत्याह रसभावक्रियात्मिकेति । रसानां भावो भावना कविनटसामाजिकहृदयव्याप्तिस्तस्या या क्रियेतिकर्तव्यता सैवात्मा स्वभावो यस्याः । एतदुक्तं भवति—रौद्रादिरसाभिव्यक्तावपि कर्तव्यायां योऽभिनय उपादीयते सोऽप्यनुप्रासवलनावर्तनाद्यात्मकसुन्दरवैचित्र्यव्यामिश्रणया दुःश्लिष्टोऽश्लिष्ट एव वा न रसाभिव्यक्तिहेतुर्भवतीति सर्वत्रैव कैशिकी प्राणाः, यद्वक्ष्यति "अस्य शाखा च नृत्तं च वस्तून्याभिनयस्ये"ति। शृङ्गाररसस्य तु नामग्रहणमपि न तया विना शक्यमिति । स्त्रीजनाहृत इति। अयं भावः—यावन्निजहृदयरसविलसद्विकस्वरनिर्वारचमत्कारपवित्रता न जाता, भगवत इव, तावच्छिक्षाशतैरपि वैचित्र्यमनाहार्यम् । मुनीनां च निसर्गाविषयविमुखचित्तवृत्तीनां को निर्वृतिचमत्कारः, योऽपि वा स समाधिजः सोऽपि देहपर्यन्ततां न भजाति । प्रत्युत ततश्चपलायमानाः । अतः स्त्रीणां तादृगस्ति वैचित्र्यं तत्सम्पर्कसम्भवादार्द्रभावास्तु कदाचिच्छक्नुयुरपि । ये त्वाहुः—न भगवतः कैशिकीप्रयोगसामर्थ्यं, तेन दृष्टोमयेति पाठः, उमया सह भगवतो नृत्यतो भगवन्तमप्यनादृत्य भगवत्या प्रयुज्यमाना मया दृष्टेति—त उक्तनीत्या पराकृताः ।

विचित्रैरङ्गहारैस्तु देवो लीलासमन्वितैः ।
बबन्ध यः शिखापाशं कैशिकी तत्र निर्मिता ॥ (अ. २०-१३)

इति भगवतो विष्णोः कैशिकीनिर्माणमनुचितं स्यादित्यलं बहुना । जनशब्देन रागिताशङ्कां परिहरति । ततोऽसृजदिति। मनसेति यथारुचि विनिर्मिता इत्यर्थः । नाट्यस्य योऽलङ्कारो वैचित्र्यहेतुः कैशिकी, तत्र चतुराः। अन्ये तु नाट्यालङ्काराः सामान्याभिनये (अ-२२) वक्ष्यमाणाः स्वभावजा लीला-

1 प - कुशलाः 2 न - क्षणात्सुरवरस्तदा प - प्रयोगज्ञा गुरुस्तदा

[1]सौदामिनीं देवदत्तां देवसेनां मनोरमाम् ।
[3]सुदतीं सुन्दरीं चैव विदग्धां [4]विपुलां तथा ॥ ४८
[5]सुमालां [6]सन्ततिं चैव सुनन्दां सुमुखीं [7]तथा ।
मागधीमर्जुनीं चैव सरलां केरलां धृतिम् ॥ ४९
† नन्दां सपुष्कलां चैव [8]कलभां चैव मे ददौ ।
*स्वातिर्भाण्डनियुक्तस्तु सह शिष्यैः स्वयम्भुवा ॥
नारदाद्याश्च गन्धर्वा [9]गानयोगे नियोजिताः ।
[10]एवं नाट्यमिदं सम्यग्बुध्वा सर्वैः सुतैः सह ॥ ५१
स्वातिनारदसंयुक्तो वेदवेदाङ्गकारणम् ।
उपस्थितोऽहं [11]लोकेशं [12]प्रयोगार्थं कृताञ्जलिः ॥ ५२

विलासा इत्याद्या दश शोभाकान्तिरित्याद्याश्च सप्त यत्नजा इति । अनेन मुनिकन्यानामत्रायोग्यत्वं तावदुक्तम् । तासां नामग्रहणे पूर्ववत्प्रयोजनं निरूप्यम् । मे ददा विति नाट्याचार्यपरवशत्वमुपकरणसम्भारस्य दर्शयति । ददाविति । ताश्च मया यथोचितं शिक्षादानेन प्रतिगृहीता इति सूचयन् कैशिकीमप्यहं योजितवानिति दर्शयति ।

एवं वृत्तिचतुष्टयसम्पूर्णं नाट्यं गुणनिकायामभ्यस्तंमिति प्रदर्श्य गीतातोद्याभ्यामुपरञ्जकाभ्यां योगं दर्शयति स्वातिरित्यादि । (स्वातिः ऋषिविशेषः) येन जलधरसमयनिपतत्सलिलधारावैचित्र्याभिहन्य-मानपुष्करदलविलसितरचितविचित्रवर्णानुहरणयोजनया यथास्वं वृत्तिनि-यमेन पुष्करवाद्यनिर्माणं कृतमित्यर्थः । सह शिष्यैरिति त्रिपुष्करवाद्यस्या-

1 ज - सौदामनीं 2 न - तथैव च ख - मनोवतीं 3 न - सुरभिं 4 ठ - विविधां, विबुधां 5 ड - सुमनां 6 ड - लासिनीं 7 न - रतिम् 8 न - कपिलां सुमनां तथा 9 - नाट्ययोगे, ड - गीतयोगे 10 न - एवं नाट्यमिदं बुध्वा सम्यक्छिष्य गणैः (पुत्र) सह 11 न - ब्रह्माणं 12 न - प्रयोगार्थी

† न - सुनन्दां सुमुखीञ्चैव काकाल्याद्याश्च मे ददै ज - अहल्यां च मे ददौ
भ - स्वातिर्भाण्डे नियुक्तस्तु सार्थं शिष्यैर्गणैस्तथा

नाट्यस्य ग्रहणं प्राप्तं ब्रूहि किं करवाण्यहम्।
एतत्तु वचनं श्रुत्वा प्रत्युवाच पितामहः॥ ५३
महानयं [1]प्रयोगस्य [2]समयः समुपस्थितः।
[3]अयं ध्वजमहः श्रीमान् [4]महेन्द्रस्य प्रवर्तते॥ ५४

पूरकपणवमृदङ्गझल्लर्याद्युपयोगेन पक्षातोऽप्यपरिग्रह उक्तः। भाण्डस्यात्र पूर्वमुपादानं वृत्तिर्येन तस्यैव परिक्रमणादौ सति सोपयोगात्कैशिकी चात्र मध्ये नियोजितेत्युक्तम्; न तत्प्रधानमेतत्। गानयोग इति। गानशब्देन ततसुषिरपरिग्रहः। गानशब्देन गान्धर्वस्यात्राप्युपयोगमाह। नियुक्तो नियोजित इत्यनेन वादकगायनादीनां नाट्याचार्यायत्ततां दर्शयति। [1]नृत्तगीतातोद्याभिनयानां साम्यसिद्ध्यर्थमेकीभावेन संमेलनं कृत्वा प्रयोगः कार्य इति दर्शयति श्लोकद्वयेन एवं नाट्यमित्यादिना। एवं [2]मेलनिकायां नाट्यमिदमित्येकबुद्धिग्राह्यं संमिलितं सम्यक्सम्पन्नमिति बुध्वा ज्ञात्वा पुत्रैः [3]स्वातिनारदाभ्यां च सह ब्रह्माणमुपस्थितः उपनिमन्त्रणार्थं ब्रह्मणोऽग्रे स्थित इत्यर्थः। उपनिमन्त्रणं दर्शयति नाट्यस्येति। ग्रहणमिति गृहीतं शिक्षितं तावन्नाट्यमित्यर्थः। ग्रहणं [4]चावलोकनं तत्प्राप्तं प्रेक्षणयोग्यं जातमित्यर्थः। एतत्त्विति तुशब्द एवकारार्थे, श्रुत्वैव अतएव प्रत्युपस्थितः अयत्नादेवाभिमुख्येनोपस्थितो दैवसङ्घटित इत्यर्थः। ध्वजस्येन्द्रार्थस्य महनं पूजनं यत्र स ध्वजमहः। ध्वजमहस्य विशेषणद्वारेण सम्भवं दर्शयति निहतासुरदानव इत्यादिना। तत्र प्रयोगे क्रमं दर्शयति [5]पूर्वं कृता मया नान्दीति नान्द्याख्यं मुख्यं मङ्गलं सकलपूर्वरङ्गाङ्गोपलक्षणमिति केचित् पूर्वरङ्गाङ्गानां मध्यात्नान्दी केवलापि प्रयोज्येति एवं परमेतदित्यन्ये। अस्मदुपाध्यायास्तु—यावद्दैत्यैस्तत्र विघ्नाद्याचरणं न कृतं तावत्पूर्वरङ्गस्य विधिपूर्वकस्य कोऽवकाशः। स हि विघ्नरक्षाकरणेन मण्डपभागनिवेशितदेवतापरितोषहेतुः, प्राधान्येन नान्तरीयकतया च दैत्यपरितोषकारणम्।

1 प - प्रयोगश्च 2 प - समया स 3 ड - योऽयं 4 न - शचीभर्तुः

1 अथ गीता 2 मेलनिकया 3 स्वात्याद्याभ्यां 4 तदवलोकनं 5 पूर्वमित्यादि.

[1]अत्रेदानीमयं वेदो नाट्यसंज्ञः [2]प्रयुज्यताम्।
[3]ततस्तस्मिन्ध्वजमहे निहतासुरदानवे॥ ५५
प्रहृष्टामरसंकीर्णे महेन्द्रविजयोत्सवे।
[4]पूर्वं कृता मया नान्दी ह्याशीर्वचनसंयुता॥ ५६
अष्टाङ्गपदसंयुक्ता विचित्रा [5]वेदनिर्मिता।
[6]तदन्तेऽनुकृतिर्बद्धा यथा दैत्याः सुरैर्जिताः॥ ५७

विघ्नास्तु यदा जातास्ततः प्रभृति पूर्वरङ्गः। तथा चतुर्थेऽध्याये वक्ष्यते, "पूर्वरङ्गे कृते" मया भगवते शिवभट्टारकाय दर्शित इति—यथा तथा तु यः कुतपविन्यासादि न पूर्वरङ्गशब्दवाच्यः। तस्मादिह नान्दीमात्रस्य प्रयोगः, किमर्थासावित्याह। वेदनिर्मिता तत्राशिषमाशास्त इति हि श्रुतिः सर्वकर्मस्वाशीःपूर्वकत्वमाह यत्ततो नान्दीप्रयोगो न तु पूर्वरङ्गाङ्गत्वेन। अष्टौ यान्यङ्गभूतानि पदानि वाक्यं प्रति महावाक्यं वा तानि सुप्तिङन्तान्यवान्तरवाक्यानि वेत्युभयथा। अत एव विचित्रेत्युक्तम्।

जितमुडुपतिना नमः सुरेभ्यो द्विजवृषभा निरुपद्रवा भवन्तु।
अवतु च पृथिवीं समृद्धसस्यां प्रतिपच्चन्द्रवपुर्नरेन्द्रचन्द्रः॥ (रत्ना-१)

इत्येषापि भारतीयत्वेन प्रसिद्धा कोहलप्रदर्शिता नान्द्युपपन्ना भवति। अत्र तु पक्षे

नान्दीपदान्तरेष्वेषु ह्येवमस्त्ववति नित्यशः।
वन्देतां [1]सम्यगुक्ताभिर्वाग्भिस्तौ [2]पारिपार्श्विकौ॥ (५-१०३)

इति श्लोकेऽन्तरशब्दोऽवान्तरवाक्यविच्छेदवाची द्रष्टव्यः। विवेचकास्त्वाहुः अङ्गग्रहणादत्रावान्तरवाक्यान्येतावतोपात्तानि, तत्र चाष्टद्वादशसङ्ख्या चतुरस्रत्र्यश्रकालानुसारी पूर्वरङ्गद्वयाभिप्रायेण। तत्र

नान्दीं पदैर्द्वादशभिरष्टभिर्वाप्यलंकृताम्। (५-९८)

---

1 ढ - पुत्रेदानी 2 ङ - प्रपूज्यताम् 3 न - ततश्शाक्रध्वजमहे 4 ग - नान्दी कृता मया पूर्वमाशीर्वचन 5 ङ - देवसम्मता, प - देवसंमिता, फ - वेदसंमिता, द - देवनिर्मिता न - देवतास्तुतिसम्मता, त - दैवतास्तुतिसंश्रया 6 प - कृता तदन्तेऽनुकृतिः न - तदन्ते तु कृतिर्बद्धा

1 सम्यगुक्ताभिः 2 पारिपार्श्वकौ

सम्फेटविद्रवकृता च्छेद्य[1]भेद्याहवात्मिका।
ततो ब्रह्मादयो देवाः प्रयोगपरितोषिताः॥ ५८
[2]प्रददुर्मत्सुतेभ्यस्तु सर्वोपकरणानि वै।
प्रीतस्तु प्रथमं शक्रो दत्तवा[4]न्स्वं ध्वजं शुभम्॥५९

इत्यत्रापिशब्दाच्चतुष्पदत्वं षोडशपदत्वं चतुरस्रगतं लभ्यते। त्र्यस्रगतं च त्रिपदत्वं षट्पदत्वं चेत्येवमल्पमपि तद्भेदेन तिस्रस्तिस्रो नान्द्यः। ततः परमपि भूयस्त्वात्तेन जितमुडुपतिनेति चतुष्पदेयं। षोडशपदा तु "जयति भुवनकारण" मित्यादि। तदन्त इति नान्द्यन्ते परिसमाप्तौ। अनुकृतिरिति नाट्यं, तत्र च बद्धेति गुणनिका योजिता। न तु प्रयोग इत्येतच्चासत्, तत्पूर्वोत्तरव्याघातात्। पूर्वं ह्युक्तं, "एवं नाट्यमिद" मित्यादि "नान्दी कृते"त्यन्तं, वक्ष्यते च "ब्रह्मादयः प्रयोगपरितोषिता" इति, तस्माद्बद्धेति प्रस्ताविता, न तु निष्पादिता, प्रस्तावना तावत्प्रयुक्तेत्यर्थः। अन्ये त्वनुकृतिरिति नाट्यानुकाररूपा प्रस्तावनेत्याहुः, कृता तदन्तेऽनुकृतिरिति च पठन्ति। एतदुपजीवनेनैव चिरन्तनः कवयो "नान्द्यन्ते सूत्रधार इति पुस्तके लिखन्ति स्म। किं प्रस्तावितमित्याह यथा दैत्या इति। डिमसमवकारेहामृगादीनामन्यतरः प्रयोगः प्रास्तावीत्यर्थः। यद्यपि भरतपुत्रैर्दशरूपकमभ्यस्तम्, तथापि न युगपत्सर्वः प्रयोक्तुं पार्यत इत्येवमुक्तम्। तेन यत्कोचिदचूचुदन्, समवकारे कः कैशिकीयोजनावसर इति पूर्वग्रन्थोऽसङ्गत इति। तन्निरवकाशमेव। समवकारादावपि च सौन्दर्यात्मकं वैचित्र्यं कैशिकीविजृम्भ एवेत्युक्तम्। रोषग्रथितवाक्यस्तु सम्फेटः। शङ्काभयत्रासकृतो विद्रवः। छेदमर्हतीति च्छेद्यः शस्त्राहवः। भेदमर्हतीति भेद्यं मल्लयुद्धात्मकं नियुद्धम्।

तत[3]इति। प्रभुपरितोषाय प्रभुचरितं कदाचिन्नाट्ये वर्णनीयमिति यथा दैत्याः सुरैर्जिता इत्येतस्माल्लभ्यत इति केचिदाहुः। तदसत्, दशरूपकलक्षणयुक्तिविरोधात्। तत्र हि किञ्चित्प्रसिद्धचरितं किञ्चिदुत्पाद्यचरितमिति वक्ष्यते, न च वर्तमानचरितानुकारो युक्तो

1 ड – वेदाहव, घ – भेद्यारवात्मिका 2 घ – प्रददुर्हृष्टमनसः, ठ – 'प्रययुः प्रददुर्हृष्टा 3 ड – नः 4 न – ध्वजमुत्तमम्।

1 नान्द्या अन्ते 2 इवेत्युक्तम् 3 इत्यादि

ब्रह्मा [1]कुटिलकं चैव भृङ्गारं वरुणः शुभम्[2] ।
सूर्यश्छत्रं [3]शिवस्सिद्धिं वायुर्व्यजनमेव च ॥ ६०
विष्णुः सिंहासनं चैव कुबेरो मकुटं तथा ।
(श्राव्यत्वं प्रेक्षणीयस्य ददौ देवी सरस्वती ।)
शेषा[4] ये देव[5]गन्धर्वा यक्षराक्षसपन्नगाः ॥ ६१
तस्मिन्सद[6]स्यभिप्रेतान्नानाजातिगुणाश्रयान्[7] ।
अंशांशै[8]र्भाषिता[9]न्भावान्रसा[10]न्रूपं [11]क्रियाबलम् ॥

विनेयानां तत्र रागद्वेषमध्यस्थतादिना तन्मयीभावाभावे प्रीतेरभावेन व्युत्पत्तेरप्यभावात्, वर्तमानचरिते च धर्मादिकर्मफलसम्बन्धस्य प्रत्यक्षत्वे प्रयोगे वैयर्थ्यं, भविष्यति प्रमाणाभावादिति न्यायेन व्युत्पत्तेः सम्भवान्नाधिकः । एतच्च दशरूपकाध्याये वितनिष्याम इत्यास्तां तावत् । देवानां त्वद्य प्रसिद्धवर्णनीयासम्भवात्पूर्वकल्पमन्वन्तरादिगतदेवासुरचारितकीर्तनमनादित्वात्संसारस्य श्रुतिस्मृत्यनुमतदेवासुरकीर्तनवदिति । तत्र [1]वर्तनोपवर्णनं तज्जातीयानामथ चरित्रभ्रमविप्रलब्धास्त्वसुराश्चुक्षुभुरिति वक्ष्यामः । न च स्वचरितवर्णनाद्देवानां परितोष इह, यत आह प्रयोगपरितोषिता इति । ध्वजमिति; यस्य विघ्नशान्त्यै पूजार्थमुपयोगो भावी । कुटिलकमिति वक्रदण्डो विदूषकोपयोगी ब्रह्मायुधात्मा दण्डोपकामत्वेन भीषणत्वापात्याद-पीत्यर्थः । भृङ्गारः पारिपार्श्विकोपयोगी । छत्रमत्र वितानो जलदानां सूर्योद्भवत्वात् तत्प्रतीमः । यदाहुः—ऋतवे वर्षोऽन्ते महतो मेघसम्प्रबानिति । भगवदायत्ता दैवी मानुषी च सिद्धिरिति मध्ये तदुपादानम्, सर्वव्यापकत्वं देव्याः सिद्धेः प्रतिपादयितुम् । व्यजनं घर्मापनुत्तये । सिंहासनादि राजभूमिकायामुपयोगि । यक्षादयो ये तत्त्वज्ञाः नाट्यस्य । भाषितमिति तत्तद्भूमिकोपयोगिवाचिके शिक्षा । भावानिति विभावादि

1 ङ - कमण्डलुं 2 ङ - तथा 3 ङ - शिवो ज्ञानं, ग - शिवा सिद्धिं 4 प - श्च 5 ङ - गन्धर्वं 6 घ - 'स्यतिभीता' 7 घ - श्रयाः 8 न - र्भावितं 9 ङ - भवान् रसान् रूपं बालिं क्रियाम् न - भावान् रूबमङ्गं क्रियां बलम् ॥ 10 प - रूपं बलं तथा

[1] तज्जातीयकत्वादसुराश्चक्षुभिरे (अ - सं)

[1]दत्तवन्तः प्रहृष्टास्ते मत्सुतेभ्यो दिवौकसः।
एवं प्रयोगे प्रारब्धे [2]दैत्यदानवनाशने॥ ६३
[3]अभवन्क्षुभिताः सर्वे दैत्या ये तत्र [4]संगताः।
विरूपाक्ष[5]पुरोगांश्च [6]विघ्नानुत्पादयन्ति ते॥ ६४
[7]नेत्थमिच्छामहे नाट्यमेतदागम्यतामिति।
ततस्तैरसुरैः सार्धं विघ्ना मायामुपाश्रिताः। ६५
वाचश्चेष्टां स्मृतिं चैव स्तम्भयन्ति स्म नृत्यताम्॥
[8]तथा विध्वंसनं दृष्ट्वा [9]सूत्रधारस्य देवराट्। ६६
कस्मात्प्रयोगवैषम्यमित्युक्त्वा ध्यानमाविशत्।

षु। तथा हि रक्तमांसादीनि भय जुगुप्साविभावरूपाणि यक्षरक्षसां हर्षोत्साह-मिभावतां यान्तीति तदुपदेशादेव तज्ज्ञेयम्। रसानिति स्वोचितस्थायिभाव-संबध्यमानतत्तद्रसोपयोगिनोऽनुभावव्यभिचारिवर्गस्य शिक्षा दर्शिता। रूप-मिति मुखरागस्य बलमित्याङ्गिकस्य प्रतिभूमिकं। परितुष्टेनान्ततोऽत्र शिष्टापि काचिद्देया, सामाजिकेभ्यश्च धनविज्ञानमित्याहरणीयातोद्यजिहीर्षता च तत्परितोषाय यतितव्यमित्येतदनेन दर्शितम्।

अथ विघ्नोपशमनाय जर्जरपूजा कार्येति दर्शयितुमितिहासेनोपक्रमते एवं प्रयोग इति। दैत्यानां विनाशनं यत्र प्रयोज्यतया। आगम्यतामित्यवधार्यतां, यदि वा सम्भूयाग्रास्यतां। मायामित्यदृश्यत्वमित्यर्थः। चेष्टेत्याङ्गिकी। यद्यपि स्मृतिस्तम्भनेन सर्वं स्तम्भितं भवति तथापि तत्तदभिनेयप्राधान्येन तदेव स्तम्भितमित्युक्तम्। सूत्रधारस्येति सपरिवारस्येति, प्रस्तावना-प्रयोगमध्य एवायं विघ्न इति यावत्। ध्यानमिति यत्र माया न प्रभवति। सद इति यत्र प्रयोगः क्रियते, सीदत्यस्मिन्निति। जीर्यत्यतिशयेनेति पचा-

1 न - प्रददुर्मत्सुतेभ्यस्तु चित्रं चा भरणं बहु (चित्रमाभरणं बहु ठ)
2 न - दैत्यमानविवाशने, प - दैत्यादीनां विनाशनम्
3 ठ - अथासुराश्च क्षुभिता ये तत्रासन् समागताः
4 न - दर्पिताः 5 ज - पुरोगाश्च 6 ठ - विघ्नान्प्रोत्साह्य तेऽब्रुवन्, न - विघ्नानुत्साहयन्ति ते 7 ठ - न क्षमिष्यामहे ड - नेत्थमक्षिामहे 8 क - एवं 9 ठ - तत्र तेषां स

अथापश्यत्सदो विघ्नैः समन्तात्परिवारितम् ॥ ६७
[1]सहेतरैः सूत्रधारं नष्टसंज्ञं जडीकृतम् ।
[2]उत्थाय त्वरितं शक्रः [3]गृहीत्वा ध्वजमुत्तमम् ॥ ६८
सर्वरत्नोज्ज्वल[4]तनुः [5]किञ्चिदुद्वृत्तलोचनः ।
रङ्गपीठगतान्विघ्नानसुरांश्चैव देवराट् ॥ ६९
जर्जरीकृतदेहांस्तानकरोज्जर्जरेण सः ।
[6]निहतेषु च सर्वेषु विघ्नेषु सह दानवैः ॥ ७०
[7]सम्प्रहृष्य ततो वाक्यमाहुः सर्वे दिवौकसः ।
अहो प्रहरणं दिव्यमिदमासादितं त्वया ॥ ७१
[8]जर्जरीकृतसर्वाङ्गा येनैते दानवाः कृताः ।
यस्मादनेन ते विघ्नाः सासुरा जर्जरीकृताः ॥ ७२
तस्माज्जर्जर [9]एवेति [10]नामतोऽयं भविष्यति ।
शेषा ये चैव [11]हिंसार्थ[12]मुपयास्यन्ति [13]हिंसकाः ॥ ७३
[14]दृष्ट्वैव जर्जरं तेऽपि गमिष्यन्त्येवमेव तु ।
[15]एवमेवास्त्विति ततः शक्रः प्रोवाच तान्सुरान् ॥ ७४
[16]रक्षाभूतश्च सर्वेषां भविष्यत्येष जर्जरः ।
प्रयोगे प्रस्तुते ह्येवं स्फीते शक्रमहे [17]पुनः ॥ ७५

---

1 ठ - तदेतरैः ङ , तथेतरैः 2 ग - अथोत्थाय द्रुतं क्रोधाद्दिव्यं जग्राह तं ध्वजम् 3 ठ - क्रोधाज्जग्राह तं ध्वजम् 4 ठ - ज्वलं तन्तु, ड - ज्ज्वलतनुं 5 ठ - कोपादुद्वृत्त 6 न - गतेषु तेषु विघ्नेषु सर्वेषु 7 न - प्रणम्यैनं तदा वाक्यमिदमूचुः-

8 ठ - नास्त्यविध्वंसिनः सर्वे येन ते जर्जरी कृताः

न - जर्जरी कृतदेहास्तु दानवा येन ते कृताः

9 ड - इत्येष 10 न - ख्यातिं लोके गमिष्यति 11 न - विघ्नार्थं 12 ग - मुपस्थाप्यन्ति 13 ग - विघ्नकाः न - विघ्नताम् 14 न - दृष्ट्वैनं 15 न - एवं भविष्यतीत्येव 16 न - रक्षाभूत स दैवस्य 17 न - तदा

[1]त्रासं सञ्जनयन्ति स्म विघ्नाः [2]शेषास्तु नृत्यताम् ।
दृष्ट्वा तेषां व्यवसितं [3]मदर्थे [4]विप्रकारजम् ॥ ७६

उपस्थितोऽहं ब्रह्माणं [5]सुतैः सर्वैः समन्वितः ।
[6]निश्चिता भगवन्विघ्ना नाट्यस्यास्य विनाशने ॥ ७७

[7]अस्य रक्षाविधिं सम्यगाज्ञापय [8]सुरेश्वर ।
[9]ततश्च विश्वकर्माणं [10]ब्रह्मोवाच प्रयत्नतः ॥ ७८

[11]कुरु लक्षणसम्पन्नं नाट्यवेश्म महामते ।
ततोऽचिरेण कालेन विश्वकर्मा महच्छुभम् ॥ ७९

सर्वलक्षणसम्पन्नं [12]नाट्यवेश्म चकार सः ।
[13]प्रोक्तवान्द्रुहिणं गत्वा [14]सभायान्तु कृताञ्जलिः ॥ ८०

सज्जं नाट्यगृहं देव तदवेक्षितुमर्हसि ।
ततः [15]सह महेन्द्रेण सुरैः सर्वैश्च [16]सेतरैः ॥ ८१

द्यचि यङ्लुकि रूपम्, अतिशयेन जीर्णीकृतो देहो येषान्ते तथा जर्जरेणेति यङ्लुगन्ताण्णिचि पुनः पचाद्यचि रूपम् । एवं राज्ञा सिद्धिविघातका दण्ड्या इति दर्शितम् । यदि वा मूलत एव तत्परिरक्षायै मण्डपः कार्यः । ये च दण्डस्याविषया वातातपवर्षादयश्च तत्कृतो हि सिद्धिविघातो मण्डपे सति न भवति । एतेनैवाभिप्रायेण पुराकल्पमाह प्रयोग इत्यादि । शेषा इति जर्जरीकृतशरीरशेषा अपीत्यर्थः । यद्वक्ष्यति, निश्चिता भगवन्विघ्ना इति । तथास्मिन् जर्जरीकरणकाले एते चासन्निहिता अभूवन् । त्रासमिति सर्वथा तु न शक्ता नाशयितु-

---

1 न - भूयः सन्त्रासयन्ति स्म 2 न - निश्चितमानसाः ड - मद्वधबुद्ध्य
3 न - दैत्यानां 4 ग - विघ्नकारकम् 5 न - सुरैः 6 ग - निःसृता
7 घ - अतो 8 न - पितामह 9 ठ - ततः स 10 न - आह ब्रह्मा, न - ब्रह्मावोचत
11 छ - गुरुलक्षणसंपन्नं नाट्यवेश्म चकार सः
12 ग - कृत्वा नाट्यगृहन्तु सः
13 ठ - कृत्वा यथोक्तमेव तु गृहं पद्मोद्भवाज्ञया ।
न - ततोऽब्रवीद्विश्वकर्मा ब्रह्माणं प्रयताञ्जलिः ॥
14 ठ - सभयन्तु 15 न - सार्धं 16 ठ - सत्तमैः, न - सर्वैः सहेतरैः

[1]आगतस्त्वरितो द्रष्टुं द्रुहिणो नाट्यमण्डपम् ।
दृष्ट्वा नाट्यगृहं ब्रह्मा प्राह सर्वान्सुरांस्ततः ॥ ८२
अंशभागैर्भवद्भिस्तु रक्ष्योऽयं नाट्यमण्डपः ।
रक्षणे [2]मण्डपस्याथ [3]विनियुक्तस्तु चन्द्रमाः ॥ ८३
[4]लोकपालास्तथा दिक्षु विदिक्ष्वपि च मारुताः ।
नेपथ्यभूमौ मित्रस्तु निक्षिप्तो वरुणोऽम्बरे ॥ ८४
[5]वेदिकारक्षणे वह्नि[6]र्भाण्डे सर्वदिवौकसः ।
वर्णाश्चत्वार [7]एवाथ स्तम्भेषु विनियोजिताः ॥ ८५

मिति । जर्जरप्रभावो गमिष्यत्येवमेवेति य उक्तः सोऽङ्गः । ततो विश्वकर्मेति वास्तुविद्यातत्त्वविदो नाट्यमण्डपे स्थपतित्वं सूचयति । द्रुहिण इति ब्रह्मा, इतरे विद्याधरगन्धर्वाद्याः । अंशैर्यानि भाजनान्यधिष्ठानानि तैर्मण्डपस्यांशेषु, सः भवतां,ये तृतीयचतुर्थादयो भागास्तैरंशविभागमेवाह । रक्षण इति । अनेन चैतत्तुल्या एव मण्डपभागरक्षकाः केचिन्नियोज्या इति दर्श्यते । मण्डपस्य सर्वस्याधिष्ठाता हि सौम्यप्रकृतिः सोमप्रधानो योज्य इति दर्शयाति चन्द्रमा इति। अपि चेति । विदिक्ष्वति न केवलं पश्चिमोत्तररूपे स्वकोणे यावदन्यास्वपि विदिक्षु, चकाराद्दिक्ष्वपि । ते हि घर्मदोषवारकत्वादत्यन्तोपकारिणः । अनेन गवाक्षकरणं सूच्यत इत्येके । आदित्ये मित्रशब्दः पुंलिङ्ग इति तेन यद्वार्तिक-कारी तदुपलक्षितो नर्तकी हि लज्जापरिहारहेतोः नपुंसको नेपथ्यगृह इति तद-परामृष्टाभिधानं । मित्र इति तेजस्विता आहार्योपयोगी रत्नादेरुक्ता । वेदिका रङ्गवेदिका तत्र तीक्ष्णोऽधिष्ठातेत्यर्थः । भाण्ड इति त्रिपुष्करे सोपकरणे । दिवौकसो मेघा मन्द्रगम्भीरशब्दसिद्धये इति । एवं सर्वत्र सदृशोपलक्षणान्त-

---

1 ठ - अगच्छत् 2 ठ - मण्डपेऽस्याथ. प - मण्डपस्यास्य 3 ठ - नियुक्तो रजनीकरः 4 न - यथादिशं लोकपालाः प - यथा दिग्लोकपालाश्च 5 ठ - वेदिकां पावकः पाति 6 ठ - भाण्डं सर्वे दिवौकसः 7 प - एवास्य

1 पराकारत्वत्

आदित्याश्चैव रुद्राश्च [1]स्थिताः स्तम्भान्तरेष्वथ ।
[2]धारणीषु स्थिता भूताः शालास्वप्सरसस्तथा ॥८६
[3]सर्ववेश्मसु यक्षिण्यो महीपृष्ठे महोदधिः ।
द्वारशालानियुक्तौ तु कृतान्तः काल एव च ॥ ८७
[4]स्थापितौ द्वार[5]पात्रेषु [6]नागमुख्यौ महाबलौ ।
देहल्यां [7]यमदण्डस्तु शूलं [8]तस्योपरि स्थितम् ॥८८
द्वारपालौ स्थितौ चोभौ [9]नियतिर्मृत्युरेव च ॥
[10]पार्श्वे [11]च रङ्गपीठस्य [12]महेन्द्रः स्थितवान्स्वयम् ॥
स्थापिता मत्तवारण्यां विद्युद्दैत्यनिषूदनी ।
स्तम्भेषु मत्तवारण्याः स्थापिताः [13]परिपालने ॥९०

प्रयोजनमुत्प्रेक्ष्यम् । सर्वथा तदलाभे नियमादृष्टमेव । वर्णा इति तदधिष्ठातारो देवताविशेषाः । स्तम्भान्तरेष्विति वर्णस्तम्भचतुष्कादिरित्येषु नान्येषु स्तम्भेष्वित्यर्थः । शालास्विति स्तम्भद्वयमष्टवेश्मनि गवाक्षनेपथ्यगृहे द्वितीयभूमिनिसन्निवेशादिति । नागमुख्याविति अनन्तगुलिकौ । द्वारपात्रं कवाटात्मकं द्वारबहुत्वाच्च बहुवचनम् । देहल्यामिति । द्वाराधस्तनकाष्ठे । तस्येति शूलमित्यनेन प्रक्रान्तद्वारमेव परामृष्टम् । तेनोर्ध्वकाष्ठे उत्सङ्गशब्दवाच्ये त्रिशूलमित्यर्थः । पार्श्वे स्वयमिति राजादेस्तत्स्थानमित्युक्तम् । चकारात्स्वदिशि अंशेनाव-स्थानमनुस्मृतम् । विद्युदिति । स्तम्भेष्वपि चतुर्षु यथाक्रमं तद्भूतादयस्ते च नाट्यतत्त्वविदोऽत एव विघ्नैः सह येन येन मिलिता इति द्रष्टव्यम् । एतेन

---

1 ग - न्यस्ताः न - गताः 2 न - धारणीष्वथ भूतानि 3 न - महोदधिर्मुहीपृष्ठे यक्षिण्यः सर्वपर्वसु । 4 न - स्थापितौ द्वारपत्रे तु नागमुख्या महाबला 5 प - पक्षे तु ठ - पार्श्वे 6 ठ - नागराजौ महाबलौ 7 न - यमदण्डश्च 8 ठ - चोपरिसंस्थितम् 9 ग निकृति 10 रङ्गपीठस्य पार्श्वे तु स्वय शक्रः प्रतिष्ठितः 11 ठ - तु 12 न - स्वयं शक्रः प्रतिष्ठितः °ढ - मध्येन्द्रः 13 ग - परिरक्षणे

भूतयक्षपिशाचाश्च गुह्यकाश्च महाबलाः।
(यक्षभूतपिशाचाश्च सुरेन्द्रेणामितौजसा।
वीरभद्रोऽथ भगवान् गुह्यकाश्च तथैव च॥)
जर्जरे [1]तु विनिक्षिप्तं वज्रं दैत्यनिबर्हणम्॥ ९१
[2]तत्पर्वसु विनिक्षिप्ताः सुरेन्द्रा ह्यमितौजसः।
[3]शिरःपर्वास्थितो ब्रह्मा द्वितीये शंकरस्तथा॥ ९२
तृतीये [4]च स्थितो विष्णुश्चतुर्थे स्कन्द एव च
पञ्चमे च महानागाः शेषवासुकितक्षकाः॥ ९३
एवं विघ्नविनाशाय स्थापिता जर्जरे सुराः।
रङ्गपीठस्य मध्ये तु स्वयं ब्रह्मा प्रतिष्ठितः॥ ९४
[5]इष्ट्यर्थं रङ्गमध्ये तु क्रियते पुष्पमोक्षणम्।
पाताल[6]वासिनो ये च यक्षगुह्यकपन्नगाः॥ ९५
[7]अधस्ताद्रङ्गपीठस्य [8]रक्षणे ते नियोजिताः।
नायकं रक्षतीन्द्रस्तु नायिकां तु सरस्वती॥ ९६

सिद्धिविघातका भेदाख्येनाप्युपायेन दुर्बलीकर्तव्या इति सूचितम्। प्रतिष्ठित इति। सदैव सन्निहितो वास्तुमध्य इत्यर्थः। कवेश्च सन्निधानं सूचितम्। अधस्तादिति। येन सुरुङ्गाखननादि विघ्नकारणं निवार्यत इत्यर्थः।

प्रधानपात्राणि पृथग्रक्षणीयानीत्याह नायकमिति। हास्यशृङ्गाराङ्गत्वाद्विदूषकमित्युक्तम्। अत एव दशरूपकप्रयोगसूचनमेतत्, समवकारे विदूषकाभावात्। हर इति बहुमूर्तिप्रथमत्वात्। देवता एव दैवतम्।

1 ठ - चैव निक्षिप्तं 2 न - सन्धौ सन्धौ 3 न - शिरो रक्षन् स्थितो ब्रह्मा हरः पूर्वण्यनन्तरे 4 न - भगवान् 5 ज - प्रीत्यर्थं ख - इत्यर्थं 6 न - वासिनश्चैव 7 न - अधस्ताद्रङ्ग 8 न - रक्षणाय

विदूषकमथोङ्कारः शेषास्तु प्रकृतीर्हरः ।
यान्येतानि नियुक्तानि दैवतानीह रक्षणे ॥ ९७
[1]एतान्येवाधिदैवानि भविष्यन्ती[2]त्युवाच सः ।
एतस्मिन्नन्तरे देवैः सर्वैरुक्तः पितामहः ॥ ९८
साम्ना तावदिमे विघ्नाः स्थाप्यन्तां वचसा त्वया ।
पूर्वं साम [3]प्रयोक्तव्यं द्वितीयं दानमेव च ॥ ९९
तयो[4]रुपरि भेदस्तु ततो दण्डः [5]प्रयुज्यते
देवानां वचनं श्रुत्वा ब्रह्मा विघ्नानुवाच ह ॥ १००
[6]कस्माद्भवन्तो नाट्यस्य [7]विनाशाय [8]समुत्थिताः ।
[9]ब्रह्मणो वचनं श्रुत्वा विरूपाक्षोऽब्रवीदिदम् । [10]१०१
दैत्यैर्विघ्नगणैः सार्धं सामपूर्वमिदं वचः ।
योऽयं भगवता [11]सृष्टो नाट्यवेदः सुरेच्छया[12] ॥ १०२
प्रत्यादेशोऽयमस्माकं [13]सुरार्थं भवता कृतः ।
तन्नैतदेवं कर्तव्यं त्वया लोकपितामह ॥ १०३

अथ नाट्यतत्त्वघातनिरूपणार्थमुपक्रमते एतस्मिन्निति । अशक्तस्य सामाङ्गीकरोति दुर्जन इति । पूर्वं रक्षाकरण इत्युक्तद्वय इति कविरनुविधेयवचनो भवतीति दर्शयति । सामादिप्रयोगे तावच्छब्दसूचितं क्रमं सूचयति पूर्वं सामेत्यादि । तत इति सर्वोपायप्रतिहताविति यावत् । तत्र ज्ञाताभिप्रायः प्रतिसमाधातुं सुशक इत्यभिप्रायेणाह देवानामिति । सुरार्थमित्यस्यैवदार्ढ्यायोक्तं सुरेच्छयेति । प्रत्यादेश इति खलीकार इत्यर्थः । भवतेति यस्यानुचितमेत-

1 ग - एतेषामधिदेवास्तु 2 त्यथाह सः 3 न - प्रयोज्यं स्यात् 4 न - उपरमे भेदः 5 ग - प्रशस्यते 6 घ - कथं 7 घ विनाशार्थमुपस्थिताः 8 ठ - समुद्यताः 9 न - तच्छ्रुत्वा ब्रह्मणो वाक्यं विरूपाक्षोऽब्रवीत्ततः 10 ग - वचः न - ततः 11 ठ - सम्यक् 12 ठ - प्रवर्तितः ज - प्रकीर्तितः 13 ज - देवार्थं

यथा देवास्तथा दैत्यास्त्वत्तः सर्वे विनिर्गताः।
[1]विघ्नानां वचनं श्रुत्वा ब्रह्मा वचनमब्रवीत् ॥ १०४
अलं वो मन्युना दैत्या [2]विषादं त्यजतानघाः।
भवतां देवतानां [3]तु शुभाशुभ[4]विकल्पकः ॥ १०५
कर्मभावान्वयापेक्षी[5] नाट्यवेदो मया कृतः।

दित्यर्थः । अनौचित्यमेव लोकपितामहेत्यामन्त्रणेनाह। तदेव पितामहत्वं दर्शयति यथेति आसतां(?) वा देवा दैत्याश्चेत्याह सर्व इति। वचनमिति सुपरिहरमेतत्। नात्र भूयान्प्रयास इत्येकवचनेन दर्शयाति । अत एव सिद्धवदुपक्रमते अलं व इति, मिथ्याज्ञानगृहीतसर्पत्रासवद्यो भ्रान्तिमात्रकृत इत्यर्थः । [1]दैत्यानामशुभकारिता लोकप्रसिद्धा । कुरु रङ्गविभागश्चैषां चेष्टितमस्तु देवानां तद्विपर्यय इति नाट्यस्य न तात्पर्यम्, येन भवतां मन्युः । किं तर्हीत्याह । शुभकारिणः शुभं फलमशुभकारिणोऽशुभं फलमित्येतावदेवास्माकं प्रति साक्षात्कारकल्पे नाट्ये प्रदर्शनीयम्। न तत्र देवेषु दैत्येषु वा कश्चिद्भरः। अत एव भवतामपि धर्मादौ यः [2]सदुपायः सोऽपि शुभविपाकत्वेनैव दर्शितः। अत्र शुभग्रहणमेकतरपक्षशैथिल्यदर्शनाय दैत्यसंबन्धार्थं प्रथममुपात्तम् । शुभमशुभं च धर्माधर्मरूपं सुखदुःखफलत्वेन विभेदेन कल्पयत्यध्यवसाययति नाट्यवेदः । कीदृक् । कर्मभावान्वयापेक्षीति तद्यथा धर्मो दानं स्नानमित्यादि, अधर्मो हिंसा स्तेयमित्यादि, भाव आशयः । स्त्रीप्रसङ्गोदिता स्वार्थतापरार्थताद्यभिसन्धिरित्यादि, अन्वयोऽभिजनः आर्यावर्तादिर्ब्राह्मण्याश्चेति, तानपेक्षते सहकारितया। एतदुक्तं भवति—अस्मिन्देशेऽस्मिन्काले ईदृशेन कर्मणा यः शुभमशुभं चार्जयति स एवंविधफलभागी भवतीति न तावदिहोपदिश्यते। विकल्पक इति द्वौ णिचौ।

---

1 ङ - विरूपाक्षवचः 2 घ - विषादस्त्यज्यतामयम् 3 प - च 4 ङ - विकल्पनम् 5 ठ - भावान्वयापेक्षो

---

1 दैत्या अशुभकारिणः सन्तु, पराजिता भवन्तः देवता पुनरन्यथेति न नाट्यस्य तात्पर्यम्। (अ॰ भा॰)

2 सदुपायः सोऽपि शुभविकासित्वेन दर्शितः अत एव (भ॰ सा)

नैकान्ततोऽत्र भवतां देवानां [1]चानुभावनम्॥ १०६
त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्।

ननु चैव [1]मप्यस्मत्पृष्ठे [2]किमेतद्योजितमित्याह, नैकान्तत इति । अयं भावः—न युष्मत्पृष्ठे केन चिदेतद्योजितम् । देवासुरस्य वहिर्यथासुस्थमवस्थानं । अत्रेति नाट्यवेदे । न देवासुराणामेकान्तेनानुभावनं, नैव तेऽनुभाव्यन्ते केन चित्प्रकारेण । तथाहि - तेषु न तत्त्वेन धीः, न सादृश्येन यमलकवत्, न भ्रान्तत्वेन रूप्यस्मृतिपूर्वकशुक्तिरूप्यवत्, नारोपेण सम्यज्ज्ञानबाधानन्तरमिथ्याज्ञानरूपं, न तदध्यवसायेन गौर्वाहीकवत्, नोत्प्रेक्ष्यमाणत्वेन चन्द्रमुखवत्, न तत्प्रतिकृतित्वेन चित्रपुस्तवत्, न तदनुकारेण गुरुशिष्यव्याख्याहेवाकवत्, न तात्कालिकनिर्माणेनेन्द्रजालवत्, न युक्तिविरचिततदाभासतया हस्तलाघवादिमायावत्; सर्वेष्वेतेषु पक्षेष्वसाधारणतया द्रष्टुरौदासीन्ये रसास्वादायोगात्, कवेश्च नियतवर्णनीयनिश्चितत्वे काव्यस्यैवासम्पत्तेरनौचित्यावर्जनयोगात्, लौकिकमिथुनदर्शीव सांसारिकहर्ष [3]क्रोधायिततापैर्लज्जाभयदर्शनकुलतया [4]मुख्यदृष्टौ प्रयोक्तृदृष्टौ, तद्धि, सम्पत्त्यभावात् । किं तर्ह्येतदाह त्रैलोक्यस्येति ।

एतदुक्तं भवति—एतादृशं तै रामादयो न कदाचन प्रमाणपथमवातरन्[5], यदागमेन वर्ण्यन्ते, तदा तद्विशेष[6]बुद्धिः। यद्यपि रामायणप्रायादेकस्मान्महावाक्यादुल्लसति, तथापि वर्तमानतयैव विशेषाणां सम्भाव्यमानार्थक्रियासामर्थ्यात्मकसालक्षण्यपर्यवसानात् न च तेषां वर्तमानतेत्युपगता तावद्विशेषबुद्धिः । काव्येष्वपि 'हृदयमेव' (हृदय एव) तावत्साधारणीभावो विभावादीनां जात्र(तः); तत्रापि कथामात्रे साधारणीभावः सम्भवति । यद्यपि "तथाप्येवं ये कुर्वन्ति तेषामेतद्भवतीति" वाक्यवद्रञ्जनातिशयाभावान्न चित्तवृत्तेर्निर्णयगता भवति । काव्ये तु गुणालङ्कारमनोहरशब्दार्थशरीरे लोकोत्तर[7]रसप्राणके हृदयसंवादवशात् निमग्नाकारिका तावद्भवति चित्तवृत्तिः। किन्तु सर्वस्य प्रत्यक्षसाक्षात्कारकल्पा तत्र न धीरुदेति । नाट्ये तु पारमार्थिकं किञ्चिदद्य मे कृत्यं भविष्यतीत्येवंभूताभिसन्धिसंस्काराभावात्सर्वपरिषत्साधारणप्रमोदसारापर्यन्तविरस -

1. घ - चापि ठ - चात्र

1 मप्यस्मिन्विसृष्टे 2 किमित्येतत् (अ॰ सं) 3 क्रोधान्वायिता 4 मुखदृष्टौ 5 पथमवतारयन्ते 6 सिद्धि 7 रससम्प्राणिते॰

नादरणीयलोकोत्तरदर्शनश्रवणयोगी भविष्यामीत्यभिसन्धिसंस्कारादुचितगीतातोद्य[1]चर्वणाविस्मृतसांसारिकभावतया विमलमुकुरकल्पीभूतनिजहृदयः, सूचाद्यभिनयावलोकनोद्भिन्नप्रमोदशोकादितन्मयीभावः, पाठ्याकर्णनपात्रान्तर[2]प्रवेशवशात् समुत्पन्ने देशकालविशेषावेशानालिङ्गिनि सम्यङ्मिथ्यासंशयसम्भावनादिज्ञानविज्ञेयत्वपरामर्शानास्पदे, रामरावणादिविषयाध्यवसाये, तत्संस्कारानुवृत्तिकारणभूततत्सहचरहृद्यवस्तुरूपगीतातोद्यप्रमदानुभवसंस्कार - सूचितसमनुगततदुक्तरूपरामाध्यवसायसंस्कार एव भवन्, पञ्चषैर्दिवसैः सचमत्कारतदीयचरितमध्यप्रविष्टस्वात्वरूपमतिः स्वात्मद्वारेण विश्वं तथा पश्यन्, प्रत्येकं सामाजिको देशकालविशेषणापरामर्शेनैवंकारिणामिदमिति लीढात्मकविधिसमर्पितं संविज्जातीयमेव संविद्विशेषरञ्जकप्राणवल्लभाप्रतिमरसास्वादं सहचररम्यगीतातोद्यादिसंस्काररसा (नुभव) वशेन हृदयाभ्यन्तरनिखातं तत एवोत्पुङ्खशतैरपि म्लानिमात्रमप्यभजमानं भजं स्तत्तच्छुभाशुभप्रेप्साजिहासासततस्यूतवृत्तित्वादेव शुभमाचरत्य(न्न)शुभं समुज्झति। इदानीमुपायसंवेदनालाभात् तदिदमनुकीर्तनमनुव्यवसायविशेषो नाट्यापरपर्यायो, नानुकार इति भ्रमितव्यम्। अनेन भाण्डेन राजपुत्रस्यान्यस्य वा(ग)नुकृतेऽन्यादिबुद्धेरभावात् तद्धि विकारणमिति प्रसिद्धं हासमात्रफलं मध्यस्थानां। यदभिप्रायेण मुनिर्वक्ष्यति—

परचेष्टानुकरणाद्धासस्समुपजायते (अ ७-१६) इति ॥

तत्पक्ष्याणान्तु तदेव द्वेषासूयानिवृत्त्यादिफलं, तद्दृष्ट्वैव हि दैत्यानां हृदयक्षोभः। एवम्भूता वयमुपहासभाजनमिति उपहास्यताभीरवश्च निवर्तन्ते ततो न [3]तूपदेशेन। नन्वेतावता नियतानुकारो माभूत्, अनुकारेण तु किमपराद्धम्। न किञ्चिदसम्भवादेतेऽनुकार इति हि सदृशकरणं तत्। एतेन प्रमदादिविभावानामनुकरणं पराकृतम्। न च चित्तवृत्तीनां शोकक्रोधादिरूपाणां, न हि नटो रामसादृश्यं स्वात्मनः शोकं करोति, सर्वथैव तस्य तत्राभावात्। भावे वाऽननुकारत्वात्। न चान्यद्वस्त्वस्ति यच्छोकेन सदृशं स्यात्। अनुभावांस्तु करोति, किन्तु सजातीयत्वेन न तु तत्सादृश्यात्। साधारणरूपस्य कः केन सादृश्यार्थस्त्रैलोक्यवर्तिनः, सदृशत्वन्तु न विशेषात्मना यौगपद्येनोपपद्यते। कदाचित्क्रमेण नियत एवानुकृतः स्यात्, सामान्यात्मकत्वे कोऽनुकारार्थः। तस्मादनियतानुकारो नाट्यमित्यपि न भ्रमितव्यम्। अस्मदुपाध्यायकृते काव्यकौतुकेऽप्ययमेवाभिप्रायो मन्तव्यो, न त्वनियतानुकारोऽपि, तेना-

1 वर्णना 2 प्रवेशात् 3 ततोऽनुरूपदेशेन

क्वचिद्धर्मः क्वचित्क्रीडा क्वचिदर्थः [1]क्वचिच्छमः॥ १०६
क्वचिद्धास्यं क्वचिद्युद्धं क्वचित्कामः क्वचिद्वधः ।

नुव्यवसायविशेषविषयीकार्यं नाट्यम् । तथाह्याहार्यविशेषादिना निवृत्ते तद्देशकालचैत्रमैत्रादिनटविशेषप्रत्यक्षाभिमाने विशेषलेशोपक्रमेण च विना प्रत्यक्षाप्रवृत्तेरायाते रामादिशब्दस्यात्रोपयोगात् प्रसिद्धतदर्थतयादरणीयचरितवाचकस्यासम्भावनामात्रनिराकरणेनानुव्यवसायस्य प्रत्यक्षकल्पनाहृद्यगीताद्यनुस्यूततया चमत्कारस्थानत्वाद्धृदयानुप्रवेशयोग्यत्वमभिनयचतुष्टयेन स्वरूपप्रच्छादनं, प्रस्तावनादिना नटज्ञानजसंस्कारसाचिव्यं, तेन रञ्जकसामग्रीमध्यानुप्रविष्टेन प्रच्छादितस्वस्वभावेन प्राक्प्रवृत्तलौकिकप्रत्यक्षानुमानादिजनितसंस्कार - सहायेन नटज्ञानसंस्कारसचिवेन हृदयसंवादतन्मयीभावनसहकारिणा प्रयोक्त्रा दृश्यमानेन योऽनुव्यवसायो जन्यते सुखदुःखाद्याकारतत्तच्चित्तवृत्ति(रूप) रूषितनिजसंविदानन्दप्रकाशमयोऽत एव विचित्रो, रसनास्वादनचमत्कारचर्वणनिर्वेशभोगाद्यपरपर्यायः, तत्र यदवभासते वस्तु, तन्नाट्यम् । तच्च ज्ञानाकारमात्रमारोपितं स्वरूपं सामान्यात्मकं तत्कालनिर्मितरूपं चान्यद्वा किञ्चिदस्तु । नात्राप्रस्तुतलेखनेनात्मनो दर्शनान्तरकथापरिचयप्रकटनफलेन प्रकृतवस्तुनिरूपणविघ्नमाचरन्तः सहृदयान्खेदयामः । तस्मादनुव्यवसायात्मकं कीर्तनं रूषितविकल्पसंवेदनं नाट्यम् ,+ तद्वेदनवेद्यत्वात् न त्वनुकरणरूपम् । यदि त्वेवं मुख्यलौकिककरणानुसारितयानुकरणमित्युच्यते, तन्न कश्चिद्दोषः, स्थिते वस्तुतो भेदे शब्दप्रवृत्तेरविवादास्पदत्वात् । एतच्च यथावसरं वितनिष्यत इत्यास्तां तावत् । यतश्चेदं नानुकरणं, ततो यत्कैश्चिच्चोदितं तदनवकाशम् — न च गीतवाद्ययुक्तः सर्वावस्थासु कश्चिदनुकार्य इति न [1]ह्यनुकार्यत्वेन गीतादय इत्युक्तम् । परिहारोऽपि य उक्तः आसनगमनस्नानस्वाप प्रतिबोधभोजनाद्यासु गीतवाद्यं लोके चेष्टास्वतिप्रथितमित्यादिं, तदप्यनुपपन्नम् , न हि गमनादौ तद्ध्रुवातालादिरूपेण गीतादि लोकेऽस्ति, मङ्गलमात्रत्वादृते , गायनवादनादिष्वपि चानुकारबुद्ध्यापत्तेरित्यलम् ।

ननु त्रैलोक्यस्य ये भावास्तेषां यद्यनुकीर्तनं नाट्यं, तदेकत्रैव रूपके एकत्रैव [2]चाङ्कादौ सर्वमेव दृश्येतेत्याशङ्कानिराकरणपूर्वकं पूर्वप्रयोजनेन सम्प्रयोज-

---

1 ठ. - क्वचिच्छ्रमः, न - क्वचिद्दमः ।

1 नत्वनु 2 चाङ्कादौ

[1]धर्मो धर्मप्रवृत्तानां कामः कामोपसेविनाम्॥ १०९
निग्रहो दुर्विनीतानां [2]विनीतानां दमक्रिया।
क्लीबानां धाष्टर्य[3]जननमुत्साहः शूरमानिनाम् ॥

नत्वमुपसंहरति क्वचिद्धर्म इत्यादिना लोकोपदेशजननं नाट्यमेतद्भविष्यतीत्यन्तेन श्लोकाष्टकेन। एतच्च कैश्चिद्भिन्नवाक्यतया प्रतिश्लोकं व्याख्यातम्। तच्च पौनरुक्त्याध्याहारपरस्परासङ्गत्यादिदोषोपहतं स्यादित्युपेक्ष्यमेव। तस्मादित्थमत्र योजना—नानाप्रकारैर्भावैः स्थायिव्यभिचारिविभावादिभिरुपसम्पन्नं सर्वतो व्याप्तं तेषां च भावादीनां देशकालप्रवृत्त्यवस्थान्तरभिन्नस्वभावत्वात्तदपि नानावस्थात्मकम्। अत एवाहोत्तमाधमेति, एवम्भूतमेतद्भविष्यति काले विश्रान्तिजननं हितोपदेशजननं च भविष्यतीति सम्बन्धः।

के के नानाप्रकारा भावा इत्याह क्वचिद्धर्म इत्यादि। यथायोगं धर्मादयः शब्दास्तदुचितस्थायिव्यभिचार्यादिसूचकाः। तेन धर्मोऽर्थ इत्युत्साहादिः, क्रीडेति विस्मयादिः शम इति निर्वेदादिः, हास्यमिति हासादिः, युद्धमिति रौद्रादिः; काम इति रत्यादिः, वध इति क्रोधभयजुगुप्साशोकादिः। अमीभिश्च समुचितव्यभिचार्यनुभावविभावाः स्वीकृताः। क्वचिदिति शब्देन दशरूपकान्यतममुच्यते। तथा नाटकाद्यनेकरूपकगतो विशेषस्तथैकं नाटकादि विशेषे को विभागः। एतदुक्तं भवति—किञ्चिद्धर्मप्रधानं रूपकं यथा नाटकं, प्रकरणं वा, क्रीडाप्रधानं तथाप्रसिद्धानां यथा भाणः, अर्थप्रधानत्वं प्रकरणादावेव। एवं दशरूपकलक्षणानुसारेण सर्वमनुसरणीयम्। तथा क्वचिन्नाटके धर्मः प्रधानम्, यथा छलितरामे रामस्याश्वमेधयागः। क्वचित्क्रीडा, यथा स्वप्नवासवदत्तायाम्। एवमन्यत्राप्यनुसरणीयम्। [1]तथैकत्रापि नाटके [2]क्वचिद्ंशे धर्मो यथाभिज्ञानशाकुन्तले "अपि नाम कुलपतेरियमसवर्णक्षेत्रसम्भवा स्यात्" (अङ्क-२)। एवं प्रतिनाटकमेकदेशेषु सुलक्षा एव क्रीडादय इति ग्रन्थविस्तरभीरुभिरस्माभिर्न परिवर्तिताः।

---

1 ठ - धर्मोऽधर्म न - धर्माधर्म 2 ग - मत्तानां दमनक्रिया
3 ठ - करण

---

1 तथा तत्रापि 2 क्वचिदङ्गे

अबुधानां विबोधश्च [1] वैदुष्यं विदुषामपि ।
ईश्वराणां विलासश्च [2] स्थैर्यं दुःखार्दितस्य च ॥ ११ १
अर्थोपजीविनामर्थो [3] धृतिरुद्विग्नचेतसाम् ।
[4] नानाभावोपसम्पन्नं नानावस्थान्तरात्मकम् ॥ ११ ८
लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम् ।

नन्ववस्थादेशकालप्रकृतिविशेषसमुचितभावानुकीर्तनमात्रमेव कर्तव्यम्, किंरामाय रावणेत्यादिसमाश्रयेणेत्याशङ्क्याह धर्म इति । चो हेतौ, यस्माल्लोकवृत्तानुसारेण करणं प्रयोगरूपं नाट्यं मयाकृतमेतदित्येतस्मात्कारणाद्धर्मप्रवृत्तानां रामयुधिष्ठिरादीनां सम्बन्धित्वेन धर्म उक्तः । निग्रह इति वधः। विनीतानां जितेन्द्रियाणां सम्बन्धित्वेन दमस्य शमस्य क्रियायोजना, विनयो हीन्द्रियजयः । एवं क्लीबानामुपहास्यानां धाष्टर्यजननमिति विभावेन हासोऽत्रोक्तः । धाष्टर्याज्जननं जन्म यस्य हास्यवस्तुनः, यद्वक्ष्यति—"विकृतपरवेषालङ्कारधाष्टर्यादिभिः" (अ-६-) इत्यादि । विबोध इति ण्यन्तस्य रूपम् । अबुद्धत्वेन प्रसिद्धानां सम्बन्धित्वेन बोधनमुपायोपदेशेन व्युत्पाद्यत्वं, विदुषां भीष्मादीनामुपायव्युत्पाद्यत्वेन वैदुष्यम् । अनेन स्मृतिमतिप्रभृतीनां निरूपणम् । विलास इति क्रीडा । स्थैर्यमिति व्यवसायात्मकमुत्साहरूपमेव । चशब्द एवकारार्थे, दुःखार्दितत्वेन यः प्रसिद्धस्तस्यैव सम्बन्धित्वेनेत्यर्थः । धृतिर्धैर्यम् । एतदुक्तं भवति—लोकवृत्तानुसारेण यत इयं नाट्यक्रीडा, लोके च धर्मादयो नाश्रयाः न संवेदनयोग्याः। तेन धर्मादिविषये यो यथा प्रसिद्धो रामादिः, स शब्दमात्रोपयोगित्वेन मुख्यया प्रणालिकया गृहीतः । एवंभूतं यन्नाट्यं तत्प्रेक्षकाणां दुःखेन व्याध्या-

---

1 घ - वैदग्ध्यं 2 ङ - धैर्यं 3 ठ - वृत्ति
4 न-दुःखितानां प्रमत्तांशः शोकार्तानां तपस्विनाम् ।
हितोपदेशजननं नानावस्थान्तरात्मकम् ।
नानाशीलाः प्रकृतयः शीलान्नाट्यं विनिर्मितम् ।
तस्माल्लोकप्रमाणं हि कर्तव्यं नाट्यवक्तृभिः ।
देवतानामृषीणां च राज्ञामथ कुटुम्बिनाम् ।
कृतानुकरणं लोके नाट्यमित्यभिधीयते ।
महेच्छा ये विदग्धाश्च यौवनैश्वर्यशालिनः ।
तेषामयं नाट्यविधिः प्रयोज्यस्त्वर्थसिद्धये ।
प्रायेण सर्वलोकस्य नृत्तमिष्टं स्वभावतः ।
मङ्गल्यमितिकृत्वा च नाट्यमेतत्प्रयोज्यते ।
प्रसवालाभविवाहहर्षेष्वभ्युदयेषु च ।
प्रस्थानसमये राज्ञां नाट्यमेतत्प्रयोज्यते ।

[1]उत्तमाधममध्यानां नराणां कर्मसंश्रयम् ॥ ११३
हितोपदेशजननं धृतिक्रीडासुखादिकृत् ।
[[2]एतद्रसेषु भावेषु सर्वकर्मक्रियास्वथ[3] ॥ ११४
सर्वोपदेशजननं नाट्यं लोके भविष्यति ।]
दुःखार्तानां [4]श्रमार्तानां शोकार्तानां तपस्विनाम् ॥
[5]विश्रान्तिजननं [6]काले नाट्यमेतद्भविष्यति[7] ।
धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम् ॥ ११६
लोकोपदेशजननं नाट्यमेतद्भविष्यति ।

दिक्कृतेन श्रमेणाध्वक्लेशादिजेन शोकेन बन्धुमरणादिकृतेनार्तानां पीडितानां तथा तपस्विनामनवरतकृच्छ्रचान्द्रायणाद्याचरणकलितदौर्बल्यातिशयपरिखिन्नहृदयानां विश्रान्तिजननं दुःखप्रसरणविघातकं, प्रतिहतदुःखानां चाह्लादधृत्यादिकारणं यथायोगं, तद्यथा शोकार्तस्य धृतिर्व्याध्यार्तस्य श्रमार्तस्य सुखं। आदिग्रहणेन तपस्विनो मतिविबोधादय इति मन्तव्यम् । नचैतावदेव, यावत्कालान्तरेऽपि परिपाके सुखमुपदेशं जनयतीत्येवं दुःखितानां तत्प्रशमसुखवितरकालान्तरसुखलाभाः प्रयोजनम्। ये पुनरदुःखिताः सुखभूयिष्ठवृत्तय एव राजपुत्राद्यास्तेषां लोकवृत्ते धर्माद्युपायवर्गे उपदेशकार्येतन्नाट्यम् । लोकशब्देन लोकवृत्तम् । ननु किं गुरुवदुपदेशं करोति, नेत्याह, किन्तु बुद्धिं विवर्धयति, स्वप्रतिभामेवं तादृशीं वितरतीत्यर्थः । न च सा दुष्टा प्रतिभेत्याह, हितं, हितप्रतिभाजनकत्वात् । अत्र हेतुमाह, यतो धर्मादनपेतं । यशश्शब्देन लोकप्रसिद्धिहेतुभूतमद्भुतकारि वस्तूच्यते, यथा रामस्य सप्तसालव्यधनादि। तदुपदेशे साधु। आयुर्वृद्धिहेतव आचारा आयुः तेषु साधु। एवं दुःखितानामदुःखितानां चेदमुपादेयमित्युक्तम् । दुःखं च शारीरं मानसं वा । शारीरमपि दैवकृतं स्वयंकृतमपि दृष्टम्। फलोद्देशेनान्येन चेत्येतावानेव दुःखितवर्ग इति दुःखार्तानामित्यादिभेदोपादानस्य फलम् । केचित्तु धर्मो धर्मप्रवृत्तानामित्यादि सामाजिकविषयत्वेन व्याचक्षते हृदयसंवादयोग्यतातात्पर्येण । अन्ये त्वकारप्रश्लेषादिव्याख्याप्रकारेणाधर्मप्रवृत्तानामित्यादिविपरीतत्वेन व्याचक्षते। उप-

---

1 न - अधमोत्तम 2 न - सर्वार्थं सर्वदा चैव 3 ठ - क्रियासु च 4 च - समर्थानां 5 ठ - विश्रामजननं 6 ठ - लोके 7 च - मया कृतम्

[1]न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला॥ ११७
[2]नासौ योगो न तत्कर्म [3]नाट्येऽस्मिन्यन्न दृश्यते ।
[सर्वशास्त्राणि शिल्पानि कर्माणि विविधानि च॥ ११८
अस्मिन्नाट्ये समेतानि तस्मादेतन्मया कृतम् ।]

देश्यत्वाभिप्रायेणोभयमपि चैतद्धर्म्यं यशस्यमित्यादेः पुनरुक्तम् । न चानेन प्रधानमात्र एवोपदेशः कृतः, पुरुषार्थोपायमात्रे वा, यावत्तदुपायोपेयादिष्वपीति ॥

अस्मिन्निति । सप्तद्वीपगतभावानुकीर्तनरूपे नाट्ये दृश्यमाने यन्न दृश्यते न हृदयगोचरमेति तादृग्ज्ञानादिकं नास्तीति शेषः । ज्ञानमित्युपादेयमात्मज्ञानादि । यथा वेणीसंहारे—"आत्मारामा विहितरतयो निर्विकल्पे समाधौ" (१-२३)इत्यादि । शिल्पमिति मालाचित्रपुस्तादियोजनम् । यथा "वेष्टित ग्रथितगुम्फसंहतैराततैश्च कुसुमैस्सपल्लवैः"इत्यादौ । विद्या दण्डनीत्यादि । यथा "शमव्यायामाभ्यां प्रतिविहिततन्त्रस्य नृपते"रित्यादौ । कला गीतवाद्यादिकाः। यथा, †"व्यक्तिर्व्यञ्जनधातुने"त्यादौ । योगो योजनं तेषामेव ज्ञानादीनां कलान्तानां स्वभेदैरन्योन्यस्वभेदैः । यथा—

* "मेघाशङ्किशिखण्डिताण्डवविधावाचार्यकं कल्पय-
न्निर्ह्लादो मुरजस्य मूर्च्छति तरां वेणुस्वनापूरितः ।
वीणायाःकलयँल्लयेन गमकानुग्राहिणीं मूर्च्छनां
कर्षत्येष च [1]कालकुट्टितलयां रम्यश्रुतिं षाडवे ॥

इत्यादौ । अत्र ह्यातोद्यनिचयगीतयोजना कृता । अन्योन्यं यथा—

‡ "आविलपयोधराग्रं लवलीदलपाण्डुकोमलच्छायम्" ॥ इत्यादौ ।

अत्र हि श्रृङ्गारस्य वैद्यकविद्यया योजना । कर्मेति युद्धनियुद्धादिर्व्यापारः । यथा-

"आलीढस्थितटङ्कितस्य निमितां दृष्टित्रयीं तन्वतः
पुङ्खाग्रक्रमसर्पणेन विशिखप्रान्तादथोच्चैस्तमाम् ।
चक्रीभूतशरासनस्य नमनाल्लक्ष्यादमी विच्युता-
श्चित्रं चित्र [2]मिराधवस्य युगपत्सर्वे सुरेन्द्रद्विषः ॥ इति

1 च - नतच्छ्रुतं 2 न - नयोगोऽसौ 3 क - यन्नास्त्येऽस्मिन्न दृश्यते

† नागानन्दे - (१-१४) * हेज्जलस्य राधाविप्रलम्भे 1 कालकूटितकला
‡ विक्रमो (५-८) 2 मुमाधवस्य

[1]तन्नात्र मन्युः कर्तव्यो [2]भवद्भिरमरान्प्रति ॥ ११९
सप्तद्वीपानुकरणं [3]नाट्यमेतद्भविष्यति ।
[4]येनानुकरणं नाट्यमेतत्तद्यन्मया कृतम् ॥ १२०
[5]देवानामसुराणां च [6]राज्ञामथ कुटुम्बिनाम् ।
ब्रह्मर्षीणां च विज्ञेयं नाट्यं वृत्तान्तदर्शकम् ॥ १२१
योऽयं स्वभावो लोकस्य सुखदुःखसमन्वितः ।
सोऽङ्गाद्यभिनयोपेतो नाट्यमित्यभिधीयते ॥ १२२

एवं सप्रयोजनत्वमभिधाय प्रकृतमेव पुराकल्पमनुबध्नाति तन्नात्रेति । तदिति । तस्मादत्र नाट्येऽमरान्प्रति न मन्युः कार्यः, तेऽपि तत्र न केचित् । एतदेवाह सप्तद्वीपानुकरणमयी हि क्रिया रङ्गे [1]दर्श्यते, न च सागरद्वीपादीनां कश्चित्तत्र सम्भाव इति भावः ।

ननु किमर्थमेषां नामानि गृहीतानीत्याशङ्क्याह देवानामित्यादि । एतेषामेवाधिकारिपुरुषत्वं, निराधारस्य वृत्तस्य दर्शयितुमशक्यत्वात् । एतच्चोक्तं पूर्वम् । अत एव यत्र निर्व्याजसहजौदार्यधर्मादिविषये बलिप्रह्लादप्रभृतेः प्रसिद्धिस्तत्र सोऽप्युदीरित आश्रयत्वेन । तदाहासुराणामिति । न च भवद्वैरिण एवात्र वर्णिताः, अपि तु ब्रह्मर्षयोऽपि । अनेन "प्रत्यादेशोऽयमस्माकं सुरार्थ"मित्याशङ्काद्वयमपि परिहृतम् ।

एतच्चातात्पर्येणोपसंहरति योऽयमिति । अयमिति प्रत्यक्षकल्पानुव्यवसायविषयो लोकप्रसिद्धसत्यासत्यादिविलक्षणत्वात्, यच्छब्दवाच्यो लोकस्य सर्वस्य साधारणतया स्वत्वेन भाव्यमानश्चर्व्यमाणोऽर्थो नाट्यम् । स च [2]सुखरूपेण विचित्रेण समनुगतो न तु तदेकात्मा । तथा हि—रतिहासोत्साहविस्मयानां

---

1 ङ यस्मात्र 2 छ - भवद्भिर्देवताः प्रति 3 छ - नाट्ये ह्यस्मित्प्रतिष्ठितम् । 4 छ - यन्नात्र 5 छ - देवतानामृषीणां च । 6 छ - राज्ये लोकस्य चैव हि । कृतानुकरणंलोके नाट्यमित्यभिधीयते ।

---

1 दृश्यते 2 सुखदुःख-

सुखस्वभावत्वं तत्र तु चिरकालव्यापिसुखानुसन्धिरूपत्वेन विषयौन्मुख्यप्राणतया तद्विषयाशंसाबाहुल्येनापायभीरुत्वाद् दुःखांशानुवेधो रतेः, हासस्य सानुसन्धानस्य विद्युत्सदृशतात्कालिको (ऽल्पदुःखरूप) सुखानुगतात्, उत्साहस्य तात्कालिकदुःखायासरूपनिमज्जनानुसन्धिना युदि भाविबहुजनोपकारिचिरतरकालभाविसुखसमीचिकीर्षात्मना सुखरूपता, विस्मयस्य निरनुसन्धानतटित्तुल्यसुखरूपता; क्रोधभयशोकजुगुप्सानां तु दुःखस्वरूपता तत्र चिरकालदुःखानुसन्धिप्राणो [1]विषयगतामन्तिकानां। भावनाकांक्षाप्राणतया सुखदुःखानुवेधवान् क्रोधः, निरनुसन्धितात्कालिकदुःखप्राणतया तदपगमाकांक्षोत्प्रेक्षितसुखानुसम्भिन्नं भयं, द्वैकालिकः स्वाभीष्टविषयनाशजः प्राक्तनसुखस्मरणानुविद्धः सर्वथैव दुःखरूपः शोक, [2]उत्पाद्यमानदुःखानुसन्धानजीवितविषयात्पलायनपरायणरूपान्निषिध्यमानशङ्कितसुखानुविद्धा जुगुप्सा, समस्तस(त)त्पूर्वदुःखसञ्चयसंस्मरणप्राणितः सम्भावितततदुपरमबहुलसुखमयो निर्वेदः। एवं व्यभिचारिप्रभृतिष्वपि वाच्यम्। संवित्स्वभावाः सुखादय इति च दर्शनेन तत्स्वभावात्, अन्ये त्वत्र तद्वेदनरूपत्वमेव तेषां मन्तव्यम्।

एवं लौकिका ये सुखदुःखात्मानो भावाः तत्सदृशस्तत्संस्कारानुविद्धो नाट्यलक्षणोऽर्थः समुदायरूपस्तस्यैव भागानुसमयः। एवं मयं (र)त्यादिरूपानुसरणभूतो नाट्यलक्षणोऽर्थः कथं प्रतीतिगोचरीभवतीत्याह अङ्गादीति। अङ्गादिषु येऽभिनयाः आङ्गिकादयो, न च ते लिङ्गसङ्केतादिरूपाः, अपि तु प्रत्यक्षसाक्षात्कारकल्पलौकिकसम्यङ्मिथ्याज्ञानादिरूपस्तस्यैव भावाः शृङ्गारादयो, रत्यादि विलक्षणास्वादपर्यायप्रतीत्युपयोगिनोऽतएवाभिमुख्यनयनहेतुत्वादन्यलोकशास्त्राप्रसिद्धेनाभिनयशब्देन व्यपदेश्याः। तथाङ्गानि शाखानृत्तगीतानि आदयः प्रधाना येषां तेऽङ्गादयः। व्यभिचारिणो भावा, आदयो हेतुरूपा विभावा अभिनयानुभावास्त एते रसाभिमुख्यनयनहेतवो, यद्वक्ष्यते—"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" (अ-६-) तैरुपेत उप समीपमितः संविद्दर्पणमभिसङ्क्रान्तः, एवम्भूतोऽर्थो नाट्यं नटनीयं नर्तनीयं नर्तनं, तथा च गमनीयं यत्नेन स्वरूपतो हृदयेनानुप्रवेष्टव्यं, तथा नाटकानां पारम्पर्यात्मकं वृत्तं नाट्यं धर्माम्नायरूपं च, तच्च सुखदुःखाभ्यां फलरूपाभ्यां सम्यगन्वितं, तेषां पश्चाद्भावित्वात्तेन हेयोपादेयव्युत्पत्तिफलम्। एतच्च वितत्याग्रे भावस्वरूपं निरूपयिष्यामः।

---

1 "विषयगतामार्पितानां" इति स्यात् 2 उत्प,

वेदविद्येतिहासानामाख्यानपरिकल्पनम् ।
(विनोदकरणं[1] लोके नाट्यमेतद्भविष्यति ॥ १२३
श्रुतिस्मृतिसदाचारपरिशेषार्थकल्पनम् ।)
विनोदजननं लोके नाट्यमेतद्भविष्यति ॥ १२४
एतस्मिन्नन्तरे देवान् सर्वानाह पितामहः ।
[2]क्रियतामद्य विधिवद्यजनं नाट्यमण्डपे ॥ १२५
बलिप्रदानैर्होमैश्च मन्त्रौषधिसमन्वितैः ।
[3]जप्यैर्भक्ष्यैश्च [4]पानैश्च बलिः समुपकल्प्यताम् ॥
[5]मर्त्यलोकगताः सर्वे शुभां पूजामवाप्स्यथ[6] ।
अपूजयित्वा रङ्गं तु नैव प्रेक्षां प्रवर्तयेत्[7] ॥ १२७

एवं सान्त्वेनापसारितेष्वपि विघ्नेषु दिव्यनिदेशनानाममोघत्वात् पूर्वविनियुक्तदेवतांशानां तत्र तत्र सन्निधानाद्यजनमवश्यकार्यमिति प्रदर्शयितु-मुक्तमेवेतिहासमनुसन्दधन्निरूपयति एतस्मिन्निति । अन्तर इति समये । विधिवदिति व्याचष्टे बलिप्रदानैरित्यादि । बल्यन्ते आप्याय्यन्ते देवता अग्निनेति बलिः, विचित्रवर्णतण्डुलादिरचनाविशेषः । दानं तिलाद-यश्च । अग्नौ हूयन्त इति होमाः, उभयत्र विशेषणम् । मन्त्रौषधीति मन्त्रा वक्ष्य-माणाः ओषधयो वचाबलाजामोदाप्रभृतयः प्रशस्तानि धान्यानि च । खरवि-शदं शष्कुलीमोदकादि भोज्यं भक्ष्यमुच्यते । भक्षणीयन्तु भक्ष्यं+पायसं कृस-रादि । पानानि क्षीरेक्षुद्राक्षारसादीनि, बलिः पूर्वोक्तो रचनाविशेषः, एतै-र्विच्छित्तियोजितैर्विविधतया कल्प्यतां । शोभाप्रधानं हि नाट्ये सर्वम् ।

ननु देवानां देवपूजाकरणे किं फलमित्याह मर्त्यलोकगता इत्यादि, यद्यदाचरति श्रेष्ठ इतिन्यायादिति भावः । प्रवर्तयेदिति देवानुष्ठिताचारानु-वर्तित्वाल्लोक इति शेषः ।

---

1 ड - जननं 2 न - कारयत्वत्र भगवान् प - कुरुध्वमत्र यजनं विधि-वत् 3 प - भोज्यैर्भक्ष्यैश्चपानैश्च 4 ड - भोज्यैश्च प - होमैश्च 5 ठ - मर्त्ये -लोकेऽप्ययं वेदः शुभां पूजामवाप्स्यति । 6 न - अवाप्स्यति 7 ड - प्रोक्षा प्रवर्तते

[1]अपूजयित्वा रङ्गं तु यः प्रेक्षां कल्पयिष्यति ।
तस्य तन्निष्फलं ज्ञानं तिर्यग्योनिं [2]च यास्यति ॥
यज्ञेन [3]संमितं ह्येतद्रङ्गदैवतपूजनम् ।
तस्मात्सर्वप्रयत्नेन कर्तव्यं [4]नाट्ययोक्तृभिः॥ १२९
नर्तकोऽर्थपतिर्वापि यः पूजां न करिष्यति ।
[5]न कारयिष्यत्यन्यैर्वा [6]प्राप्नोत्यपचयं तु सः॥ १३०
यथाविधि [7]यथादृष्टं यस्तु पूजां करिष्यति ।
स लप्स्यते शुभानर्थान् स्वर्गलोकं च [8]यास्यति ॥
[9]एवमुक्त्वा तु भगवान्द्रुहिणः [10]सर्वदैवतैः ।
[11]रङ्गपूजां कुरुष्वेति मामेवं समचोदयत् ॥ १३२

इति भारतीये नाट्यशास्त्रे
[12]नाट्योत्पत्तिर्नाम प्रथमोऽध्यायः ।

ननु यदि लोकः सदाचारं नानुवर्तेत ततः किमित्याह अपूजयित्वेति । निष्फलमिति । तस्येति नाट्याचार्यस्य । पारलौकिकमपि प्रत्यवायमाह तिर्यग्योनिं चेति ॥

ननु यद्यपूजने प्रत्यवायस्तर्हि पूजने किं तन्निवृत्तिमात्रं फलं, नेत्याह यथा विधीति, यथा देवैर्विहिता । कथमेतज्ज्ञायत इत्याह यथादृष्टमिति, शास्त्रदृष्टोऽसौ विधिरित्यर्थः। अर्थाच्छुभानित्यैहलौकिकधनमानप्रसिद्धिलाभ उक्तः ।

एवं मर्त्यान्प्रत्यभिधाय प्रकृतमेव पुराकल्पमनुसन्धत्ते एवमुक्त्वेति । नाट्याचार्यस्यैव देवयजनेऽधिकारः, तस्यैव फललाभः, कवेः प्रेक्षा, प्रवर्तयितुश्च तत्प्रयोक्तृत्वमित्यनेनोक्तम् । रज्यतेऽनेनेति रङ्गो नाट्यम् । तदाधा-

---

1 न - अप्रपज्याथ 2 ठ - गमिष्यति, ठ - भविष्यति 3 च - संमतं 4 ठ - रङ्गपूजनम् 5 ड - कारयिष्यति वा नैव 6 ठ - प्राप्स्यत्यापदमेव सः । ड - प्रस्यत्यपचयं 7 ड - यथाशास्त्रं 8 ठ - गमिष्यति 9 ठ - एवं भवित्विति प्राह 10 ठ - सह 11 न - नाट्य 12 न - शास्त्रोत्पत्ति,

रत्वान्मण्डपः । तदधिष्ठातृत्वाच्च देवता अपीति मण्डपाध्यायस्य द्वितीयस्यो पोद्धातं करोतीति शिवम् ॥

त्रिणेत्रपादाब्जसदास्तवोल्लस-
त्प्रसादभाक्स्फुटमिह नाट्यशासने ।
प्रवर्तितेयं हृदये महाधियां
प्रकाशतामभिनवगुप्तभारती ॥

इति श्रीमहामाहेश्वराभिनवगुप्ताचार्य-
विरचितायामभिनवभारत्यां
भारतीयनाट्यशास्त्रविवृतौ
नाट्योत्पत्तिः
प्रथमोऽध्यायः

श्रीः

नाट्यशास्त्रम्

अथ द्वितीयोऽध्यायः

[1]भरतस्य वचः श्रुत्वा [2]प्रत्यूचुर्मुनयस्ततः[3] ।
भगवञ्छ्रोतुमिच्छामो यजनं [4]रङ्गसंश्रयम् ॥ १
अथ वा याः क्रियास्तत्र लक्षणं यच्च पूजनम् ।
[5]भविष्यद्भिर्नरैः कार्यं कथं [6]तन्नाट्यवेश्मनि ॥ २

संसारनाट्यजननधातृबीजलताजुषाम् ।
जलमूर्तिं शिवां पत्युः सरसां पर्युपास्महे ॥

वृत्तेऽध्याये यथातत्त्वमिति (१-५) वचनवशात् भरतमुनिर्यजनादेः पाक्यादिवदन्तरङ्गतां पश्यन्परमार्थनिर्णयेन कुर्यात्कातुकथा(?)मण्डपलक्षणं स्यादत एव [1]मुनिः "गानं रङ्गश्च सङ्ग्रह" (६-१०) इति रङ्गं सर्वपश्चाद्वक्ष्यति, तस्मात्कदाचिदेतदित्याशङ्कमाना मुनयः पप्रच्छुरिति परमात्मानं परिकल्प्य मुनिराह भरतस्य वच इति । ब्रह्मेव कविः, शक्र इव प्रयोजयिता, भरत इव नाट्यानामाचार्यः, कोहलादय इव नटाः, अप्सरस इव सुकुमारोपकरणं, स्वातिरिवावनद्धवित् , नारदवद्गीतज्ञः, सुरक्षितो मण्डप, इन्द्रोत्सवसदृशः प्रयोगकालः, प्रशान्त[2]रागद्वेषाः सामाजिकाः, देवतापूजनपूर्वकः प्रयोग इत्येव सङ्ग्रहेण पूर्वाध्यायनिरूपितमर्थमवधार्येत्यर्थः । रङ्गपूजां कुरुष्वेति वृत्तेऽध्याये निरूपितमिति सङ्गतिः । देवविषये मण्डपस्य क्रियां विना न निष्पत्तिरिति प्रथमं क्रियाप्रश्नस्तेषां विस्मृतोऽपि झटिति स्मृतिं गत इत्यभिप्रायेण दर्शयति अथ वेति । पूर्वप्रश्नार्थोप[3]मर्दनाय अत एव पूजनमिति पुनर्वचनम् । क्रियेति-

---

1 ण - श्रुत्वातुवचनं तस्य प्रत्यूचुर्मुनयस्तथा
श्रोतुमिच्छाम भगवन्यजनं नाट्यमण्टपे

2 न - प्राब्रुवन् 3 ठ - स्तदा 4 प - नाट्यमण्टपे 5 फ - भविष्यद्भिः कथं कार्यं पुरुषैर्नाट्ययोक्तृभिः 6 च - वै नाट्यवेश्मनि ।

---

1 मुनिर्गीतं 2 रागद्वेषादिकाः 3 दर्शनाय.

[1]इहादिर्नाट्ययोगस्य[2] नाट्यमण्डप एव हि[3] ।
तस्मात्तस्यैव तावत्त्वं लक्षणं वक्तुमर्हसि ॥ ३
तेषां तु वचनं श्रुत्वा मुनीनां भरतोऽब्रवीत् ।
लक्षणं पूजनं चैव श्रूयतां नाट्यवेश्मनः[4] ॥ ४
[5]दिव्यानां मानसी सृष्टिर्गृहेषूपवनेषु च ।
[[6]यथा भावाभिनिर्वर्त्याः सर्वे भावास्तु मानुषाः]
नराणां यत्नतः कार्या लक्षणाभिहिताः क्रिया: ॥ ५
[7]श्रूयतां तद्यथा यत्र कर्तव्यो नाट्यमण्डपः ।
तस्य [8]वास्तु च पूजा च [9]यथा योज्या प्रयत्नतः ॥ ६

कर्तव्यतालक्षणं सन्निवेशपरिमाणादि । अतीतेषूपदेशो व्यर्थ इति भविष्यद्भि-रित्युक्तम् । देवानां मनसासम्पत्तेर्नरैरिति ।

ननु लक्षणं किं कार्यम् । लक्ष्यत इति लक्षणम्, सन्निवेश इत्यदोषः । अथ वा भाविभिर्यत्कार्यं नाट्यवेश्म तत्र यत्क्रिया लक्षणं पूजनं तत्कथमिति सम्बन्धः । पूर्वकृते प्रश्नपञ्चके निर्णयं कृत्वेदं प्रश्नान्तरं निर्णयेदित्याशङ्कमाना मुनयः पुनराहुरिहादिरिति । नाट्यस्य योग [1]उत्पत्तिः । तावदित्यनेन पूर्व-प्रश्नितस्यात्याग उक्तः । एवकारो लक्षणशब्दानन्तरमितिकर्तव्यतायाः तद-ङ्गत्वाद्यजनस्य च तन्निष्पत्त्यनन्तरत्वात् । तेषामिति । अन्यथा तु न ब्रूयादेवोक्ता-द्धेतोः । अनेन श्लोकेन लक्षणपूजनज्ञानं देवानामप्युपयोगि, सङ्कल्पितस्यापि निर्माणस्य ज्ञानापेक्षित्वादित्युक्तम् । अत एवात्र क्रियेति नोक्तम् ।

ननु किं क्रियैवोच्यत इत्याह दिव्यानामिति । श्रूयतामित्यनुवर्तते, नराणां कार्या क्रियेतिकर्तव्यता च श्रूयताम् । चकाराल्लक्षणपूजने । शास्त्रे-णोक्ता नराणामेव । कस्मादित्याह दिव्यानामिति । सृज्यमानत्वेन कर्मणोऽपि विषयत्वावि(हीनता) । यत्र जन्मक्रमनियतप्ररोहकुसुमफलानि, बहुविचित्र-

1 न - इहादौ 2 न - नाट्यवेदस्य 3 ठ - कीर्तितो नाट्यमण्डपः । 4 च - वेश्मनि 5 च देवानां 6 च - यत्र भावा विनिष्पन्ना 7 ठ - तत्र 8 ठ - दैवतपूजा च 9 ठ - यथायोग्या च वास्तुषु ।

1 उपपत्तिः

इह [1]प्रेक्षागृहं दृष्ट्वा [2]धीमता विश्वकर्मणा ।
त्रिविधः सन्निवेशश्च शास्त्रतः [3]परिकल्पितः ॥ ७
विकृष्टश्चतुरस्रश्च त्र्यस्रश्चैव तु मण्डपः ।
तेषां त्रीणि प्रमाणानि ज्येष्ठं [4]मध्यं तथावरम् ॥ ८
प्रमाणमेषां [5]निर्दिष्टं हस्तदण्डसमाश्रयम् ।
[6]शतं चाष्टौ चतुःषष्टिर्हस्ता द्वात्रिंशदेव वा[7] । ९

तरुलतास्थलीसरोवराक्रीडमयानि, उपवनान्यपि मानसानि, [1]तत्र गृहे का सम्भावनेति श्रूयतामिति । तदिति यतो नराणां यत्नतः कार्यतामकारः । यत्रेति देशकालौ । वास्त्विवति गृहभूमिगतं परिमाणमिह मन्तव्यम् । लक्षणो-क्तेत्युक्तम् ।

तत्र किं तल्लक्षणमित्याह इहप्रेक्षागृहमिति, इह नाट्यमण्डपे सन्निवेशः, चशब्दात्प्रमाणमेतत्, विश्वकर्मणा परिकल्पितः । किं स्वबुद्ध्या न, अपि तु शास्त्रतः प्रेक्षागृहं विचार्य । शक्तश्चासौ विचार इत्याह धीमतेति । कथं ज्ञायत इत्याह शास्त्रतः, तदप्यपरशास्त्रमूलमिति प्रवाहानादित्वमुक्तम् । कोऽसौ त्रिविध इत्याह विकृष्टश्चेति । विभागेन कृष्टो दीर्घो न तु चतसृषु दिक्षु साम्येन । तिस्रोऽश्रयस्त्र्यश्री, तदस्मिन्निति मत्वर्थीयोऽच् । एतान्येव त्रीणि ज्येष्ठादीनीति केचित् । अन्ये तु प्रत्येकं त्रित्वमिति नवैतेऽत्र भेदा इत्याहुः एतदेव युक्तम् । तथा चाह तेषामिति । प्रमाणं हस्तदण्डाश्रयं ज्येष्ठादित्वम्, न तु सन्निवेशाश्रयमिति यावत् ।

शतं चाष्टौ चतुःषष्टिर्द्वात्रिंशच्चेति निश्चयात् ।

इति केचित्पठन्ति । तेषां चास्ति(पि)हस्तदण्डसमाश्रयत्वं वाचकं भवति । एतच्च सर्वं सम्भवमात्रेणोच्यतेऽनुवादकतया, न त्वियन्तो भेदा उपयोगिनः । एवं चाष्टादशभेदास्तावच्छास्त्रे दृष्टाः, ते चान्यत्वे यद्यप्यनुपयोगिनः, तथापि च सम्प्रदायाविच्छेदार्थं निर्दिष्टाः केषाञ्चित्कदाचिदुपयोगो भवि-

1 ठ - प्रेक्षागृहाणां तु न - प्रेक्षागृहं दृष्ट्वा 2 क - श्रीमता 3 ड - परिकीर्तितः 4 ठ - मध्यमथापरम् प - मध्यमथाधमम् 5 न विज्ञेयं 6 न - शतं साष्टं 7 न - द्वात्रिंशच्चेति निश्चयात् (निश्चितः - ड) छ - द्वात्रिंशदिति निश्चयः

अष्टाधिकं शतं ज्येष्ठं चतुःषष्टिस्तु मध्यमम्।
कनीयस्तु तथा वेश्म [1]हस्ता द्वात्रिंशदिष्यते॥ १०
[2]देवानां तु भवेज्ज्येष्ठं नृपाणां मध्यमं भवेत्[3]।
शेषाणां प्रकृतीनां तु कनीयः संविधीयते॥ ११
[प्रेक्षागृहाणां सर्वेषां प्रशस्तं मध्यमं स्मृतम्।
तत्र पाठ्यं च गेयं च सुखश्राव्यतरं भवेत्॥ १२
प्रेक्षागृहाणां सर्वेषां त्रिप्रकारो विधिः स्मृतः।
विकृष्टश्चतुरस्रश्च त्र्यस्रश्चैव [4]प्रयोक्तृभिः॥ १३
कनीयस्तु स्मृतं त्र्यस्रं चतुरस्रं तु मध्यमम्।
ज्येष्ठं विकृष्टं विज्ञेयं [5]नाट्यवेदप्रयोक्तृभिः॥] १४
प्रमाणं यच्च निर्दिष्टं लक्षणं विश्वकर्मणा।
प्रेक्षागृहाणां सर्वेषां तच्चैव हि निबोधत॥ १५
अणू रजश्च वालश्च लिक्षा यूका यवस्तथा।
अङ्गुलं [6]च तथा हस्तो [7]दण्डश्चैव प्रकीर्तितः॥ १६

ष्यतीति, यथोक्त'मप्रयुक्ते दीर्घसत्रव'दिति। इदन्त्विहोपयोगीति दर्शयति। अष्टाधिकं शतमित्यादि। इष्यत इत्यन्यत्वेऽपीत्याशयः। देवानामिति। यत्र देवासुरप्राया एव नायकप्रतिनायकास्तत्र डिमादावारभटीप्रधाने विततरङ्ग-पीठोपयोगात्, भाण्डवाद्यप्रधानत्वाच्च, परिक्रमणादेरुच्चतरदीर्घतरदीर्घताल-परिग्रहादियोगाच्च, भक्तभावस्यासम्भवादष्टोत्तरशतहस्तो मण्डप इत्यर्थः। यस्तु व्याचष्टे प्रेक्षका अत्र देवादयो विवक्षिता न तु प्रयोज्याः, तेषां नियत-संख्याकत्वादिति तस्यास्मदभिप्रायो न स्मृतिपथमागतः, सन्नपि दशरूपकादौ स चानन्तरमेव दर्शयिष्यते। प्रमाणं लक्षणं यन्निर्दिष्टमिति जातावेकवचनम्।

---

1 छ - द्वात्रिंशत्करामिष्यते 2 न - देवतानां भवे, ठ - देवानां भवनं
3 ड - बथा छ - स्मृतम् 4 छ - हिं कीर्तितः। 5 न - नाट्यवेश्म 6 ठ - चैव हस्तश्च 7 ठ - दण्डश्च परिकीर्तितः॥ छ - तथा दण्डक एव च।

अणवोऽष्टौ रजः प्रोक्तं तान्यष्टौ वाल उच्यते ।
वालास्त्वष्टौ भवेल्लिक्षा यूका लिक्षाष्टकं भवेत् ॥ १७
यूकास्त्वष्टौ [1]यवो ज्ञेयो [2]यवास्त्वष्टौ तथाङ्गुलम् ।
[3]अङ्गुलानि तथा हस्तश्चतुर्विंशतिरुच्यते ॥ १८
चतुर्हस्तो भवेद्दण्डो निर्दिष्टस्तु प्रमाणतः ।
अनेनैव [4]प्रमाणेन वक्ष्याम्येषां विनिर्णयम् ॥ १९

कानि प्रमाणानीत्याह। अणू रजश्चेत्यादिना । तेषां लक्षणान्याह, अणवोऽष्टावित्यादि । यतः प्रभृति दृश्यता प्रवर्तते सोऽणुः । [1]अणुः प्रसिद्धोऽणुपरिमाणः । द्व्यणुकद्वयपरमाणुद्वयारब्धा, अणव एव वा महत्त्वयुक्ताः । परमाणुद्वयारब्धेतु द्व्यणुकेऽणुपरिमाणमस्तु, कोऽत्र विरोध इत्यलमवान्तरेण । अनेनैवेति, देवानान्तु भवेदित्यनेन मण्डपस्तत्रथाज्येष्ठप्रमाणं डिमप्राये, यद्वक्ष्यति—

निर्घातोल्कापातैरुपरागेणेन्दुसूर्ययोर्युक्तः ।
युद्धनियुद्धाधर्षणसम्फेटकृतश्च विज्ञेयः ॥
देवभुजंगेन्द्राक्षसयक्षपिशाचावकीर्णश्च ।
षोडशनायकबहुलः सात्त्वत्यारभटिकायुतस्तु डिमः ॥ (अ-१७) इति

तथा मध्यमप्रमाणं नृपतिप्रायप्रयोज्ये नाटकादौ । यद्वक्ष्यति—

निर्घातोल्कापातैरुपरागेणेन्दुसूर्ययोर्युक्तः ।
युद्धनियुद्धाधर्षणसम्भवकृतश्च विज्ञेयः ।
नृपतीनां यच्चरितम् (अ-१७)

इत्यादि । शेषास्तु प्रकृतयो भाणप्रहसनादौ यच्चवक्ष्यति—

विविधाश्रयो हि भाणो विज्ञेयस्त्वेकहार्यस्तु ।(अ-१७)

तथा "भगवत्तापसविप्रैरन्यैरपि (अ-१७)" चेत्यादि, एवंभूतप्रकृतिप्रधाने प्रयोगे कनीयःप्रमाणो मण्डप, इत्येषां मण्डपानां मध्ये यो विनिर्णय एव सर्वसाधारणः मध्यमे मण्डपे कनीयसि च डिमरूप एव मण्डपं तं वक्ष्यामीति ।

1 छ - यवः प्रोक्तो 2 प - अङ्गुलन्तु यवाष्टकम् 3 प अङ्गुलानि चतुर्विंशद्धस्त इत्यभिधीयते । [4] प - विधानेन

1 कण

चतुःषष्टि करान्कुर्याद्दीर्घत्वेन तु मण्डपम्[1] ।
[2]द्वात्रिंशतं च विस्तारान्मर्त्यानां यो भवेदिह[3] ॥ २०
अत ऊर्ध्वं न कर्तव्यः कर्तृभिर्नाट्यमण्डपः ।
यस्मादव्यक्तभावं हि [4]तत्र नाट्यं [5]व्रजेदिति ॥ २१
मण्डपे विप्रकृष्टे तु पाठ्यमुच्चरितस्वरम् ।
[6]अनिस्सरणधर्मत्वाद्विस्वरत्वं भृशं व्रजेत्[7] ॥ २२

अयमभिप्रायः—ज्येष्ठमाने नाटकादिप्रयोगसौकर्याभावान्मध्यम एव युक्तः । स एव निर्णयो विविधोऽपि दिव्यनृपभक्तता(त्या)दिस्वभावो निश्चयमाभिमुख्य-मभिनयप्रयोगद्वारेण नीयते यत्रेति । तं दर्शयति चतुष्षष्टिकरानित्यादि । प्रयोक्तुः पुरस्तात्पृष्ठतश्च मण्डपेऽस्मिन् सति करणार्हो न भवतीत्यर्थः । कर्तृभिरिति । किं तेषां वृथा प्रयासोत्पादनेनेति यावत् । तत्रेत्यतोऽधिकप्रमा-णेऽत्यन्तं न्यूनप्रमाणे चेत्यर्थः । नाट्यमिति सकलावान्तरभेदे प्रभेदं दर्शयितुम् । नाट्यतोऽभिव्यक्तं भवतीति समुदायाभिप्रायेण मन्तव्यम् । तदेव दर्शयति मण्डप इति । दीर्घत्वं पार्श्वयोर्विस्तारः मर्त्यानामित्यनेन मण्डपकरणात् किम्प्रि-त्यकारणं प्रयोगेणैव वेद्यत इत्याशयः । एतदेवाह अत ऊर्ध्वं नेति । अत इत्येवं-विधो यतो मध्यमोऽस्ति ततो हेतोरित्यर्थः। ऊर्ध्वमिति प्रमाणस्याधिक्यं न्यूनाति-रेकाभ्यामिति मन्तव्यम् । कर्तव्य इति । प्रकर्षः प्रकृष्टं तदतिक्रान्तो विप्रकृष्टः । किन्नियोगमानस्तास्मिंश्च तत्र ज्येष्ठे, पाठ्यं यन्मुख्ये "नाट्यस्यैषा तनूस्स्मृता(अ-१४-२)" इति दर्शयिष्यते, तद्विस्वरत्वं विशेषेणोपतापकत्वं निकटवर्तिनां प्रति व्रजेत् । अत्र हेतुः उच्चं कृत्वा चरितोऽतिक्लेशेन सम्पादितः स्वरः काक्वादिविभा-गो यत्र तथा दूरवर्तिनः सामाजिकान्प्रति विस्वरत्वं विगतशब्दकत्वमनाकर्णनी-यत्वं व्रजेत् । अत्र हेतुरनिस्सरणधर्मत्वात् । निरन्तरे देशे सरणं द्वितीयशब्दा-

---

1 प - दीर्घं वै नाट्यमण्डपम् 2 ठ - द्वात्रिंशेन तु ड - द्वात्रिंशदेव विस्तारः छ - विस्तारस्त्रिंशदेवास्य, ट - द्वात्रिंशतैव विस्तारं 3 न - तु भवेदिह, ठ - योजयेदिह 4 ठ - तस्मान्नाट्यं ट - तस्मिन्नाट्यं 5 ड - व्रजेद्यतः, छ - भवेदिति 6 ज - अनभिव्यक्तवर्णत्वाद्विस्वरत्वं भृशं व्रजेत्, न - अनिस्सरणवर्णत्वं 7 छ - दुश्चरत्वं भृशं व्रजेत्

[1]यश्चाप्यास्यगतो भावो नानादृष्टिसमन्वितः ।
[2]स वेश्मनः प्रकृष्टत्वाद्व्रजेदव्यक्ततां [3]पराम् ॥ २३
प्रेक्षागृहाणां सर्वेषां तस्मान्मध्यममिष्यते ।
[4]यावत्पाठ्यं च गेयं च तत्र श्रव्यतरं भवेत् ॥ २४

रम्भः स यस्य धर्मो नास्ति, शब्दान्तरस्य प्रसराभावादित्यर्थः । तथातिकनीयसि मण्डपे पाठ्यमुच्चरितस्वरं सदा निस्सरणधर्मत्वादनुरणनात्मकमधुरशब्दान्तरानारम्भात् विनष्टस्वरो मधुरो यस्य तादृशत्वं व्रजेत् । अनुरणनं हि स्वरस्य रूपमिति गेयाधिकारे वक्ष्यामः । अनेन समानयोगक्षेमत्वात् अधिकातोद्यविस्वरत्वमपि लक्षितं भवति । तथा चोपसंहरिष्यति गेयं चेति विस्वरत्वमिति,'स्वृ शब्दोपतापयो' रित्यस्य रूपम् । प्रधानस्य पाठ्यस्य प्रधानानुरणनभूतस्य च गीतातोद्यादेर्विनाशं प्रतिपाद्याभिनयवर्गस्यापि प्रतिपादयति यश्चापीति । आस्यगतो मुखगतो भावः योऽनुभावलक्षणो दृष्टिबाष्पस्वेदवैवर्ण्यादिस्तथा मकुटप्रतिशीर्षादिश्चकारादाङ्गिकः स वेश्मनः प्रकृष्टत्वादतिविस्तीर्णत्वादव्यक्ततां गच्छेत् । तथा प्रगतं कृष्टं कर्षणं दैर्घ्यं यस्य तस्य भावः ततः कनीयस्त्वाद्धेतोः परां द्वितीयामव्यक्ततामतिसामीप्यकृतां व्रजेत् । प्रथमं ह्यतिदूरत्वं कृत्वा सोक्ता । एवमुभयमण्डपाभिप्रायेणेदं व्याख्येयम् । अन्यथा तस्मान्मध्यममिष्यत इत्युपसंहारो न श्लिष्यति ।

तदाह प्रेक्षागृहाणामित्यादि । मध्ये भवं मध्यमम् , तदिष्यते यतः सर्वेषां रूपाणां सम्बन्धि यत्पाठ्यं प्रधानं तनूरूपप्राणोपरञ्जकरूपं च गीतं चकारादातोद्यं च श्रव्यतरं भवति । द्वितीयचकारादभिनयान्तरमपि श्रव्यतरं भवतीत्यर्थः ।

---

1 ठ - यश्चाप्यस्य गतो रागो भावदृष्टिरसाश्रयः ।
छ - यश्चाप्यास्यगतो रासो भावदृष्टिरसाश्रयः ॥
2 छ - स च वेश्म, ड स वेश्मना प्रकृष्ट, न - स तु वेश्म ठ - स वेश्मना प्रकृष्टत्वात् 3 छ - इति 4 ; - यस्मात्, न - तस्मात् ड - वाद्यं च गेयं च सुखश्रव्यं भविष्यति ।

प्रेक्षागृहाणां सर्वेषां त्रिप्रकारो विधिः स्मृतः ।
विकृष्टश्चतुरस्रश्च त्र्यस्रश्चैव प्रयोक्तृभिः॥ २५
कनीयस्तु स्मृतं त्र्यस्रं चतुरस्रं च मध्यमम् ।
ज्येष्ठं विकृष्टं विज्ञेयं नाट्यवेश्म प्रयोक्तृभिः ॥ २६
देवानां मानसी सृष्टि[1]र्गृहेषूपवनेषु च ।
[2]यत्नभावाद्विनिष्पन्नाः सर्वेभावा हि[3] मानुषाः॥ २७
तस्माद्देवकृतैर्भावैर्न विस्पर्धेत मानुषः ।
मानुषस्य तु गेहस्य सम्प्रवक्ष्यामि लक्षणम्॥ २८
[4]भूमेर्विभागं [5]पूर्वं तु परीक्षेत [6]प्रयोजकः ।
ततो [7]वास्तु प्रमाणेन प्रारभेत [8]यदृच्छया॥ २९

ननु यद्येवम्भूतः प्रयोगक्रमस्तर्हि हस्तसमाश्रयेणैव विधिर्वक्तव्यः। सोऽपि यत्र परिपूर्णो नोपकारी तत्र दण्डसमाश्रयेणातोद्यमानेन । अथ कदाचिद्दिव्य-प्रकृतिप्रेक्षकाभिप्रायेण तदुच्यते तत्रापि कः श्लोकान्तरत्वेनेति न्यायेन का इति सम्भावनेत्याशङ्कां पराकर्तुं श्लोकोऽभावि । अत एव पूर्वश्लोकेन सह नात्र पौनरुक्त्यं शङ्कितव्यम् + तस्यान्यथोपक्षेपात् । तच्छ्लोकमाह देवानामित्यादि। मनसस्तदीयस्य सत्त्वबहुलत्वात् तत्क्रियत इन्द्रियविसर्जनलक्षणे व्यापारेऽति-रूपव्यापी । उपवनेष्वविविक्तविलतेषु । का कथा मण्डपविषये । अत एव गृहेष्विति बहुवचनमुपात्तम् । तेन तदपेक्षया ते मण्डपा उक्ता इत्यर्थः, न त्वेषां मानुषाणां राजसानां मनस्तदाह देवकृतैरिति । यत एवं तस्मान्मानुषस्यैव गेहस्य लक्षणं सम्यक्प्रवक्ष्यामि । तुशब्द एवकारार्थे ।

सम्यगिति यदुक्तं तदाह भूमेरित्यादि । विभागो हेयोपादेयत्वेन । वास्त्विति ग्रहणं प्रमाणं चेत्युपलक्ष्यमाणरूपेण प्रारभेत कर्तुमिति शेषः ।

---

1 ठ - वनेषू 2 छ - यत्र भावाभिनिष्पन्नाः 3 च - स्तु 4 प - भूमिभागं परीक्ष्येत प्रथमं नाट्यवेश्मनः 5 ड - प्रथमं 6 ठ - विचक्षणः 7 ठ - वास्तुप्रमाणं च 8 ठ - शुभेच्छया

समा स्थिरा [1]च कठिना कृष्णा गौरी च या भवेत् ।
भूमिस्तत्रैव[2] कर्तव्यः कर्तृभिर्नाट्यमण्डपः ॥ ३०
प्रथमं शोधनं कृत्वा लाङ्गलेन [3]समुत्कृषेत् ।
अस्थिकीलकपालानि[4] तृणगुल्मांश्च शोधयेत् ॥ ३१
शोधयित्वा वसुमतीं प्रमाणं निर्दिशेत्ततः ।
[त्रीण्युत्तराणि सौम्यं च विशाखापि च रेवती ॥ ३२
हस्ततिष्यानुराधाश्च प्रशस्ता नाट्यकर्मणि ।]
पुष्यनक्षत्रयोगेन[5] शुक्लसूत्रं [6]प्रसारयेत् ॥ ३३
कार्पासं [7]बाल्बजं वापि मौञ्जं वाल्कलमेव च ।

तं विभागमाह समेत्यादि । स्वभावान्नातिनिम्नोन्नतेत्यर्थः । स्थिरा अचलनस्वभावा, कठिना अनूषरा कृष्णा गौरीचेति । चो वार्थे, अन्ये तु व्यामिश्रितत्वमाहुः । कर्तव्य इति करणार्हः ।

कथमित्याह प्रथममित्यादि । शोधनमुपरिगताशुचिशर्कराद्यपसारणं ततो हलेनोद्धृतगुल्मपाषाणादिकं कुर्यात् । एतदेवाहास्थीत्यादिना ।

एवं बाह्याभ्यन्तरतो भूमिशुद्धिं निरूप्यानन्तरकरणीयमाह शोधयित्वेति। [1]कथमित्याह पुष्येति । शुक्लसूत्रं तावत्पिष्टरञ्जनादिना, चर्मकृतं मानसूत्रं न कार्यमिति च तात्पर्यम्। स्वामिनः प्रेक्षापतेः । प्रयोक्तुर्नाट्याचार्यस्य, प्रयत्नेन रज्जुग्रहणमित्यच्छेद्यानुसरणीया तादृशी च सावधानतयावष्टम्भवियोगाद्युभयथा तथा प्रयत्नतो योज्यम् । नित्यमिति न केवलमत्र प्रथमपरिग्रहे यावदन्यदापि स्तम्भविनिवेशाय भूभागमानग्रहणादावित्यर्थः । प्रयत्नेन मानमित्यूनाधिकादिदोषवर्जनायायं यत्न इत्यपौनरुक्त्यम् । मुहूर्तो ब्राह्मादिः। तिथिर्नन्दादिः (भद्रादिः) करणं विष्ट्यादिरहितम् ।

---

1 च - तु, छ - सु 2 ठ - स्तत्र तु 3 प - समुत्क्षिपेत् 4 ड - कपालादि 5 ठ - योगे तु 6 न - निधापयेत् 7 ठ - वादरं वापि वाल्कलं मौञ्जमेव वा, न - वाल्कलं चापि वाल्वजं मौञ्जमेव च । छ - शणजं वापि वाल्कलं मौञ्जमेव च ।

1 कथ प्रमाणनिर्देश इत्याह

सूत्रं [1]बुधैस्तु कर्तव्यं [2]यस्य च्छेदो न विद्यते ॥ ३१
अर्धच्छिन्ने भवेत्सूत्रे स्वामिनो मरणं ध्रुवम् ।
[3]त्रिभागच्छिन्नया रज्ज्वा [4]रा कोपो विधीयते ॥ ३२
छिन्नायां तु चतुर्भागे प्रयोक्तुर्नाश उच्यते ।
[5]हस्तात्प्रभ्रष्टया वापि [6]कश्चित्त्वपचयो भवेत् ॥ ३३
[7]तस्मान्नित्यं प्रयत्नेन [8]रज्जुग्रहणमिष्यते ।
कार्यं चैव [9] प्रयत्नेन मानं नाट्यगृहस्य तु ॥ ३४
मुहूर्तेनानुकूलेन [10]तिथ्या सुकरणेन च ।
ब्राह्मणांस्तर्पयित्वा तु पुण्याहं वाचयेत्ततः ॥ ३५
शान्तितोयं ततो दत्वा ततः सूत्रं [11]प्रसारयेत् ।
चतुष्षष्टिकरान्कृत्वा [12]द्विधाभूतान्पुनस्ततः ॥ ३६
पृष्ठतो यो भवेद्भागो [13]द्विधाभूतस्य तस्य तु ।
[14]सममर्धविभागेन [15] रङ्गशीर्षं [16]प्रकल्पयेत् ॥ ३७

सूत्रप्रसारणेन यत्कृत्यं तदाह चतुःषष्टिरित्यादि । चतुष्षष्टिर्हस्तदैर्घ्याद्विस्ताराच्च । द्वात्रिंशत्करं क्षेत्रं गृहीत्वा मध्ये सूत्रं विस्तारेण दद्यात् । तत्र यत्प्रयोक्तुः पृष्ठतो भविष्यति [1]तदेव पृष्ठम् । तस्य मध्ये विस्तारेण सूत्रं दद्यात् । ततः षोडशहस्तौ द्वौ भागौ भवतः । पृष्ठगतं भागमर्धेन विभज्याष्टहस्तं रङ्गशिरः प्रविशतां पात्राणां चान्तस्स्थानं नाट्यमण्डपस्य ह्युत्तानसुप्तवदवस्थितस्य रङ्गपीठमुख्यं तदष्टहस्तं शिरः । तत्पृष्ठे तु दैर्घ्याद्धि षोडशहस्तं नेपथ्य गृहं भवति विस्तारात्तु द्वात्रिंशत्करमेव । ननु नैपथ्यादिकं च तत्र गृह्यते तदाह

---

1 प - बुधेन 2 ग - छेदो यस्य 3 ड - त्रिभागे 4 न - राष्ट्रकोपोऽभिधीयते ज राष्ट्रक्षोभं । प - राष्ट्रं कोशश्च हीयते 5 ठ - हस्तप्र- ज - हस्तप्रकृष्टया चापि 6 न - कश्चित्, प - तस्मात्पापचयो 7 छ - हस्ता 8 प - रज्ज्वाग्रहण 9 न - विशेषेण 10 न - तथा 11 ज - निपातयेत् 12 ठ - द्विधा कुर्यात्पुनश्च तान्, फ - द्विधाभूमिप्रदर्शिका 13 ठ - द्विधाभूतो भवेच्च सः 14 न - तस्याप्यर्धार्धभागेन, प - तस्यार्धेन विभागेन 15 छ. विभागे तु 16 प - प्रयोजयेत्

[1]पश्चिमे च विभागेऽथ नेपथ्यगृहमादिशेत् ।
[2]विभज्य भागान्विधिवद्यथावदनुपूर्वशः ॥ ३८
शुभे नक्षत्रयोगे च मण्डपस्य निवेशनम् ।
[3]शंखदुन्दुभिनिर्घोषैर्मृदङ्गपणवादिभिः ॥ ३९
[4]सर्वातोद्यैः प्रणुदितैः स्थापनं कार्यमेव तु ।
उत्सार्याणि त्वनिष्टानि पाषण्ड्याश्रमिणस्तथा ॥ ४०
[5]काषायवसनाश्चैव विकलाश्चैव ये नराः ।
निशायां च बलिः कार्यो नानाभोजनसंयुतः[6] ॥ ४१
गन्धपुष्पफलोपेतो दिशो दश समाश्रितः ।
पूर्वेण शुक्लान्नयुतो [7]नीलान्नो दक्षिणेन च ॥ ४२
पश्चिमेन बलिः पीतो रक्तश्चैवोत्तरेण तु ।
[8]यादृशं दिशि यस्यां तु दैवतं परिकल्पितम् ॥ ४३
तादृशस्तत्र दातव्यो बलिर्मन्त्रपुरस्कृतः ।
स्थापने ब्राह्मणेभ्यश्च दातव्यं घृतपायसम् ॥ ४४

पश्चिमे चेति । तत्र रङ्गपीठं विस्तारतः षोडश दैर्घ्यतस्त्वष्टहस्ता इति केचित् । अन्ये त्वेतदेव विपर्यासयन्ति । सर्वथा तावद्रङ्गपीठस्यापि विकृष्टत्वं विधेयमिति तात्पर्यम् । यद्वक्ष्यते रङ्गो विकृष्टो भरतेन कार्य (१२-१९) इत्यादि ।

एवं मानविधिमभिधायेष्टकास्थापनरूपे निवेशने विधिमाह शुभे नक्षत्रयोग इत्यादिना । दशसु तिर्यगूर्ध्वाधोरूपासु दिक्षु बलिः कार्य इत्युक्त्वा चतसृषु दिक्षु बलिविधिरुक्तो, नान्यथेत्यभिप्रायेण व्यापकं विधिमाह यादृशमित्या-

1 ठ - पश्चिमे तु पुनर्भागे 2 ग - विकल्प्य 3 ड - सार्थं दुन्दुभिनिर्घोषै र्मृदङ्गपटहादिभिः 4 ठ सर्वतूर्यनिनादैश्च न - सर्वातोद्यनिनादैश्च छ - भेरीतूर्यनिनादैश्च गायनीगायनैर्बहु । सर्वा.........तु ॥ ज - सर्वातोद्यैर्निनादैस्तु 5 न - काषायवासिनश्चैव 6 न - संश्रयः 7 च - नीलश्चैव तु दक्षिणः । ठ - निधानो दक्षिणेन च, छ - नीलो याम्येन चैव हि
8 ठ - यस्यां यश्चाधिदैवं तु दिशि सम्परिकीर्तितम् ।
छ - यस्या यथाधिदेवस्तु दिगीशः परिकीर्तितः ॥

मधुपर्कस्तथा राज्ञे कर्तृभ्यश्च गुडौदनम्।
नक्षत्रेण तु कर्तव्यं मूलेन स्थापनं बुधैः॥ ४५
मुहूर्तेनानुकूलेन [1]तिथ्या सुकरणेन च।
एवं तु स्थापनं कृत्वा भित्तिकर्म प्रयोजयेत्॥ ४६
भित्तिकर्मणि निर्वृत्ते स्तम्भानां स्थापनं ततः।
तिथिनक्षत्रयोगेन शुभेन करणेन च॥ ४७
स्तम्भानां स्थापनं कार्यं रोहिण्या श्रवणेन वा।
आचार्येण सुयुक्तेन त्रिरात्रोपोषितेन च॥ ४८
स्तम्भानां स्थापनं [2]कार्यं प्राप्ते सूर्योदये शुभे।
प्रथमे ब्राह्मणस्तम्भे सर्पिस्सर्षपसंस्कृतः॥ ४९
सर्वशुक्लो विधिः कार्यो दद्यात्पायसमेव च।
ततश्च क्षत्रियस्तम्भे वस्त्रमाल्यानुलेपनम्॥ ५०
सर्वं रक्तं प्रदातव्यं द्विजेभ्यश्च गुडौदनम्।
वैश्यस्तम्भे विधिः कार्यो दिग्भागे पश्चिमोत्तरे॥ ५१
[3]सर्वं पीतं प्रदातव्यं द्विजेभ्यश्च [4]घृतौदनम्।
शूद्रस्तम्भे विधिः कार्यः सम्यक्पूर्वोत्तराश्रये॥ ५२

दिना। तेनाग्नेये रक्तवर्ण इत्याद्यूह्यम्। मन्त्रा रङ्गपूजाविधौ वक्ष्यमाणास्ते च कर्मशंसोपयोगिनोहेन युक्ता विधेयाः। मन्त्रेण स्मृतं कर्म करोतीति स्मृतिः। अन्येतु तद्देवताकैः श्रुतिमन्त्रैरेव बलिकर्मेत्याहुः। ताल्लिङ्गैरित्यन्ये। चकारो भिन्नक्रमः, न केवलं मानोपक्रमे ब्राह्मणतर्पणं यावत्स्थापनेऽपीत्यर्थः।

एवं मानविधिं स्थापनविधिं भित्तिविधिं च कृत्वा स्तम्भविधिः कार्य इति दर्शयति भित्तिकर्मणीति। स्थापनमुच्छ्रयणम्, प्रथमं त्वाग्नेयः कोणस्तस्य

1 ड तिष्यानुकरणेन च 2 न - चैव कार्यं सूर्योदये बुधैः, ख - चैव कार्यं सूर्योदये शुभे। चन्दनं च भवेद्ब्राह्मं क्षात्रं खादिरमेव च। धावाख्यं वैश्यवर्णे स्याच्छत्रं सर्वद्रुमैः स्मृतम्॥ 3 न - पीतं सर्वं 4 न घृताशनम्

नीलप्रायं [1]प्रयत्नेन [2]कृसरं च द्विजाशनम् ।
[3]पूर्वे तु ब्राह्मणस्तम्भे शुक्लमाल्यानुलेपने[4] ॥ ५३

निक्षिपेत्कनकं मूले [5]कर्णाभरणसंश्रयम् ।
ताम्रं [6]चाधः प्रदातव्यं स्तम्भे क्षत्रियसंज्ञके ॥ ५४

[7]वैश्यस्तम्भस्य मूले तु रजतं सम्प्रदापयेत् ।
[8]शूद्रस्तम्भस्य मूले तु दद्यादायसमेव च[9] ॥ ५५

[10]शेषेष्वपि तु निक्षिप्तं [11]स्तम्भमूले तु काञ्चनम् ।
स्वस्तिपुण्याहघोषेण जयशब्देन चैव हि ॥ ५६

स्तम्भानां [12]स्थापनं कार्यं [13]पुष्पमालापुरस्कृतम् ।
[14]रत्नदानैः सगोदानैर्वस्त्रदानैरनल्पकैः[15] ॥ ५७

ब्राह्मणांस्तर्पयित्वातु स्थम्भानुत्थापयेत्ततः ।
अचलं [16]चाप्यकम्प्यंच तथैवाचलितं पुनः[17] ॥ ५८

[18]स्थम्भस्योत्थापने सम्यग्दोषा ह्येते प्रकीर्तिताः ।
[19]अवृष्टिरुक्ता चलने वलने [20]मृतितो भयम् । ५९

विशेषणैः अनुवादलिङ्गविधिकल्प्यं शुभं सर्वत्र पायसमिति, द्विजेभ्य इति प्रकरणात् । सर्वस्य विध्यनुसारेणैव भोजनं शुक्लादिवर्णमिति मन्तव्यम् । ततश्चेति तैरन्त इत्यर्थः । अचलमिति स्थानान्तरानिवेशलक्षणमनेनोक्तम्, अविद्यमाना चलना यस्येति । अकम्प्यमिति तत्रैव स्थानशिथिलता येन न भवति । अचलितमिति, वलयाकृत्यादिना परिवर्तनं यस्य करणीयं न भवति दोषसूचकत्वाद्दोषत्वकारित्वाच्च दोषाः। तान्दोषानाह वृष्टिरित्यादि । दातव्येति

1 ठ - प्रदातव्यम् 2 प - कृसरा च, च - कृशरा 3 च - पूर्वोक्त 4 ड - लेपिते 5 म कण्ठाभर 6 न - वापि 7 च - वैश्यस्य स्तम्भमूले 8 क - शूद्रस्य स्तम्भमूले 9 ड - तु 10 न - शेषेष्वेव तु निक्षेप्यं 11 ड - स्तम्भमूलेषु 12 ड - स्थापनं कुर्यात् 13 ड - वर्ग, ठ - पर्ण 14 न - रत्नप्रदानैर्गोदानै 15 न - स्तथैव च 16 च चाप्यकम्पं च 17 न - तथा चलितमेव तु प - तथैवावलितं, ड - तथैवास्खलितं 18 छ - स्तम्भानुत्थापयेत् ड - स्तम्भमुत्थापयेत् 19 छ - अदृष्टि 20 न - मृत्युता

कम्पने परचक्रात्तु[1] भयं [2]भवति दारुणम् ।
दोषैरेतैर्विहीनं तु स्तम्भमुत्थापयेच्छिवम्[3] ॥ ६०

[4]पवित्रं ब्राह्मणस्तम्भे दातव्या दक्षिणा च गौः ।
शेषाणां [5]भोजनं कार्यं स्थापने[6] कर्तृसंश्रयम् ॥ ६१

[7]मन्त्रपूतं च तद्देयं नाट्याचार्येण धीमता ।
पुरोहितं नृपं चैव भोजयेन्मधुपायसैः[8] ॥ ६२

कर्तृनपि तथा सर्वान्कृसरां लवणोत्तराम्[9] ।
सर्वमेव विधिं कृत्वा सर्वातोद्यैः प्रवादितैः ॥ ६३

अभिमन्त्र्य यथान्यायं[10] स्तम्भमुत्थापयेच्छुचिः ।
यथाचलो गिरिर्मेरुर्हिमवांश्च [11]महाबलः ॥ ६४

जयावहो नरेन्द्रस्य तथा त्वमचलो भव ।
स्तम्भद्वारं च भित्तिं च नेपथ्यगृहमेव च ॥ ६५

एवमुत्थापयेत्तज्ज्ञो[12] विधिदृष्टेन कर्मणा ।
रङ्गपीठस्य[13] पार्श्वे तु कर्तव्या मत्तवारणी ॥ ६६

द्विजायेति दातव्यबलाल्लभ्यते । अभिमन्त्र्येति समूहसूचितो यो मन्त्रस्तमाह । यथेति प्रणवनमस्कारमध्यवर्ती चायं पठितव्य इति वास्तुविद्याविदः । अचलो भवेति पूर्वविधिः । न तदनुवादेन जयावहो भवेत्यस्य न पौनरुक्त्यम् । एवमिति । तेन भित्तौ स्त्रीत्वेन गृहे नपुंसकत्वेनोहः कार्यः । पार्श्वे इति विशेषानुपादानात्तयोस्तुल्यमिति च द्विवचनाल्लिङ्गाद्भाविनोर्द्वयोः पार्श्वयोरिति लभ्यते। स्तम्भाश्चत्वारो बहिर्मण्डपान्निष्कासनं कृत्वा ध्रियन्ते मण्डपक्षेत्राद्बहिस्तेन भित्तिच्छेदावधौ स्तम्भद्वयं ततोऽपि बहिर्भित्तेरष्टहस्तान्तरं स्तम्भापेक्ष-

1 न - कम्पिते परराष्ट्रेभ्यः 2 ठ - वदति 3 ड - च्छुभं 4 ड - पवित्रे 5 ड - स्थापने 6 ङ - भोजनं 7 ठ - मन्त्रपूर्वं च 8 ठ - पायसा[9 च - त्तरम् 10 च - स्तम्भानुत्थापयेत् 11 न - यथाचलः 12 च - त्प्राज्ञो 13 ठ - पश्चात्तु

चतुःस्तम्भसमायुक्ता रङ्गपीठप्रमाणतः ।
अध्यर्धहस्तोत्सेधेन[1] कर्तव्या मत्तवारणी । ६७
उत्सेधेन [2]तयोस्तुल्यं कर्तव्यं रङ्गमण्डपम् ।
तस्यां माल्यं च धूपं च गन्धं वस्त्रं तथैव च ॥ ६८
नानावर्णानि देयानि तथा भूतप्रियो बलिः ।
[3]आयसं तत्र दातव्यं स्तम्भानां कुशलैरधः ॥ ६९
[4]भोजनं कृसरां चैव [5]दातव्यं ब्राह्मणाशनम् ।
एवं [6]विधिपुरस्कारैः कर्तव्या मत्तवारणी ॥ ७०
रङ्गपीठं ततः कार्यं विधिदृष्टेन कर्मणा ।
रङ्गशीर्षन्तु कर्तव्यं षड्दारुकसमान्वितम्[7] ॥ ७१

याप्यष्टहस्तान्तरं स्तम्भद्वयमित्येवमित्यष्टविस्तारा समचतुरश्रा मत्तवारणी भवति। आयामस्तु प्रमाणमिति ये वदन्ति तेषां कृते दैर्घ्यादष्टहस्तं विस्ताराच्छोडशहस्तमित्येवं विकृष्टता रङ्गपीठस्य भवति। अन्येषां हस्तमानोऽत्र यथा रङ्गपीठापेक्षया च सार्धहस्तपरिमाण उच्छ्रायः कार्यो मत्तवारण्याः। तयोरिति द्विवचनं ज्ञापकं तं चरितार्थमितीह नोपेक्षित इति, तस्या एव यावानुत्सेधस्तावान्रङ्गपीठस्य, तेन ब्रध्नभूभागापेक्षया सार्धहस्तप्रमाणोन्नतं रङ्गपीठमित्युक्तं भवति। तेन मत्तवारण्यालोकेनात्यर्थं रङ्गपीठस्य दुष्प्रेक्षता! एतच्चोत्सेधेनेत्येकवचनेन सूचितम्। अन्यथोत्सेधाभ्यामित्युच्येत। माल्यधूपाद्यत्र निर्माणकाल एव देयम्। तदधिष्ठातॄणां भूतादीनामग्रत्वेन यत्नोपचरणीयत्वात्। तदाह विधिपुरस्कारैरिति। पुरस्कारशब्देन विधिर्वास्तुविद्याशास्त्रोक्तः। रङ्गपीठे कर्तव्ये रङ्गशिरस्तावदाह रङ्गशीर्षमिति। नेपथ्यगृहभित्तिलग्नौ स्तम्भावष्टहस्तान्तरावन्योन्यं निवेश्य तयोर्यन्मुखादेरपेक्षया चतुर्हस्तान्तरं स्तम्भद्वयं तेषामधस्तनं काष्ठमुपरितनं चेति षड्दारूणि, यत्र षड्दारूणि तत्षड्दारुकम्, संज्ञायां कन्। तत्तेन

1 न - हस्ता चोत्सेधा 2 च - तथा तुल्यं 3 न - आसनं चात्र, ठ - पायसं चात्र 4 च - भोजने कृशरा 5 च - दातव्या 6 न - विधैः 7 न - मसंवृतम्

कार्यं द्वारद्वयं चात्र नेपथ्यगृहकस्य [1]तु ।
पूरणे मृत्तिका चात्र कृष्णा देया प्रयत्नतः ॥ ७२
[2]लाङ्गलेन समुत्कृष्य निर्लोष्टतृणशर्करम्[3] ।
लाङ्गले शुद्धवर्णौ [4]तु धुर्यौ योज्यौ प्रयत्नतः ॥ ७३
कर्तारः पुरुषाश्चात्र[5] ये[6]ऽङ्गदोषविवर्जिताः ।
[7]अहीनाङ्गैश्च वोढव्या मृत्तिका पीवरैर्नरैः[8] ॥ ७४
[9]एवंविधं प्रकर्तव्यं र शीर्षं प्रयत्नतः ।
कूर्मपृष्ठं न कर्तव्यं मत्स्यपृष्ठं तथैव च ॥ ७५
शुद्धादर्शतलाकारं [10]रङ्गशीर्षं [11]प्रशस्यते ।
रत्नानि चात्र देयानि पूर्वे वज्रं विचक्षणैः ॥ ७६
वैडूर्यं दक्षिणे [12]पार्श्वे स्फटिकं पश्चिमे तथा ।
प्रवालमुत्तरे चैव मध्ये तु कनकं भवेत्[13] ॥ ७७

विचित्ररचनोपेतत्वं लभ्यते । अत्र नेपथ्यगृहस्य द्वारद्वयं कार्यम् । एकं दक्षिणतः । अपरमुत्तरतः । तच्च द्वारद्वयमापादितं कूर्पराभिनत्या भवति । तत्पात्राणां विश्रान्त्यै आगच्छतां च गुप्त्यै, रङ्गस्य शोभायै रङ्गशिरः कार्यम् । अन्ये तु

पार्श्वद्वयोर्ध्वाधरदारुमण्डितं
स्तम्भद्वयोपेतमिहाच्छपातम् । (?)

इति षड्दारुकमाहुः । अन्ये तूहः स्तम्भशिरसो दूरं निर्गतकाष्ठं प्रत्यूहस्ततो विनिर्गता तुला, सञ्जवनफलकाः सृता आकाशे भित्तिव्याख्याः, स्तम्भाश्रिताः सिंहादयो व्यालानुबन्धाश्च निर्व्यूहास्तुलान्तान्निस्सृताः फलकभित्तिमयाः, कुहराणि पर्वतपुरनिकुञ्जगह्वररूपाणीति । षड्दारुकं सर्वत्र च पक्षे दक्षिणोत्तरगतं द्वारद्वयं पात्राणां प्रवृत्तिभेदकृतात्प्रदक्षिणं प्रदक्षिणप्रवेशत्वात् शुद्धवर्णौ शुक्लधुर्यौ दान्तौ । कूर्मपृष्ठमिति समन्ततो निम्नं मध्ये च

---

1 ज - नेपथ्यस्य गृहस्य च 2 प - लाङ्गले च 3 ठ - शर्कराम् 4 ज - वर्णे 5 न - पुरुषाश्चैव ठ - पुरुषास्तत्र 6 च - शब्द, 7 ठ - अहीनाश्चैव 8 ग . पिठकैर्नवैः, ठ - पीठकैर्नवैः 9 च - एवंविधैः ठ - एवंविधैश्च कर्तव्यं 10 च - तलप्रख्यं 11 न - रङ्गपीठं 12 ठ - चैव 13 न - तथा

एवं रङ्गशिरः कृत्वा दारुकर्म प्रयोजयेत्[1] ।
ऊहप्रत्यूहसंयुक्तं नानाशिल्पप्रयोजितम् ॥ ७८
नानासञ्जवनोपेतं बहुव्यालोपशोभितम् ।
भवेयुश्चात्र विन्यस्ता विविधाः सालभञ्जिकाः ॥ ७९
निर्व्यूहकुहरोपेतं [2]नानाग्रथितवेदिकम् ॥ ८०
नानाविन्याससंयुक्तं [3]यन्त्रजालगवाक्षकम् ।
सुपीठ[4]धारणीयुक्तं कपोतालीसमाकुलम् ॥ ८१
नानाकुट्टिमविन्यस्तैः स्तम्भैश्चाप्युपशोभितम् ।
एवं [5]काष्ठविधिं कृत्वा भित्तिकर्म [6]प्रयोजयेत् ॥ ७२
स्तम्भं वा नागदन्तं वा वातायनमथापि वा ।
[7]कोणं वा सप्रतिद्वारं [8]द्वारविद्धं न कारयेत् ॥ ८३

वर्तुलरूपं मन्दं तत्तादृगेव मध्ये दीर्घरूपं मत्स्यपृष्ठं तदुभयं नात्र कार्यम् । समं तुल्यं कार्यम् । रत्नानि तदायुधं तद्वर्णानुरूपत्वेन यथायोगम् । कृत्वेति पूर्वं विभज्य बुद्ध्येति यावत् । दारुकर्मेत्युक्तं विभजति ऊहप्रत्यूहसंयुक्तमित्यादिना स्तम्भैश्चाप्युपशोभितमित्यन्तेन । अनेकसालभञ्जिकाः काष्ठमय्यः कान्ताप्रकृतयः नानाकृतिभिर्ग्रथिताः वेदिकाश्चतुरश्रिका, यन्त्रचित्राणि जालानि चतुरश्राष्टाश्रच्छिद्ररूपाणि, गवाक्षाणि च वर्तुलच्छिद्रात्मकानि यत्र, पीठानि स्तम्भोपरि तेषु धारिण्यस्तुलाः । कपोताली विटङ्कपाली । कुट्टिमस्य नानात्वं रङ्गशिरोरङ्गपीठमत्तवारणीद्वयभेदात्सर्वत्र तथाविधदारुकं रक्तासितनीलपीतादिभेदाद्वा । अत्रोहप्रत्यूहावन्वयव्यतिरेकतर्कोपयोगिनौ केचिदाहुः । प्रतिद्वारमवान्तरद्वारं द्वारेण विद्धं परस्परसंमुखीभूतमध्यं न कुर्यात् । नागदन्तं स्तम्भोर्ध्वनीचस्थांशकं पुत्रिकाधारणार्थं गजमुखमिति केचित् । द्वे भूमी रङ्गपीठस्याधस्तनोपरितनरूपेणेति केचित् । मत्तवारणी बहिर्निर्गमनप्रमाणेन सर्वतो द्वितीयभित्तिनिवेशेन देवप्रसादाद्वारिका (देवप्रासादाट्टालिका ?) प्रदक्षिणसदृशी द्वितीया भूमि-

1 ठ - प्रवर्तयेत्, 2 च - कुहरोपेतं 3 च - चित्रजाल 4 न - धारिणी
5 ज - दारु 6 ज प्रवर्तयेत् 7 क - कार्ष्णायसंप्रति ,8 ठ - दारुविद्धं

कार्यः शैलगुहाकारो द्विभूमिर्नाट्यमण्डपः ।
मन्दवातायनोपेतो [1]निर्वातो धीरशब्दवान्[2] ॥ ८४
तस्मान्निवातः कर्तव्यः कर्तृभिर्नाट्यमण्डपः ।
(मण्डपे विप्रकृष्टे तु पाठ्यमुच्चरितस्वरम् ॥ ८५
अनभिव्यक्तवर्णत्वाद्विस्वरत्वं भृशं व्रजेत् ।)
गम्भीरस्वरता येन[3] कुतपस्य [4]भविष्यति ॥ ८६
भित्तिकर्मविधिं कृत्वा भित्तिलेपं प्रदापयेत् ।
सुधाकर्म [5]बहिस्तस्य विधातव्यं प्रयत्नतः ॥ ८७
भित्तिष्वथ विलिप्तासु[6] परिमृष्टासु सर्वतः[7] ।
समासु जातशोभासु चित्रकर्म प्रयोजयेत् ॥ ८८
चित्रकर्मणि[8] चालेख्याः पुरुषाः स्त्रीजनास्तथा ।
लताबन्धाश्च कर्तव्याश्चरितं चात्मभोगजम् ॥ ८९

रित्यन्ये । उपरिमण्डपान्तरनिवेशनादित्यपरे । अद्विभूमिरित्येके । उपाध्यायास्तु वीप्सागर्भं व्याचक्षते । द्वे द्वे भूमी यत्र निम्नाते(निम्नोन्नते)ततोऽप्युन्नता इति निक्रमेण (निम्नोन्नतक्रमेण) रङ्गपीठनिकटात्प्रभृति द्वारपर्यन्तं यावद्रङ्गपीठोत्सेधतुल्योत्सेधा भवति। एवं हि परस्परानाच्छादनं सामाजिकानां। शैलगुहाकारत्वं स्थिरशब्दादित्वं च भवति । मन्दत्वं वातायनानां जलकपान- (जालकवात)योगात्कार्यम् । कुतपः संफेटकगायनवादकसमूहः, कुर्नाट्यभूमिस्तं तपति उज्ज्वलयतीति कृत्वा, कुतं शब्दं पातीत्यन्ये । गम्भीरत्वं तत्रैव शब्दस्य भ्रमणादन्योन्यप्रतिश्रुतिकारसमारम्भिसम्पूर्णाच्च । भित्तिलेपो भङ्ग(शङ्ख)- वालुकाशुक्तिकालेपः लताबन्धा द्रमिडाभिनयसन्निवेशा वा माल-

---

1 ठ - निवातो 2 ठ - शब्दभाक् 3 ज - गाम्भीर्यं सुस्वरत्वं च, न - सगाम्भीर्यादवैस्वर्यं 4 ठ - भवेदिह, छ – कूपस्येव भाविष्यति 5 ठ - विधिस्तस्य, झ - तथैवास्य कुर्याद्बाह्यं 6 ठ - भित्तिष्वपि च लिप्तासु, न - भित्तिकर्मसु लिप्तासु 7 ज - परिवृत्तासु सर्वशः 8 च - चित्रकर्माणि

एवं विकृष्टं कर्तव्यं नाट्यवेश्म प्रयोक्तृभिः ।
पुनरेव [1]हि वक्ष्यामि चतुरस्रस्य लक्षणम् ॥ ९०
[2]समन्ततश्च कर्तव्या हस्ता द्वात्रिंशदेव तु ।
शुभभूमिविभागस्थो नाट्यज्ञैर्नाट्यमण्डपः ॥ ९१
यो विधिः पूर्वमुक्तस्तु लक्षणं [3]मङ्गलानि च ।
[4]विकृष्टे तान्यशेषाणि चतुरस्रेऽपि कारयेत् ॥ ९२
चतुरस्रं समं कृत्वा सूत्रेण प्रविभज्य च ।
बाह्यतः सर्वतः कार्या भित्तिः [5]श्लिष्टेष्टका दृढा ॥ ९३

त्यादिलतागता वातोद्यवेष्टनवैचित्र्यप्रकारा वा वक्ष्यमाणपिण्डीबन्धप्रकारविशेषाश्च ।

एतदुपसंहरति एवं विकृष्टमिति । यद्यपि समचतुरस्रोऽत एव शक्य ऊहितुम् । तथापि विस्पष्टार्थं वक्ष्यामीत्याशयेन पुनःशब्देनोपक्रमते पुनरेवेति । ननु विकृष्टे स्तम्भविभागरङ्गयोजनादि नोक्तम्, तत्कथं प्रतिपत्तव्यमित्याशङ्कायामावृत्त्यानेनैवोत्तरं चतुरस्रसम्बन्धि यल्लक्षणं तत्पुनर्यस्माद्वक्ष्यामो तस्य विकृष्टस्य सम्बन्धित्वेन तस्मान्नापूर्णं विकृष्टलक्षणं । तथा यदस्य लक्षणमुक्तं तच्चतुरस्रेऽपि सञ्चारणीयमिति पुनश्शब्देन दर्शयति, तेनातिदेशानागतापेक्षणाख्यं तत्र परिहरति । चतुरस्रमाह समन्तत इति । सर्वेष्वन्तेषु चतसृष्वपि दिक्ष्वित्यर्थः। प्रविभज्य चेति पूर्ववदेवेत्यर्थः । यदि बाह्यतो भित्तिरभ्यन्तरे किमित्याह तत्राभ्यन्तर इति । अष्टभिर्भागैः सर्वतः क्षेत्रं विभजेत्, येन चतुरङ्गफलकवच्चतुष्षष्टिकोष्ठं भवति । तत्र मध्यमकोष्ठकचतुष्के रङ्गपीठं सर्वतोऽष्टहस्तं, तस्य पश्चिमे भागे प्राक्पश्चिमे द्वादशहस्तं दक्षिणोत्तरतो द्वात्रिंशत्करं तत्क्षेत्रमवशिष्यते । अत्र यद्रङ्गपीठेन स्वीकृतं तद्धि हस्ताष्टकमेव । यदवशिष्टं क्षेत्रं तन्मध्याद्रङ्गपीठनिकटगतं प्राक्पश्चिमतश्चतुर्हस्तविस्तारेण द्वात्रिंशद्धस्तं क्षेत्रांशाद्विभज्य तावत्प्रमाणमेव पश्चिमभागेऽपि । ष(ड्दारु)कसंस्थानं रङ्गशिरः कुर्यात् । ततोऽपि पश्चिमे तावदेव नेपथ्यग्रहणम्(गृहम्)। एवं स्थिते रङ्गपीठं लक्ष-

1 ठ - अतःपरं 2 ठ - समन्ततस्तु कर्तव्यो हस्तो 3 ठ - मण्डलानि च
4 ठ - चतुरस्रस्य तान्येव कारयेन्नाट्यवेश्मनः 5 क - श्लिष्टेष्टकादृढः

[1]तत्राभ्यन्तरतः कार्या रङ्गपीठोपरि स्थिताः ।
दश प्रयोक्तृभिः स्तम्भाः [2]शस्ता मण्डपधारणे ॥ ९४
स्तम्भानां बाह्यतश्चापि [3]सोपानाकृति पीठकम् ।
इष्टकादारुभिः कार्यं प्रेक्षकाणां निवेशनम् ॥ ९५
हस्तप्रमाणैरुत्सेधै[4]र्भूमिभागसमुत्थितैः ।
रङ्गपीठावलोक्यं तु [5]कुर्यादासनजं विधिम् ॥ ९६

यित्वा दश स्तम्भाः षड्दारुकस्तम्भव्यतिरिक्ता देयाः । तत्र कोणचतुष्टये तावच्चत्वारः । तत्राग्नेयस्तम्भाच्चतुर्हस्तान्तरो दक्षिणदिश्येकः स्तम्भः । तथैव नैर्ऋतस्तम्भाद् द्वितीयः । एवमुदीच्यामपि स्तम्भद्वयं । पूर्वभागे ऐशानाग्निगतात्स्तम्भद्वयाच्चतुर्हस्तान्तरं स्तम्भद्वयमिति षट् कोणगाश्चत्वार इति ये दश त एव। बहिः सामाजिकासनानि सर्वेभ्यो वा बहिरतिसामीप्ये दृष्टिविघातात् । अत एवाह रङ्गपीठावलोकने साधुभूतामिति । अनेन द्विभूमित्वमेवानुसंहितम्। अन्तरे स्तम्भविधिमाह षडन्यानिति । रङ्गपीठस्य दक्षिणतो निवेशितस्तम्भद्वयाच्चतुर्हस्तान्तरौ अन्योन्यमष्टहस्तान्तरौ द्वौ, तत्र आग्नेयस्तम्भसम्मुखो योऽन्यस्तु पूर्वः स्तम्भः ततश्चतुर्हस्तान्तरं दक्षिणस्तम्भं कुर्यादिति पूर्वन्यस्तानां दक्षिणस्तम्भानां दक्षिणभित्तेश्चान्तराले स्तम्भत्रयम् । एवमुत्तरस्यामपि । तेषामुपरीत्यधिकानष्टौ दद्यात् । तत्र दक्षिणभित्तेरुदग्भागे चतुर्हस्तान्तरं पूर्वस्थापितस्तम्भाद्भित्तेश्चैकं स्तम्भं दद्यात्पूर्वं, एवमुत्तरभित्तेर्दक्षिणदिग्भागे, ततः पूर्वभित्तेश्चतुर्हस्तान्तरौ रङ्गभागद्वयानुसारेणद्वौ ततोऽपि चतुर्हस्तान्तरौ द्वावित्यष्टौ । विद्धमास्यं मुखं यस्य तत् । पद्मादिविरचितमुखस्तम्भेष्वष्टहस्तं पीठं निक्षिपेत्। विद्धास्यस्योपरि हस्तप्रमाणधारिणीनां तुलानां धारकाःस्तम्भा ·····श्रया इति चतुरस्रे स्तम्भविधिः तमेव विकृष्टे त्रिकोणेषु स्वबुद्ध्या योजयेदिति श्रीशङ्कुकाद्याः । अन्ये त्वष्टौ स्तम्भान्पुनश्चेति नेपथ्यगृहविषयानेतानाहुः । वार्तिककृत्तु—

"अन्ते नेपथ्यगृहं स्तम्भौ द्वौ पीठकाश्च चत्वारः ।
... ... न्ये चत्वारो दशैवमुक्ता भवन्त्येते ।
भित्तेः स्तम्भानां च स्यादन्तरमष्टहस्तमेवान्त " इति ।

1 न - कृताभ्यन्तरतः कार्यं रङ्गपीठं यथाविधि (ठ - यथादिशम्, प - यथा हर्षम्) 2 न - शुभा मण्डपधारिणः । ठ - शक्ता मण्डपरक्षणे 3 ठ - स्थाप्यं 4 न - भूमिभागैः 5 ठ - कुर्यादासनिकं

[1]षडन्यानन्तरे चैव पुनः स्तम्भान्यथादिशम्[2] ।
विधिना [3]स्थापयेत्तज्ज्ञो दृढान्मण्डपधारणे ॥ ९७
अष्टौ स्तम्भान्पुनश्चैव तेषामुपरि [4]कल्पयेत् ।
[5]विद्धाख्यमष्टहस्तं च पीठं तेषु ततो न्यसेत् ॥ ९८

दत्तोऽह्यवातार्थः, सोऽथो नानाभवेदुक्तः (?) ।
चत्वारः पीठगताः पश्चादग्रे च याविह द्वौ द्वौ ॥
षट् सान्तरास्तथान्ये कार्या इति शास्त्र ......
.... पीठगताः पश्चादग्रे च याविह द्वौ द्वौ ॥
तेषामष्टावन्येऽप्युपरि निवेश्या य उद्दिष्टाः ।
तैरुत्क्षिप्तैरिह तत् स्यादालोकः समस्तरङ्गस्य ॥
सोपानाकृति पीठकमत्र विधेयं समन्ततो रङ्गे ।
येनालोक ... ... व्युपरिकाष्ठासु ॥ इति ।

अन्येऽपि चैवं विधा बहवः प्रवादा ग्रन्थविस्तरभयान्न लिखिताः । अयं चन्द्रसोदर इत्युपाध्यायाः । इह प्रेक्षामण्डपस्य त्रिधा कल्पना कृता । अधोभूमिः रङ्गपीठं रङ्ग इति, तेषु चायं स्तम्भविन्यासविधिविच्छेद उक्तः । तथा ह्यधोभूमौ स्तम्भानाह तत्राभ्यन्तरत इति । विस्तारे द्वादशहस्तायाममेवं च चतु......दातव्याः । द्वौ स्तम्भौ भित्तिद्वयापेक्षया द्वादशहस्तान्तरावन्योन्यापेक्षया चाष्टहस्तान्तरावन्योन्यं तयोरन्तरं तथा कार्यं येन द्वारविद्धता न भवतीति । एवं पञ्चतुलासु दश । एतत्स्तम्भदशकव्यतिरिक्तायां भूमावासनविधिरित्याह स्तम्भानां बाह्यतश्चापीत्यादि । पूर्ववद्व्याख्येयम् ।

अथ रङ्गपीठे स्तम्भन्यासमाह षडन्यानित्यादि । उपरि रङ्गपीठमुखोपलक्षितस्य वानेपथ्यगृहस्य वारुणकोण इत्युक्तं भवति । रङ्गपीठस्य यत्पृष्ठं रङ्गशिरस्तत्र द्वितीयमिति राश्यपेक्षयैकवचनम् । तेन द्वारद्वयमेव रङ्गशिरसि नेपथ्यगतपात्रप्रवेशाय चकारादन्य(प्रवेशा)र्थम् । जनप्रवेशनद्वारं च त्रीणि वा कार्याणि मतान्तर इति सङ्गृहीतं भवति । सर्वग्रहणादन्यूनाधिकत्वमत्र दर्शयन्

---

1 प - षडन्यान्सुन्दरान्दद्यात्, प - षडन्यान्सान्तरान्दद्यात् छ - षड्न्यान्सान्तरान्दद्यात् 2 ज - यथादरम् 3 क - धारयेत्तज्ज्ञो, ठ - स्थापयेत्प्राज्ञो 4 ठ - कारयेत् 5 ठ - संस्थाप्यं च ततः पीठमष्टहस्तप्रमाणतः (न स्थाप्यं चैव ततः) ड - विद्धाख्यं च पुनः पीठमष्टौ हस्तप्रमाणतः ।

तत्र स्तम्भाः प्रदातव्यास्तज्ज्ञैर्मण्डपधारणे ।
[1]धारणीधारणास्ते च शालस्त्रीभिरलंकृताः ॥ ९९

नेपथ्यगृहकं चैव ततः कार्यं [2]प्रयत्नतः ।
द्वारं चैकं भवेत्तत्र रङ्गपीठप्रवेशनम् [3]॥ १००

जनप्रवेशन[4] चान्यदाभिमुख्येन कारयेत् ।
रङ्गस्याभिमुखं कार्यं द्वितीयं द्वारमेव तु ॥ १०१

विकृष्टे स्तम्भानामाधिक्यमभ्यनुजानीते । त्र्यस्रारङ्गपीठे तु प्रतिरङ्गमध्य इति । रङ्गेऽत्र तच्छिरस्ततः. पृष्ठतः रं...गेयादि वाभितः । कर्मप्रवचनीयो वर्जग द्योतकः । रङ्गपीठं वर्तयित्वा तदभ्यन्तरमण्डपस्य तत्र द्वात्रिंशद्धस्तेषु रङ्गपीठे प्रतिकोणस्तम्भ इत्यष्टहस्तान्तराश्चत्वारः। तदनन्तरं स्तम्भद्वयमिति षडप्येतेऽष्टहस्तान्तरं ततो द्वादशहस्तायामं यदवशिष्यते तत्र चतुर्हस्तायामं द्वात्रिंशद्धस्तविस्तारं यद्रङ्गशिरस्तत्र द्वे तुले दातव्ये । प्रतितुलं चाष्टहस्तान्तरं स्तम्भचतुष्टयं वर्तयित्वेत्यष्टौ भवन्ति। अत एव हि विद्धास्यमष्टहस्तं चतुर्हस्तान्तरालेऽपि तिरश्चीनं देयम् । येन तुलितं चित्रं भवति । एतदाहाष्टौ स्तम्भानित्यादि । शन्दसौभौम्रादिकोवा सिरयमुपरीति(?) रङ्गपीठस्य यदुपरि शिरोरूपमित्यर्थः तथा च विकृष्टमण्डपे रङ्गपीठापेक्षया रङ्गशिर उन्नतं वक्ष्यते। तत्र नियमादष्टस्तम्भा न्यस्यन्ते । अपि तु दृढा न्यसनीया इति दर्शयति तत्र स्तम्भा इति । अथवावशिष्टेषु हस्तेषु विधिमाह। नेपथ्यगृहकमिति रङ्गपीठप्रवेशनमिति वचनेनेदमाह। कक्ष्याविभागेन तावत् द्वे द्वारे, तेन द्वारमिति जातावेकवचनम् । एकशब्दश्च राश्यभिप्रायेण राशिकरणे च निमित्तं पात्रप्रवेशोपायनं, तथा च कक्ष्याध्याये वक्ष्यति, "ये नेपथ्यगृहद्वारे मया पूर्वं प्रकीर्तिते। तयोर्भाण्डस्य विन्यास"(१३-२) इति (जन) प्रवेशनं च तृतीयद्वारं नेपथ्यगृहस्य येन भार्यामादाय नटपरिवारः प्रविशति । अन्यत्तु द्वारमाभिमुख्येन पूर्वस्यां दिशि कुर्यात्, द्वारवृत्त्या सामाजिकजनप्रवेशार्थं । ननु किमपेक्ष(णीय)माभिमु(ख्यं, कक्ष्यापे)क्षयैव पूर्वादिभिरित्युक्तम् । यद्वक्ष्यति च

यतो मुखं भवेद्भाण्डद्वारनेपथ्यकस्य तु ।
सा मन्तव्या तु दिक् पूर्वा नाट्ययोगे विपश्चिता ॥ (१३-१०) इति

1 ठ - धरणी धारितास्ते 2 ठ : प्रयोक्तृभिः । 3 ठ - प्रवेशने
4 ठ - प्रवेशने

अष्टहस्तं तु कर्तव्यं रङ्गपीठं प्रमाणतः ।
चतुरस्रं[1] समतलं वेदिकासमलंकृतम् ॥ १०२
पूर्वप्रमाणनिर्दिष्टा कर्तव्या मत्तवारणी ।
चतुःस्तम्भसमायुक्ता वेदिकायास्तु पार्श्वतः ॥ १०३
समुन्नतं समं चैव [2]रङ्गशीर्षं तु कारयेत् ।
विकृष्टे [3]तून्नतं कार्यं चतुरस्रे समं तथा ॥ १०४
एवमेतेन विधिना चतुरस्रं गृहं भवेत् ।
अतः परं प्रवक्ष्यामि त्र्यस्रगेहस्य लक्षणम् ॥ १०५
त्र्यस्रं त्रिकोणं कर्तव्यं नाट्यवेश्म प्रयोक्तृभिः ।
मध्ये त्रिकोणमेवास्य रङ्गपीठं तु कारयेत् ॥ १०६
द्वारं [4]तेनैव कोणेन कर्तव्यं [5]तस्य वेश्मनः ।
द्वितीयं चैव कर्तव्यं रङ्गपीठस्य पृष्ठतः ॥ १०७

एवं चतुर्द्वारं नाट्यगृहम् । अन्ये त्वाद्यद्वार . . . . . वाद्येन हेतुनान्यद्वारद्वयं पार्श्वस्थितं कुर्यादालोकसिद्ध्यर्थमिति षड्द्वारं नाट्यगृहमाचक्षते ।

अथ रङ्गपीठरङ्गशिरसोर्वक्तव्यशेषं निरूपयति अष्टहस्तान्त्विति । वेदिके शोभायुक्ते कार्ये पूर्वप्रमाणमध्यर्धहस्तोत्सेधत्वं । समुन्नतमिति रङ्गपीठापेक्षया । एतच्चेह प्रसङ्गात्सूचयन् विकृष्टे तेनैव प्रकारेण स्तम्भत्रयाधिका कर्तव्या । अन्तरमप्यत्रैव दर्शितम् । अथ त्र्यस्रस्यातिदेशद्वारेण लक्षणं कर्तुमुपक्रममाह त्र्यस्रमिति । त्रिकोणमिति लक्षणमुभयानुग्रहाच्च विकृष्टचतुरस्रमानद्वयमेव भवति । मध्ये च त्रिकोणमेव रङ्गपीठम् । तथैव रङ्गशिरसो नेपथ्यगृहं च तेनैव कोणेनेति । वारुणीगतेन द्वारं जनप्रवेशनं येन तस्मिन्नेव कोणे द्वारे कर्तव्ये । सङ्गतिं सूचयत्येवमेतेनेति । एतेन विधिना बहवो नाट्यमण्डपाः, न तु पूर्वोक्ता-

---

1 ठ. चतुरस्रं 2 ठ - रङ्गपीठं 3 ठ - प्युन्नतं, ड - ह्युन्नतं 4 ढ - द्वारमेकेन 5 प - च प्रकाशने न - तन्निवेशनम्, ठ - तु प्रवेशने

[1]विधिर्यश्चतुरस्रस्य भित्तिस्तम्भसमाश्रयः[2] ।
स तु सर्वः प्रयोक्तव्यस्त्र्यस्रस्यापि प्रयोक्तृभिः ॥
एवमेतेन विधिना कार्या नाट्यगृहा बुधैः ।
[3]पुनरेषां प्रवक्ष्यामि पूजामेवं [4]यथाविधि ॥ १०९

इति श्रीभारतीये नाट्यशास्त्रे मण्डपविधानं[5] नाम
द्वितीयोऽध्यायः ।

ष्टादशभेदकलनयेत्यर्थः । बुधैरित्यूहापोहविद्भिः । पुनरिति । यद्यपि गदिताः सर्वे शुभदाः, पूजामिति तथापि वक्ष्यामीति पुनश्शब्दार्थस्तत्र हि विधानेनोक्तं तदाह यथाविधीति । एषामिति मण्डपस्था देवताः अनेनोपचारा उक्ताः ।

....

.... दृष्ट्या सन्तोऽनुगृह्यताम् ।

इति श्रीमहामाहेश्वराभिनवगुप्ताचार्यविरचिताया-
मभिनवभारत्यां नाट्यशास्त्रविवृतौ
मण्डपाध्यायो द्वितीयः ।

---

1 क - विधेयश्च पुरस्तस्य 2 ङ - समन्वितः 3 च - तत ऊर्ध्वं. 4 च - मेषां 5 ठ - प्रेक्षागृहलक्षणम् ।

श्रीः

नाट्यशास्त्रम्

अथ तृतीयोऽध्यायः

सर्वलक्षणसम्पन्ने कृते नाट्यगृहे शुभे ।
गावो वसेयुः सप्ताहं सह जप्यपरैर्द्विजैः ॥ १
ततोऽधिवासयेद्वेश्म रङ्गपीठं तथैव च ।
मन्त्रपूतेन तोयेन [1]प्रोक्षिताङ्गो निशागमे ॥ २
यथा स्थानान्तरगतो दीक्षितः प्रयतः शुचिः ।
त्रिरात्रोपोषितो भूत्वा [2]नायकोऽहतवस्त्रधृक् ॥ ३
नमस्कृत्य [3]महादेवं [4]सर्वलोकोद्भवं भवम् ।
[5]जगत्पितामहं चैव विष्णुमिन्द्रं [6]गुहं तथा ॥ ४
सरस्वतीं च लक्ष्मीं च सिद्धिं मेधां [7]धृतिं मतिम् ।
[8]सोमं सूर्यं च मरुतो लोकपालांस्तथाश्विनौ ॥ ५
मित्रमग्निं [9]सुरान्वर्णान् रुद्रान्कालं कलिं तथा ।
मृत्युं च [10]नियतिं चैव कालदण्डं तथैव च ॥ ६

॥ श्री ॥

यदाप्यायपरा लो …… ……………………।
………………………………… तत्तेजोवपुरैश्वरम् ॥

निष्पन्ने मण्डपे पूजावश्यं कर्तव्येति सङ्गतिः । तत्र प्रयोगक्रमोऽयं तथात्वेऽध्यायानन्तरं पूर्वरङ्गाभिधानापत्तेः तस्मान्मण्डपविधानशेष ए(वदर्शयि)ष्यते,

1 ड प्रोषिताङ्गो 2 ज - नाट्याचार्योऽहताम्बरः । 3 न - नमस्कृत्वा 4 ठ - सर्वलोकेश्वरं ज - विभुम् च - सर्वलोकोद्भवोद्भवम् 5 ज - पद्मयोनिं सुरगुरुं . 6 न - तथा गुहम् 7 ठ - स्मृतिं मतिम् । 8 ठ - सेन्दुं 9 च - स्वरान् 10 प - निर्ऋतिं

विष्णुप्रहरणं चैव नागराजं च वासुकिम्[1] ।
वज्रं विद्युत्समुद्रांश्च गन्धर्वाप्सरसो मुनीन् ॥ ७
[भूतान् पिशाचान् यक्षांश्च गुह्यकांश्च महोरगान् ।
असुरान्नाट्यविघ्नांश्च तथान्यान्देवराक्षसान्]॥ ८
तथा [2]नाट्यकुमारीश्च [3]महाग्रामण्यमेवच ।
[4]यक्षांश्च गुह्यकांश्चैव भूतसङ्घांस्तथैव च ॥ ९
[5]एतांश्चान्यांश्च देवर्षीन्प्रणम्य रचिताञ्जलिः ।
[6]यथास्थानान्तरगतान्समावाह्य ततो वदेत् । १०
[7]भगवद्भिर्निशायां नः कर्तव्यः [8]संपरिग्रहः ।
साहाय्यं चैव दातव्यमस्मिन्नाट्ये सहानुगैः ॥ ११
[9]सम्पूज्य सर्वानेकत्र कुतपं सम्प्रयुज्य च ।
जर्जराय प्रयुञ्जीत पूजां नाट्यप्रसिद्धये ॥ १२
[10]त्वं महेन्द्रप्रहरण सर्वदानवसूदन ।
[11]निर्मितस्त्वं सर्वदेवैः सर्वविघ्ननिबर्हण[12] ॥ १३

अवश्यपूज्यत्वात् । जप्यपरैरिति, ये रक्षोघ्ना मन्त्रास्तज्जापकैरित्यर्थः । तत इति सप्ताहादनन्तरम् । अधिवासयेदिति देवता मण्डपमधिवसन्त्यागच्छन्ति । नाट्याचार्यो धर्मतनदेवतोपनिमन्त्रणमधिवासनं वेश्मनः । दीक्षितो गृहीतव्रतः । नायको नाट्याचार्यः नमस्कृत्यात्राह्य वदेदिति सम्बन्धः । परमेश्वरस्मरणं च प्रथममुचितमिति महादेवमिति । महाग्रामणीर्गणपतिः । अन्यांश्चेति प्रथमाध्यायोक्तान् । एकत्रेति स्थण्डिलभूभागे । कुतपमिति चतुर्विधातोद्यभाण्डानि

---

1 ठ - खगेश्वरम् 2 ठ - नाट्यं च मातृश्च 3 ठ तथा ग्रामाधिदेवताः 4 ज प्रभृत्यादर्शेषु नास्ति 5 न - एतानन्यांश्च वै सर्वान्प्रणिपत्य कृताञ्जलिः । 6 ठ - यथास्थानं स्थितान्देवान्निमन्त्र्यैतद्वचो वदेत्, (न - वचो मम) 7 ठ - भवद्भिर्नो निशायां तु न - वदद्भिः श्वो निशायां तु 8 च - सपरि, न - कर्तव्यो नः 9 ठ - संपूज्य देवताः सर्वाः, न - निमन्त्र्य देवताः सर्वाः 10 च - महेन्द्रस्य प्रहरण त्वं दानवनिषूदन 11 घ - नमितः सर्वदेवैस्तु 12 ठ - निवारण

[1]नृपस्य विजयं शंस रिपूणां च पराजयम् ।
गोब्राह्मणशिवं[2] चैव नाट्यस्य च विवर्धनम् ॥ १४
एवं कृत्वा यथान्यायमुपास्यं[3] नाट्यमण्डपे ।
निशायां तु प्रभातायां पूजनं [4]प्रक्रमेदिह ॥ १५
आर्द्रायां वा मघायां वा याम्ये [5]पूर्वेषु च त्रिषु ।
आश्लेषामूलयोर्वापि कर्तव्यं रङ्गपूजनम् ॥ १६
आचार्येण तु युक्तेन शुचिना दीक्षितेन च ।
रङ्गस्योद्योतनं[6] कार्यं देवतानां च पूजनम् ॥ १७
दिनान्ते दारुणे घोरे मुहूर्ते [7]भूतदैवते ।
आचम्य तु यथान्यायं [8]देवता वै निवेशयेत् ॥ १८
रक्ताः प्रतिसराः [9]सूत्रं रक्तगन्धाश्च पूजिताः ।
रक्ताः सुमनसश्चैव यच्च रक्तं फलं भवेत् ॥ १९
यवैस्सिद्धार्थकैर्लाजैरक्षतैः शालितण्डुलैः[10] ।
नागपुष्पस्यमूलेन[11] वितुषाभिः प्रियङ्गुभिः ॥ २०

एकत्र निवेशनं जर्जरस्य पूजार्थमवस्थापनम् । निवसत्ययमिति भावे कल्यः । याम्यं भरणीनक्षत्रम् । पूर्वेष्वति नक्षत्रापेक्षानिर्देशः । तानि पूर्वफल्गुनीपूर्वाषाढा पूर्वाभाद्रपदा च । (आचम्येति) ज्वलितदर्भोल्मुकेन स्पर्शनं नीराचमनमिति प्रसिद्धम् । प्रतिसरा इति । सूत्रविनिर्मिता ग्रन्थिमन्तः कङ्कणविशेषाः । मण्डपस्य रङ्गपीठादेश्चोपर्युक्तं सर्वं निवेश्यते । सूत्रमिति । समन्ततो . . . रित्येतत्सर्वं शेषनिवेशनमित्यावाहनकालेऽर्घ्यदानमित्यर्थः । अन्ये तन्निवेशनमित्यधिकरणे ल्युट् मण्डपविशेषणं चैतत् । मण्डलं च यवादिभिरित्यादि । नागपुष्पं नागदन्तः[1] षोडशहस्तं[2] यथा भवति[3] तथा कार्यमिति, अतः चतुर्हस्तं

1 ग - नृत्यस्य, ज - नृपाय विजयं देहि 2 ठ - हितं 3 च - निदध्यात्, न - मुषित्वा 4 ठ - प्रक्रमेद्बुधः 5 ठ - पूर्वासु 6 च - उद्यापनं 7 ग - पूतदैवते 8 ठ - दैवतानि 9 ठ - तत्र 10 ठ - लक्षितैर्लाजतण्डुलैः 11 ज - चूर्णेन

1 नागरन्तः 2 हस्ता 3 भवन्ति

एतैर्द्रव्यैर्युतं [1]कुर्याद्देवतानां निवेशनम् ।
आलेखेन्मण्डलं[2] पूर्वं यथास्थानं यथाविधि ॥ २१
समन्ततश्च [3]कर्तव्यं हस्ताः षोडश [4]मण्डलम् ।
द्वाराणि चात्र कुर्वीत [5]विधानेन चतुर्दिशम् ॥ २२
मध्ये चैवात्र कर्तव्ये द्वे रेखे तिर्यगूर्ध्वगे ।
तयोः [6]कक्ष्याविभागेन [7]दैवतानि निवेशयेत् ॥ २३
पद्मोपविष्टं ब्रह्माणं [8]तस्य मध्ये निवेशयेत् ।
आदौ निवेश्यो भगवान्सार्धं भूतगणैर्भवः[9] ॥ २४
नारायणो महेन्द्रश्च [10]स्कन्दः सूर्योऽश्विनौ शशी ।
[11]सरस्वती च लक्ष्मीश्च श्रद्धा मेधा च पूर्वतः ॥
पूर्वदक्षिणतो वह्निर्निवेश्यः स्वाहया सह[12] ।
विश्वेदेवाः सगन्धर्वा [13]रुद्राः सर्वगणास्तथा ॥ २६
दक्षिणेन निवेश्यस्तु [14]यमो मित्रश्च सानुगः ।
पितॄन्पिशाचानुरगान् गुह्यकांश्च निवेशयेत् ॥ २७

रङ्गपीठपृष्ठ एव मण्डलमित्युक्तं भवति । तेन शङ्कादिभिः षोडशहस्तावकाशाभावः आसनस्तम्भादिवशात्तस्मादकृत एव रङ्गपीठे इत्यादि वृथैव बहुतरमुपन्यस्तम् (द्वे रेखे इति प्राक्तने) तिर्यग्गतैका दक्षिणोत्तरगता, पृष्ठे द्वितीया पूर्वपश्चिमगता। यतो रेखयोः कक्ष्यास्थानान्तराणि तेषु विभागेन भावितानि। तस्येति मण्डलस्य । पद्मोपविष्टमिति मध्ये पद्मं कार्यमित्यर्थः। आदाविति, तेन आदिदेशे ऐशानकोणे प्रथमावसरे च तथैवावाहनस्योक्तत्वात्। पद्मोपममिति

1 च - कार्यं 2 ङ - मण्डपं चैव 3 ठ - कर्तव्या 4 ङ - मण्डले 5 ठ - विधिना च 6 च - उक्तविभागेन 7 ठ - नियोगेन 8 च - रङ्गमध्ये 9 ठ - सर्वभूतगणैः शिवः 10 ठ स्कन्दार्कावश्विनौ तथा 11 ठ - सरस्वतीं च लक्ष्मीं च श्रद्धां मेधां 12 ठ - चन्द्रमा भानुरेव च 13 ठ - रुद्राश्च ऋषयस्तथा। न - रुद्राश्चाप्सरसो मुनिः 14 न - यमः प्रेतगणैः सह

नैर्ऋत्यां राक्षसांश्चैव [1]भूतानि च निवेशयेत्।
पश्चिमायां समुद्रांश्च वरुणं [2]यादसां पतिम्॥ २८
[3]वायव्यां वै दिशि तथा सप्तवायून्निवेशयेत्।
[4]तत्रैव विनिवेश्यस्तु गरुडः पक्षिभिः सह॥ २९
उत्तरस्यां [5]दिशि तथा धनदं संनिवेशयेत्।
नाट्यस्य मातृश्च तथा यक्षानथ [6]सगुह्यकान्॥ ३०
तथैवोत्तरपूर्वायां [7]नन्द्याद्यांश्च गणेश्वरान्।
ब्रह्मर्षिभूतसंघांश्च यथाभागं निवेशयेत्॥ ३१
स्तम्भे सनत्कुमारं[8] तु दक्षिणे दक्षमेव च।
ग्रामण्यमुत्तरे स्तम्भे [9]पूजार्थं संनिवेशयेत्॥ ३२
अनेनैव विधानेन यथास्थानं यथाविधि।
[10]सुप्रसादानि सर्वाणि दैवतानि निवेशयेत्॥ ३३
स्थाने स्थाने यथान्यायं[11] विनिवेश्य तु देवताः।
[12]तासां प्रकुर्वीत ततः पूजनं तु यथार्हत[13]ः॥ ३४

प्रतिदिशः सम्बन्धनीयत्वेन नवपद्मण्डलमित्युक्तं भवति। दक्षिणपूर्वे आग्नेयस्तम्भ इति, उत्तरपूर्वे ऐशानस्तम्भ इत्यर्थः। सुप्रसादानीति, तथा[1]स्थानेन निवेशितानीत्यर्थः। यथार्हतस्तत्तदागमेषु यो यस्यां विधिर्दृश्यते देवतायां तेन क्रमेण।

---

1 ठ - सर्वभूतान् 2 ठ - च निवेशयेत् न - चाम्भसां पतिम् 3 च - वायव्यायां 4 न - निवेशयेच्च तत्रैव गरुडं पक्षिभिः सह। 5 न - कुबेरं च सर्वैरनुचरैर्वृतम् (ज - सह) 6 च - सहानुगान्। 7 न - नन्दिनं च 8 न - च 9 न - पश्चिमे स्कन्दमेव च। स्तम्भे स्तम्भे यथान्यायं पूजार्थं संनिवेशयेत् 10 न - सुप्रसन्नानि ठ - वर्णरूपान्विताः सर्वा देवताः संनिवेशयेत्। 11 न - विनिवेश्यास्तु 12 ठ - प्रकुर्वीत ततस्तासां, (न - ततःपश्चात्) 13 न - यथार्थतः

1: स्थानेन

देवताभ्यस्तु[1] दातव्यं सितमाल्यानुलेपनम् ।
[2]गन्धर्ववह्निसूर्येभ्यो रक्तमाल्यानुलेपनम् ॥ ३५

गन्धमाल्यांश्च[3] धूपं च यथावदनुपूर्वशः ।
दत्त्वा ततः प्रकुर्वीत [4]बलिं पूजां यथाविधि । ३६

ब्रह्माणं[5] मधुपर्केण पायसेन सरस्वतीम् ।
शिवविष्णुमहेन्द्राद्याः सम्पूज्या मोदकैरथ ॥ ३७

घृतौदनेन [6]हुतभुक्सोमार्कौ तु गुडौदनैः ।
विश्वेदेवाः सगन्धर्वा मुनयो मधुपायसैः ॥ ३८

यममित्रौ [7]च सम्पूज्यावपूपैर्मोदकैस्तथा ।
पितॄन्पिशाचानुरगान् सर्पिःक्षीरेण तर्पयेत् ॥ ३९

पक्वान्नेन तु मांसेन सुरासीधुफलासवैः ।
अर्चयेद्भूतसंघांश्च [8]चणकैः पललाप्लुतैः ॥ ४०

अनेनैव विधानेन सम्पूज्या मत्तवारणी ।
[9]पक्वान्नेन तु मात्स्येन सम्पूज्या रक्षसां गणाः ॥ ४१

[10]सुरामांसप्रदानेन [11]दानवान्प्रतिपूजयेत् ।
[12]शेषान्देवगणांस्तज्ज्ञः सापूपोत्कारिकोदनैः ॥ ४२

---

1 ठ - दैवतेभ्यस्तु 2 ठ - वह्निगन्धर्व 3 ठ - गन्धमाल्यं च, च - गन्धाद्य 4 च - पूजनं च यथार्हतः । 5 ठ - द्रुहिणं 6 ज - वह्निश्च 7 ठ - समभ्यर्च्यौ मोदकैः सूपमिश्रितैः 8 ग - वेणूरुपललाप्लुतैः ज - पयसाप्लुतैः 9 प - पक्वान्नेन तु मांसेन, ठ - पक्वामंकेन 10 च - सुरया गुडधानेन मांसैश्च विधिनार्चयेत् 11 न - विधिना प्रति 12 च - शेषाः देवगणाः सर्वे पूपकाद्वारिकोत्करैः

मत्स्यैश्च पिष्टभक्ष्यैश्च सागरान्सरितस्तथा ।
[1]संपूज्य वरुणं चापि दातव्यो घृतपायसः ॥ ४३
नानामूलफलैश्चापि[2] मुनीन्सम्प्रतिपूजयेत् ।
वायूंश्च पक्षिणश्चैव [3]विचित्रैर्भक्ष्यभोजनैः । ४४
[4]मातृर्नाट्यस्य सर्वास्ता धनदं च सहानुगैः ।
[5]अपूपैर्लिपिकामिश्रैर्भक्ष्य भोज्यैः प्रयत्नतः ॥ ४५
[6]एवमेषां बलिः कार्यो नानाभोजनसंश्रयः ।
पुनर्मन्त्रविधानेन [7]बलिकर्म [8]च वक्ष्यते ॥ ४६
[9]देवदेव महादेव सर्वलोकपितामह ।
मन्त्रपूतमिदं सर्वं [10]प्रतिगृह्णीष्व मे बलिम् ॥ ४७
पुरन्दरामरपते वज्रपाणे शतक्रतो ।
प्रगृह्यतां बलिर्देव विधिमन्त्रपुरस्कृतः ॥ ४८
देवसेनापते स्कन्द भगवन् शङ्करप्रिय ।
बलिः प्रीतेन मनसा षण्मुख प्रतिगृह्यताम् ॥ ४९
[11]नारायणामितगते पद्मनाभ सुरोत्तम ।
प्रगृह्यतां बलिर्देव मन्त्रपूतो मयार्पितः ॥ ५०
देवदेव महादेव गणेश त्रिपुरान्तक ।
प्रगृह्यतां बलिर्देव मन्त्रपूतो मयोद्यतः[12] ॥ ५१

1 ठ - अभ्यर्च्यं च - सदृशं वरुणायाथ दातव्यं घृतपायसम् 2 ठ - फलैश्चैव 3 प - विविधै 4 ठ - नाट्यस्य च तथा मातॄः 5 प - अपूपलेपिकामिश्रैः भक्ष्यभोज्यैश्च पूजयेत् 6 च एवमेवंविधं कार्यं 7 ठ - बलिकर्मणि 8 च - प्रचक्षते 9 ग - देवदेव महाभाग पद्मयोने 10 ठ - बलिं देव गृहाण नः 11 छ - नारायण हरे विष्णो द - नारायणामृतपते 12 न - मन्त्रसंस्कारसंस्कृतः

देवदेव महायोगिन्देवदेव सुरोत्तम ।
संप्रगृह्य बलिं देव रक्ष विघ्नात्सदोत्थितात् ॥ ५२
देवदेवि महाभागे सरस्वति हरिप्रिये ।
प्रगृह्यतां बलिर्मातर्मया भक्त्या समर्पितः ॥ ५३
नानानिमित्तसम्भताः पौलस्त्याः सर्व एव ते[1] ।
राक्षसेन्द्रा महासत्वाः [2]प्रतिगृह्णीत मे बलिम् ॥ ५४
लक्ष्मीः सिद्धिर्मतिर्मेधा सर्वलोकनमस्कृताः ।
मन्त्रपूतमिमं देव्यः प्रतिगृह्णन्तु मे बलिम् ॥ ५५
[4]सर्वभूतानुभावज्ञ लोकजीवन मारुत ।
प्रगृह्यतां बलिर्देव मन्त्रपूतो [5]मयोद्यतः ॥ ५६
देववक्त्र सुरश्रेष्ठ धूमकेतो हुताशन ।
भक्त्या समुद्यतो देव बलिः सम्प्रतिगृह्यताम् ॥ ५७
सर्वग्रहाणां [6]प्रवर तेजोराशे दिवाकर ।
भक्त्या मयोद्यतो देव बलिः सम्प्रतिगृह्यताम् ॥ ५८
सर्वग्रहपते सोम द्विजराज जगत्प्रिय ।
[7]प्रगृह्यतामेष बलिर्मन्त्रपूतो मयोद्यतः ॥ ५९
[8]महागणेश्वराः सर्वे नन्दीश्वरपुरोगमाः ।
[9]प्रगृह्यतां बलिर्भक्त्या मया सम्प्रतिचोदितः ॥ ६०
नमः पितृभ्यः सर्वेभ्यः [10]प्रतिगृह्णन्त्विमं बलिम् ।

1 प - तु 2 ठ - प्रतिगृह्णी न्त्विमंबलिम् 3 च - देव्यःसिद्धिवृद्धिलक्ष्म्यः 4 च भावज्ञ सर्वभूतानां 5 च मयार्पितः 6 च - सम्पूज्य 7 च प्रगृह्यतां बलिर्देव 8 द - महासत्त्वोद्धुराः 9 ठ - प्रतिगृह्ण न्त्विमं भक्त्या बलिङ्सम्यङ् मयोदितम् न - प्रगृह्यतामेष बलिर्मयाभक्त्या प्रचोदितः । द - गृह्यतां मे बलिर्भक्त्या गणाः संप्रतिपादितः 10 प - प्रतिगृह्णन्तु मे

भूतेभ्यश्च[1] नमो नित्यं [2]येषामेष बलिः प्रियः ॥ ६१

कामपाल नमो नित्यं यस्यायं ते विधिः कृतः ।

नारदस्तुम्बुरुश्चैव विश्वावसुपुरोगमाः ॥ ६२

परिगृह्णन्तु मे सर्वे गन्धर्वा बलिमुद्यतम्[3] ।

यमो मित्रश्च भगवानीश्वरौ लोकपूजितौ ॥ ६३

इमं मे प्रतिगृह्णीतां बलिं मन्त्रपुरस्कृतम् ।

रसातलगतेभ्यश्च [4]पन्नगेभ्यो नमो नमः ॥ ६४

दिशन्तु सिद्धिं नाट्यस्य पूजिताः पापनाशनाः ।

सर्वाम्भसां पतिर्देवो वरुणो हंसवाहनः ॥ ६५

पूजितः प्रीतिमानस्तु ससमुद्रनदीनदः ।

वैनतेय महासत्त्व सर्वपक्षिपते विभो ॥ ६६

प्रगृह्यतां बलिर्देव मन्त्रपूतो [5]मयोद्यतः ।

धनाध्यक्षो यक्षपतिर्लोकपालो धनेश्वरः ॥ ६७

[6]सगुह्यकस्सयक्षश्च प्रतिगृह्णातु मे बलिम् ।

नमोऽस्तु नाट्यमातृभ्यो ब्राह्म्याद्याभ्यो नमो नमः ॥

सुमुखीभिः प्रसन्नाभिर्बलिस्सम्प्रतिगृह्यताम्[7] ।

रुद्रप्रहरणं [8]सर्वं प्रतिगृह्णातु मे बलिम् ॥ ६९

विष्णुप्रहरणं चैव विष्णुभक्त्या मयोद्यतम् ।

तथा [9]कृतान्तः कालश्च [10]सर्वप्राणिवधेश्वरौ ॥ ७०

---

1 न - ऋषिभ्यश्च 2 ठ - तेषामेष 3 ठ - बलिमुत्तमम् द - बलिं-गान्धर्वपुङ्गवाः 4 ठ - चरेभ्यस्तु 5 ठ - मयोदितः 6 ड सगुह्यकैश्च यक्षैश्च 7 च - बलिरद्य प्रगृह्यताम् 8 ठ - चैव . 9 द - भूतान्तकः कालः 10 च सर्वप्राणधनेश्वरः

मृत्युश्च नियतिश्चैव प्रतिगृह्णातु मे बलिम् ।
याश्चास्यां मत्तवारण्यां संश्रिता[1] वास्तुदेवताः ॥ ७१
मन्त्रपूतमिमं सम्यक्प्रतिगृह्णन्तु मे बलिम् ।
[2]अन्ये ये देवगन्धर्वा दिशो दश समाश्रिताः ॥ ७२
दिव्यान्तरिक्षभौमाश्च तेभ्यश्चायं बलिः कृतः ।
कुम्भं [3]सलिलसम्पूर्णं पुष्पमालापुरस्कृतम् ॥ ७३
स्थापयेद्रङ्गमध्ये तु सुवर्णं चात्र दापयेत् ।
आतोद्यानि तु सर्वाणि कृत्वा वस्त्रोत्तराणि तु ॥ ७४
गन्धैर्माल्यैश्च धूपैश्च भक्ष्यैर्भोज्यैश्च पूजयेत् ।
पूजयित्वा तु सर्वाणि दैवतानि यथाक्रमम् ॥ ७५
[4]जर्जरस्त्वभिसंपूज्यः स्यात्ततो विघ्नजर्जरः ।
श्वेतं शिरसि वस्त्रं स्यान्नीलं रौद्रे [5]च पर्वणि ॥ ७६
विष्णुपर्वणि वै पीतं रक्तं स्कन्दस्य पर्वणि ।
[6]मूलपर्वणि चित्रं तु देयं वस्त्रं हितार्थिना ॥ ७७
सदृशं च प्रदातव्यं धूपमाल्यानुलेपनम् ।
आतोद्यानि च सर्वाणि वासोभिरवगुण्ठयेत् ॥ ७८
[7]गन्धैर्माल्यैश्च धूपैश्च भक्ष्यभोज्यैश्च पूजयेत् ।
सर्वमेवं विधिं कृत्वा [8]गन्धमाल्यानुलेपनैः ॥ ७९
विघ्नजर्जरणार्थं तु जर्जरं त्वभिमन्त्रयेत् ।

माल्यानुलेपनं . . . तापि सुरादिप्रधानो बलिरित्यर्थः । अत्र पूजितस्थापितस्य कुम्भस्य विनियोगो भविष्यति ।

---

1 द - संस्थिता 2 क - अन्येऽपि ये देवगणा द - अथान्येऽपि देवगणा 3 ज - सलिलपूर्णं च पर्णमाला 4 ठ - जर्जराः प्रतिपूज्याः स्युस्ततो वै विष्णुजर्जरः । 5 च - रौद्रेऽथ 6 द - मृड 7 ठ - गन्धमाल्यैश्च 8 ठ - धूपमल्यानु

[1]अत्र विघ्नविनाशार्थं पितामहमुखैस्सुरैः ॥ ८०
निर्मितस्त्वं [2]महावीर्यो वज्रसारो महातनुः ।
शिरस्ते रक्षतु ब्रह्मा [3]सर्वैर्देवगणैः सह ॥ ८१
द्वितीयं तु हरः पातु तृतीयं च जनार्दनः ।
चतुर्थं [4]च कुमारश्च पञ्चमं पन्नगोत्तमः ॥ ८२
नित्यं [5]सर्वेऽपि पान्तु त्वां [6]पुनस्त्वं च शिवो भव ।
नक्षत्रेऽभिजिति [7]श्रेष्ठे जातस्त्वमरिषूदनः ॥
जयं चाभ्युदयं चैव [8]पार्थिवस्य समावह ।
जर्जरं पूजयित्वा च बलिं सर्वं [9]निवेद्य च ॥ ८४
अग्नौ होमं ततः कुर्यान्मन्त्राहुतिपुरस्कृतम् ।
[10]हुत्वा स एव दीप्ताभिल्कलाभिः परिमार्जनम् ॥ ८५
नृपतेर्नर्तकीनां च कुर्याद्दीप्त्यभिवर्धनम् [11]।
अभिद्योत्य सहातोद्यैर्नृपतिं नर्तकीं तथा ॥ ८६
मन्त्रपूतेन तोयेन पुनरभ्युक्ष्य तान्वदेत् ।
[12]महाकुले प्रसूताः स्थ गुणौघैश्चाप्यलंकृताः ॥ ८७
यद्वो जन्मगुणोपेतं तद्वो[13] भवतु नित्यशः । [13]
एवमुक्त्वा ततो वाक्यं नृपतेर्भूतये बुधः ॥ ८८
नाट्ययोगप्रसिद्ध्यर्थमाशिषस्सम्प्रयोजयेत् ।

आहुतिराहवनम् । हुत्वाहवनं तथा सत्याहुतिः स्यात् । दीप्ताभिः...... ।

---

1 ठ - विघ्नानां शमनार्थं हि देवैर्ब्रह्मपुरोगमैः 2 च - महावीर्यं वज्रसत्त्वे 3 ठ - सर्वदेव 4 न - रक्षतु स्कन्दः द - च कुमारस्ते 5 ठ - सर्वे हि, द - सर्वेऽभि 6 ठ - सुरास्त्वं द - सुरार्थे 7 च - त्वं तु सूतितोऽहितसूदनः ठ - रिपुसूदनः 8 ठ - पार्थिवाय प्रयच्छतः 9 द - निवेदयेत् 10 न - समाप्तेवंविधानेऽसिन्नुल्काभिः द - हुताश 11 न - नर्तकीभावं कार्यं दीप्त्यभिवर्धनम् 12 द - महागुण 13 द - तद्वो

सरस्वती धृतिर्मेधा ह्रीः श्रीर्लक्ष्मीर्धृतिर्मतिः[1] ॥ ८९

पान्तु वो मातरः [2]सौम्यास्सिद्धिदाश्च भवन्तु वः ।

होमं कृत्वा यथान्यायं हविर्मन्त्रपुरस्कृतम् ॥ ९०

भिन्द्यात्कुम्भं [3]ततश्चैव नाट्याचार्यः प्रयत्नतः ।

अभिन्ने तु भवेत्कुम्भे स्वामिनः शत्रुतो भयम् ॥ ९१

[4]भिन्ने चैव तु विज्ञेयः स्वामिनः शत्रुसंक्षयः ।

भिन्ने कुम्भे ततश्चैव [5]ना ह्याचार्यः प्रयत्नतः ॥ ९२

प्रगृह्य दीपिकां दीप्तां सव रङ्गं प्रदीपयेत् ।

[6]क्ष्वेडितैः स्फोटितैश्चैव वल्गितैश्च प्रधावितैः[7] ॥ ९३

रङ्गमध्ये तु तां दीप्तां [8]सशब्दां सम्प्रयोजयेत्[9] ।

[10]शङ्खदुन्दुभि निर्घोषैर्मृदङ्ग पणवै स्तथा ॥ ९४

सर्वातोद्यैः प्रणदितै रङ्गयुद्धानि कारयेत् ।

[11]तत्र च्छिन्नं च भिन्नं च दारितं च सशोणितम् ॥ ९५

[12]क्षतं प्रदीप्तमायस्तं निमित्तं सिद्धिलक्षणम्[13] ।

सम्यगिष्टस्तु रङ्गो वै स्वामिनः [14]शुभमावहेत् ॥ ९६

कुम्भस्य विनियोगमाह भिन्द्यादिति ।

---

1 ठ - मतिः स्मृतिः 2 द - सर्वाः 3 च - ततश्चैवातोद्याचार्यः 4 च-भवेद्भिन्ने तु कुम्भे तु न - भिन्ने तु जायते राज्ञः शत्रूणां चैव संक्षयः द - भिन्ने तु जायते राज्ञः सर्वशत्रुपरिक्षयः 5 ठ - नाट्याचार्योऽप्यपेतभीः 6 द - क्ष्वेडितास्फोटितैश्चैव वल्गितैर्विप्रधावितैः 7 ड - प्रसृतैस्तथा 8 द - सदा-वर्तिं प्रयोजयेत् 9 न - सम्प्रदापयेत् 10 द - गाढ 11 न - भिन्नं च छिन्नं च, द - तदुच्छिन्नं 12 ग - क्षतं दीप्तामयस्तम्भे 13 ठ - सिद्ध लक्षणम् 14 द - सिद्धि ।

[1]पुनस्सबालवृद्धस्य तथा जनपदस्य च ।
दुरिष्टस्तु तथारङ्गो दैवतैर्दुरधिष्ठितः ॥ ९७
नाट्यविध्वंसनं कुर्यान्नृपस्य च तथाशुभम्[2] ।
[3]य एवंविधिमुत्सृज्य यथेष्टं सम्प्रयोजयेत् ॥ ९८
प्राप्नोत्यपचयं शीघ्रं तिर्यग्योनिं च गच्छति ।
यज्ञेन [4]संमतं ह्येतद्रङ्गदैवतपूजनम् ॥ ९९
अपूजयित्वा रङ्गं तु नैव [5]प्रेक्षां प्रयोजयेत् ।
पूजिताः पूजयन्त्येते मानिता मानयन्ति च ॥ १००
तस्मात्सर्वप्रयत्नेन कर्तव्यं रङ्गपूजनम् ।
[6]न तथाशु दहत्यग्निः प्रभञ्जनसमीरितः ॥ १०१
यथा ह्यपप्रयोगस्तु प्रयुक्तो दहति क्षणात् ।
शास्त्रज्ञेन विनीतेन शुचिना दीक्षितेन च ॥ १०२
नाट्याचार्येण शान्तेन कर्तव्यं रङ्गपूजनम् ।
स्थानभ्रष्टं तु यो दद्याद्बलिमुद्विग्नमानसः ॥ १०३
मन्त्रहीनो यथा होता प्रायश्चित्ती भवेत्तु सः ।
[7]इत्ययं यो विधिर्दृष्टो रङ्गदैवतपूजने ॥ १०४

उद्विग्नमानस इत्यनवधानरूपं लक्ष्यते । नवे नाट्यगृह इति मण्डपशेषत्वमेवोक्तम् । प्रेक्षायां चेति नवायामिति केचित्संबन्धयन्तिं तेन पूजाकार्येति । अन्ये तु प्रेक्षारम्भे सर्वथा पूजा कार्येत्याहुरिति शिवम् ॥

इत्थं तृतीयमध्यायं ग्रन्थिस्थानेषु योजये[त्] ।
बुद्ध्याभिनवगुप्तोऽहं शिवतातत्त्वबृंहितः ॥

---

1 ठ - पुरस्याबाल द - पुरःस 2 न - नृपत्वस्यासुखावहम् 3 न - यस्त्वेवं 4 च - संमिते द - संमितं 5 क - प्रेक्ष्यं 6 न - न तथाग्निः प्रदहति द - सार्धं 7 ज - एवमेव

नवे नाट्यगृहे [1]कार्यः प्रेक्षायां [2]च प्रयोक्तृभिः।

इति श्रीभारतीये नाट्यशास्त्रे रङ्गदैवतपूजनं[3]
नाम तृतीयोऽध्यायः
समाप्तः।

इति श्रीमहामाहेश्वराभिनवगुप्तविरचितायां भारतीय-
नाट्यशास्त्रविवृतावभिनवभारत्यां रङ्गदैवतपूजनं
नाम तृतीयोऽध्यायः समाप्तः

---

1 ठ - कार्यं 2 - तु प - रङ्गदेवता ठ - रङ्गदैवतपूजाविधानं.

श्रीः

नाट्यशास्त्रम्

अथ चतुर्थोऽध्यायः

एवं तु पूजनं कृत्वा मया [1]प्रोक्तः पितामहः।
आज्ञापय विभो क्षिप्रं कः प्रयोगः प्रयुज्यताम्॥ १

श्रीः

अभिनवभारती

अथ चतुर्थोऽध्यायः

स्वविलासैरिदं विश्वं यो दर्शयति सन्ततम्।
समीरमूर्तिं तं वन्दे गिरिराजसुताप्रियम्॥

एवन्त्विति प्रथमाध्यायोक्ताभिप्रायेणेदमुच्यते। तथा हि—

"मर्त्यलोकगताः सर्वे शुभां पूजामवाप्स्यथ" (१-१२७)

इति एवमवश्यकार्या पूजा। तत्र च;

"रङ्गपूजां कुरुष्वेति मामेव समचोदयम्" (१-९३)

इति वचनानुसारेण वेदं प्रोक्तमित्येवमिति। द्रुहिणाज्ञप्तेन सते (मये)त्यर्थः,। मध्ये तु,

"अथवा याः क्रियास्तत्र लक्षणं यच्च पूजनम्।
भविष्यद्भिर्नरैः कार्यं कथं तन्नाट्यवेश्मनि" (२-२)

इति मुनिप्रश्नितपूजा कथं कृतेति प्रसङ्गादेवमंशस्य यथासंभवं पूरकं सर्वात्मना दिव्ये[:] नाट्यगृहे भोजनदानलाङ्गलोत्कर्षणादिविधेः समस्तस्यासम्भवादिति प्रथमाध्यायानन्तर्यमेवास्य तु कर्तव्यम्। क्षिप्रमित्यनेन पूजानन्तरं प्रयोगेण न चिरयितव्यमित्युक्तं भवति। प्रयुज्यत इति प्रयोगो दशरूपकान्यतमं यद्यपि च संफेटविद्रवकृता प्रस्तावना बद्धेत्युक्तं (१-५८) तथापि प्रयोगो विघ्नैः

1 क - प्रोक्तं पितामह।

1 सम्फेट

ततोऽस्म्युक्तो भगवता [2]योजयामृतमन्थनम् ।
एतदुत्साहजननं [3]सुरप्रीतिकरं तथा[4] ॥ २
योऽयं समवकारस्तु धर्मकामार्थसाधकः ।
मया [5]प्रग्रथितो विद्वन्स प्रयोगः [6]प्रयुज्यताम् ॥ ३
तस्मिन्समवकारे तु प्रयुक्ते देवदानवाः ।
हृष्टाः समभवन्सर्वे कर्मभावानुदर्शनात् ॥ ४

स्तभित इति नाट्यमण्डपे विघ्नसान्त्वनदैवतपूजने च कृतेऽन्त्यएवाय मुपक्रम इति युक्त एव प्रश्नः ।

कः प्रयोगः प्रयुज्यतामित्यत्रोत्तरं श्लोकद्वयेनाह—ततोऽस्मीति योजयेति स्वपुत्रानटां (त्रान्नटां)स्तं प्रयोगं पुनरनुसन्धानशिक्षयेत्यर्थः । यो धर्मकामार्थोपायोपदेशको मया प्राङ्नाट्यवेदनिर्माणावधौ ग्रथितोऽयमिति च गुणनिकया त्वया सम्यक्साक्षात्कारकल्पत्वनयनयोग्यत्वकृतोऽमृतमथनं नाम समवकाराख्यः प्रयोगः, सह (स) विद्वन्ननुप्रयोज्यतामिति श्लोकद्वये सङ्गतिः । तुर्हेतौ, यस्मादेतदुत्साहजननं चतुर्विधनायकस्थायिभावोत्साहप्रभववीररसात्मकं । तथेति तेन प्रकारेण सुराणां सर्वेषां प्रीतिं रसनारूपां चर्वणालक्षणां करोति । उत्साहो जननो यस्येति समासः। तेन च प्रीतिप्रकारेणोत्साहस्य त्रिवर्गोपायविषयस्य जननम्, एतेन दृश्यं श्रव्यमित्यनुसंहितम् । सङ्गतं महावाक्यार्थाभिप्रायेणापि किञ्चिच्छब्दोन्मीलनाभिप्रायेणात्र कार्यम् । तेन समवकीर्यतेऽर्थो यत्र स समवकारः । सङ्गतिश्च

"देवासुरवीजकृतः प्रख्यातोदात्तनायकश्चैवं" (१८-१०९)

इत्यनेन दर्शितः(ता), "अङ्कोऽङ्कस्त्वन्यार्थः कर्तव्य" (१७-११४) इत्यनेन चावकीर्णता। एष च प्रयोग (सम)ये सुखभूयिष्ठतया एकरसे वस्तुन्युद्वेगशीलाः एकानुसन्धानप्रयासभीरवश्च देवतुल्याः । अमृतमथनं समवकार इति भिन्नलिङ्गसामानाधिकरण्यसूचनद्वारेण तदेव तदिति साक्षात्कारकल्पनाद्व्यवधानविषय .... स्याह तत एव विक्रमोर्वशीयस्वप्न वा सवदत्ता(त्ते) नाटकमिति व्यवहरन्ति ।

1 ठ - ततो ह्युक्तो 2 द - योजयामृतमन्थनात् 3 क - सर्वे 4 ठ - महत् 5 ज - प्राग्ग्रथितो 6 द - प्रत्यास ।

कस्यचित्त्वथ कालस्य मामाहाम्बुजसम्भवः ।
नाट्यं सन्दर्शयामोद्य[1] त्रिनेत्राय महात्मने ॥ ५
ततः सार्धं सुरैर्गत्वा [2]वृषभाङ्कनिवेशनम् ।
[3]समभ्यर्च्य शिवं पश्चादुवाचेदं पितामहः ॥ ६
मया समवकारस्तु योऽयं सृष्टः सुरोत्तम ।
श्रवणे दर्शने चास्य प्रसादं कर्तुमर्हसि ॥ ७
पश्याम इति देवेशो द्रुहिणं [4]वाक्यमब्रवीत् ।
ततो मामाह भगवान् [5]सज्जो भव महामते ॥ ८
ततो हिमवतः पृष्ठे नानानगसमाकुले[6] ।
बहुचूतद्रुमाकीर्णे[7] रम्यकन्दरनिर्झरे ॥ ९
पूर्वरङ्गे कृते[8] पूर्वं तत्रायं द्विजसत्तमाः[9] ।
तथा त्रिपुरदाहश्च[10] डिमसंज्ञः प्रयोजितः ॥ १०

एवमितिहासस्य परिसमाप्तिं पश्यन्सकलप्रयोगप्राणभूतकैशिकीसर्वस्व-भूतनृत्तप्रयोगप्रस्तावनायेतिहासमनुसन्धत्ते । कस्यचित्त्विति । तावता कालेन गतेन हेतुनेत्यर्थः, एतेन नाट्यप्रयोगस्तद्विदे प्रथमं दर्शनीय इति दर्शयति । तेन यद्बलात्प्रयोगो ब्रह्मणे दर्शित इति व्याख्यातं तदसदेव, न चोपयुक्तं वस्तु भगवते प्रदर्शयितुमुपयोजयेदिति चासङ्गतं स्यात्, सन्दर्शयाम इति चानेन कवेस्तन्मध्ये प्रवेशसूचनेनोत्प्रेक्षकत्वसूचनं स्यादित्यलमनेन महात्म(मति)शब्देन।

तस्यैवात्र प्रेक्षणे सम्यगौचित्यमाह श्रवणे दर्शने चेति । अनुसन्धत्ते तथा पूर्वं परीक्षकः कविना श्रावयितव्य इति श्रवण इत्यनेनोक्तम् । सामाजिकास्तु श्रावयितव्या इति नातीव समञ्जसं, तावत्तेषां प्रवृत्त्ययोगात् । श्रवणादेव चोपदेशासिद्धौ प्रयोगवैफल्यात्परमेश्वरस्य परीक्षकत्वात् परितोष्यत्वाच्च ज्ञानातिशयेन रसचर्वणात्मकमहाभोगसमर्पणेन च ।

1 ठ - सन्दर्शयामोऽत्र क - सन्दर्शयामोऽन्यं द - संदर्शयिष्यामः 2 द - त्र्यम्बकस्य 3 ठ - अभ्यर्च्य च 4 द - पुनरब्रवीत् 5 ठ - सज्जीभव 6 ठ - समावृते 7 ठ - बहुभूतगणाकीर्णे 8 ठ - पूर्वरङ्गः कृतः 9 प - द्विजसत्तमः, छ - तत्रार्य द्विजसत्तमः 10 च - दाहस्थो ।

ततो भूतगणा हृष्टाः कर्मभावानुकीर्तनात्[1]।
महादेवश्च सुप्रीतः पितामहमथाब्रवीत् ॥ ११
अहो[1] नाट्यमिदं सम्यक्त्वया[2] सृष्टं महामते[3]।
यशस्यं च शुभार्थं च पुण्यं[4] बुद्धिविवर्धनम् ॥ १२
मयापीदं स्मृतं नृत्यं[5] सन्ध्याकालेषु नृत्यता[6]।
नानाकरणसंयुक्तैरङ्गहारैर्विभूषितम्[7] ॥ १३
पूर्वरङ्ग[8] विधावस्मिंस्त्वया सम्यक्प्रयोज्यताम्[9]।

तत्र पूर्वरङ्गपूर्वकत्वं प्रयोगक्रमस्य दर्शयति पूर्वरङ्ग इत्यादिना। अयमिति समवकारः। परमेश्वरचरितप्राधान्येन च त्रिपुरदाहसंबन्धो डिमः प्रयुक्त इत्यनेन परीक्षकपरितोषनिमित्तं प्रयोक्तृभिः किञ्चित्प्रयोज्यमित्याह। परितोषं फलतः प्रकटयति मयापीदमिति। इत्यनेनेदमाह—भरतमुनिना [1]तावद्भगवन्नृत्त कैशिकीदर्शनात्तत्प्रयोगार्थमनुस्मृत्य किञ्चिन्नियोजितम्, तत्तु सम्यगुपदेशाभावान्नातीव सुश्लिष्टमिति। अत एव वक्ष्यति सम्यगिति। स्मृतमित्यनादित्वमस्य दर्शयति। बहुवचनेनादरविषयतामिति। अङ्गहार एव नृत्तफलं प्रसूते तदङ्गानि तु करणादीनि द्वात्रिंशन्नृत्तकर्माणि प्रधानानीत्याशयेन विशेषणयोगमाह नानेति। विनियोगमस्य दर्शयति पूर्वरङ्गविधाविति। कतिस्थाने रङ्गे, नाट्यप्रयोगे(गो) यः पूर्वो भागस्त्वया शुद्धो वैचित्र्यरहितः प्रयुक्तः स एतेन नृत्तेन मिश्रितश्चित्रो नामेति प्रासिद्ध्यात् भरत इत्येष भविष्यति। भरतमुनिना प्रत्याहाराद्यन्तर्यवनिकागतमङ्गनवकं गीतक(महागीतक)रचनान्तकमङ्गदशकं यत्प्रयोगे नृत्तविरहितमेव प्रयुक्तं कर्तव्यमात्रेण, न तु कृतमङ्गदशकं यत्प्रयुक्तं तद्दृष्टादृष्टोभयप्रयोजनमपि यथा तत्र रञ्जकत्वं किञ्चित्। अनेन तु विमिश्रं विचित्रं दृष्टादृष्टात्मकफलं सम्यग्वितरतीत्याभिप्रायो महावाक्यस्य। अस्मिन्निति त्वं प्र(त्वत्प्र?)युयुक्षितप्रयोगोचितोद्धतपूर्वरङ्गप्रयोगविधौ तत्प्रयुक्ता इमे करणाङ्गहाराः सुकुमारपूर्वरङ्गे तु दैवी(देवी?)कृता अनुद्धता अङ्गहारा

1 क - ततो, च - अतो 2 च - हृष्टं, 3 द - महात्मना 4 द - कीर्तिं 5 च - नित्यं 6 प - पुरा सन्ध्यामुपासता, च - नृत्यताम् 7 द - विनिस्सृतम् 8 न - विधानेऽस्मिन् 9 ठ - प्रयुज्यताम्।

1 तावद्भरतनृत्त

[वर्धमानकयोगेषु[1] गीतेष्वासारितेषु च]॥ १४
महागीतेषु चैवार्थान्सम्यगेवाभिनेष्यसि[2] ।
यश्चायं पूर्वरङ्गस्तु त्वया शुद्धः प्रयोजितः ॥ १५
[3]एतद्विमिश्रितश्चायं चित्रो नाम भविष्यति ।
श्रुत्वा महेश्वरवचः [4]प्रत्युक्तं तु स्वयम्भुवा ॥ १६
[5]प्रयोगमङ्गहाराणामाचक्ष्व सुरसत्तम ।
[6]ततस्तण्डुं समाहूय प्रोक्तवान् [7]भुवनेश्वरः ॥ १७
प्रयोगमङ्गहाराणामाचक्ष्व भरताय वै[8] ।
ततो ये[9] तण्डुना[10] प्रोक्तास्त्वङ्गहारा महात्मना ॥ १८
नानाकरणसंयुक्तान्व्याख्यास्यामि सरेचकान् ।

इत्यभिप्रायात् । महागीतं च यद्गीतकवर्धमानमनादिरूपं तत्र सम्यग्वर्धमानादिक्रमेण, तथा वाक्यार्थाभिनये यथायोगं योज्यमानाङ्गहारपिण्डीबन्धक्रमेण येनाभिनेतुं शक्ष्यसि । आचक्ष्व भरतायेत्यनेन मुनिः परमेश्वरप्रसादपात्रमात्मानं बहुमन्यमानो मामेव प्रति देवेनैवेदं निरूपितम् । प्रयोजितस्त्वयाभिनेतुं शक्ष्यसीति दर्शयता प्रधानसन्निधौ तु नैव प्रतिपत्तव्यमित्याशयेन "श्रुत्वा महेश्वरवचः प्रत्युक्तं तु स्वयम्भुवे" त्युक्तमिति दर्शयति । तण्डुं समाहूयेति । सर्वत्र पाठे तण्डुशब्द एव युक्तः, ताण्डवशब्दव्युत्पत्तिवशात् । तण्डुमुनिशब्दौ (नन्दिभर)त्रयोरपरनामनी । य इत्यात्रेयप्रभृतीन्प्रति मुनिरेतदाह सकरणान्सरेचकानिति विशेषणत्वादङ्गहाराणामेव प्राधान्यम् । तत एव तेषामेव पूर्वमुद्देशः उपायत्वात् । तत्र करणानां पूर्वं लक्षणं तत्सञ्चयात्मकत्वात् ।

---

1 ठ - योगेन 2 छ - नेष्यति द - सम्यक्त्वमभिनेष्यसि 3 ठ - एभिर्विमिश्रित 4 ठ - प्रत्युक्तस्तु 5 छ प्रयोगं ह्यङ्ग 6 ड - ततस्ताण्डिनमाहूय 7 ठ - सुरसत्तमः 8 द - भरतायोपदिश्यताम् 9 ठ - वै 10 प - ताण्डिना ।

स्थिरहस्तोऽङ्गहारस्तु तथा [1]पर्यस्तकः स्मृतः ॥ १९

सूचीविद्धस्तथा[2] चैव ह्यपविद्धस्तथैव च ।

[3]आक्षिप्तकस्तु विज्ञेयस्तथा [4]चोद्धट्टितः स्मृतः॥ २०

विष्कम्भश्चैव सम्प्रोक्तस्तथा चैवापराजितः ।

विष्कम्भापसृतश्चैव मत्ताक्रीडस्तथैव च ॥ २१

स्वस्तिको रेचितश्चैव[5] पार्श्वस्वस्तिक एव च ।

वृश्चिकश्चैव सम्प्रोक्तो [6]भ्रमरश्च तथापरः ॥ २२

[7]मत्तस्खलितकश्चैव [8]मदाद्विलसितस्तथा ।

[9]गतिमण्डलोऽथ विज्ञेयः परिच्छिन्नस्तथैव च ॥ २३

[10]परिवृत्तरेचितः स्यात्तथा [11]वैशाखरेचितः ।

परावृत्तोऽथ विज्ञेयस्तथा [12]चैवाप्यलातकः ॥ २४

पार्श्वच्छेदोऽथ सम्प्रोक्तो [13]विद्युद्भ्रान्तस्तथैव च ।

[14]ऊरूद्वृत्तस्तथा चैव स्यादालीढस्तथैव च ॥ २५

[15]रेचितश्चापि विज्ञेयस्तथैवाच्छुरितः स्मृतः ।

तत्राङ्गहारोद्देशमाह स्थिरहस्त इत्यादिना । द्वात्रिंशदेत इति । अयं भावः—अष्टोत्तरे करणशते ज्ञाते चतुष्षष्टिकरणयोजनया त्रुटिताङ्गगत्या यद्यप्यानन्त्यमङ्गहाराणां तथापि प्राधान्याद्दृष्टफलं [1]प्रत्यधिकोपरक्ततया द्वात्रिंशन्नामतो निर्दिष्टाः । न तु परिगणनमेतत् । अङ्गानां देशान्तरे समुचिते प्रापणप्रकारोऽङ्गहारः, हरस्य चायं हारः प्रयोगः, अङ्गनिर्वर्त्यो हारोऽङ्गहारः, यद्वक्ष्यति—"महेश्वरस्य चरितं य इद"मिति (अ-४) तत्र निर्दिष्टानामेषां लक्षणं

---

1 प - पर्यस्तहस्तकः ठ पर्यस्तकस्ततः 2 ठ - वर्धस्तथा च स्यात् 3 ठ - आक्षिप्तकोऽथ 4 प - चोद्धटितः 5 क - रचितश्चैव 6 क - चमरश्च 7 छ - समस्खालितकश्चैव 8 प - पदाद्विलसित 9 ड - गतिमण्पलोत्थ 10 ड परिक्षिप्त 11 क - वैशाख एव च 12 ड - चैव ह्यलातकः 13 क - विद्युद्भ्रान्त 14 ठ - उद्वृत्तकस्तथा 15 ठ - रेचितं चापि ।

1 प्रत्यधिकोपाधितया ।

आक्षिप्तरेचितश्चैव[1] सम्भ्रान्तश्च तथापरः ॥ २६
अपसर्पस्तु[2] विज्ञेयस्तथा चार्धनिकुट्टकः[3] ।
द्वात्रिंशदेते सम्प्रोक्ता [4]अङ्गहारास्तु नामतः ॥ २७
एतेषां तु[5] प्रवक्ष्यामि प्रयोगं [6]करणाश्रयम् ।
हस्तपादप्रचारश्च[7] यथा योज्यः[8] प्रयोक्तृभिः ॥ २८
अङ्गहारेषु[9] वक्ष्यामि [10]करणेषु च वै द्विजाः[10] ।
सर्वेषामङ्गहाराणां निष्पत्तिः [11]करणैर्यतः ॥ २९
तान्यतः[12] सम्प्रवक्ष्यामि नामतः कर्मतस्तथा ।
हस्तपादसमायोगो[13] नृत्यस्य करणं भवेत् ॥ ३०

वाच्यमित्याशङ्क्याह एतेषान्त्वित्यादि । प्रवक्ष्यामि न तु ब्रवीमि, करणेषूक्तेष्वेव ते लक्षयितुं शक्यन्ते ।

ननु किं करणक्रमपाठ एव तेषां लक्षणं भविष्यति, नेत्याह हस्तपादप्रचारश्चेति । अङ्गहारप्रयोगेषु कर्तव्येषु यानि करणानि तद्विषये करणात्करणान्तरसञ्चारे हस्तपादादेरङ्गस्य यः संहिताकार्यकल्पप्रयोगः तमपि वक्ष्यामि । चशब्दात्कचिन्नवक्ष्यामि, ऊहाप्रदर्शनार्थं वैशब्दः अगदप्रयोगद्योतकस्तु । अङ्गहारविषये कर्तव्ये पूर्वं किं निरूपणार्हमित्याह सर्वेषामिति । तत्र करणानामङ्गहाराणां च सामान्यलक्षणं कर्तुमाह हस्तपादेत्यादिना । क्रिया करणं, कस्य क्रिया नृत्तस्य गात्राणां हस्तपादसमायोगः हस्तोपलक्षितस्य विलासक्षेपस्य हेयोपादेयविषयक्रियादिभ्यो व्यतिरिक्तायास्तक्रियायाः करणमित्यर्थः । नृत्तस्येति व्यपदेशिवत्त्वेन षष्ठी । तस्याः क्रियायाः स्वरूपमाह हस्तपादसमायोगो हस्तोपलक्षितस्य पूर्वकायवर्तिशाखाङ्गोपाङ्गादेः पादोपलक्षितस्य चापरकायगतपार्श्वकट्यूरुजङ्घाचरणादेः सङ्गततयात्रुटितत्वेनावृत्तियोजने पूर्वक्षेत्रसंयोगत्यागेन समुचितक्षेत्रान्तरप्राप्तिपर्यन्ततया एका क्रिया तत्करणमित्यर्थः । उत्तरसंयोगान्तं हि सर्वत्र कर्म । स चाप्यभिलषितोत्तरसंयोग एव क्रियाविधि-

1 ठ - रेचितं चैव 2 ठ. असर्पितोऽथ 3 प - विकुट्टकः 4 ठ - स्त्वङ्गहारास्तु 5 ठ - एषां चैव 6 - करणाश्रितम्. 7 ठ - हस्तपादप्रचारस्तु 8 ड - योज्यं . क - अङ्गहारप्रयोगेषु 10 ठ - तथाहं द्विजसत्तमाः छ - करणानां च वै द्विजाः 11 ठ - करणैर्भवेत् 12 ठ - तान्यहं 13 ठ - समायोगं ।

द्वे [1]नृत्तकरणे चैव भवतो नृत्तमातृका[2]।
द्वाभ्यां त्रिभिश्चतुर्भिर्वाप्यङ्गहारस्तु मातृभि ॥ ३१
त्रिभिः [4]कलापकं चैव चतुर्भिर्मण्डकं भवेत्[5]।
पञ्चैव करणानि स्युः [6]सङ्घातक इति स्मृतः ॥ ३२
षड्भिर्वा सप्तभिर्वापि अष्टभिर्नवभिस्तथा।
करणैरिह [7]संयुक्ता अङ्गहाराः प्रकीर्तिताः ॥ ३३
एतेषामेव[8] वक्ष्यामि हस्तपादविकल्पनम्।

त्वेन लोके प्रसिद्ध इति नापूर्वमेतत्। एतावदेवाधिकं सौन्दर्यानुप्रवेशेन सविलासत्वं नाम। अत एव नृत्तशब्देन विशेषणं नृत्तकरणमिति एकदेशाभिप्रायेण तु करणशब्दस्य प्रयोगो भीमसेने भीम इतिवत्।

एवं तावत्करणस्य सामान्यलक्षणम्। तत्राङ्गहारस्य विशेषलक्षणं विरचयितुं पीठबन्धमाह द्वे नृत्तकरणे इति। नृत्तमातृकेति। नृत्तस्याङ्गहारात्मनो मातृका उत्पत्तिकारणं। नृत्तशब्देन विशेषणात् वक्ष्यमाणाभ्यः करणमातृकाभ्यो विशेषणं दर्शयति।

"द्वाभ्यां त्रिभिश्चतुर्भिर्वाप्यङ्गहारस्तु मातृभिः"।

इति पाठः। यानि स्थानानीत्यादिना याः करणमातृका वक्ष्यन्ते ततोऽत्रविशेषं दर्शयति। करणद्वयप्रयोगेण च विनिवृत्ताभिमानो नास्ति, ततः परं तु नृत्यतीत्यभिमानात्करणद्वयं नृत्तमातृकेत्युक्तम्। एवग्रहणादन्यूनाधिकसङ्ग्रहः। नृत्तमातृकालक्षणेनाङ्गहारसामान्यलक्षणेन च करणद्वयमूहिताङ्गहारान्तरं च पिण्डीबन्धोपयोगि प्रयोज्यानुजानीते एतेषामिति। अङ्गहाराणामेव संबन्धित्वेन हस्तपादविकल्पनं करणं वक्ष्यामि। जातावेकवचनम्। ननु स्थानकचार्यादीनां प्राक् लक्षणं वाच्यम्, नैवम्; तेषां नाट्यज्ञानादेव मुनिं प्रति विदितत्वात्। नृत्तहस्ता अपि वर्तनात्मानोऽस्य विदिता एव यत, उक्तमिदं नृत्तमिति तत एवाङ्गिके (अ-१०) तेषामभिधास्यमानता करणान्येव त्विव...वाच्यं। तत्र नामतः कर्मतश्चेत्युक्तम्। नामतस्तावदाह तलपुष्पपुटमित्यादि।

---

1 ठ नृत्य 2 न - मातृकाः 3 ठ - त्रिचतुराभिर्वा 4 ठ - कलापको ज्ञेय 5 क - षण्डकं तथा 6 ठ - संघात इति सिद्धिजः 7 प - संयुक्त अङ्गहारः प्रकीर्तितः 8 ठ - एतेषामिह।

[1]तलपुष्पपुटं पूर्वं वर्तितं [2]वलितोरु च॥ ३४
अपविद्धं समनखं लीनं स्वस्तिकरेचितम्।
[3]मण्डलस्वस्तिकं चैव निकुट्टकमथापि च[4]॥ ३५
तथैवार्धनिकुट्टं च कटिच्छिन्नं[5] तथैव च।
अर्धरेचितकं चैव [6]वक्षःस्वस्तिकमेव च॥ ३६
[7]उन्मत्तं स्वस्तिकं चैव पृष्ठस्वस्तिकमेव च।
दिक्स्वस्तिकमलातं च तथैव च कटीसमम्॥ ३७
आक्षिप्तरेचितं चैव विक्षिप्ताक्षिप्तकं तथा।
अर्धस्वस्तिकमुद्दिष्टमञ्चितं च तथापरम्॥ ३८
भुजङ्गत्रासितं [9]प्रोक्तमूर्ध्वजानु तथैव च।
निकुञ्चितं च मत्तल्लि त्वर्धमत्तल्लि चैव हि॥ ३९
[11]स्याद्रेचकनिकुट्टं च तथा पादापविद्धकम्।
वलितं घूर्णितं चैव ललितं च तथापरम्॥ ४०
दण्डपक्षं तथा चैव [12]भुजङ्गत्रस्तरेचितम्।
नूपुरं चैव सम्प्रोक्तं तथा वैशाखरेचितम्॥ ४१
भ्रमरं चतुरं चैव भुजङ्गाञ्चितमेव च।
[13]दण्डरेचितकं चैव तथा वृश्चिककुट्टनम्[14]॥ ४२
[15]कटिभ्रान्तं तथा चैव [16]लतावृश्चिकमेव च।
छिन्नं च करणं प्रोक्तं तथा वृश्चिकरेचितम्॥ ४३

---

1 ठ - विष्कम्भं तिलपुष्पं च 2 ड - चलितोरु 3 प - मण्डलः 4 प - चा 5 क - कटिच्छन्नं 6 प - विक्षिप्ताक्षिप्तकं तथा 7 प - उन्मत्तः 8 प - अलाभं च, ड - अलाभश्च 9 प - चैव ऊर्ध्वं जानु 10 प - निकुञ्चितमतल्ली च अर्धमताल्लि 11 ठ - स्याद्रेचकं 12 ठ - भुजङ्गत्रासि 13 ठ - दग्ध 14 ठ - कुट्टिकौ 15 ठ - कुटिलान्तं 16 ठ - तथा।

वृश्चिकं व्यंसितं चैव तथा पार्श्वनिकुट्टकम्[1] ।
ललाटतिलकं क्रान्तं कुञ्चितं चक्रमण्डलम् ॥ ४४
उरोमण्डलमाक्षिप्तं तथा तलविलासितम् ।
अर्गलं चाथ विक्षिप्तमावृत्तं दोलपादकम् ॥ ४५
विवृत्तं[2] विनिवृत्तं च पार्श्वक्रान्तं निशुम्भितम्[3] ।
विद्युद्भ्रान्तमतिक्रान्तं [4]विवर्तितकमेव च ॥ ४६
गजक्रीडितकं चैव तलसंस्फोटितं तथा ।
गरुडप्लुतकं चैव गण्डसूचि तथापरम् ॥ ४७
परिवृत्तं समुद्दिष्टं पार्श्वजानु तथैव च ।
गृध्रावलीनकं चैव सन्नतं सूच्यथापि च ॥ ४८
[5]अर्धसूचीतिकरणं सूचीविद्धं तथैव च ।
अपक्रान्तं च सम्प्रोक्तं मयूरललितं तथा ॥ ४९
सर्पितं दण्डपादं च हरिणप्लुतमेव च ।
प्रेङ्खोलितं नितम्बं च स्खलितं करिहस्तकम् ॥ ५०
[6]प्रसर्पितकमुद्दिष्टं सिंहविक्रीडितं तथा ।
सिंहाकर्षितमुद्वृत्तं तथोपसृतमेव च ॥ ५१
[7]तलघट्टितकं चैव जनितं चावहित्थकम् ।
[8]निवेशमेलकाक्रीडमूरुद्वृत्तं तथैव च ॥ ५२

---

1 ठ पादनिकुट्टकम् 2 ठ - निवृत्तं 3 ठ - निशुम्भकम् 4 ठ - निवर्तितं 5 ठ - अर्धसूची च 6 ठ - प्रसर्पितं समुद्दिष्टं 7 ठ - तलसंघट्टितं 8 प - निवेशं मौलिका

मदस्खलितकं चैव विष्णुक्रान्तं तथापि च।[1]
[2]सम्भ्रान्तमथ विष्कम्भमुद्घट्टितमथापि च। ५३
वृषभक्रीडितं चैव लोलितं च तथापरम्।
नागापसर्पितं चैव शकटास्यं तथैव च॥ ५४
गङ्गावतरणं चैवे[3]त्युक्तमष्टाधिकं शतम्।
अष्टोत्तरशतं ह्येतत्करणानां मयोदितम्॥ ५५
नृत्ते[4] युद्धे नियुद्धे च तथा [5]गतिपरिक्रमे।
गतिचारे प्रवक्ष्यामि युद्धचारीविकल्पनम्॥ ५६
यत्र तत्रापि संयोज्यमाचार्यैर्नाट्यशक्तितः।
प्रायेण करणे कार्यो वामो वक्षःस्थितः करः॥ ५७
[6]चरणस्यानुगश्चापि दक्षिणस्तु भवेत्करः।
हस्तपादप्रचारन्तु कटिपार्श्वोरुसंयुतम्॥ ५८
[7]उरःपृष्ठोदरोपेतं [8]वक्ष्यमाणं निबोधत।


अष्टाधिकं शतमुक्तं यदङ्गहारोपयोगित्वे नियतसंख्यामत्यस्तमयामिति किमनेन संख्यानिरूपणेनेत्याशंक्याह अष्टोत्तरशतमित्यादिना। अभिनये वस्तुत्वेन यन्नृत्तं वक्ष्यतेऽभि[1]नयान्तरालवर्तिच्छिद्रप्रच्छादनादौ तत्प्रयुज्यते, शस्त्रादियुद्धे बाहुयुद्धे चाङ्गप्रयोगसौष्ठवार्थमपि प्रयुज्यते। पृथक्तया गत्यध्याय-(१२) वक्ष्यमाणासु च गतिषु ये परिक्रमाः परिक्रमणानि तत्र तेन पृथक्त्वेन प्रयोगदर्शनादष्टोत्तरशतत्वं न नोपयोगि। एष च यथा विनियोगो भविष्यति तथा समनन्तरमेव वक्ष्यामः। अत्राष्टोत्तरशतमित्यादिश्लोकं केचिन्न पठन्ति। अन्ये ततोऽप्यधिकं।

---


1 ठ - क्रान्तं तथैव च 2 प - सङ्क्रान्त 3 ठ - चैवमुक्त 4 च - नृत्य
5 च - गीतिपरिक्रमे 6 ठ - प्रचारं तु 7 न - ऊरुपृष्ठोदरोपेतं 8 ठ - नृत्तमार्गे

---


1 नयान्तराल इव।




१ तलपुष्पपुटम्




२ वर्त्तितम्



३ वलितोरुकम्




४ अपविद्धम्




५ समनखम्



६ लीनम्



७ स्वस्तिकरेचितम्



८ मण्डलस्वस्तिकम्




११ कटिच्छिन्नम्



१२ अर्धरेचितकम्



१३ वक्षःस्वस्तिकम्



१४ उन्मत्तकम्

यानि स्थानानि याश्चार्यो नृत्तहस्तास्तथैव च।
सा मातृकेति विज्ञेया तद्योगात्करणं भवेत्॥ ५९
कटी कर्णसमा यत्र [1]कोर्परांसाशिरस्तथा।
समुन्नतमुरश्चैव[2] सौष्ठव नाम तद्भवेत्॥ ६०
वामे [3]पुष्पपुटः पार्श्वे पादोऽग्रतलसञ्चरः।
तथा च सन्नतं [4]पार्श्वं [5]तलपुष्पपुटं भवेत्॥ ६१

"हस्तपादप्रचारन्तु कटिपार्श्वोरुसंयुतम्"॥
इति श्लोकं पठन्ति। तत्र महासामान्यरूपं करणमाह यानि स्थानानीति। इहावस्थानं गतिश्चेति द्वयं निर्वर्त्यं करणे, तत्रावस्थाने करका(णा?)योपयोगि स्थानकं,गतौ तु चार्यः,पूर्वकाये तु गतौ नृत्तहस्ता दृष्टयश्च, स्थितौ पताकाद्याः; एतच्चकारेण संगृहीतम्। तत्रुगतिस्थितिसंमिलिते करणमित्यानन्त्यं यद्यपि करणम्, तथाप्यङ्गहारोपयोगित्वादेतावदुक्तमिति श्लोकस्य तात्पर्यम्।

अथ तलपुष्पपुटम् (१)

तत्रोद्देशक्रमेण लक्षणान्याह वाम इत्यादिना।

"यस्तु सर्पशिरः प्रोक्तस्तस्याङ्गुलिनिरन्तरः।
द्वितीयः पार्श्वसंश्लिष्टः स तु पुष्पपुटः [1]करः"॥ (९-१३५)
"उत्क्षिप्ता तु भवेत्पार्ष्णिः प्रसृतोऽङ्गुष्ठकस्तथा।
[2]अङ्गुल्यश्चाश्चिताः सर्वाः पादोऽग्रतलसञ्चरे"॥ (९-२३९)
"कटी भवेच्च व्याभुग्ना पार्श्वमाभुग्नमेव च।
तथैवापसृतांसं च किञ्चित्पार्श्वं नतं स्मृतम्"॥ (९-२०७)

एषां योजनोच्यते। तत्र नृत्ते समपादतलहस्तद्वयपूर्वकं त(लसञ्चर)स्ताव-त्प्राचुर्येण सर्वत्र [3]ततश्चाध्यर्धया चार्या (१०-१६) दक्षिणपादनिष्क्रमणेन सम-कालं व्यावर्तितेन करयुगलेन दक्षिणपार्श्वे समं नीतेन परिवर्तितकरणवशा-

1 ठ - कोर्पराङ्ग च कूर्पसंश 2 ठ - मुखश्चैव 3 ठ - पुष्पपुटं 4 ठ - पार्श्वे 5 न - तिलपुष्प इति स्मृतः

1 स्मृतः 2 अङ्गुल्यग्राश्चिताः 3 ततश्चाध्यार्धिकया

दानीतेन वामपार्श्वे सौष्ठवेन वामस्तनक्षेत्रे पुष्पपुटहस्तबन्ध इति। अग्रतल-पादपुष्पपुटयोगादेशसूचनं नामेदं तलपुष्पपुटमिति। एवमन्यत्रापि [1]नामप्र-धाना ऊह्याः। तत्र क्वचिद्वाक्यार्थाभिनय एव प्राधान्येन दर्शिते तत्र करणानामेव प्राधान्यं। यत्रापि पदार्थाभिनयाः क्रियन्ते तत्राप्येकवाक्यानुप्रवेशप्राधान्यप्र-ख्यापनायावश्यमादौ मध्येऽन्ते वा यथावसरं करणमित्युपनिषत्। अत एव वक्ष्यति।

"अस्य शाखा च नृत्तं च तथैवाङ्कुर एव च।
वस्तून्यभिनयस्येहे "इति। (८-२५)

[2]वर्तनानुप्रवेशो हि शाखयैव गतार्थः स्यात्। तत्रैव च शाखान्ते भेदं वक्ष्यति। "आङ्गिकश्च भवेच्छाखा" (८-२५) इत्युक्तं "अङ्गहारविनिष्पन्नं नृत्तं तु करणाश्रयम्" (८-२५) एतत्स्फुटं तत्रैव व्याख्यास्यत इत्यास्तां तावत्। अत्रोदाहरणदिक्प्रदर्शनाय "अभिजअइ मळविमुक्कमळासणउदितस्स" इत्यादावनेन वाक्यार्थाभिनये, नाट्येऽपि "पादाग्रस्थितया" (रत्ना १-१) इत्यादावुपसंहारवाक्यर्थाभिनये इय(द)मेव युक्तं करणं न नृत्यस्य पादाग्रस्थितत्वस्य कुसुमाञ्जलिक्षेपः, स चानेनैव सम्पन्नेन चतुरश्रीभूतत्वादङ्गादनन्तरं यदा प्रयु-ज्यते तदा हस्तयोः स्वे स्वे पार्श्वे आवेष्टितकरणं (९-२९२) कृत्वा ततः परिष्टि-वेतु (वेष्टित?) करणेन (९-२०९) पुष्पपुटप्रयोगः। यदा तु करान्तरसन्निवे-शान्तरमिदं करणं प्रयुज्यते तदा त्यक्तव्यतदीयहस्तपादाक्षेपया आदातव्य-करणगतहस्तपादाद्यपेक्षया च यथा वर्तनाक्रमेण स्वयमेव त्यागोपादाने अनु-टिततया वा सम्पद्यते तथा कर्तव्यमित्यलं नृत्ताचार्यगोपिता(ते?)नानेन। एतच्च यथावसरं दर्शयित्वा सर्वं निरूपयिष्यामः।

"सव्यस्य पृष्ठतो वामश्चरणस्तु यदा भवेत्।
तस्यापसर्पणं चैव सा ज्ञेयाध्यर्धिका बुधैः॥ (१०-१८)

"आवर्तन्ते कनिष्ठाद्या अङ्गुल्योऽभ्यन्तरेण तु" (९-१८९)

"उद्वर्तन्ते कनिष्ठाद्या बाह्यतः क्रमशो यदा" (९-१९०)

इति व्यावृत्तपरिवर्तिते। एवं तर्जन्यादितः।

"आवेष्ट्यन्ते यदाङ्गुल्यस्तर्जन्या च यथाक्रमम्।
आवेष्टितं तु करणं तथा ज्ञेयं प्रयोक्तृभिः" ॥ (९-१९१)

इत्यावेष्टितपरिवेष्टिते।

---

1 नामावसाना 2 वर्तमानानुप्रवेशो

कुञ्चितौ [1]मणिबन्धे [2]तु [3]व्यावृत्तपरिवर्तितौ ।
हस्तौ निपतितौ चोर्वोर्वर्तितं करणं तु तत् ॥ ६२
शुकतुण्डौ यदा हस्तौ व्यावृत्तपरिवर्तितौ[4] ।
ऊरू च वलितौ [5]यस्मिन्[6]वलितोरुकमुच्यते ॥ ६३

अथ वर्तितम् (२)

कुञ्चितावित्यादि । वक्षःक्षेत्रे उन्मुखं स्वस्तिकवदश्लिष्टमेव मणिबन्धनगतं करयुगलं कृत्वा तत्रैव विहस्तौ समकालं आवृत्तपरिवर्तौ विधायोत्तानावेव यथास्वमूर्वोः पातनीयौ । असूयावाक्यार्थाभिनये चोत्तानौ पताकौ । यथा "तुज्झ कए सरिवं ररामर उण मरापराशुण अआविद्धत्तनआ" तावेव पताकावधोमुख घृष्टमुखपातैरेतैर्यदा तदा रोषवाक्यार्थाभिनये यथा "सव... डओ गु" इत्यादौ । एवं कटकामुखशुकतुण्डादयो यथायथमत्र योजयितव्याः। तत एवात्र मुनिना हस्तावशेषो न निरूपितः। अग्रतलसञ्चर एवात्र पाद इति केचित् । तद्धस्तौचित्यानुसारी पादयोग इति नृत्ताचार्याः ।

अथ वलितोरुकम् (३)

शुकतुण्डावित्यादि।

"आद्या धनुर्नता कार्या कुञ्चितोऽङ्गुष्ठकस्तथा ।
शेषा भिन्नोर्ध्ववलिता ह्यरालेऽङ्गुलयः करे" (९-४३)

"[1]अरालस्य यदा वक्रानामिका त्वङ्गुलिर्भवेत् ।
शुकतुण्डः स तु करः" (९-५०)

"भवेदभ्यन्तरं जानु [2]यत्राहुर्वलितं तु तत् । (९-२२३)

योजना तु - वक्षःक्षेत्रात्समकालं हस्तौ व्यावर्तितौ कृत्वा आक्षिप्तया पादचार्या सह पततः परिवर्तनानुनीय वक्षःप्रदेशे शुकतुण्डावधोमुखौ स्थापयेत् । बद्धया च चार्या स्थितिः । एतन्मुग्धाविषयं च, यथा "दुल्लणुल्लीति तुहिगुल्लविल्लुलिअ अद्ध हुदौ सुणाहि दिडात्तसहि"। त्रिपताका तर्जनी वक्रतया शुकतुण्ड इत्यतान्त्रिकैर्लिखितमुपेक्ष्यमेव ।

---

1 ठ - मणिबन्धौ 2 क - च 3 च - व्यावर्तपरिवर्तिते 4 ड - परिवर्तकौ 5 ठ - यत्र 6 च - वलितोरु तदुच्यते ।

1 अराले तु 2 यत्र तद्वलनं स्मृतम् ।

[1]आवर्त्य शुकतुण्डाख्यमूरुपृष्ठे निपातयेत् ।
वामहस्तश्च [2]वक्षःस्थोऽप्यपविद्धं तु तद्भवेत् ॥ ६४
श्लिष्टौ [3]समनखौ पादौ करौ चापि प्रलम्बितौ ।
देहः स्वाभाविको यत्र [4]भवेत्समनखं तु तत् ॥ ६५

अथापविद्धम् (४)

आवर्त्येत्यादि ।

"वक्षसोऽष्टाङ्गुलस्थौ तु प्राङ्मुखौ कटकामुखौ" । (९-१६३)

इति चातुरश्र्येण स्थित्वा ततो हस्तमावर्तितेन निष्क्रमय्य ततः समकालमाक्षिप्तिकां चारीं (१०-३४) कृत्वा, तमेव हस्तं शुकतुण्डीकृतं (९-५०) तस्योर्वोः पृष्ठे निपातयेत् । वामहस्तश्च कटकामुखः स तु वक्षस्येवेति । दक्षिणस्य करपादस्य पर्यवसानात्तदुपलक्षितवेगनिस्सरणादपविद्धमिति नाम्नैव वर्तनायाश्चातुर्यं सूचितम् । असूयाकोपवाक्यार्थाभिनये चेदम् । "विमाळकाळतुज्झ" गत्यादौ । मुनिविषयस्त्वस्यैव कैश्चित्प्रयोगो लिखितः तत्पात्रान्तरपरिवर्तनदोषात्स्वयमलक्ष्यत्वाचेत्युपेक्ष्यम् ।

"कुञ्चितं पादमुत्क्षिप्य व्याक्षिप्तं त्वञ्चितं न्यसेत् ।
जङ्घा स्वस्तिकसंयुक्ता चाक्षिप्ता नाम सा स्मृता" (१०-३४)

अथ समनखम् (५)

श्लिष्टावित्यादि । प्रलम्बितौ कराविति लताहस्तौ मन्तव्यौ । न तु दोलाहस्तौ, तयोरेकविषययोरत्र वर्तनायाश्चातुरश्र्यभङ्गहेतुत्वात् ।

"तिर्यक्प्रसारितौ चैव पार्श्वसंस्थौ लताकरौ" (९-१७५)

एतच्च प्रथमप्रदे(वे?)शे नृत्ते दृश्यते । जप्यमङ्गलादिविषये तु नास्य प्रयोगो युक्तः यथा कैश्चिदिष्टः ।

---

1 न - आपत्य ठ - आवृत्य 2 न - वामहस्तं तथा वक्षस्यपविद्धं ठ - वक्षःस्थो वामहस्तश्च 3 ठ - समनयौ 4 न - ज्ञेयं समनखं ।

पताकाञ्जलि वक्षःस्थं प्रसारितशिरोधरम् ।
[1]निहञ्चितांसकूटं च तल्लीनं करणं स्मृतम् ॥ ६६
स्वस्तिकौ [2]रेचिताविद्धौ विश्लिष्टौ कटिसंश्रितौ ।
यत्र तत्करणं ज्ञेयं बुधैः स्वस्तिकरेचितम् ॥ ६७

अथ लीनम् (६)

पताकेत्यादि "।

"पताकाभ्यां तु हस्ताभ्यां संश्लेषादञ्जलिः स्मृतः"। (९-१२१)
प्रसारितसमाः सर्वा यस्याङ्गल्यो भवन्ति हि ।
कुञ्चितश्च तथाङ्गुष्ठः स पताक इति स्मृतः । (९-१७)

रेचितग्रीवा ।

"रेचिता [1]विस्तृतभ्रान्ता [2]भावे मथननृत्तयोः" (८-१५७)

इति केचित् । तदसत्, औचित्यायोगात् । तेन प्रणाभ्रापसारिता गमिता न तस्याभूद्ग्रीवा (?) ।

"उत्क्षिप्तबाहुशिखरं निकुञ्चितशिरोधरम् ।
निकुञ्चितं शिरः" । (८-३०)

तद्योगादंसकूटयोर्निहञ्चितत्वम् । योजना तूर्ध्वमण्डलिनौ (९-१८०) नृत्तहस्तौ प्राक्प्रयुज्य तद्वर्तनाक्रमेण वक्षोदेशेऽञ्जलिं रचयेत् । एतदेव पताकाग्रहणस्य प्रयोजनम् । अञ्जलेर्नलिनीकोशपद्मावर्तनया संपादनं माभूत् । अपि तूर्ध्वमण्डलिवर्तनया तथा पताकयोः स्फुटप्रयोगोत्पत्तिः । तथा ह्यव्यभिचारात्, पताकाग्रहणमफलमेव । लौकिकाञ्जलिशङ्काशमनं तु सति तान्त्रिके तुच्छफलम् । एतच्च प्रियप्रार्थनावाक्यार्थाभिनये, यथा "पुरिपडाळपळदु०ळडामं लिंबिल्लइ दुंदुं" । न तु देवताप्रणामे वक्षःस्थोऽप्यञ्जलिरत्र, देवताप्रणामे तु शिरःस्थ इति वक्ष्यामः ।

अथ स्वस्तिकरेचितम् (७)

स्वस्तिकावित्यादि । पूर्वं रेचितौ तत आविद्धौ आविद्धवक्रौ ततो देहक्षेत्रमागतौ स्वस्तिकौ ततोऽपि विश्लिष्टौ विप्रकीर्णौ ततः कटिसंस्थौ पक्षप्रद्योतपक्षवञ्चिताख्यौ । एवं नृत्तहस्तषट्कात्मकमेतत्करणम् । तत्र—

1 न - निकुञ्चितांस, ठ - नभाञ्चितांस 2 ठ - रेचितौ न - रेचिकाविद्धौ ।

1 विधुतभ्रान्ता 2 हावे ।

स्वस्तिकौ तु करौ कृत्वा प्राङ्मुखोर्ध्वतलौ समौ ।
तथा च [1]मण्डलं स्थानं मण्डलस्वस्तिकं तु तत् ॥ ६८

"रेचितावपि विज्ञेयौ हंसपक्षौ द्रुतभ्रमौ" । (९-१७०)
समाः प्रसारितास्तिस्रः तथा चोर्ध्वा कनीयसी ।
अङ्गुष्ठः कुञ्चितश्चैव हंसपक्ष इति स्मृतः ॥ (९-१०२)
"भुजांसकूर्पराग्रैस्तु कुटिलावर्तितौ करौ ।
पराङ्मुखतलाविद्धौ[2] ज्ञेयावाविद्धवक्रकौ" ॥ (९-१६८)
"तावेव मणिबन्धान्ते स्वस्तिकाकृतिसंस्थितौ ।
स्वस्तिकाविति [3]विज्ञेयौ विच्युतौ विप्रकीर्णकौ" ॥ (९-१६६)
"कटिशीर्षनिविष्टाग्रौ त्रिपताकौ यदा करौ ।
पक्षवञ्चितकौ" (९-१७७)
"तावेव तु परावृत्तौ पक्षप्रद्योतकौ स्मृतौ" (९-१७८)

योजना तु-चातुरश्र्यान्तरे रेचितवर्तनया पक्षौ विधाय व्यावर्तितकरणेन शिरःक्षेत्रादधरगमनोपरिगमने चाक्षिप्तया आविद्धवक्रवर्तनया तया वक्षःक्षेत्रस्वस्तिकौ विधाय तावेव विप्रकीर्णौ कृत्वा पुनःपक्षवञ्चितौ पुनः पक्षप्रद्योताविति तद्योगात्स्वस्तिकरेचितम् । अत्र च तत्र तत्र नृत्तहस्तप्रयोगवशाद(ला)(त)चार्या [वातचार्या वदन्ते]... बहिर्मण्डलसंस्थानकृतेन समनखौ पादावनुवर्तत इत्यसत्। एतच्च यत्र नृत्तमेव प्राधान्येनाभिनेयं तावत्कालं प्रहर्षादियोगे तत्र तत्र प्रयुज्यते। यथा "धणिणइ धणिणइ धणहिए अणुराहिणव्वहरासु महुरकण्णे जितिसअउदाणवकुळिणिणोसु" ।

अथ मण्डलस्वस्तिकम् (८)

स्वस्तिकावित्यादि । स्वस्तिकवृत्तलक्षणौ करौ प्राङ्मुखौ चतुरश्रौ ऊर्ध्वतलावूर्ध्वमण्डलिनौ ।

"वक्षसोऽष्टाङ्गुलस्थौ तु प्राङ्मुखौ कटकामुखौ ।
समानकूर्परांसौ च[1] चतुरश्रौ प्रकीर्तितौ" ॥ (९-१६३)
"ऐन्द्रे तु मण्डले पादौ चतुस्तालान्तरस्थितौ ।
त्र्यश्रौ [2]वक्षःस्थितौ चैव कटी जानुसमा तथा" ॥ (१०-६२)

---

1 ठ - मण्डलस्थानं ।

1 प्रसारितौ 2 लताविद्धौ 3 विख्यातौ 4 च 5 पक्षकृतौ ।

निकुट्टितौ यदा हस्तौ स्वबाहुशिरसोऽन्तरे।
पादौ [1]निकुट्टितौ चैव [2]ज्ञेयं तत्तु [3]निकुट्टनम्॥ ६९

योजना तु - चतुरश्रहस्ताभ्यां स्थित्वा ततो विच्यवप्रयोगसमकालमुद्वेष्टितवर्तनया गत्वा तत ऊर्ध्वमण्डलिवर्तनिकया स्वस्तिकौ कुर्यात्। मण्डलस्थानकं च बध्नीयादिति। इति मण्डलस्वस्तिकम्।

"विच्यवात्समपादाया विच्यवं सम्प्रयोजयेत्।
निकुट्टयंस्तलाग्रेण पादस्य धरणीतलम्" (१०-१९)

तलाग्रोऽग्रतलसञ्चरः। निकारवाक्यार्थाभिनये, यथा "उव्वेळा वि अगत्थि अवळआ वाहिभराहिहिंशि जळचरिउ ससक्कसुणिमंमद" इत्यादौ।

अथ निकुट्टनम् (९)

निकुट्टिताविति।

"उन्नमनं विनमनं स्यादङ्गस्य निकुट्टनम्"

इति कोहलः। तेन हस्तस्यालपल्लवस्य कनिष्ठाङ्गुलिपतनोत्पतनप्रकारो निकुट्टनमिहापि वक्ष्यते। अञ्चित इति पादस्याप्युद्घट्टितरूपता।

"स्थित्वा पादतलाग्रेण [1]पार्ष्णिं भूमौ निपातयेत्।
यस्य पादस्य करणे भवेदुद्घट्टितस्तु सः"॥ (९-२३६)

चकारेण मण्डलस्थानकमुच्यते। स्वबाहुशिरस इत्येकवचनाद्धस्ताविति द्विवचनाच्च पर्यायेणाङ्गद्वयेन प्रयोगः। एवकाराद्दक्षिणेन प्रयोगे दक्षिण एव पादः, वामेन च वामः। तेन मण्डलस्थानके स्थित्वा चातुरश्र्यादनन्तरमुद्वेष्टितकरणेन हस्तं नीत्वा स्कन्धशिरसि निकुट्टयेत्। तमेव पादमुद्घट्टितं कुर्यात्। वामं तु हस्तं यथावस्थितं पुनराविद्धवक्रवर्तनयातं चतुरश्रीकुर्यात् तत्समकालं चोक्तविधिना द्वितीयमङ्गं निकुट्टयेदिति योजना। अस्य च पुनः पुनरात्मसम्भावनाप्रधाने वाक्यार्थेऽभिनेतव्ये प्रयोगः। यथा "भीउणजाणमिहउस्स भवउ कज्जी"॥

1 च - निकुट्टितं चैव 2 च - विज्ञेयं चैव कुट्टकम् 3 न - नि कुट्टकम्।

1 पार्ष्णिर्भूमौ निपात्यते।

अञ्चितौ[1] बाहुशिरसि[2] हस्तस्त्वभिमुखाङ्गुलिः ।
[3]निकुञ्चितार्धयोगेन[4] भवेदर्धनिकुट्टकम् ॥ ७०
पर्यायशः कटिश्छिन्ना[5] बाहू शिरसि पल्लवौ ।
पुनःपुनश्च करणं कटिच्छिन्नं तु तद्भवेत् ॥ ७१

अथार्धनिकुट्टकम् (१०)

अञ्चिताविल्यादि । चरममेवार्धं लक्षणम् । आद्येन तु निकुट्टितस्य हस्तस्य युक्त्या लक्षणं कृतम् । अलपल्लव इति वक्तव्ये कुञ्चितग्रहणं क्रियाविशिष्टत्वप्रदर्शकम् ।

"आवर्तिन्यः करतले यस्याङ्गुल्यो भवन्ति हि ।
पार्श्वगास्ता विकीर्णाश्च स हस्तस्त्वलपल्लवः । (९-८७)

शङ्कादिभिस्त्वञ्चनं देहाभिमुख्येन पृष्ठभागेन मनागालक्षणमिति व्याख्यायितं नाम्ना न सङ्गतमित्यास्ताम् । अस्य च प्रयोगः,स्वात्मसम्भावनाविषय एव प्ररूढे वाक्यार्थे । यथा "हउपरपरिवध उद्घटइ" ।

अथ कटिच्छिन्नम् (११)

पर्यायश इत्यादि । "कटिमध्यस्य वलनाच्छिन्ना" (९-२१६) पर्यायश इत्युभयशेषः ।

"मणिबन्धनमुक्तौ तु पताकौ पल्लवौ स्मृतौ" (९-१७३)

योजना तु भ्रमरिकया(१०-५२)चार्या पर्यायेण पार्श्वद्वयभ्रमणं कृत्वा मण्डलस्थानके (१०-६२) स्थित्वा बाहुशिरासि च पल्लवं पताकालपल्लवच्छायाद्वितीयं पर्यायेण बिभ्रद्विधेयः । पुनरपरेणाङ्गेनैवमिति । त्रिश्चतुर्वैषैव क्रिया ।

"अतिक्रान्तक्रमं कृत्वा त्रिकं तु परिवर्तयेत्
द्वितीयपादभ्रमणात्तलेन भ्रमरी स्मृता" (१०-४२)
"कुञ्चितं पादमुत्क्षिप्य पुरतः सम्प्रसारयेत् ।
उत्क्षिप्य पातयेच्चैनमतिक्रान्ता तु सा स्मृता" (१०-२८)

विस्मयप्रधानवाक्यार्थाभिनये चास्य प्रयोगः । यथा "एभि उ०वि०खु गिढत्थ गिळित्थ उ०वोरु०वदाणहुणं भकुळावणइ"। विस्मयप्राधान्यख्यापनायैवात्र पुल्लवस्यादौ प्रयोगः । "अद्धक्खि आइं" इत्यादौ ॥

---

1 न - कुञ्चितो 2 च - बाहुशिखरौ 3 ठ च - निकुट्टितार्धभागेन न - निकुञ्चितं च पादं स्यात् 4 ठ - ज्ञेयमर्धं 5 प - बाहुः, न - बाह्वोः ।

अपविद्धः करः सूच्या पादश्चैव निकुट्टितः[1] ।
सन्नतं यत्र[2] पार्श्वं च तद्भवेदर्धरेचितम् ॥ ७३
स्वस्तिकौ चरणौ यत्र करौ वक्षसि रेचितौ[3] ।
निकुञ्चितं तथा वक्षो वक्षस्स्वस्तिकमेव तत्[4] ॥ ७४

अथार्धरेचितकम् (१२)

अपाविद्ध इत्यादि ।

"हस्तौ तु सर्पशिरसौ मध्यमाङ्गुष्ठकौ[1] यदा ।
तिर्यक्प्रसारितास्यौ च तदा सूचीमुखौ स्मृतौ" (९-१७६)

मण्डल एव स्थानके स्थित्वा करो वक्षसि कटकामुखः सूचीमुखेन हस्तेनापगमपूर्वकं विद्धो निकटयोजितो चपटचासरे(तदपसारणे?)च पार्श्वं सम्यक्सौष्ठवेन नतं पादश्च निकुट्टितस्तदा कायार्धस्य पर्यायेण रेचनाद्बहिर्गमनादर्धरेचितम् । एतच्चासमञ्जसचेष्टाप्रधानवाक्यार्थाभिनये, यथा [2]"गिरिगिइइळ०वसुं चोळउकज्जनुकारण" इत्यादौ ।

अथ वक्षःस्वस्तिकम् (१३)

स्वस्तिकाविति । वक्षसि तौ हस्तौ चतुरश्रौ स्थितौ तौ रेचितौ कृत्वा व्यावृत्तकरणेनानीय निकुञ्चिते आभुग्ने वक्षसि स्वस्तिकौ कार्यौ । हस्तस्वस्तिकानुसारेण च पादावन्योन्यं जङ्घानुगुल्फवलनेन स्वस्तिकौ कार्यौ ।

"निम्नमुन्नतपृष्ठं च व्याभुग्नांसं श्लथं क्वचित् ।
आभुग्नं तदुरः" (९-२०७)

अत्र च नृत्तयोगात्सौष्ठवप्राधान्यमिति । भुग्नांसमिति, अंसौ हस्तापेक्षया । लज्जितजातानुतापप्रधाने वाक्यार्थे चास्य योजनम् । यथा "भुंजइ सदेसदेसं धादंति वाहिः णिं अमित एव वंसतिण्णववसिः अनु अन्नओविरंहीम (?)"

---

1 न - सूच्या पादश्चेत्स निकुट्टितः 2 ठ - यस्य 3 च - वक्षःस्थरेचितौ
4 ठ - च, न - तु ।

1 मध्यमाङ्गुलिकौ 2 गिरिगिळळङवदंचोळउ कज्जणु कारण ।

14

अञ्चितेन तु पादेन रेचितौ [1] तु करौ यदा [2] ।
उन्मत्तं करणं तत्तु [3] विज्ञेयं नृत्तकोविदैः [4] ॥ ७५
[5] हस्ताभ्यामथ पादाभ्यां भवतः स्वस्तिकौ यदा ।
तत्स्वस्तिकमिति प्रोक्तं करणं करणार्थिभिः ॥ ७६

अथोन्मत्तकम् (१४)

अञ्चितेनेत्यादि ।

"पार्ष्णिर्यत्र स्थिता भूमावूर्ध्वमग्रतलं तथा ।
अङ्गुल्यश्चाञ्चिताः सर्वाः स पादोऽञ्चित उच्यते" (९-२५४)

आविद्धचार्या चास्य प्रयोगः ।

"स्वस्तिकस्याग्रतः पादः कुञ्चितस्तु प्रसारितः ।
निपतेदञ्चिताविद्धमाविद्धा नाम सा स्मृता" । (१०-३७)

एकवचनद्विवचनाभ्यामङ्गपर्यायः सूच्यते । एतस्यातिसौभाग्यादिजनितगर्वविषयः प्रयोगः । यथा, "इंतिइएण इइहि कह विमाखरिततवसिइ" ।

अथ स्वस्तिकम् (१५)

हस्ताभ्यामित्यादि । उद्वेष्टितवर्तनवामहस्तो निष्क्रामय्य व्यावर्तितस्य करणसमकालमुत्प्लुत्य युगपदेव हस्तपादस्य स्वस्तिकं रचयेत् । करणार्थिभिरिति वाक्यार्थाभिनयलक्षणा नृत्ताङ्गहाररूपा गतिपरिक्रमादिस्वभावाश्च क्रिया येऽर्थवन्त इति । मध्ये तेन भङ्गिवचनेन सर्वेषां करणानां प्रयोजनं सूचितम् । तत्र युक्त्या द्वेषणनिषेधरहस्ये (राभस्ये?) च वाक्यार्थेऽभिनेतव्येऽस्य प्रयोगः । यथा "मणिचारिं ते मत्थिअरुअअं गढजांवणयेणवंति हिअंभुळणए किं त कंमणएण" ॥


अथ पृष्ठस्वस्तिकम् (१६)

विक्षिप्तेत्यादि ।


"ऊरुभ्यां वलनं कृत्वा कुञ्चितं पादमुद्धरेत् ।
पार्श्वे विनिक्षिपेच्चैनमपक्रान्ता तु सा स्मृता" (१०-३०)

---


1 ङ - च 2 च - तदा 3 न - ह्येतत् 4 न - नाट्यकोविदैः
5 ठ - उभाभ्यां हस्तपादाभ्यां ।



१५ स्वस्तिकम्



१६ पृष्ठस्वस्तिकम्



१७ दिक्स्वस्तिकम्




१८ अलातकम्




१९ कटीसमम्



२० आक्षिप्तरेचितम्



२१ विक्षिप्ताक्षिप्तकम्




२२ अर्धस्वस्तिकम्



२३ अञ्चितम्



२४ भुजङ्गत्रासितम्



२५ ऊर्ध्वजानु



२६ निकुञ्चितम्

विक्षिप्ताक्षिप्तबाहुभ्यां स्वस्तिकौ चरणौ यदा।
अपक्रान्तार्धसूचिभ्यां तत्पृष्ठस्वस्तिकं भवेत्॥ ७७
पार्श्वयोरग्रतश्चैव यत्र [2]श्लिष्टगतो भवेत्।
स्वस्तिको हस्तपादाभ्यां तद्दिक्स्वस्तिकमुच्यते॥
अलातं चरणं कृत्वा व्यंसयेद्दक्षिणं करम्।
ऊर्ध्वजानुक्रमं कुर्यादलातकमिति स्मृतम्॥ ७९

"कुञ्चितं पादमुत्क्षिप्य जानूर्ध्वं सम्प्रसारयेत्।
पातयेच्चाग्रयोगेन सा सूची परिकीर्तिता" (१०-३४)

ऊर्ध्वशब्देन द्वितीयस्मिन्पादे सुची कार्या। न तु तस्मिन्नेव पर्यायेणेत्याह। तेनेत्थं योजना—उद्वेष्टितक्रियया बाहुद्वयविक्षेपः समकालमपक्रान्ता चारी तया अपवेष्टितकरणसमकालं द्वितीयेन पादेन सूचीं विधाय स्वस्तिकं पादाभ्यां तथा हस्ताभ्यां कुर्यादिति पृष्ठे पाश्चात्ये समे यत्स्वस्तिकं तथा दक्षिणपृष्ठे वामपादेन स्वस्तिकं त्रिकवलनया च पराङ्मुखीभूय स्वस्तिकमिति पृष्ठस्वस्तिकम्। प्रयोगोऽस्योक्तविषय एव (स्वस्तिकवत्)। अन्ये तु पृष्ठविषये हस्ताभ्यां स्वस्तिकमिच्छन्तो युद्धविषये परिक्रमेऽस्य प्रयोगमाहुः।

अथ दिक्स्वस्तिकम् (१७)

पार्श्वयोरित्यादि। हस्ताभ्यामथेत्यादिना यत्पश्चात्स्वस्तिकाख्यं करणमुक्तं तदेव यदा पार्श्वयोरग्रे चकारात्पृष्ठे चतुर्दिङ्मुखेषु त्रुटितेनाङ्गुष्ठेन क्रियतेऽतएवाङ्गश्लिष्ट इति तदा दिक्स्वस्तिकम्। इत्यनेन मध्ये निरूपितेन सर्वेषां करणानामित्थं प्रयोगमनुजानीते। प्रयोगश्चास्य गीतपरिवर्तेषु, यद्वक्ष्यति "तदा गीतिवशादङ्गं भूयो भूयो निवर्तत"(४-२९०) इत्यादि।

अथालातकम् (१८)

अलातमित्यादि।

"पृष्ठे प्रसारितः पादो वलितेनान्तरीकृतः।
पार्ष्णीः प्रपतिता चैवमलाता सा प्रकीर्तिता" (१०-४०)

---

1 न सूची च 2 न - श्लिष्टकृतो, ठ - श्लिष्टः कृतो, प - श्लिष्टकरो।
3 ठ - चैवाप्यलातकरणं न्यसेत्। वलितोऽभ्यन्तरीकृतः।

स्वस्तिकापसृतः पादः करौ नाभिकटिस्थितौ ।
[1]पार्श्वमुद्वाहितं चैव करणं तत्कटीसमम् ॥ ८०

अंसाद्विनिष्क्रामणं व्यंसयेदिति तं च नृत्तहस्तं [नितम्बहस्तौ (९-१८१)] दक्षिणेन रचयति यत् ।

"कुञ्चितं पादमुत्क्षिप्य जानुस्तनसमं न्यसेत् ।
द्वितीयं च क्रमं तूर्ध्वमूर्ध्वजानुः प्रकीर्तिता" (१०-३२)

ततश्चारीनिवेशाच्च पादस्याप्यलातादिसंज्ञा । एवं सर्वत्र ।

"बाहुशीर्षाद्विनिष्क्रान्तौ नितम्बाविति कीर्तितौ" (९-१८१)

योजना तु दक्षिणपादेनालातां चारीं प्रयुञ्जानो दक्षिणहस्तेन नितम्बं कृत्वा चतुरश्रमेव कुर्यात्; वामेन पादेनोर्ध्वजानुं ततो वामेनाप्यङ्गेन । एवमेतेऽप्यलातचार्या द्विप्रयोगात्तन्नामधेयमेवेदं करणम् । प्रयोगश्चास्य ललितनृत्तविषये, यथा । "देंवं इं उणवशमिं" इत्यादौ ।

अथ कटीसमम् (१९)

स्वस्तिकापसृत इत्यादि स्वस्तिकादनन्तरमपसृत इत्यनेन आक्षिप्तायाश्चार्या अनन्तरमपक्रान्तायाश्चार्याः प्रयोगमाह। चकारेण करौ च स्वस्तिकावपसृतौ, तत एको नाभिस्थः खटकः एवमपरः कट्यामर्धचन्द्रः । तदेव पार्श्वं नतमपरमुद्वाहितं द्वितीयेनाङ्गेन।

"कुञ्चितं पादमुत्क्षिप्य आक्षिप्य त्वञ्चितं न्यसेत्।
जङ्घास्वस्तिकसंवृत्तमाक्षिप्ता नाम सा स्मृता" (१०-३६)

"आक्षिप्तवक्रा तु यदानामिका सकनीयसी ।
अस्यैव तु कपित्थस्य तदासौ खटकामुखः" (९-५५)

"यस्याङ्गुल्यस्तु विनताः सहाङ्गुष्ठेन चापवत् ।
सोऽर्धचन्द्रः" (९-३६)

"उद्वाहितं तूर्ध्वगतमुरो ज्ञेय"मिति (९-२१४) तत्पार्श्वमप्युद्वाहितम् । वैष्णवं चात्र स्थानकं क्राटिसमं तच्चबन्धाल्लभ्यते ।

"द्वौ तालावर्धतालश्च पादयोरन्तरं भवेत् ।
तयोः समस्थितस्त्वेकः त्र्यश्रः पक्षस्थितोऽपरः ॥

---

1 ठ - पार्श्वमुत्थापितम् ।

हस्तो हृदि भवेद्वामः सव्यश्चाक्षिप्तरेचितः ।
रेचितश्चापविद्धश्च तत्स्यादाक्षिप्तरेचितम् ॥ ८१
विक्षिप्तं हस्तपादं च तथैवाक्षेपणं पुनः ।
यत्र तत्करणं ज्ञेयं विक्षिप्ताक्षिप्तकं द्विजाः ॥ ८२

किञ्चिदञ्चितजङ्घं च सौष्ठवाङ्गपुरस्कृतम् ।
वैष्णवं स्थानमेतद्धि विष्णुरत्राधिदैवतम् " (१०-५१,५२)
जर्जराभिमन्त्रणावसरे सूत्रधारेणायं प्रयोक्तव्यः ।

अथाक्षिप्तरेचितम् (२०)

हस्त इति । हृदयक्षेत्रे वामः सव्यश्च यो हस्तः स आसमन्तादित्यूर्ध्वे पार्श्वद्वये च व्यावर्तितकरणेन क्षिप्तः स रेचितो हंसपक्षद्रुतभ्रमात्मा (९-१७८) तत एक आक्षिप्तः स्ववक्षोदेशमधोमुख आनीतोऽञ्चितश्च रेचितः सन्नपविद्धश्च (९-२०३) गात्रक्षेत्रान्निष्क्रामित इत्याक्षिप्तरेचितं करणम् । पादावत्र प्रयोगानुसारेणाञ्चितसूचीरूपेण । त्यागोपादानपरस्परात्मनि च वाक्यार्थेऽभिनेतव्येऽस्य प्रयोगः । यथा " हण्डे चिसुणइ एइं वइउं वण " इत्यादौ ॥

अथ विक्षिप्ताक्षिप्तकम् (२१)

विक्षिप्तमित्यादि । एकस्य हस्तस्य व्यावर्तनकाले पादस्य बहिर्निष्क्रमणलक्षणो विक्षेपो, द्वितीयहस्तस्तु चतुरश्र एव ; पुनः परिवर्तितकरणेन तस्य हस्तपादस्याक्षेपो द्वितीयस्य विक्षेपगमनागमने । प्रधाने वाक्यार्थे चास्य प्रयोगः । यथा " आवतउजंतउ पुणं रगइदं " इत्यादाविति केचित् । उपाध्यायास्त्वाहुः । अभिनयहस्ता ये वक्ष्यन्ते तत्प्रधानस्य करणस्य वाक्यार्थाभिनये प्रयोगः, न तु केवलवर्तनाप्रधानस्य केवलनृत्तहस्तप्रधानस्य वा तस्य तु नृत्ते प्रयोगः प्राधान्येन । अन्ये तु कदाचिदङ्गस्य मोदरक्षणा यथायोगमभिनयान्तराले गतिपरिक्रम(मे?)तालान्तरसन्धाने युद्धनियुद्धचारीस्थानके सञ्चारे वा प्रयोग इति । एतच्च सर्वत्रानुसरणीयम् ।

स्वस्तिकौ चरणौ कृत्वा [1]करिहस्तं च दक्षिणम् ।
वक्षःस्थाने तथा वाममर्धस्वस्तिकमादिशेत् ॥ ८३
व्यावृत्तपरिवृत्तस्तु[2] स एव तु करो यदा ।
अञ्चितो नासिकाग्रे तु तदञ्चितमुदाहृतम् ॥ ८४
कुञ्चितं [3]पादमुत्क्षिप्य [4]त्र्यश्रमूरुं विवर्तयेत् ।
कटिजानू विवर्तौ च[5] भुजङ्गत्रासितं भवेत् ॥ ८५

अथार्धस्वस्तिकम् (२२)

स्वस्तिकावित्यादि ।

"समुन्नतो लताहस्तः पार्श्वात्पार्श्वं तु दोलितः ।
त्रिपताकोऽपरः कर्णे करिहस्तः प्रकीर्तितः" (९-१८४)
"तिर्यक्प्रसारितौ चैव पार्श्वसंस्थौ लताभिधौ ।
"[1]कटिहस्तं" इति केचित्पठन्ति ।

तत्र व्याख्या कट्यां यो हस्तोऽर्धचन्द्रः । (९-३६) पक्षप्रद्योतक(९-१८५) वञ्चितकौ । वाममिति खटकास्यं (९-५५) पादाभ्यामेव स्वस्तिकयोगादर्धस्वस्तिकम् । एतत्करणमभिनयहस्तरहितमेव ।

अथाञ्चितम् (२३)

व्यावृत्तेत्यादि । स एवेति योऽर्धस्वस्तिककरणे करिहस्त उक्तः स एव व्यावर्तितकरणेन यदा नासाक्षेत्रे, अलपल्लवाकृतित्वादञ्चितोदञ्चितसारणानुकारि तदञ्चितम् । एतस्य संमुखीनात्मविषये स्वातिशयकौतुके, निर्वाणप्रधाने वाक्यार्थे प्रयोगः । यथा, एउवेवं मक्कुहेउको इति ।

अथ भुजङ्गत्रासितम् (२४)

कुञ्चितमित्यादि । नृत्तस्यानादिसिद्धत्वात्करणमिदमुक्तरूपमाशङ्कितदृष्टनिकटकसर्पत्रासाविष्टस्येव गतिसंवर्ते भुजङ्गत्रासितं करणम् । हस्तौ तु

---

1 ठ - कटिहस्तं 2 प - परिवृत्तं तु 3 न - पादमुद्दिश्य 4 ठ - न्यस्त मूरुं 5 ठ - निवृत्तौ च, न - जानुविवर्तौ अ - जानुविवर्तश्च ।

---

1 करिहस्तं 2 नासाविष्टस्यैवं ।

कुञ्चितं पादमुत्क्षिप्य[1] जानुस्तनसमं[2] न्यसेत्।
प्रयोगवशगौ हस्तावूर्ध्वजानु प्रकीर्तितम्[3]॥ ८६
[4]वृश्चिकं चरणं कृत्वा करं पार्श्वे निकुञ्चयेत्।
नासाग्रे दक्षिणं चैव ज्ञेयं तत्तु निकुञ्चितम्॥ ८७

पादवशाद्व्यावर्तितपरिवर्तितौ भवतः। क्रमेणैको दोलाहस्तः परः खटकास्य इति करणम्। एतत्सादृश्यात्तु भुजङ्गत्रासित चारी (१०-४१) वक्ष्यते। एवं करणतुल्यनामसु सर्वचारीषु वाच्यम्।

अथोर्ध्वजानु (२५)

कुञ्चितमित्यादि।

"उत्क्षिप्ता यस्य पार्ष्णिः स्यादङ्गुल्यः कुञ्चितास्तथा।
तथा कुञ्चितमध्यश्च स पादः परिकुञ्चितः"। (९-२५५)

ऊर्ध्वजानु एवं भविष्यति। कुञ्चितसमकालं स एव हस्त एव कुञ्चितस्तनसमजानूपरि वोर्ध्वमुखेऽलपल्लवोऽरालो वा, तत्रापरस्तु वक्षःस्थखटकामुखः।

अथ निकुञ्चितम् (२६)

वृश्चिकमित्यादि। वृश्चिकाख्ये करणे यः पादो वक्ष्यते "पादः पृष्ठाश्चितस्तथे"ति (४-१०८) (स) वृश्चिकशब्देनेहोच्चते। तेन पश्चात्प्रसारितं चरणं कृत्वा तदेकं च हस्तं शिरःपार्श्वक्षेत्रेऽरालं, द्वितीयं च नासाग्रक्षेत्रानुसारि वक्षस्यरालमेव कुर्यात्। अन्ये त्वाहुः—नासाग्रे एकः पताकः अन्यश्च सूच्य इति। एतच्चाकाशगमनोन्मुखवितर्कप्रणिधानादिप्रधानवाक्यार्थाभिनये। यथा हनूमतः 'एषोऽस्मि व्योममार्गे प्रसभमभिचरन्कि विलम्बैः'। इत्यादौ॥

---

1 ठ - पादमुद्दिश्य 2 ठ - जानुहस्तं समं 3 ठ - जानुः प्रकीर्तितः
4 ठ - करणं वृश्चिकं ज - चरणं वृश्चिकं 5 ठ - तद्धि निकुञ्चनम्।

वामदक्षिणपादाभ्यां [1]घूर्णमानोपसर्पणैः ।
[2]उद्वेष्टितापविद्धैश्च हस्तैर्मत्तल्ल्युदाहृतम् ॥ ८८

[3]स्खलितापसृतौ पादौ वामहस्तश्च रेचितः ।
सव्यहस्तः कटिस्थः स्यादर्धमत्तल्लि तत्स्मृतम्[4] ॥

रेचितो[5] दक्षिणो हस्तः पादः [6]सव्यो निकुट्टितः ।
दोला चैव भवेद्वामस्तद्रेचितनिकुट्टितम्[7] ॥ ९०

अथ मत्तल्लि (२७)

वामेत्यादि । चार्यप्येवंरूपे (१०-२६) भविष्यति । घूर्णमानस्य ततो वात्युपसर्पणानि पादस्य तैरुपलक्षिताभ्यां पादाभ्यां घूर्णनं च पादस्य द्वितीयपादगुल्फस्वस्तिकोपसर्पणं, तत्समकालं च हस्तौ नितम्बाख्यावुद्वेष्टितौ तदोपसर्पणकालेऽपविद्धोपवेष्टने । एवं द्वितीयेनाङ्गेन । बहुवचनं पुनः पुनरित्थं क्रियेति सूचयति । मदनं मत्तं तनोतीति मत्तल्लि । मत्तोत्कूलस्य वीप्सायोगेन करणेन तन्मत्तल्लिचार्या विक्षेपः । मत्तशेखरकादि विषयोऽस्याः प्रयोगः ।

अथार्धमत्तल्लि (२८)

स्खलितेत्यादि । (वामः) रेचितो हंसपक्षो द्रुतभ्रमः । स्खलित इति षट् (कथ्यां?) द्वितीयः पादनिकटं प्राप्तः। तरुणमदविषयः (प्रयोगः)।

अथ रेचितनिकुट्टितम् (२९)

रेचित इत्यादि । सव्य इति दक्षिण एव, निकुट्टित इत्युद्घट्टित क्रियया ।


"स्थित्वा पादतलाग्रेण पार्ष्णिर्भूमौ निपात्यते । " (९-२४८)

स उद्घट्टितः

"अंसौ प्रशिथिलौ मुक्तौ पताकौ तु प्रलम्बितौ ।
यदा भवेतां करणे स दोल इति संज्ञितः" (९-१३५)

स्त्रीलिङ्गयोगेन दोलाहस्तस्य प्रेङ्खोलितं, यद्वर्तनया गमनागमने सूचयति ।


1 प - घूर्णमानापसर्पणैः 2 न - उद्वेष्टितापविद्धौ च 3 न - स्खलितासर्पितौ 4 ठ - मत्तल्लिमादिशेत् 5 ठ - कुञ्चितो 6 ठ - सव्ये 7 च - निकुट्टके प - निकुट्टनम् ।



२७ मत्तल्लि



२८ अर्धमत्तल्लि



२९ रेचितनिकुट्टितम्




३० पादापविद्धकम्



३१ वलितम




३२ घूर्णितम्




३३ ललितम्




३४ दण्डपक्षम्



३५ भुजङ्गत्रस्तरेचितम्



३६ नूपुरम्



३७ वैशाखरेचितम्



३८ भ्रमरकम्

कार्यौ [1]नाभितटे हस्तौ प्राङ्मुखौ खटकामुखौ ।
सूचीविद्धावपक्रान्तौ पादौ पादापविद्धके ॥ ९१
अपविद्धो भवेद्धस्तः सूचीपादस्तथैव च ।
तथा त्रिकं विवृत्तं च वलितं नाम तद्भवेत् ॥ ९२
[2]वर्तिताघूर्णितः सव्यो हस्तो वामश्च दोलितः ।
स्वस्तिकापसृतः पादः करणं घूर्णितं तु[3] तत् ॥ ९३

अथ पादापविद्धकम् (३०)

कार्यावित्यादि । प्राङ्मुखाविति नाभिक्षेत्रे पराङ्मुखौ सूच्याख्येन पादेन द्वितीयं पादं विद्धं विधाय स एव सूचीपादोऽपक्रान्तचारीयुक्तः कार्यः, एवं द्वितीयोऽपि ।

"उत्क्षिप्ता तु भवेत्पार्ष्णिरङ्गुष्ठाग्रेण संस्थितः ।
सूचीपादः" (९-२५६)

"ऊरुभ्यां वलनं कृत्वे"त्यपक्रान्तापादात् (१०-३०) पादान्तरमपविद्ध-मपसारितं यत्र तदिदं करणम् ।

अथ वलितम् (३१)

अपविद्ध इत्यादि । "हस्तौ तु सर्पशिरसा"विति (९-१७६) सूचीमुखो हस्तः । स देहक्षेत्रादपसृतः कार्यः । तत्समकालं सूचीपादोऽप्यपसृतः । भ्रम-रिकां चारीं कृत्वा ।

"अतिक्रान्तक्रमं कृत्वा त्रिकं तु परिवर्तयेत् ।
द्वितीयपादभ्रमणात्तलेन भ्रमरी स्मृता । (१०-४४)

तत्रेदं त्रिकवलनाद्वलितम् ।

अथ घूर्णितम् (३२)

वर्तितेत्यादि । पार्श्वक्षेत्रादूर्ध्वव्यावर्तितेनाधोमुखपरिवर्तितेन यदा दोला-हस्तत्वाद्घूर्णितम् ।

1 क - नाभिमुखे ठ - नाभिकटी 2 ठ - वर्तितो छ - वलिता
3 च - हितम् ।

करिहस्तो भवेद्वामो दक्षिणश्चापवर्तितः ।
बहुशः [1]कुट्टितः पादो ज्ञेयं तल्ललितं बुधैः ॥ ९४
ऊर्ध्वजानु विधायातस्तस्योपरि लतां न्यसेत् ।
दण्डपक्षं तु तत्प्रोक्तं करणं नृत्तवेदिभिः ॥ ९५
भुजङ्गत्रासितं कृत्वा [2]यत्रोभावपि रेचितौ ।
[3]वामपार्श्वस्थितौ हस्तौ भुजङ्गत्रस्तरेचितम् ॥ ९६

अथ ललितम् (३३)

करिहस्त इत्यादि ।

"समुन्नतो लताहस्तः पार्श्वात्पार्श्वविलोलितः ।
त्रिपताकोऽपरः कर्णे करिहस्तः" (९-१८४)

दक्षिणं (आ)विद्धं कृत्वा बहुशोऽपवर्तितः ।

"बाहुशीर्षाद्विनिष्क्रान्तौ नितम्बौ" (९-१८१)
"केशदेशाद्विनिष्क्रान्तौ पारिपार्श्वोत्थितौ तदा ।
विज्ञेयौ केशबन्धौ" (९-१८२)

इत्येवंप्रकारं नृत्तहस्तयोजनया वर्तितः । चकाराद्वर्तनांते "त्रिपताकोऽपरः कर्णे" (९-१८४) इति करिहस्तः । पादश्च हस्तानुसारेण निकुट्टितः । पुनः पुनरन्येनाङ्गेन । तदिति संविलासनृत्तविषयमेतत्, अत एव ललितं नामकरणम् ।

अथ दण्डपक्षम् (३४)

ऊर्ध्वजान्वित्यादि । कुञ्चितं पादमुत्क्षिप्य जानुस्तनसममिति (१०-३२) ऊर्ध्वजानुचारीं कुर्वन् "तिर्यक्प्रसारिता"विति (९-१८३) लताहस्तौ विधायैकं लताहस्तं तस्य जानुन उपरि क्षिपेत् । पुनर्द्वितीयेनाङ्गेनैवमित्येकत्र पार्श्वे दण्डवद्बाहुसमवस्थानाद्दण्डपक्षं करणम् ।

अथ भुजङ्गत्रस्तरेचितम् (३५)

भुजङ्गेत्यादि । तदित्यध्याहारः ।

"कुञ्चितं पादमुत्क्षिप्य त्र्यश्रमूरुं विवर्तयेत्" (४-८५) इति विधाय द्वावपि हंसपक्षौ तद्भ्रमौ (९-१७८) वामक्षेत्रगौ हस्तौ नेयौ ।

1 न - कुञ्चितः पादे 2 प - यथोभावपि 3 द - वामपार्श्वे ।

त्रिकं सुवलितं कृत्वा लतारेचितकौ करौ ।
नूपुरं च [1]तथा पादं करणे नूपुरे न्यसेत् ॥ ९७
रेचितौ हस्तपादौ [3]च [4]कटी ग्रीवा च रेचिता ।
वैशाखस्थानकेनैतद्भवेद्वैशाखरेचितम् ॥ ९८
आक्षिप्तः स्वस्तिकः पादः करौ चोद्वेष्टितौ तथा ।
त्रिकस्य [5]वलनं चैव ज्ञेयं भ्रमरकं तु तत् ॥ ९९

अथ नूपुरम् (३६)

त्रिकमित्यादि ।

"पृष्ठतोऽभ्यञ्चितं कृत्वा पादमग्रतलेन तु ।
द्रुतं निपातयेद्भूमौ चारी नूपुरपादिका" (१०-३३)

भ्रमरिकया चार्या (१०-४४) त्रिकवलनं कृत्वा ततो नूपुरपादिकां चारीं येन पादेन करोति तद्दिकेनैव हस्तेन (रेचितम् । द्वितीयो लताहस्तः)

अथ वैशाखरेचितम् (३७)

रेचितावित्यादि । रेचितं नृत्तहस्तौ हंसपक्षौ द्रुतभ्रमाविति तदनुकारेण पादग्रीवाकटिगतं रेचितं ज्ञेयम् । यथोक्तं राहुलकेन—

"ग्रीवायां करयोः कट्या पादयोश्च पृथक्पृथक् ।
भ्रमणं रेचितं विद्या"दिति ।
"[1]तालास्त्रयोऽर्धतालश्च पादयोरन्तरं भवेत् ।
[2]तालांस्त्रीनर्धतालं च निषण्णोरुं प्रकल्पयेत् ।
त्र्यश्रौ [3]वक्षःस्थितौ पादौ" वैशाखं स्थानम् (१०-६०)

एतत्करणमभिवाहने ।

अथ भ्रमरकम् (३८)

आक्षिप्त इत्यादि । अनेन पादेनाक्षिप्तचारी सूचिता ।

"कुञ्चितं पादमुत्क्षिप्य व्याक्षिप्य त्वञ्चितं न्यसेत् ।
जङ्घास्वस्तिकसंयुक्तमाक्षिप्ता नाम सा स्मृता" (१०-३६)

1 प - तदा 2 प - मतम् 3 न - तु 4 ठ - कटिग्रीवौ च रेचितौ
5 प - वलनाचैव ।

1 तालत्रयोऽर्ध 2 तालास्त्रयोऽर्धतालश्च 3 स्थानम् ।

अञ्चितः स्यात्करो वामः [1]सव्यश्चतुर एव तु ।
दक्षिणः कुट्टितः पादश्चतुरं तत्प्रकीर्तितम् ॥ १०० ॥
भुजङ्गत्रासितः पादो दक्षिणो रेचितः करः ।
[2]लताख्यश्च करो वामो भुजङ्गाञ्चितकं भवेत् ॥ १०१ ॥

तेनैवं योजना—स्वस्तिकानन्तरं पादमाक्षिप्य तत्समकालमुद्वेष्ट्य "तर्जन्याद्या बहिर्मुख" (९-१९९) मित्युद्वेष्टितमेकं हस्तं कृत्वा त्रिकवलनं कृत्वा पुनर्द्वितीयेनाङ्गेन तथैव चकाराद्वलनानन्तरं स्वस्तिक एव पादः । एकवचनद्विवचनाभ्यां पर्यायेण प्रयोगोऽत्र सूचितः । यदि वोद्वेष्टितशब्देनोल्बणौ नृत्तहस्तावुपलक्षितौ,

"करावुद्वेष्टिताग्रौ तु प्रविधायालपल्लवौ ।
ऊर्ध्वं प्रसारिताविद्धौ कर्तव्यावुल्बणा"विति (९-१९३)

तदा युगपदेव प्रयोगं कृत्वा पादस्वस्तिकं च भ्रमणादेहस्य साक्षात्कृतः । संज्ञायां कन् । एतदुद्धतपरिभ्रमणविषये प्रयोक्तव्यम् ।

अथ चतुरम् (३९)

अञ्चित इत्यादि । अञ्चित इत्यलपल्लवः (९-८५)

"तिस्रः प्रसारिता यत्र तथा चोर्ध्वा कनीयसी ।
तासां मध्ये तथाङ्गुष्ठः स करश्चतुरः स्मृतः" (९-८७)

एवकारेण वक्षःक्षेत्राद् द्वयोरप्यलम् । तुशब्देन सन्निवेशाधिक्यं केवलमिति सूच्यते । कुट्टित इति ।

"स्थित्वा पादतलाग्रेण पार्ष्णिर्भूमौ निपात्यते" । (९-२४९) इत्युद्घट्टिताङ्गरूपः । एतद्विदूषकस्य सविस्मयसूच्याभिनयादौ । यथा "सानुरे खण्डदासवम्मिमिसासा ।

अथ भुजङ्गाञ्चितकम् (४०)


(भुजङ्गेत्यादि । "कुञ्चितं पाद"मित्यादि (१०-४१) भुजङ्गत्रासितचार्यां पादः । "हंसपक्षौ द्रुतभ्रमा"विति (९-१७८) दक्षिणो रेचितः, "तिर्यक्प्रसारिता"विति (९-१८३) वामो लताख्यो नृत्तहस्तः ।)

---


1 ढ सव्यश्चाप्यलपल्लवः 2 ढ - लताख्यं च ततो वामो भुजङ्गाञ्चितकं




३९ चतुरम्




४० भुजङ्गाञ्चितकम्




४१ दण्डकरचितम




४२ वृश्चिककुट्टितम्




४३ कटिभ्रान्तम्




४४ लतावृश्चिकम्




४५ छिन्नम्




४६ वृश्चिकरेचितम्



४७ वृश्चिकम्



४८ व्यंसितम्



४९ पार्श्वनिकुट्टकम्



५० ललाटतिलकम्

विक्षिप्तं हस्तपादं तु [1]समन्ताद्यत्र दण्डवत् ।
रेच्यते तद्धि करणं ज्ञेयं दण्डकरेचितम् ॥ १०२
वृश्चिकं [1]चरणं कृत्वा द्वावप्यथ निकुट्टितौ ।
विधातव्यौ करौ [2]तत्तुज्ञेयं वृश्चिककुट्टितम् । १०३
सूचीं दत्त्वापविद्धं च दक्षिणं चरणं न्यसेत् ।
[3]रेचिता च कटिर्यत्र कटिभ्रान्तं तदुच्यते ॥ १०४

अथ दण्डकरेचितम् (४१)

विक्षिप्तमित्यादि । दण्डवद्धस्तविक्षेपेण रेचनेन च दण्डपक्षौ सूच्येते। पादविक्षेपेण तु दण्डपादा चारी ।

" हंसपक्षकृतौ हस्तौ व्यावृत्तपरिवर्तितौ ।
तथा प्रसारितभुजौ दण्डपक्षाविति स्मृतौ " (९-१८७)

" नूपुरं चरणं कृत्वा पुरतः सम्प्रसारयेत् ।
क्षिप्रमाविद्धकरणं दण्डपादा तु सा स्मृता " (१०-४३)

तत्प्रमोदनृत्तविषयं करणम् । उद्धतविषयं चास्य प्रयोगः (इत्यन्ये) ।

अथ वृश्चिककुट्टितम् (४२)

वृश्चिकमित्यादि । पृष्ठभागे रेचितजङ्घमुत्तानतलं वृश्चिकोपलक्षितं चरणं कृत्वा द्वावपि हस्तौ स्वबाहुशिरस्थलपल्लवौ निकुट्टितौ पर्यायेण विधेयावि-[विद्ध्यादि]ति। एतच्च विस्मयाकाशगमनेच्छादिप्रधाने वाक्यार्थविषये प्रयुज्यते । यथा, "पडिविधारिअं उवक्खंहिआ" इत्यादौ ।

अथ कटिभ्रान्तम् (४३)

सूचीमित्यादि ।

" कुञ्चितं पादमुत्क्षिप्य जानूर्ध्वं सम्प्रसारयेत् ।
पातयेदग्रयोगेन सा सूची परिकीर्तिता " (१०-३४)

---

1 ढ - करणं 2 ढ - तद्धि 3 ढ - पादयोरखुगौ हस्तौ, न - रेचितौ ।

अञ्चितः पृष्ठतः पादः [1]कुञ्चितोर्ध्वतलाङ्गुलिः ।
[2]लताख्यस्तु करो वामस्तल्लतावृश्चिकं भवेत् ॥ १०५

अलपद्मः कटीदेशे [3]छिन्ना पर्यायशः कटी ।
वैशाखस्था केनेह तच्छिन्नं करणं भवेत् ॥ १०६

वृश्चिकं चरणं कृत्वा स्वस्तिकौ च करावुभौ ।
[4]रेचितौ विप्रकीर्णौ च करौ वृश्चिकरेचितम् ॥ १०७

वामं द्रुतमपसारितं कृत्वा पार्श्वे दक्षिणं पादं न्यसेत्, समकालं पृष्ठपरावर्तनक्रमेण कटिं रेचयेत् । भ्रमरिकया वा चार्या(१०-४४)करयोश्च प्रयोगवशगत्वेन(कटि) भ्रमणकाले तयोरपिव्यावर्तनपरिवर्तनकरणयोजनान्ते चतुरश्रावस्थानम् । गतिपरिक्रमेऽस्य तालान्तरादि(ले ?), यतिपरि[1]पुरण विषयेऽस्य प्रयोगः ।

अथ लतावृश्चिकम् (४४)

अञ्चित इत्यादि । प्रथमार्धेन वृश्चिकं वामं चरणं । भूमावाकाशादवपतनेऽस्य प्रयोगः ।

अथ च्छिन्नम् (४५)

अलपद्म इत्यादि । क्रमेण पार्ष्ण्योर्नमनोन्नमनाभ्भां (९-२२८, २३५) यदा कटिच्छेदः पार्ष्ण्योर्नमनोन्नमने न पर्यायेण, तथैव च कटिपार्श्वक्षेत्र एव,

"आवर्तिन्यः करतले यस्याङ्गुल्यः" (९-८५)

इत्येवंभूतोऽलपल्लवः ईषद्गतागतपर्यायेण द्वाभ्यां हस्ताभ्यां प्रयुज्यते वैशाखस्थानकेन "तालास्त्रयोऽर्धतालश्चे"ति "निष्क्रान्ता"विति च लक्षणेन, तदा कटिच्छेदयोगि छिन्नं नाम । अङ्गप्रतिसारणतालभञ्जनादिविषये चास्य प्रयोगः

अथ वृश्चिकरेचितम् (४६)

वृश्चिकमित्यादि । "तावेव मणिवन्धान्त" इति (९-१७२) स्वस्तिकौ, विप्रकीर्णकौ रेचितौ हंसपक्षौ द्रुतभ्रमौ । एतदाकाशयानके प्रयोज्यम् ।

---

1 प - कुञ्चितोऽर्धलताङ्गुलिः 2 न - लताख्यश्च 3 ठ - छित्वा 4 न - रेचितापसृतौ चैव कार्यं वृश्चिकरेचिते ।

---

1 पूरण ।

बाहुशीर्षाञ्चितौ हस्तौ [1]पादः पृष्ठाञ्चितस्तथा ।
दूरसन्नतपृष्ठं[2] च वृश्चिकं तत्प्रकीर्तितम् ॥ १०८
आलीढं स्थानकं यत्र[3] करौ वक्षसि रेचितौ ।
ऊर्ध्वाधो विप्रकीर्णौ च [4]व्यंसितं करणं तु तत् ॥
हस्तौ तु [5]स्वस्तिकौ पार्श्वे तथा पादो [6]निकुट्टितः ।

अथ वृश्चिकम् (४७)

बाह्वित्यादि । द्विवचनैकवचने अङ्गस्यापरिहारं सूचयतः । हस्तस्य बाहुशिरस्यञ्चनेन करिहस्तप्रयोगः सूच्यते ।

"समुन्नतो लताहस्तः पार्श्वात्पार्श्वे विलोलितः ।
त्रिपताकोऽपरः कर्णे करिहस्तः" (९-१८४)

दूरसन्नतपृष्ठत्वं वृश्चिकप्रयोगानन्तरीयं सर्वत्र वृश्चिकप्रयोगेषु मन्तव्यम् । वृश्चिकपुच्छस्थानीयचरणं वृश्चिकमेतत्करणं तदुपलक्षितपादो वृश्चिकः । अस्याकाशगतौ च ऐरावणादिविषयः प्रयोगः । यथा—"श्वेताभ्रभ्रान्तिकारी समवतरति खादभ्रमूवल्लभोऽय"मिति ।

अथ व्यंसितम् (४८)

आलीढमित्यादि ।

"मण्डले दक्षिणं पादं पञ्चतालान्प्रसार्य तु ।
आलीढं स्थानकं कुर्यात् ॥ (१०-६७)

एकस्य तर्जन्याद्युद्वेष्टितेन (९-१९९) करणेनाधो विप्रकीर्णता । द्वितीयस्तर्जन्यादिपरा वर्तितकरणेनोर्ध्वगतः, क्षेत्रपर्यायेणैक उत्तानो हंसपक्षो द्रुतभ्रमलक्षणो रेचकं । अपरोऽधोमुख ऊर्ध्वाध इत्येकीकरणम् । तच्च करणमुभयत्र संबध्यते । एतच्च विभ्रमादि(हनुमदादि?)परिक्रमविषयम् ।

अथ पार्श्वनिकुट्टकम् (४९)

हस्तावित्यादि । "तावेव मणिबन्धान्त" इति (९-१७२) स्वस्तिकौ । तथाशब्देन पार्श्वेन तयोर्निकुट्टितत्वं पर्यायेणोर्ध्वाधोमुखत्वं लभ्येते । तस्य

1 ठ - पादपृष्ठाञ्चित 2 ठ - पृष्ठश्च 3 न - आलीढस्थानके यत्तु 4 ठ - व्यंसितं तद्विदुर्बुधाः 5 प - स्वस्तिके 6 न - पक्षे निकुट्टितौ ।

यत्र तत्करणं ज्ञेयं बुधैः पार्श्वनिकुट्टितम्[1] ॥ ११०

वृश्चिकं [2]चरणं कृत्वा पादस्याङ्गुष्ठकेन तु ।

ललाटे तिलकं कुर्याल्ललाटतिलकं [3]तु तत् ॥ १११

पृष्ठतः कुञ्चितं [4]कृत्वा व्यतिक्रान्तक्रमं ततः ।

आक्षिप्तौ च करौ कार्यौ क्रान्तके करणे द्विजाः॥ ११२

तस्य तलमेव च पादस्य निकुट्टितत्वं,पुनर्द्वितीयेनाङ्गेनोति, पार्श्वगतहस्तनिकुट्टित-योगात् पार्श्वनिकुट्टितम् । प्रकाशनसंचरणाहार(भ्यास?)प्रधाने वाक्यार्थे चास्य प्रयोगः । यथा "पुण्णाव अडेहराभुइं कुहुएहमं . . . . पेताहं सहंसिपित" इत्यादौ ।

अथ ललाटतिलकम् (५०)

वृश्चिकमित्यादि । पादस्य तस्यैव पश्चाद्भागादितरस्याङ्गुष्ठेन तिलकं तिलकक्रियाहेतुभूतत्वेन लक्षितं संश्लेषं कुर्यादित्यासिक्रमेतत्करणं विद्याधर-गतिविषये प्रयुज्यते ।

अथ क्रान्तकम् (५१)

पृष्ठत इत्यादि ।

"कुञ्चितं पादमुत्क्षिप्य पुरतः सम्प्रसारयेत् ।
[1]उत्क्षिप्य पातयेच्चैनमतिक्रान्ता" (१०-२९) इति


चारीं तां कृत्वा पात्यमानं चरणं कुञ्चितं स्थापयेत्पृष्ठतः कुञ्चितं च समादाय क्रियान्तपरिक्रमेण प्रसारयेत् । हस्तौ विचार्य(ल्य?) व्यावर्तितकरणेन देह-क्षेत्राभिष्क्रान्तः पुनः परिवर्तितकरणेनाक्षिप्तः स (व)क्षसि खटकामुखः । पुनरपरेणाङ्गेन प्रयोगः । उद्धतपरिक्रमेऽस्य प्रयोगः ।

---


1 ठ - निकुट्टनम् प - निकुट्टकम् 2 ठ - करणं 3 न - च तत
4 ठ - कुर्यादतिक्रान्तक्रमं पुनः ।

---


1 उत्क्षिप्तं ।



५१ क्रान्तकम्




५२ कुञ्चितम्



५३ चक्रमण्डलम्




५४ उरोमण्डलम्




५५ आक्षिप्तम्




५७ अर्गलम्




५८ विक्षिप्तम्



५९ आवर्तम्




६० डोलापादम्



६१ विवृत्तम्



६३ पार्श्वक्रान्तम्



६५ विद्युद्भ्रान्तम्

आद्यः [1]पादो नतः कार्यः सव्यहस्तश्च कुञ्चितः ।
उत्तानो [2]वामपार्श्वस्थस्तत्कुञ्चितमुदाहृतम् ॥ ११३
प्रलम्बिताभ्यां बाहुभ्यां [3]यद्गात्रेणानतेन च ।
अभ्यन्तरापविद्धः स्यात्तज्ज्ञेयं चक्रमण्डलम् ॥ ११४
[5]स्वस्तिकापसृतौ पादावपविद्धक्रमौ यदा ।
[6]उरोमण्डलको हस्त उरोमण्डलिकन्तु तत् ॥ ११५

अथ कुञ्चितम् (५२)

आद्य इत्यादि । आद्यो नत इति जानुगमनेनाग्रतलसञ्चरो लक्ष्यते । दक्षिणहस्तश्च कुञ्चितः उत्तानालपल्लवरूपो वामपार्श्वे विधेयः । तदेतन्निर्भरानन्दपूर्णदैवतस्याभिनयविषये प्रयोक्तव्यम् । यथा "देहसुभाइउं मकरकलिअणुकापालविलोइचळणं धिआइं" इत्यादौ ।

अथ चक्रमण्डलम् (५३)

प्रलम्बिताभ्यामित्यादि । अड्डिता चात्रादौ चारी ।

"अग्रतः [1]पृष्ठतश्चापि पादोऽग्रतलसञ्चरः ।
द्वितीयपादनिर्घृष्टो यस्यां स्यादड्डिता तु सा" (१०-२२)

उद्धतपरिक्रमपरिष्करणादिविषये चैतत् ।

अथोरोमण्डलम् (५४)

स्वस्तिकेत्यादि ।

"भूमिघृष्टेन पादेन कृत्वाभ्यन्तरमण्डलम् ।
[2]पुनरुत्सारयेदन्यं स्थितावर्ता तु सा स्मृता" (१०-१४)

इत्यनया चार्यापसारणं स्वस्तिकस्य कार्यम् । वद्धा(स्थिता)वर्तत्वात् आपव (अपविद्ध ?)स्थानमित्युक्तं भवति ।

"अन्योन्यजङ्घासंवेधात्कृत्वा तु स्वस्तिकं ततः ।
ऊरुभ्यां वलन"मिति (१०-२०) (बद्धाचारी)

---

1 ठ - पादोऽञ्चितः 2 ठ · वामपार्श्वश्च तत्कुञ्चित 3 ठ - यद्गात्रेण नतेन 4 ठ - आद्यन्तरापविद्धं 5 न - उद्वेष्टिततलौ हस्तावपविद्धक्रमौ यदा । मण्डलं च शिरो ज्ञेयमुरोमण्डलमेव तत् । 6 च · उरोमण्डिलिनौ हस्तावुरे ।

1 पृष्ठतो वापि 2 पुनरुत्सारयेत्पादं ।

[1]आक्षिप्तं हस्तपादं च क्रियते यत्र वेगतः।
आक्षिप्तं [2]नाम करणं विज्ञेयं [3]तद्द्विजोत्तमाः॥ ११६
[4]ऊर्ध्वाङ्गुलितलः पादः पार्श्वेनोर्ध्वं[5]प्रसारितः।
प्रकुर्यादञ्चिततलौ हस्तौ तलविलासिते॥ ११७
पृष्ठतः प्रसृतः पादो द्वौ [6]तालावर्धमेव च।
[7]तस्यैव चानुगो हस्तः [8]पुरतस्त्वर्गलं तु तत्॥ ११८

तस्योरुस्वस्तिकसंस्थानाक्षिप्तम्।

"उद्वेष्टितो भवेदेको द्वितीयश्चापवेष्टितः।
भ्रमितावुरसः स्थाने ह्युरोमण्डलिनौ स्मृतौ" (९-१८९)

अथाक्षिप्तम् (५५)

आक्षिप्तमित्यादि। "कुञ्चितं पादमुत्क्षिप्याञ्चित"मिति (१०-३६) आक्षिप्तया पादचार्या पार्श्वस्य किञ्चिन्नमनेन हस्तस्य चतुरस्य खटकामुखाक्षेपः (मुखस्य वाक्षेपः ?) इति। विदूषकगतिविषयमाक्षिप्तकरणम्।

अथ तलविलासितम् (५६)

ऊर्ध्वेत्यादि। तेनैवोर्ध्वगतेन पादेन सहाञ्चिततलो वा श्लिष्टतलत्वात्कर्तव्यः। द्विवचनात्पर्यायेण द्वितीयेनाङ्गेन प्रयोगोऽभ्यासेन वा। पताकौ हस्तौ परस्परोपसंश्लिष्टाविति पादतलस्य हस्ततलस्य च विकृष्टे देशे आकाशे लसितं श्लेषणं यत्र तलविलसितम्। पादोद्धारसंज्ञया सूत्रधारादिविषये नाट्याचार्या योजयन्ति।

अथार्गलम् (५७)

पृष्ठत इति। द्वितीयचरणकनिष्ठाभङ्गे [1]सार्धात्तालद्वयजङ्घः सन् पादः प्रसृतो भवति। एतत्समकालं च हस्तबाहुर्द्वितीयं पार्श्वक्षेत्रं किञ्चिदग्रप्रसृतोऽल-

1 ठ - आक्षिप्तहस्तपादौ तु, छ - आक्षिप्तहस्तपादं च 2 च - करणं नाम 3 प - तद्द्विजोत्तमैः, ठ - तद्विज्ञेयं द्विजर्षभाः 4 प - ऊर्ध्वं तु गलितः 5 प - समुच्छ्रितः, न - समुत्थितम् 6 न - तलावूर्ध्वं 7 ठ - तस्यैवानुगतो, छ - आस्ये चानुगतो 8 प - पुनरस्त्वर्गलं।

1 साधान्तालाहस्त।

विक्षिप्तं हस्तपादं च [1]पृष्ठतः [2]पार्श्वतोऽपि वा ।
एकमार्गगतं यत्र तद्विक्षिप्तमुदाहृतम् ॥ ११९
प्रसार्य कुञ्चितं पादं [8]पुनरावर्तयेद्द्रुतम् ।
[4]प्रयोगवशगौ [5]हस्तौ [3]तदावर्तमुदाहृतम् ॥ १२०
कुञ्चितं [7]पादमुत्क्षिप्य पार्श्वात्पार्श्वं तु डोलयेत् ।
प्रयोगवशगौ हस्तौ [9]डोलापादं तदुच्यते । १२१

पल्लवाकारःतदन्तर्जलमर्गलयेत् । देहस्य नयम्यन्त्रणात् (नियंत्रणात्?)(अर्गलम्)। परिक्रमे चैतदङ्गदप्रभृतीनां भवति ।

अथ विक्षिप्तम् (५८)

<u>विक्षिप्त</u>मित्यादि । <u>वा</u>ग्रहणं चार्थे तेन विद्युद्भ्रान्तादण्डपादाभ्यां (१०-३२-४३) चारीभ्यामुद्वेष्टितापवेष्टितरेचकवर्तनया पार्श्वयोः पृष्ठेऽग्रे च हस्तपादविक्षेपः । (इद) मुद्धतगतिपरिक्रमसूचनादिविषयम् ।

अथावर्तम् (५९)

<u>प्रसार्ये</u>त्यादि ।

"पादः प्रसारितः सव्यः पुनश्चैवापसर्पितः ।
वामः सव्योपसर्पी च चाषगत्या"मिति (१०-१७)

चाषगत्या चार्या प्रयोगः, हस्तौ च किञ्चिदुद्वेष्टितापवेष्टितरूपौ दोलावेवेति । आ ईषत् वर्तनं हस्तपादस्य यत्र तदिदमावर्तकरणम् । एतन्नायकोपसर्पणे सागरिकापाशबन्धाद्यवसरे प्रयोज्यम् ।

अथ डोलापादम् (६०)

<u>कुञ्चित</u>मित्यादि । पूर्वमूर्ध्वजानुचारी (१०-३२) ततोदोलापादा ।

---

1 ठ - तु न - तत् 2 ठ - पार्श्वतोऽथवा 3 च - पुर आवर्तयेद्द्रुतम् ठ - पुनरावर्तयेत्क्रमात् 4 न - प्रयोगावशगौ 5 न - वर्तौ 6 प - डोलापादं प्रकीर्तितम् ठ - तदावर्तितमुच्यते 7 च - पादमुत्क्षिप्तं 8 च - तदुक्तं दोलपादकम् ।

आक्षिप्तं [1]हस्तपादं च त्रिकं चैव[2] विवर्तयेत् ।
रेचितौ च तथा हस्तौ [3]विवृत्ते करणे द्विजाः॥१२२
सूचीविद्धं विधायाथ त्रिकं तु विनिवर्तयेत् ।
करौ च[4] रेचितौ कार्यौ विनिवृत्ते द्विजोत्तमाः ॥१२३

"कुञ्चितं पादमुत्क्षिप्य पार्श्वात्पार्श्वे विलोलयेत् ।
पातये दञ्चितं चैव दोलापादे"ति (१०-३५)
डोलाहस्तावेव (९-१३५) प्रयोगवशगाविति डोलापादं करणम् ।

अथ विवृत्तम् (६१)

आक्षिप्तमित्यादि । आक्षिप्य वाम(पाद)माक्षिप्य स्वदेहक्षेत्रादपसारित-वृत्त्यावर्त्य हस्तं च व्यावर्तितपरिवर्तिताभ्यां तथैवाक्षिप्य त्रिकं भ्रमरिकया वलयेत् । तद्रेचितौ च हंसपक्षौ द्रुतभ्रमौ हस्ताविति त्रिकविवर्तनयोगात् विवृत्तम् । अस्योद्धतगतिपरिक्रमे प्रयोगः ।

अथ विनिवृत्तम् (६२)

सूचीत्यादि ।

"कुञ्चितं पादमुत्क्षिप्य जानूर्ध्वं सम्प्रसारयेत् ।
पातयेच्चाग्रयोगेन सा सूची "इति (१०-३४)

चार्या द्वितीयं पादं पार्ष्णिभागे स्वस्तिकयोजनया, विद्धा(ध्वा?)त्रिकस्यैकपार्श्वे विवर्तनस्य प्रत्यावर्तनक्रमेण निवृत्तिं कुर्यात् । "अन्योन्यजङ्घावेधेन बद्धया" (१०-२०) वा चार्योरुवलनं कुर्यात् । हस्तौ च रेचितौ हंसपक्षौ द्रुतभ्रमौ । उक्त एवास्य प्रयोगः (विवृत्तवत्) ।

---

1 क - चक्रपादं च 2 च - च परिवर्तयेत् छ - च विनिवर्तितम् 3 ठ - निवृत्ते च - विवृते 4 ठ - करौ तु ।

पार्श्वक्रान्तक्रमं[1] कृत्वा [2]पुरस्तादथ [3]पातयेत् ।
प्रयोगवशगौ हस्तौ [4]पार्श्वक्रान्तं तदुच्यते ॥ १२४
पृष्ठतः [5]कुञ्चितः पादो वक्षश्चैव समुन्नतम् ।
तिलके च [6]करः स्थाप्यस्तन्निशुम्भितमुच्यते ॥
पृष्ठतो वलितं पादं शिरोघृष्टं प्रसारयेत् ।
[7]सर्वतो मण्डलाविद्धं विद्युद्भ्रान्तं तदुच्यते ॥ १२६

अथ पार्श्वक्रान्तम् (६३)

पार्श्वेत्यादि ।

"कुञ्चितं पादमुत्क्षिप्य पार्श्वस्थाने स्थितं न्यसेत्" (१०-२९) इति पार्श्वक्रान्ता चारी । तयाग्रे चरणं पातयेत् । हस्तयोश्च पादप्रयोगानुसारेण पर्यायेण पुरः प्रसारणं, यदि वा प्रयुज्यत इति प्रयोगः गतिप्रचारयुद्धादिस्तत्र पादावुचितौ हस्तावित्येवं सर्वत्र । एतच्च रौद्रप्रधाने भीमसेनादेः परिक्रमे ।

अथ निशुम्भितम् (६४)

पृष्ठत इत्यादि । द्वितीयपादस्य पृष्ठे पार्ष्णिभागे कुञ्चितः । समुन्नतमिति निर्भुग्नं स्तब्धं च निम्नपृष्ठं, चेति खटकामुखः कर इति तदेतद्देशो मध्यमाङ्गुलिरूपो, ललाटे तिलकवदिति । पादेन भुव आघातान्निशुम्भितं महेश्वराभिनयविषयम् । वृश्चिकोऽत्र पाद(हस्त?) इत्येके ॥

अथ विद्युद्भ्रान्तम् (६५)

पृष्ठत इत्यादि । पृष्ठत ऊरुमूलदेशात्प्रभृति वलितं चक्रवद्भ्रामितं तत एव प्रयोक्तुः शिरःक्षेत्रेण श्लिष्टं सर्वतो मण्डलगत्या आख्या आविद्धं चतुरं कृत्वा प्रसारयेत् प्रकर्षेण स सर्वादिषु पर्यायेण सारयेत् । तत्पादस्य विद्युत उत्क्रमणाद्विद्युद्भ्रान्तमुद्धतगतिपरिक्रमादिविषयम् ॥

1 ठ - पार्श्वक्रान्तत्रिकं 2 ठ - पुरस्तात्संप्रसारयेत् 3 प - वादयेत् 4 ठ - पार्श्वक्रान्तमुदाहृतम् 5 ठ - कुञ्चितौ पादौ 6 ठ तुरकः स्थाप्य 7 ठ - हस्तौ च मण्डलाविद्धौ ।

अतिक्रान्तक्रमं कृत्वा [1]पुरस्तात्संप्रसारयेत् ।
प्रयोगवशगौ हस्तावतिक्रान्ते प्रकीर्तितौ॥ १२७
आक्षिप्तं हस्तपादं च त्रिकं चैव विवर्तितम् ।
[2]द्वितीयो रेचितो हस्तो विवर्तितकमेव तत् ॥ १२८
कर्णेऽञ्चितः[3] करो वामो लताहस्तश्च दक्षिणः ।
दोलापादस्तथा चैव गजक्रीडितकं[4] भवेत् ॥ १२९

अथातिक्रान्तम् (६६)

अतिक्रान्तेत्यादि । अतिक्रान्ता चारी (१०-२९) व्याख्याता । पुरस्तादिति स्वदेहस्याग्रेण । एतदपि गतिपरिक्रमादिविषयमेव । एवमन्यस्याभिनयविषयेनोपयोगस्तस्य विषयो मन्तव्यः ॥

अथ विवर्तितकम् (६७)

आक्षिप्तमित्यादि। आक्षिप्तहस्तापेक्षया द्वितीयो हस्तः तं हंसपक्षद्रुतभ्रमं कुर्यात् ॥


अथ गजक्रीडितकम् (६८)

कर्ण इत्यादि ।


"समुन्नतो लताहस्तः पार्श्वात्पार्श्वे विलोलितः" (९-१८४)
इति यः करिहस्तो लक्ष्यते वृत्तमध्ये तस्यैव यदा त्रिपताकोऽसावञ्चितक्रियाविष्टो डोलापादचारी तदा गजक्रीडितकम् । क्रियाविष्टत्वाच्चाङ्गपर्यायोऽत्र लभ्यते । प्रयोगश्चास्य नामोचित एव विषये । यथा "अरुवद्दणा" इत्यादौ ।

---


1 च - पुरस्तात्संप्रयोजयेत् 2 ठ - पुनश्च रेचमेद्धस्तं 3 च - कर्णाञ्चितः करो 4 ठ - गजक्रीडितके



७६ सूची




७७ अर्धसूची




७८ सूचीविद्धम्




८१ सर्पितम्




८२ दण्डपादम्




८३ हरिणप्लुतम्




६६ अतिक्रान्तम




६७ विवाततकम्




६९ तलसंस्फोटितम्



७३ पार्श्वजानु



७४ गृध्रावलीनकम



७५ सन्नतम

द्रुतमुत्क्षिप्य चरणं पुरस्तादथ पातयेत् ।
तलसंस्फोटितौ हस्तौ [1]तलसंस्फोटिते मतौ ॥ १३०
पृष्ठप्रसारितौ[2] पादौ लतारेचितकौ करौ[3] ।
समुन्नतमुरश्चैव[4] गरुडप्लुतकं[5] भवेत् ॥ १३१
सूचीपादोन्नतं[6] पार्श्वमेको वक्षःस्थितः करः ।
द्वितीयश्चाञ्चितो गण्डे [7]गण्डसूची तदुच्यते ॥ १३२

अथ तलसंस्फोटितम् (६९)

द्रुतेत्यादि । अतिक्रान्तया चार्या दण्डपादया वा चरणमुत्क्षिप्याक्षिप्तं कृत्वा तथैवाग्रे निपातयेत् । तत्समकालं च पताकौ हस्तौ, संश्लेषितशब्दादभिहित इति तलसंस्फोटितम् । तस्यैतद्विषय एव प्रयोगो, यथा "तालादेवी सुसुखसुभसइ जणु" इत्यादौ ॥

अथ गरुडप्लुतकम् (७०)

पृष्ठेत्यादि । वृश्चिकवच्चरणमेकोऽलातहस्तः(लताहस्तः?), द्वितीयो रेचितः। प्रयोगोऽस्य नामोचित एव विषये ।

अथ गण्डसूची (७१)

सूचीत्यादि ।

"उत्क्षिप्ता तु भवेत्पार्ष्णिरङ्गुष्ठाग्रेण संस्थितः ।
वामश्चैव स्वभावस्थः" (९-२५७)

इति सूचीपादः । अञ्चितोऽलपल्लवो गण्डक्षेत्रे । अन्ये तु सूचीपादं गण्डक्षेत्रप्राप्तमिच्छन्ति । अन्ये तु सूचीमुखं नृत्तहस्तं गण्डाञ्चितं पुनः क्रियाविष्टमाहुः

"हस्तौ तु सर्पशिरसौ मध्यमाङ्गुष्ठकौ यदा ।
सूचीमुखौ" (९-१७६) इति ।

अन्ये तु सूच्यास्य (९-५९) मभिनयहस्तमाहुः ।

---

1 प - तलस्फोटितकौ मतौ 2 ठ - पृष्ठप्रसारितः पादः 3 ठ - कुञ्चितौ रेचितौ करौ 4 च - समुन्नतं शिरश्चैव 5 ठ - गरुडप्लुतके 6 ठ - सूचीपादौ नतं 7 न - गण्डसूचीति नामतः ।

1 सुप्रसारितं ।

[1]ऊर्ध्वापवेष्टितौ हस्तौ [2]सूचीपादो विवर्तितः।
परिवृत्तत्रिकं चैव परिवृत्तं तदुच्यते॥ १३३
एकः [4]समस्थितः पाद [5]ऊरुपृष्ठे स्थितोऽपरः।
मुष्टिहस्तश्च [6]वक्षःस्थः पार्श्वजानु तदुच्यते॥ १३४
पृष्ठप्रसारितः पादः किञ्चिदञ्चित[7]जानुकम्।
यत्र प्रसारितौ बाहू तत्स्याद्गृध्रावलीनकम्॥ १३५

"खटकाख्ये यदा हस्ते तर्जनी [1]सम्प्रसारिता।
हस्तः सूचीमुखो नामे"ति (९-५९)
अत्र पक्षे गण्डसंश्रयप्रधानभूषणाभिनयविषयोऽस्य प्रयोगः। यथा "गंड-प्पलीळावण्णज्जल एसो फळके अइदाम" इत्यादौ।

अथ परिवृत्तम् (७२)

ऊर्ध्वेत्यादि।

"ऊर्ध्वमण्डलिनौ हस्तावूर्ध्वदेशविवर्तनात्"(९-१८८)(इति हस्तौ) सूचीलक्षणश्च पादो बद्धाचारीं (१०-२०)आश्रित्य विचित्ररूपतया द्वितीयपादे वर्तितः। अन्योन्यजङ्घासंवेधादिति, ततोऽपि भ्रमरिकया त्रिकं परिवृत्तमाहुः।

अथ पार्श्वजानु (७३)

एक इत्यादि। ऊरुपृष्ठजनितस्यैव समस्थितपादस्योरोः द्वितीयोऽस्या हस्तः कव्यामर्धचन्द्र इति पार्श्वजानु। पार्श्वे ऊरुपृष्ठस्तस्य पादस्य संबन्धि द्विजानु यत्रेति। युद्धनियुद्धविषयमेतत्।

अथ गृध्रावलीनकम् (७४)

पृष्ठेत्यादि। पार्श्वात्प्रसारिपादोऽङ्गुष्ठभूमिसंश्लेपादञ्चितजानुकः लताहस्तौ च पार्श्वगौ। तत्पक्षिनिरूपणाद्गृध्रावलीनकम्॥

1 ठ - ऊर्ध्वावचेष्टितौ न सूचीपादेऽपवर्तितः 3 प - परिवृत्तं-त्रिकोणं च 4 ठ - समुत्थितः 5 ठ - ऊरुपार्श्वेस्थितोऽपरः 6 ड - पक्षस्थः 7 ठ - जानुकः।

उत्प्लुत्य चरणौ कार्यावग्रतः स्वस्तिकस्थितौ।
सन्नतौ च तथा हस्तौ सन्नतं तदुदाहृतम्॥ १३६
कुञ्चितं[1] पादमुत्क्षिप्य कुर्यादग्रस्थितं भुवि।
प्रयोगवशगौ हस्तौ [2]तत्सूची परिकीर्तितम्॥ १३७
[3]अलपद्मः शिरोहस्तः सूचीपादश्च दक्षिणः।
यत्र तत्करणं ज्ञेयमर्धसूचीति नामतः॥ १३८

अथ सन्नतम् (७५)

उत्प्लुत्येत्यादि।

"[1]कुञ्चितं पादमुत्क्षिप्य समुत्प्लुत्य निपातयेत्।
जङ्घाञ्चितोपरिक्षिप्ता सा ज्ञेया हरिणप्लुता" (२०-२०)

इत्यनया चार्योत्प्लुत्याग्रदेशे पादं स्वस्तिकं कुर्यात्। सन्नतौ च दोलाहस्तौ।

"अंसौ प्रशिथिलौ हस्तौ पताकौ तु प्रलम्बितौ" (९-१३५)

एतदधमप्रकीर्तनादुपसर्पणादिविषये।

अथ सूची (७६)

कुञ्चितमित्यादि। अग्रतः स्थितमिति।

अथार्धसूची (७७)

अलपद्म इत्यादि। शिरःक्षेत्रे हस्तः शिरोहस्तः। [3]तचार्यामेव करण-मेकेनाङ्गेनेत्यर्धसूची।

---

1 ठ - अञ्चितं 2 न - सा सूची परिकीर्तिता 3 क - वामः पादः शिरोदेशे।

---

1 अतिक्रान्तसमं कृत्वा 2 जङ्घाञ्चिता परि 3 तचार्या एव पादः।

पादसूच्या यदा पादो द्वितीयस्तु [1]प्रविध्यते ।
[2]कटिवक्षःस्थितौ हस्तौ सूचीविद्धं तदुच्यते॥ १३९
कृत्वोरुवालितं पादमपक्रान्तक्रमं नयेत्[3] ।
प्रयोगवशगौ [4]हस्तावपक्रान्तं तदुच्यते। १४०
वृश्चिकं [5]चरणं कृत्वा [6]रेचितौ च तथा करौ।
तथा त्रिकं विवृत्तं च [7]मयूरललितं भवेत्॥ १४१

अथ सूचीविद्धम् (७८)

पादेत्यादि । प्रविध्यत इति सूचीपादौ । द्वितीयं इति, पादः पार्ष्णिस्थः क्रियत इत्यर्थः । कटिस्थितः पक्षवञ्चितकोऽर्धचन्द्रो वा द्वितीयः खटकामुख एव वक्षसि । चिन्ताविषयेऽस्य प्रयोगः । यथा—"कालीकरमिकस्सकह" मित्यादौ ।

अथापक्रान्तम् (७९)

कृत्वेत्यादि ।

"ऊरुभ्यां वलनं कृत्वा कुञ्चितं पादमुद्धरेत् ।
पार्श्वे विनिक्षिपेच्चैतदपक्रान्ता" (१०-३०)

इत्यपक्रान्तक्रमं कृत्वोरुवलितवद्धां चारीमन्योन्यजङ्घा संयोगात्कृत्वा तु स्वस्तिकमूरुभ्यां वलनमित्येवंभूतां कुर्यात् ।

अथ मयूरललितम् (८०)

वृश्चिकमित्यादि । वृश्चिकं[1] पादं विधाय रेचितौ हंसपक्षौ द्रुतभ्रमौ करौ कृत्वा पादान्तमेवोरुदेशे निकुञ्चयभ्रमरिकां चारीं कुर्यादिति मयूरनृत्तानुकारि मयूरललितम् ।

"अतिक्रान्तक्रमं कृत्वा त्रिकं तु परिवर्तयेत् ।
द्वितीयपादभ्रमणाच्चलने भ्रमरी भवेत्" (१०-४४)

1 प - प्रवेध्यते, ठ - प्रपीड्यते 2 ठ - कटिदेश 3 ठ - न्यसेत् 4 न - हस्तावपक्रान्ते प्रकीर्तितौ 5 ठ - करणं 6 ठ - रेचितं च पदद्वयम् न - करद्वयम् मयूरललिते ;

1 स्तुता ।

अञ्चितापसृतौ पादौ[1] शिरश्च परिवाहितम्[2] ।
रेचितौ च तथा हस्तौ[3] तत्सर्पितमुदाहृतम् ॥ १४२
नूपुरं चरणं[4] कृत्वा दण्डपादं प्रसारयेत् ।
क्षिप्राविद्धकरं[5] चैव दण्डपादं तदुच्यते ॥ १४३
अतिक्रान्तक्रमं[6] कृत्वा समुत्प्लुत्य[7] निपातयेत् ।
जङ्घाञ्चितोपरि क्षिप्ता तद्विद्याद्धरिणप्लुतम् ॥ १४४

अथ सर्पितम् (८१)

अञ्चितेत्यादि

"पार्ष्णी यस्य स्थितौ भूमावूर्ध्वमग्रतलं भवेत् ।
अङ्गुल्यश्चाञ्चिताः सर्वाः स पादोऽञ्चित उच्यते" (९-२५५)

अञ्चितपादः सन्नपसृतो द्वितीयपादनिकटात्पलायितकोऽयः (तयो?) समकालमेव तत्पार्श्वगं शिरः तथेति तत्पार्श्वग एव हस्तो रेचितः पुनरयं द्वितीयकरपादस्य विधिः तत्पार्श्वगतमेव च शिरः, अत एव च परिवाहितं, यद्वक्ष्यति—

"पर्यायशः पार्श्वगतं शिरः स्यात्परिवाहितम्" (८-२८)

एतच्च पादकृतमदोपसर्पणविषयमिति मान(नाम?)बलाद्गम्यते ।

अथ दण्डपादम् (८२)

नूपुरमित्यादि ।

"पृष्ठतोऽभ्यञ्चितं कृत्वा पादमग्रतलेन तु ।
द्रुतं निपातयेद्भूमौ चारी नूपुरपादिका ॥ (१०-३३)

इत्येतदनन्तरमेव दण्डपादादिपुरश्चरणं कृत्वा दण्डपादं प्रसारयेत् ।

"क्षिप्रापविद्धकरणं दण्डपादा तु सा स्मृता" (१०-४३)

इत्येतत्सहितमेव पादसहितदण्डत्वरितहस्तं न्यसेदिति साटोपपरिक्रमादिविषयमेतत् ॥

अथ हरिणप्लुतम् (८३)

अतिक्रान्तेत्यादि । ईदृशस्यैव हरिणप्लुता चारी (१०-४२) भविष्यति ।

तस्यास्तु करणप्रवेशः प्रागेवोक्तः (भुजङ्गत्रासितकरणव्याख्यावसरे) ।

---

1 छ - अञ्चितोपगतः पादः, च - अन्तरापसृतौ पादौ 2 - परिवारितम्
3 ठ - करौ यत्र 4 न - कुञ्चितं करणं 5 न - क्षिप्ताविद्धकरं प - क्षिप्तविद्ध 6 ठ - अतिक्रान्तक्षमं 7 न - निवर्तयेत् ।

डोलापादक्रमं कृत्वा समुत्प्लुत्य निपातयेत् ।
परिवृत्तत्रिकं[1] चैव तत्प्रेङ्खोलितमुच्यते[2] ॥ १४५

भुजावूर्ध्व[3]विनिष्क्रान्तौ [4]हस्तौ चाभिमुखाङ्गुली ।
बद्धाचारी[5] तथा चैव [6]नितम्बे करणे भवेत् ॥ १४६

दोलापादक्रमं [7]कृत्वा हस्तौ तदनुगावुभौ ।
रेचितौ घूर्णितौ वापि[8] स्खलितं करणं [9]भवेत् ॥

अथ प्रेङ्खोलितकम् (८४)

दोलेत्यादि । कुञ्चितं पादं पार्श्वात्पार्श्वे दोला (१०-३५) तमेव कृत्वा द्वितीयेनोत्प्लुत्य भ्रमरिकां (१०-४४) कुर्यात् ॥

अथ नितम्बम् (८५)


भुजावित्यादि । अभिमुखाङ्गुली अथोर्ध्वाङ्गुलौ पताकौ व्यावर्तितकरणेन शिरोदेशं नीत्वा ततः परिवर्तितकरणेनोर्ध्वक्षेत्रेण निष्क्रान्तौ बाहू कृत्वा यथासममंसदेशेऽन्योन्यं वीक्ष्यमाणौ पताकौ स्थापयेत् । ततो देहाभिमुखाङ्गुलिहस्तौ तदनुगावुभौ रेचिताघूर्णितौ चापि नितम्बहस्तलक्षणौ कुर्यात् । एतत्त्रिभिर्मुखा (एतदभिमुखा?) ङ्गुलित्वं निपातत्रयेण द्योतितम् "बाहुशीर्षाद्विनिष्क्रान्तौ" (९-१९१) निमेषा(वेशा?)त्तद्योगात्करणान्वितम् ॥

अथ स्खलितम् (८६)

दोलेत्यादि । दोलापादगमनसमकालं हंसपक्षोपलक्षितौ बाहू गमनागमनयुक्तं पुनरपरेणाङ्गेनेति ॥

---


1 ठ परिवर्तत्रिकं 2 च · चैतत्प्रेङ्खोलितकमुच्यते 3 छ - भुजादूर्ध्वं 4 ठ - हस्तावभि 5 ठ - बद्धचारी 6 ठ - नितम्बकरणे 7 ठ - दोलापादं क्रमं 8 च - रेचिताघूर्णितौ चापि 9 ठ · न्यसेत् ।





८४ प्रेङ्खोलितकम्

८५ नितम्वम्





८६ स्खलितम्

८७ करिहस्तम्






८९ सिंहविक्रीडितम्


९० सिंहाकर्षितम्




९१ उद्वृत्तम




९२ उपसृतकम्




९४ जनितम्



९६ निवेशम्



९७ एलकाक्रीडितम



९८ ऊरुद्वृत्तम्

वामो[1] वक्षःस्थितो हस्तः [2]प्रोद्वेष्टिततलोऽपरः।
अञ्चितश्चरणश्चैव[3] प्रयोज्यः [4]करिहस्तके॥ १४८
एकस्तु रेचितो हस्तो [5]लताख्यस्तु तथापरः।
[6]प्रसर्पिततलौ पादौ प्रसर्पितकमेव तत्॥ १४९
अलातं च पुरःकृत्वा द्वितीयं च द्रुतक्रमम्।
हस्तौ पादानुगौ [7]चापि सिंहविक्रीडिते स्मृतौ॥ १५०

(अथ करिहस्तम् (८७)

वाम इत्यादि। प्रोद्वेष्टनक्रियया परः कर्णस्थः त्रिपताकस्तद्दिक्क एव च पादस्तत्प्रोद्वेष्टनसमकालमञ्चितः सम्प्रयोज्य निष्क्रमणीयः। करिहस्तेन नृत्तहस्तेन (योगात्सन्नाम।

सम्मुखतो लताहस्तः पार्श्वात्पार्श्वे विलोलितः।
त्रिपताकोऽपरः कर्णे करिहस्तः—(९-१८४)

अथ प्रसर्पितकम् (८८)

एकस्त्वित्यादि हंसपक्षो द्रुतभ्रम इति रेचितः, अपरो लताख्यो (९-१८३) नृत्तहस्तः। रेचितकरस्य दिक्पादः पादान्तरान्मन्दं मन्दं भूमिघर्षणाच्चलेत्। एतस्य खेचरसंचारविषये प्रयोगः)

अथ सिंहविक्रीडितम् (८९)

अलातमित्यादि चारीमग्रगतां द्रुतं निक्षिप्य तदनुसारेणैव च हस्तं द्वितीयमपि चक्रमेवंभूतं कुर्यादिति सिंहकरघातसाम्यात्सिंहविक्रीडितं रौद्रगतिविषयम्।

---

1 ठ - एको 2 ठ - प्रवेष्टित 3 न - वृश्चिकश्चरणश्चैव 4 ठ - करिहस्तकम् 5 ठ - लताख्यः 6 ठ - संसर्पित 7 च - वापि।

पृष्ठप्रसारितः[1] पादस्तथा हस्तौ निकुञ्चितौ[2]।
पुनस्तथैव कर्तव्यौ सिंहाकर्षितके द्विजाः ॥ १५१
आक्षिप्तहस्तमाक्षिप्तदेहमाक्षिप्तपादकम्[3]।
[4]उद्वृत्तगात्रमित्येतदुद्वृत्तं करणं स्मृतम् ॥ १५२
आक्षिप्तश्चरणश्चैको[5] हस्तस्यैव [6]वशानुगः।
आनतं च तथा गात्रं तथोपसृतकं भवेत्[7] ॥ १५३

अथ सिंहाकर्षितम् (९०)

पृष्ठ इत्यादि । वृश्चिक एकः पादः निकुञ्चितौ स्वस्तिकेन [1]पद्मकोशोर्णनाभौ (९-७४,११४) वामहस्तौ पुनर्द्वितीयेन पादेन यदा वृश्चिकस्तदा तौ क्रियावर्तनावशादपसार्य पुनरपि तादृशावेव हस्ताविति सिंहाद्यभिनयविषयं [2]सिंहाकर्षितकम् ॥

अथोद्वृत्तम् (९१)

आक्षिप्तेत्यादि । आक्षिप्तमासारितानीतं हस्तपादं यथाक्रमं समस्तदेहस्याक्षेपेण । कथं सर्वदेहाक्षेपः, आह उद्वृत्ताचारीयुक्तं कृत्वा—

"पादमाविद्धमावेष्ट्य समुत्प्लुत्य निपातयेत् ।
परिवृत्त्य द्वितीयं तु सोद्वृत्ता" (१०-३८) इति । अत एवोद्वृत्तं करणम् ॥

अथोपसृतकम् (९२)

आक्षिप्तेत्यादि । कुञ्चितं पादमुत्क्षिप्येत्याक्षिप्तां चारीं (१०-३६) वामतो व्यावृत्य करपरिवर्तनेन गात्रमानम्य दक्षिणमरालतां नयेत् । एतद्विनयोपसर्पणे, यथा "महादेवी विण्णवेदीति ॥

---

1 ठ - पृष्ठप्रसर्पितः 2 ठ. कुञ्चितावर्तितौ करौ न - कुञ्चितौ च तथा करौ 3 ड - पादमाक्षिप्तदेहकम् ड - नियताञ्चितपादकम् 4 छ - उद्वृत्य 5 म - अग्रतश्चरणौ कार्यौ 6 ठ - तस्यैव चानुगः 7 न - तच्चोपसृतकं स्मृतम् ।

1 पद्मकोशोद्घानगो 2 सिंहाक्षिप्तकम् ।

दोलापादक्रमं कृत्वा तलसंघट्टितौ करौ।
रेचयेच्च करं वामं[1] तलसंघट्टिते [2]सदा॥ १५४
एको वक्षःस्थितो हस्तो द्वितीयश्च प्रलम्बितः[3]।
[4]तलाग्रसंस्थितः पादो [5]जनिते करणे भवेत्॥ १५५
[6]जनितं करणं कृत्वा हस्तौ चाभिमुखाङ्गुली।
शनैर्निपतितौ चैव ज्ञेयं तदवहित्थकम्॥ १५६

अथ तलसङ्घट्टितम् (९३)

दोलेत्यादि। कुञ्चितं पार्श्वात्पार्श्वमिति दोलापादां चारीं कुर्वंस्तत्समकालं पताकौ सम्यग्घट्टितमन्योन्यतलं ययोस्तादृशौ करौ कृत्वा वैष्णवे स्थानके "द्वौ तालौ" (१०-५१) इत्यत्र स्थित्वा दक्षिणं हस्तं कर्ब्यां च द्वितीयं हंसपक्षद्रुतभ्रमात्मकं रेचकं कुर्यात्। अनुकम्पाप्रधाने वाक्यार्थेऽस्य प्रयोगः। "धाणवगळछिफ . . अ॰धिअचणारि" इत्यादि।

अथ जनितम् (९४)

एक इत्यादि। वक्षसि मुष्टिहस्तः प्रलम्बितो लताख्यः, अन्यासां क्रियाणामारम्भकाल एव तत्सन्निवेशजननयोगाद्यथोचितचारीवशानीतम्। (जनिताचारी—१०-२४)

अथावहित्थकम् (९५)

जनितमित्यादि।

"मुष्टिहस्तश्च वक्षःस्थः करोऽन्यश्च प्रवर्तते।
तलसञ्चरपादश्च जनिता" (१०-२४) इति

चारीपादं कृत्वा तथाप्यभिमुखाङ्गुली इत्यरालालपल्लवतया ललाटवक्षःक्षेत्रगौ हस्तौ विधाय, शनैरिति यथाक्रममुद्वेष्टितकरणावधरोर्ध्वक्रमेण पार्श्वगौ कृत्वा पुनरपवेष्टितपरिवर्तितक्रिययारालालपल्लवावन्योन्यं सम्मुखं वक्षोदेशे

---

1 प - रेचयेच्चरणं वामं 2 प - तथा 3 न - कार्यांवुरो निर्भुग्नमेव
4 ठ - लताग्र 5 ठ - जनितं करणे 6 ठ - सन्नतं न - स्थानं तु जनितं

करौ वक्षःस्थितौ कार्यावुरो निर्भुग्नमेव च।
मण्डल[1]स्थानकं चैव निवेशं [1]करणं तु तत् ॥ १५७
तलसञ्चरपादाभ्यामुत्प्लुत्य [2]पतनं भवेत्।
संनतं वलितं गात्रमेलकाक्रीडितं तु तत् ॥ १५८
करमावृत्तकरणमूरुपृष्ठेऽञ्चितं न्यसेत्।
जङ्घाञ्चिता [4]तथोद्वृत्ता [5]ह्यूरूद्वृत्तं तु तद्भवेत् ॥ १५९

कुर्यात्। गोपनप्रधाने वाक्यार्थेऽस्य प्रयोगः। इत्यवहित्थक्रमे तद्यथा—"ऐथग अं गइकारिं थविफासहसम्ब॰खे इअं बइसं प्ररिहि" ॥

अन्ये तु (अवहित्थहस्तेन)

"शुकतुण्डौ करौ कृत्वा वक्षस्यभिमुखाञ्चितौ।
शनैरधोमुखाविद्धोऽसाववहित्थः" (९-१४३)

इत्येतच्चिन्तादौर्बल्यविषयमाहुः।

अथ निवेशम् (९६)

करावित्यादि।

"स्तब्धं च निम्नपृष्ठं च निर्भुग्नांसं समुन्नतम्।
उरो निर्भुग्नं" (९-९५)

ऐन्द्रे मण्डले पादौ चतुस्तालान्तरस्थितौ गजवाहनादिविषयेऽनेन निवेशयेत्। गात्रस्याविश्रमणान्निवेशाख्यम् ॥

अथैलकाक्रीडितम् (९७)

तलेत्यादि। पतनकाले गात्रस्य नमनं ततो वलनम्। एवं नामैकरूपा च चारी (१०-१९) भविष्यति। अधमप्रकृतिगतिविषयमेतत।


अथोरूद्वृत्तम् (९८)

करमित्यादि।


"तलसञ्चरपादस्य पार्ष्णिर्बाह्योन्मुखी यदा।
जङ्घाञ्चिता तथोद्वृत्ता ऊरूद्वृत्तेति" (१०-२४)

अनया चार्या सह व्यावर्तितकरणेनारालं खटकं चोरुदेशे पृष्ठे च क्षिपेत्। प्रणयकोपेर्ष्याप्रार्थनादिविषयमेतत्करणम्।


1 च - करणं च 2 च - पतनं तु यत् 3 ठ - पृष्ठेऽञ्चिते 4 ठ - ततो वृत्ता 5 न - ह्यूद्वृत्तं तदुच्यते।




९९ मदस्खलितकम्




१०० विष्णुक्रान्तम्




१०१ सम्भ्रान्तम्



१०३ उद्वृत्तम्




१०४ वृषभक्रीडितम्




१०५ लोलितम्


Plate XVI.



१०८ गङ्गावतरणम्



१०७ शकटास्यम्



१०६ नागापसर्पितम्

करौ प्रलम्बितौ कार्यौ शिरश्च परिवाहितम् ।
पादौ च वलिताविद्धौ मदस्खलितके द्विजाः॥ १६०
पुरः प्रसारितः[1] पादः [2]कुञ्चितो गमनोन्मुखः ।
करौ च रेचितौ यत्र विष्णुक्रान्तं तदुच्यते॥ १६१
करमावर्तितं कृत्वा ह्यूरुपृष्ठे निकुञ्चयेत् ।
ऊरुश्चैव तथाविद्धः सम्भ्रान्तं करणं तु तत्॥ १६२
अपविद्धः करः सूच्या पादश्चैव [3]निकुट्टितः ।
वक्षःस्थश्च करो वामो विष्कम्भे करणे भवेत्॥

अथ मदस्खलितकम् (९९)

करावित्यादि । करौ दोलौ पर्यायशः पार्श्वगतं शिरो वलिताविद्धावनतानन्तरं स्वस्तिकापसृतौ (पादौ) पर्यायेणेति । मद्यमदविषयमेतत् ।

अथ विष्णुक्रान्तम् (१००)

पुर इत्यादि । विष्णोरित्थं क्रमणमत्र । तत्तद्विषय एवास्य प्रयोगः ।

अथ सम्भ्रान्तम् (१०१)

करमित्यादि । आविद्धायां चार्यां सत्यामूरुस्तथा ।

"स्वस्तिकस्याग्रतः पादः कुञ्चितश्च प्रसारितः ।
निपतेदञ्चिताविद्ध आविद्धा नाम सा स्मृता"

तच्चारीप्रयोगकाले च व्यावर्तितपरिवर्तितकरणेनालपल्लवमूरुपृष्ठे न्यसेत् । सम्भ्रमपरिक्रमविषयमेतत् ।

अथ विष्कम्भम् (१०२)

अपविद्ध इत्यादि । वामः करो दक्षिणेन हस्तेन सूचीहस्तनृत्तहस्तात्मनापगमपूर्वकं विद्धः स एव पादो निकुट्टितः । चकारात् द्वितीयेनैवाङ्गेन ।

---

1 ठ - उरःप्रसारितः च - पुरःप्रसर्पितः 2 प - कुञ्चितोद्वर्जनोन्मुखः
3 ठ , निकुञ्चितः ।

पादावुद्धट्टितौ कार्यौ तलसङ्घट्टितौ [1]करौ ।
नितम्बपार्श्वं[2] कर्तव्यं बुधैरुद्धट्टिते सदा ॥ १६४
प्रयुज्यालातकं पूर्वं[4] हस्तौ चापि हि रेचयेत्[3] ।
कुञ्चितावञ्चितौ चैव वृषभक्रीडिते सदा[5] ॥ १६५
रेचितावञ्चितौ हस्तौ लोलितं वर्तितं शिरः ।
उभयोः पार्श्वयोर्यत्र [6]तल्लोलितमुदाहृतम् ॥ १६६

एवकारेणेदमाह पुनः सूच्या चार्योपलक्षितः पादः परश्च निकुट्टितोऽलपल्लवो ऽन्यस्तु वामः । एवं पुनःकरणे सति क्रियाविष्कम्भणाद्विस्तारणाद्विष्कम्भाख्यं करणम् ।

अथोद्धट्टितम् (१०३)

पादावित्यादि । "स्थित्वा पादतलाग्रेण पार्ष्णीं भूमा" विति (९-२३५) पादोऽन्योन्यमनेन तालिकादानोन्नतौ करौ पुनर्द्वितीयपाद उद्घट्टितः पर्यायेण तथैव च पार्श्वयोर्गमनमिति । प्रमोदविषयमेतत् ।

अथ वृषभक्रीडितम् (१०४)

प्रयुज्येत्यादि । अलातचारीं कुर्वन्हस्तौ रेचितौ कुर्यात् । ततः कुञ्चितौ व्यावर्तिकरणेन कृत्वा ततो बाहुशिरस्यलपल्लवाकृती अञ्चितौ विधेयाविति वृषभमङ्कद्वारयोगाद् वृषभक्रीडितम् ।

अथ लोलितम् (१०५)

रेचिताविति । वैष्णवे स्थाने आदौ रेचितं हंसपक्षद्रुतभ्रमरूपं हस्त द्वितीयं चाञ्चितं वक्षस्यलपल्लवाकारं कुर्यात् । शिरश्च लोलितं सर्वतो लोलितमपि चोभयोः पार्श्वयोर्वर्तितं विश्रमितम् ।

---

1 ठ - परौ 2 न - नतं च पार्श्वं 3 ठ - द्वावपि रेचितौ 4 ठ - पादं
5 ठ - स्मृतौ 6 ठ - ज्ञेयं तल्लोलितं बुधैः ।

[1]स्वस्तिकापसृतौ पादौ शिरश्च परिवाहितम् ।
रेचितौ च तथा हस्तौ स्यातां नागापसर्पिते ॥ १६७
निषण्णाङ्गस्तु चरणं प्रसार्य तलसञ्चरम् ।
उद्घाटितमुरः कृत्वा [2]शकटास्यं प्रयोजयेत् ॥ १६८
ऊर्ध्वाङ्गुलितलः पादस्त्रिपताकावधोमुखौ ।
हस्तौ [3]शिरस्सन्नतं च [4]गङ्गावतरणं त्विति ॥ १६९

अथ नागापसर्पितम् (१०६)

स्वस्तिकेत्यादि । परिवाहितं पर्यायशः पार्श्वगतं कुटिलगतियोगान्नागापसर्पितम् । इदं तरुणमदविषयम् ।

अथ शकटास्यम् (१०७)

निषण्णेत्यादि । निषण्णं निस्समीकृतमङ्गं येन तेन, तज्जानुसमस्थिते पदे पुरो गुल्फदेशे कुञ्चितो न तु जानुरेव पादः स एवाध्यर्धतालान्तरसञ्चरः प्रसार्य तत्सहितोऽपि हस्तद्वितीयो वक्षसि खटकः । ईदृश्येवेयं चारी (१०-१५) भविष्यति । अनेन सन्निवेशेन शकटस्यासनं क्षेप इति । तथाविधबालक्रीडादिविषये भाणिकादिविषयेऽस्य प्रयोगः ।

अथ गङ्गावतरणम् (१०८)

ऊर्ध्वेत्यादि । अत्र केचिदूर्ध्वाङ्गुलितल इत्यनेन समपादाञ्चितावस्थानमुक्तमित्याहुः । एतच्चायुक्तमशब्दार्थत्वात् । तस्मादञ्चितो न पादः । अन्ये त्वाहुः—अनेन क्रमेणाग्रतलसञ्चारो वृश्चिकहस्तपाद इति । अपरे तु—चकारेण भिन्नक्रमेण च पादस्य त्रिपताकाहस्तयोश्शिरसश्च सन्नतत्वात्तेन प्रथमं पादोद्धारं स्थित्वा पादमूर्ध्वं विधाय तदुपरि च पताकाहस्तौ तं पादं क्रमेणाग्रतलसञ्चारो वृश्चिकपाद इति । [अपरे तु चकारेण भिन्नक्रमेण च तदास्य त्रिपताकाहस्तयोः शिरसश्च सन्नतत्वात्तेन प्रथमः पादोद्धारः स्थित्वा पादमूर्ध्वं विधाय तदुपरि

1 न, स्खलितापसृतौ, ड - स्खलितासर्पितौ तथा हस्तौ च रेचितौ । परिवाहितं शिरश्चैव कुर्यान्नागावसर्पिते 2 प - शकटाख्यं ठ - उद्वाहितमुरः कृत्वा शकटास्यं 3 च - शिरस्सकृत्तं 4 ठ - गङ्गावतरणं तु तत् ।

यानि स्थानानि याश्चार्यो व्यायामे गदितानि तु ।
पदप्रचारस्त्वेषां तु करणानामयं भवेत् ॥ १७०
ये चापि नृत्तहस्तास्तु गदिता नृत्तकर्मणि ।
तेषां समासतो योगः करणेषु विभाव्यते ॥ १७१
प्रायेण करणे कार्यो वामो वक्षःस्थितः करः ।
चरणश्चानुगश्चापि दक्षिणस्तु भवेत्करः ॥ १७२
[1]चार्यश्चैव तु याः प्रोक्ता नृत्तहस्तास्तथैव च ।
सा मातृकेति विज्ञेया तद्भेदात्करणानि तु ॥ १७३
अष्टोत्तरशतं ह्येतत्करणानां मयोदितम् ।
अतः पर प्रवक्ष्यामि [2]ह्यङ्गहारविकल्पनम् ॥ १७४

च त्रिपताकहस्तौ तं पादं क्रमेण सन्नमयेत्] अवरोधयेत्तदनुसारे च त्रिपताकाहस्तं संनमयेत् । तथैव क्रमेण शिरः । एवमेव त्रिविक्रमपादप्रसरणपूर्वकं गङ्गादेव्या अवतरणमिति नाम्नैवास्य करणस्य विषयो दर्शितः । इतिशब्दः समाप्तौ ।

इत्यष्टोत्तरशतकरणनिरूपणं समाप्तम्

अथाङ्गहारलक्षणम् ।

तलपुष्पपुटस्य पूर्वनिर्देशात्सर्वत्र वर्तनाप्राधान्येनोपक्रम इति सूचितं परं प्रयोगमाह । उक्तमुपसंहरन् क्रमप्राप्तानङ्गहारान्यथोद्देशं लक्षणीयत्वेन प्रतिजानीते अष्टोत्तरशतमित्यादिना । हि यस्मात्करणानामष्टोत्तरशतमुदितं (ततो) हेतोः परं विशिष्टमङ्गहारो (वि) कल्प्यते परस्परतोऽभेद्येन येन तदङ्गहारेष्वेव विशेषलक्षणं वक्ष्यामीति सम्बन्धः । जातावेकवचनम् ।

---

1 ढ - कार्यश्चैव 2 न - अङ्गहार ।

प्रसार्योत्क्षिप्य च करौ समपादं प्रयोजयेत् ।
व्यंसितापसृतं [1]सव्यं हस्तमूर्ध्वं प्रसारयेत् ॥ १७५
प्रत्यालीढं ततः कृत्वा तथैव च निकुट्टकम् ।
ऊरूद्वृत्तं ततः [2]कुर्यादाक्षिप्तं स्वस्तिकं ततः ॥ १७६
नितम्बं करिहस्तं च कटिच्छिन्नं [3]च योगतः ।
स्थिरहस्तो [4]भवेदेष त्वङ्गहारो [5]हरप्रियः ॥ १७७

अथ स्थिरहस्तः (१)

तत्रोद्देशक्रमेण स्थिरहस्तं लक्षयति प्रसार्येत्यादिना हरप्रिय इत्यन्तेन । तत्र प्रसार्योत्क्षिप्य च कराविति त्रिपताकदण्डविलक्षमिति लक्षितस्य लीनाख्यस्य करणस्य प्रथमेतिकर्तव्यतानिरूपणेनोपलक्षितम्। एतच्च तल्लक्षण एवोक्तमस्माभिः पताकशब्दस्य प्रयोजनं वदद्भिः । इदमिदं करणं योगतोऽन्यादौ ह्यन याजिघृक्षतीत्यक्षिकरणगतहस्तपादाद्यौचित्ययुक्तवर्तनाचारीयोजनया यदि भवति तत एव चाविच्छिन्ना शुभा च, प्रबन्धादलातचक्रवदेकबुध्द्युपसंहार्यं तदलं। स्थिरहस्तो नामाङ्गहार इति संबन्धः । एवं सर्वत्र, योगत इति सर्वाङ्गहारेषु संबध्यते । अन्ये तु योगात्समाधेरप्ययं भगवतः प्रीतय इति व्याचक्षते । समपादमिति समनखं करणम् । पदं "श्लिष्टौ समनखा"विति (४-६५) । व्यंसिते—

"आलीढं स्थानकं यत्र करौ वक्षसि रेचितौ ।
ऊर्ध्वाधोविप्रकीर्णौ च व्यंसितं करणं तु तत्" (४-१०९)

इति लक्षिते करणेऽपसृतौ विप्रकीर्णौ यौ हस्तौ तौ द्वावप्यूर्ध्वस्थानस्थितौ कृत्वा कृत्वा आलीढस्य परिवर्तनेन (१०-७०) प्रत्यालीढं स्थानकं कुर्यात् । ततो निकुट्टिते "निकुट्टितौ यदा हस्तौ" (४-७०) इति नवमं करणम् । ततोऽपि "करमावृत्तकरणमूरुपृष्ठ" (४-१५९) इत्यष्टनवतितमं । ततः स्वस्तिकं "हस्ताभ्यामथ पादाभ्यामिति (९७६) पञ्चदशम् । तत "आक्षिप्तं हस्तपादं चेति" (४-११६) पञ्चपञ्चाशत् ।

1 ठ - सव्यमूर्ध्वं हस्तं 2 ठ - कुर्यात्स्वस्तिकाक्षिप्तमेव च 3 ठ - तथैव च
4 च - भवेदेवमङ्गहारा 5 प - रा हरप्रियाः द - भवप्रियः ।

तलपुष्पापविद्धे[1] द्वे वर्तितं [2]सनिकुट्टकम् ।
प्रत्यालीढं ततः कृत्वा तथैव च निकुट्टकम् ॥ १७८
ऊरुद्वृत्तं [3]तथाक्षिप्तमुरोमण्डलमेव च ।
[4]नितम्बं करिहस्तं च कटिच्छिन्नं तथैव च ॥ १७९
एष पर्यस्तको नाम [5]ह्यङ्गहारो हरोद्भवः[6] ।

"भुजावूर्ध्वं विनिष्क्रान्तौ हस्तौ चाभिमुखाङ्गुली" (४-१४६)
इति नितम्बगतिः (नितम्बकरणम् ?) । ततः करिहस्तम्—
"वामो वक्षःस्थितो हस्तः प्रोद्वेष्टिततलोपरि" (४-१४८)
इति सप्ताशीतितमं, ततः "पर्यायशः कटिश्छिन्ना बाहू शिरसि" (४-७२)
इत्येकादशम् । इत्येवं करणग्रामसम्यग्योजनया कृतस्थिरहस्तमङ्गहारं निवर्तयति । अतः सर्वेष्वङ्गहारेष्वित्यर्थः । करणावयववर्गं सर्वं करणजातं चतुर्दिङ्मुखेषु प्रयोज्यमिति नाट्याचार्या मन्यन्ते । अनागतातीतवे(दी मुनिस्तद) युक्तं मन्यमान एकान्नविंशतितमे परिवृत्तकरेचितेऽङ्गहारे वक्ष्यति पराङ्मुखविधिर्भूय एव मेव भवेदित्यङ्गहारविधावित्यर्थायोगात्तदाङ्गिकेष्वेव वक्ष्यामःउद्वेष्टितकरणस्वरूपं निरूपयतः । प्रयोगश्चैषामदृष्टार्थ एव, प्रयोगे च तत्तद्वाक्यार्थादूनं विप्रकर्षानुसारेणैतच्च पूर्वरङ्गे (अ-५) यथोपदेशं वक्ष्यामः । युद्धे नियुद्धे चेत्यादौ विषयेणैतेषां कदाचित्प्रयोगः । एवं स्थिरहस्त एव नानिर्व(र्तनं) लक्ष्यत इति न वृथा तन्निर्देशेनायासः ॥

अथ पर्यस्तकः । (२)

तलपुष्पपुटेत्यादि । केचित्प्रसार्येत्यादिना प्रत्यालीढं ततः कुर्यादित्यन्तं सर्वेष्वङ्गहारेषु प्रथमामिति कर्तव्यतां योजयन्ति प्रथमाङ्गस(ङ्ग)तिकरणयोगः कथमित्यभिप्रायेण । अन्ये तु प्रत्यङ्गहारासमुचिताः साधारणाः स्वयमूह्या इत्याहुः । श्रुतहानौ को गुण इत्यपरे । तत्र "वामे पुष्पपुट" (४-६१) इति प्रथमम् । "आवर्त्य शुकतुण्डाख्यमूरुपृष्ठे" "वामहस्तश्च वक्षःस्थ" (४-६५) इत्यपविद्धम् । "कुञ्चितो मणिबन्धे त्वि"ति (४-६२) वर्तितम् । निकुट्टिता-

1 ठ - विद्धे च 2 च - सन्निकुट्टकम् ठ - संप्रसारयेत् 3 ड - ततः कुर्यादुरोमण्डलमेव च ठ - ततः कुर्यादाक्षिप्तस्वस्तिकं तथा 4 न - नितम्बकरिहस्तश्च 5 ठ - त्वङ्ग 6 द - भवोद्भवः ।

अलपल्लवसूचीं च [1]कृत्वा विक्षिप्तमेव च ॥ १८०
[2]आवर्तितं ततः कुर्यात्तथैव च निकुट्टकम् ।
ऊरूद्वृत्तं तथाक्षिप्तमुरोमण्डलमेव च[3] ॥ १८१
करिहस्तं [4]कटिच्छिन्नं सूचीविद्धो [5]भवेदयम् ।
अपविद्धं तु करणं सूचीविद्धं [6]तथैव च ॥ १८२
उद्वेष्टितेन हस्तेन त्रिकं तु परिवर्तयेत् ।

विति (४-७०) निकुट्टकम् । "करमावृत्तकरण"मिति (४-१५९) ऊरूद्वृत्तम् । तत "आक्षिप्तहस्तपादौ" (५-११९) इत्याक्षिप्तम् । "स्वस्तिकापसृता" विति (४-११५) उरोमण्डलम् । ततो "भुजावूर्ध्वविनिष्क्रान्ता"विति (४-१४६) नितम्बकरणम् । अन्तरं "वामो वक्षः स्थित" इति (४-१४८) करिहस्तम् । ततः "पर्यायश" इति (४-७२) कटिच्छिन्नम् । एतेन करणदशकेन पर्यस्तकः ॥

अथ सूचीविद्धः । (३)

अर्ध(ल?)पल्लवसूची चेति । "अलपद्मः शिरोदेशे सूचीपादश्चे"ति (४-१३८) अलपल्लवोपलक्षितमर्धसूच्याख्यं सप्तसप्ततितमं करणं—

"विक्षिप्तं हस्तपादं च पृष्ठतः पार्श्वतोऽपि वा ।
एकमार्ग"मिति (४-११९).

विक्षिप्तम् । एकान्नषष्टितमं यदावर्ताख्यं करणं—

"प्रसार्य कुञ्चितं पादं पुरस्त्वावर्तयेद्द्रुतम् ।
प्रयोगवशगा"विति (४-१२०)

तदेवावर्तितशब्देनोक्तम् । ततो निकुट्टकादीनि षड्करणान्युक्ताङ्गहारवदेव (स्थिरहस्त इव) ।

अथापविद्धः । (४)

अपविद्धन्त्वित्यादि ।

"आवर्त्य शुकतुण्डाख्यमूरुपृष्ठे निपातयेत् ।
वामहस्तश्च वक्षःस्थोऽप्यपविद्धं" (४-६५)

1 न - क्षिप्त्वा द - सूचीस्तुकृत्वा 2 ठ - आरात्रिकम् 3 ठ - मण्डलकं तथा 4 न - कटिच्छिन्नं 5 ठ - भवेद्द्वयम् 6 द - पुनर्भवेत् ।

उरोमण्डलकौ हस्तौ कटिच्छिन्नं तथैव च॥ १८३

अपविद्धोऽङ्गहारश्च विज्ञेयोऽयं प्रयोक्तृभिः[1] ।

करणं नूपुरं कृत्वा विक्षिप्तालातके पुनः ॥ १८४

पुनराक्षिप्तकं[2] कुर्यादुरोमण्डलकं तथा ।

[3]नितम्बं करिहस्तं च कटिच्छिन्नं तथैव च ॥ १८५

[4]आक्षिप्तकः स विज्ञेयो ह्यङ्गहारः प्रयोक्तृभिः ।

"पादसूच्या यदा पादो द्वितीयश्च प्रविध्यते ।
कटिवक्षःस्थितौ हस्तौ सूचीविद्धं तत्" (४-१३९)

एवं करणद्वयं कृत्वोद्वेष्टितेन करणेन (९-१९९) बद्धया चार्या त्रिकं वलितं कृत्वोरोमण्डलहस्तोपलक्षितमुरोमण्डलकरणं ततोऽपि कटिच्छिन्नं विदध्यात् ।

"स्वस्तिकापसृतौ पादावपविद्धक्रमौ यदा ।
उरोमण्डलको हस्तावुरोमण्डलकं तु तत्" । (४-११५)

प्रयोक्तृभिरिति [म] ये प्रयोगकुशलास्तैः स्वयमङ्गस्यागतिं सम्यग्विद्वद्भिर्ज्ञातुं न शक्य इत्यनेनेदमाह। एतेषु करणेषु यदा मध्यवर्तनाशिरोभ्रूनेत्रादिकर्मसहितापि या योजना च सा अंशश्च स्वरूपतत्त्वविदा स्वयमङ्गीकर्तुं शक्यः । अन्यस्य तूक्तापि प्रयोक्तुमशक्या, न चापि निरूपयितुं शक्या। गीतवाद्यालययन्ति (ति?)वाक्यार्थभेदेन च तस्या एव योजना। योजने चानन्त्यं, नहि सुशिक्षितोऽपि लक्षणकारो वाक्यानां प्रतिपदं लक्षणं कर्तुं शक्नोति। अस्य पश्चादिदं प्रयोज्यमिति दयापि (ज्ञापि?)तेन किञ्चित्सात्मनो योजना च संहिता कार्या । नियमनमग्रे वक्ष्याम इत्युक्तम् । तेन मण्डलादिस्थाननिरुपणमिह कैश्चित्कृतं निरुपयोगमेवेत्यास्ताम् ।

अथाक्षिप्तकः (५)

करणं नुपुरमित्यादि ।

"त्रिकं सुवलितं कृत्वा लतारेचितकौ करौ" (४-९७) (नू)पुरं च तथा पादकरणे नूपुरे "विक्षिप्तं हस्तपादं चे"ति (४-११९) विक्षिप्तम् ।

---

1 ढ - हारस्तु विज्ञेयस्तत्प्रयोक्तृभिः द - अपविद्धस्तु विज्ञेयोह्यङ्गहारः प्रयोक्तृभिः 2 ठ - पुराविक्षिप्तकं 3 द - नितम्बकरिहस्तश्च कटिच्छेदं 4 न - आक्षिप्तकस्तु ।

उद्वेष्टितापविद्धस्तु करः पादो [1]निकुट्टितः ॥ १८६
पुनस्तेनैव योगेन वामपार्श्वे भवेदथ।
उरोमण्डलकौ हस्तौ [2]नितम्बं करिहस्तकम् ॥ १८७
[3]कर्तव्यं सकटिच्छिन्नं नृत्ते तूद्धट्टिते[4] सदा[5]।
[6]पर्यायाद्वेष्टितौ हस्तौ पादौ चैव[7] निकुट्टितौ ॥ १८८
कुञ्चितावञ्चितौ चैव ह्यूरूद्वृत्तं तथैव च।

"अलातं चरणं कृत्वाप्यंसयोर्दक्षिणं करम्।
ऊर्ध्वजानुक्रमं कुर्यादलातकमिति स्मृतम्" (५-७९)

यत्र यत्र पुनर्ग्रहणं तत्र तत्र केचिद्द्वियोगमाहुः। द्वितीयाङ्गहारोक्तमाक्षिप्तादिकरणपञ्चकम्।

अथोद्धट्टितः (६)

उद्वेष्टितापविद्धस्त्विवति। अनेन प्रथमश्लोकेन पर्यायशोऽङ्गद्वयप्रयोगं निकुट्टकं करणमाह "निकुट्टितौ यदा हस्तौ" (४-७०) इति। उरोमण्डलकादिकरणचतुष्कं द्वितीयाङ्गहारवदेव।

अथ विष्कम्भः (७)

पर्यायोद्वेष्टिताविति। अनेनार्धेनानन्तराङ्गहारवदेव प्रथममण्डलद्वयेन निकुट्टितं करणमित्याह। कुञ्चिताविति हस्तौ पादौ चेति सम्बन्धः, तेन कुञ्चितस्य करणस्याञ्चितस्य चाङ्गद्वयपर्यायेण प्रयोज्यमुक्तम्।

"वृश्चिकं चरणं कृत्वा करं पार्श्वे निकुञ्चयेत्।" (४-८७)
"वक्षःस्थाने तथा वाममर्धस्वस्तिकमादिशेत्" (४-८३)

इत्यनन्तरं,

"व्यावृत्तपरिवृत्तस्तु स एव तु करो यदा।
अञ्चितो नासिकाग्रे तु तदञ्चितम्" (४-८४)

चतुरश्रमित्यनेनोर्ध्वेनार्धनिकुट्टकं दशमं करणमाह

---

1 ठ - निकुञ्चितः 2 न - नितम्बः, करिहस्तकः द - पादौ चैव निकुञ्चितौ। 3 ढ कर्तव्यः सकटिच्छेदो 4 द - तूत्कटिते 5 च - बुधैः 6 ज - पर्यायोद्वेष्टितौ 7 न - नैव।

चतुरश्रं करं कृत्वा पादेन च निकुट्टकम्[1] ॥ १८९
भुजङ्गत्रासितं[2] चैव करं चोद्वेष्टितं पुनः ।
परिच्छिन्नं च कर्तव्य त्रिकं भ्रमरकेण तु ॥ १९०
[3]करिहस्तं कटिच्छिन्नं विष्कम्भः परिकीर्तितः ।
दण्डपाद करं चैव[4] विक्षिप्याक्षिप्य चैव हि ॥ १९१
व्यंसितं वामहस्तं च सह पादेन सर्पयेत् ।
चतुरश्रं करं कृत्वा पादेन च निकुट्टकम् ॥ १९२
भुजङ्गत्रासितं चैव करं चोद्वेष्टितं पुनः ।
निकुट्टकद्वयं कार्यमाक्षिप्तं मण्डलोरसि ॥ १९३
[5]करिहस्तं कटिच्छिन्नं कर्तव्यमपराजिते ।

"अञ्चितौ बाहुशिरसि हस्तस्त्वभिमुखाङ्गुलिः ।
निकुञ्चितार्धयोगेन (४-७०)

इति, द्वितीयो हि तत्र प्राङ्मुखं खटकरूपं चतुरश्रो हस्तः,

"कुञ्चितं पादमुत्क्षिप्य त्र्यश्रमूरुं विवर्तयेत् ।
कटिजानुविवर्तश्च भुजङ्गत्रासितं भवेत्"(४-८५)

भुजङ्गत्रासितं चतुर्विधम् । अत्रैवकारेण हस्तप्रयोगमनुक्तं निरूपयति करंचोद्वेष्टितमिति । तत्समकालं च भ्रमरकेणाष्टत्रिंशेन (४-९९) करणेन परित इत्युभयाङ्गप्रयोगेण च्छिन्नात्रिकं कुर्यात् । कटिमध्यस्य वलनाच्छिन्ना, यतः—

"आक्षिप्तः स्वस्तिकः पादः करौ चोद्वेष्टितौ तथा ।
त्रिकस्य वलनाच्च"(४-९९)

इति भ्रमरकम् । ततः करिहस्तः कटिच्छिन्नश्च पूर्वाङ्गहारवदेव ।

अथापराजितः (८)

दण्डपादमित्यादि ।

"नूपुरं चरणं कृत्वा दण्डपादं प्रसारयेत् ।
क्षिप्राविद्धकरं चेति दण्डपादम्" (४-१४३)

1 न - निकुट्टितम् 2 ठ - त्रासकं 3 ठ - करिहस्तः कटिच्छेदो विष्कम्भे 4 न - करं कृत्वा 5 न. - करिहस्तः कटिच्छेदः।

कुट्टितं[1] करणं कृत्वा भुजङ्गत्रासितं तथा ॥ १९४
रेचितेन तु हस्तेन [2]पताकं हस्तमादिशेत् ।
आक्षिप्तकं प्रयुञ्जीत [3]ह्युरोमण्डलकं तथा ॥ १९५
[4]लताख्यं [5]सकटिच्छिन्नं [6]विष्कम्भापसृते भवेत् ।
त्रिकं सुवलितं कृत्वा नूपुरं [7]करणं तथा ॥ १९६
भुजङ्गत्रासितं सव्यं [8]तथा वैशाखरेचितम् ।

यदत्र करणे निरूपितं तदेवेह भङ्क्त्वादर्शितं विक्षिप्येत्यादिना "आलीढस्थानकं यत्रे"ति (४-१०९) व्यासितम् । प्रथमाङ्गहारोक्तं वामहस्तेत्यादिना, प्रसर्पितमष्टाशीतिकरणमाह ।

"एकस्तु रेचितो हस्तः लताख्यश्च तथापरः ।
प्रसर्पितक"मिति (४-१४९)

निकुट्टकद्वयमिति निकुट्टमर्धनिकुट्टं च (४-७०,७१)"निकुट्टितै यदा हस्ता"विति। "अञ्चितो बाहुशिरसि हस्त" स्त्विति मण्डलोरसीत्युरोमण्डले करणे (४-११५) सतीत्यर्थः । आक्षिप्तादीनि कटिच्छिन्नान्तानि चत्वारि द्वितीयाङ्गहारवदेव ।

अथ विष्कम्भापसृतः (९)

कुट्टितमित्यादि । निकुट्टकमर्धनिकुट्टकं चेति (४-७०-७१) द्वे कुट्टितशब्देन साधारण्यात्सङ्गृहीते । "कुञ्चितं पाद"(४-८५) मित्यादि भुजङ्गत्रासितं चतुर्विंशति, रेचितेभ्यस्त्वित्यादिनार्धेन पञ्चत्रिंशकं (४-९६) दर्शयतीति ।

"भुजङ्गत्रासितं कृत्वा यत्रोभावपि रेचितौ ।
वामपार्श्वस्थितौ हस्तौ भुजङ्गत्रस्तरेचितम् (४-९६)

अस्य चाङ्गपर्यायेण प्रयोग इति पताकाग्रहणेनाह । आक्षिप्तकादित्रयं पूर्वाङ्गहारवदेव । केवलमत्र कटिच्छिन्ने करणे (४-७२) पर्यायेणैको लताहस्तः ।

अथ मत्ताक्रीडः (१०)

(त्रिकं सुवलितं कृत्वेति । भ्रमरकं करणम् "आक्षिप्तः स्वस्तिकः पाद इत्यादि (४-९९)। ततो नूपुराख्यं करणं "त्रिकं सुवलित"मिति (४-९७),

---

1 ढ - कुञ्चितं च करं 2 ज - पताकाहस्त 3 न - उरो 4 ठ - तालाख्यं 5 - सकटिच्छेदं 6 ड - विष्कम्भापसृतो 7 ठ - चरणं 8 ठ - करणं चैव, न - चरणं चैव ।

आक्षिप्तकं ततः कृत्वा परिच्छिन्नं तथैव च॥ १९७
बाह्यभ्रमरकं कुर्यादुरोमण्डलमेव च।
नितम्बं करिहस्तं च कटिच्छेदं तथैव च॥ १९८
मत्ताक्रीडो भवेदेष [1]ह्यङ्गहारो [2]हरप्रियः।
रेचितं [3]हस्तपादं तु कृत्वा वृश्चिकमेव च॥ १९९
पुनस्तेनैव योगेन [4]वृश्चिकं सम्प्रयोजयेत्।
निकुट्टकं तथा चैव सव्यासव्यकृतं क्रमात्[5]॥ २००
लताख्यः [6]सकटिच्छेदो [7]भवेत्स्वस्तिकरेचिते।

"कुञ्चितं पाद"मिति (४-८५) भुजङ्गत्रासितम्। सव्यमिति दक्षिणाङ्गेनैव वैशाखरेचितम् (४-९८)। "आक्षिप्तहस्तपादा"विति (४-११६) आक्षिप्तकरणम्। परिच्छिन्नमिति—

"अलपद्मः कटीदेशे च्छिन्ना पर्यायशः कटी"।

इति च्छिन्नं करणम् (४-१०६)। बाह्यभ्रमरकमिति वामभ्रमरकम्। ततो व्यंसितम् "आक्षिप्तः स्वस्तिकः पाद" इति (४-९९) भ्रमरकम्। व्यंसितं "आलीढं स्थानकं यत्रे"ति (४-१०९)। उरोमण्डलम्— "स्वस्तिकापसृतौ पादा"विति (४-११५)।नितम्बं—"भुजावूर्ध्वविनिष्क्रान्ता"विति(४-१४६)। करिहस्तं वामो वक्षः स्थितो हस्त" इति (४-१८)। कटिच्छिन्नम् "पर्यायशः कटी च्छिन्ने"ति (४-७१)। एतानि द्वादशकरणानि।

अथ स्वस्तिकरेचितः (११)

रेचितमिति। रेचितं हस्तपादं चेति वैशाखरेचितम् (४-९८)। वृश्चिकं "बाहुशीर्षाश्चिता"विति (४-१०४), पुनरिति वैशाखरेचितवृश्चिके प्रयोजयेत्। निकुट्टकं "निकुट्टितौ यदा हस्ता"विति(४-७०) वामदक्षिणकृतौ लताख्यौ नृत्तहस्तौ (९०-१८३)। ततः कटिच्छिन्नं "पर्यायशः कटीच्छिन्ने"ति(४-७१)। षट् करणानि।

1 ठ - अङ्गहारो 2 ड - भवप्रियः 3 प - हस्तपादं च 4 न - कृत्वा वृश्चिकमेव तु 5 ठ - कृतैः क्रमैः 6 ड - सकलच्छेदो 7 न - भवेत्स्वस्वर रेचिते।

[1]पार्श्वस्वस्तिकपादौ च [2]कार्यन्त्वर्धनिकुट्टकम् ॥ २०१
द्वितीयस्य [3]च पार्श्वस्य विधिः [4]स्यादयमेव हि ।
ततश्च करमावर्त्य [5]ऊरुपृष्ठे निपातयेत् ॥ २०२
ऊरूद्वृत्तं ततः कुर्यादाक्षिप्तं [6]पुनरेव हि ।
[7]नितम्बं करिहस्तं च कटिच्छिन्नं तथैव च ॥ २०३
पार्श्वस्वस्तिक इत्येष ह्यङ्[8]हारः प्रकीर्तितः ।
वृश्चिकं [9]करणं कृत्वा लताख्यं हस्तमेव च ॥ २०४
[10]तमेव च करं भूयो [11]नासाग्रे सन्निकुञ्चयेत् ।
तमेवोद्वेष्टितं कृत्वा [12]नितम्बं परिवर्तयेत् ॥ २०५
करिहस्तं कटिच्छिन्नं [13]वृश्चिकापसृते भवेत् ।

अथ पार्श्वस्वस्तिकः (१२)

पार्श्वस्वस्तिक इति । पार्श्वयोः स्वस्तिक इति दिक्स्वस्तिकं करणम् "पार्श्वयोरग्रतश्चैवेति (४-७०) एकाङ्गेनार्धनिकुट्टकम्—"अञ्चितौ बाहुशिखरा" विति (४-७१) । पुनर्दिक्स्वस्तिकं कृत्वा द्वितीयपार्श्वेनार्धनिकुट्टकं योजयेत् । "करमावर्त्यें" त्यपविद्धम् "आवर्त्य शुकतुण्डाख्य" मिति (४-६५) । ऊरूद्वृत्तम्— "करमाविद्धकरण" मिति (४-१५९) । "आक्षिप्तं हस्तपादौ त्विति (४-११६) अक्षिप्तम् । नितम्बादिकरणत्रयं पूर्ववत् ॥

अथ वृश्चिकापसृतः (१३)

वृश्चिकमिति । वृश्चिकचरणत्वलताहस्तत्वात् लतावृश्चिकम्—"अञ्चितः पृष्ठतः पाद" इति (४-१०५) । नासाग्र इति निकुञ्चितं । वृश्चिकं चरणं कृत्वेति (४-८७), तमेवोद्वेष्टितमिति मत्तल्लि, "वामदक्षिणपादाभ्या" मिति (४-८८) । नितम्बादित्रयं पूर्ववत् । केचिन्नितम्बस्य भ्रमरमाहुः ।

1 ढ - पार्श्वे तु स्वस्तिकं बध्वा 2 न - कुर्यादर्ध प - कार्यस्त्वर्थ 3 द - तु पार्श्वस्य 4 प - स्यादेष एव हि 5 न - करमावृत्त्य 6 ड - पुनरेव च 7 ढ - नितम्बः करिहस्तश्च कटिच्छेदः 8 न - हाराः प्रकीर्तिताः 9 न - चरणे 10 न - तथैव च 11 ढ - नासाग्रेण निकुञ्चयेत् ड - नासाग्रे सन्निवेशयेत् 12 - नितम्बमथ 13 च - वृश्चिके सम्प्रयोजयेत् ।

कृत्वा नूपुरपादं तु तथाक्षिप्तकमेव च॥ २०६
[1]कटिच्छिन्नं च कर्तव्यं सूचीविद्धं तथैव च।
नितम्बं करिहस्तं [3]चाप्युरोमण्डलकं तथा॥ २०७
[4]कटिच्छिन्नं ततश्चैव भ्रमरः स तु संज्ञितः।
मत्तल्लिकरणं कृत्वा [5]करमावर्त्य दक्षिणम्॥ २०८
कपोलस्य प्रदेशे तु [6]कर्तव्यं च निकुञ्चितम्।
अपविद्धं [7]द्रुतं चैव तलसंस्फोटसंयुतम्॥ २०९
[8]करिहस्तं कटिच्छिन्नं मत्तस्खलितके भवेत्।

अथ भ्रमरः (१४)

कृत्वेति। नूपुरपादं कृत्वेति नूपुरं करणम्—"त्रिकं सुवलितं कृत्वे"ति (४-९७)। आक्षिप्तकं "आक्षिप्तहस्तपादा"विति (४-११६)। परिच्छिन्नम्—

"अलपद्मः शिरोदेशे च्छिन्ना पर्यायशः कटी"

इति (४-१०६)। नितम्बं "भुजावूर्ध्वविनिष्क्रान्ता"विति (४-१४६), करिहस्तं "वामो वक्षःस्थितो हस्त"इति (४-१४८) उरोमण्डलं "स्वस्तिकापसृतौ पादा"विति (४-११५), कटिच्छिन्नं "पर्यायशः कटी च्छिन्ने"ति (४-७२)

अथ मत्तस्खलितकः (१५)

मत्तल्लीति। "वामदक्षिणपादाभ्या"मिति मत्तल्लि (४-८८)। कपोलस्येति गण्डसूची "सूचीपादोन्नतं पार्श्व"मिति (४-१३२), सम्यङ्निकुञ्चितमिति लीनं नाम करणम्—

"पताकाञ्जलिवक्षःस्थं प्रसारितशिरोधरम्।
निकुञ्चितांसकूटं च तल्लीनम् (४-६७)

---

1 न - परिच्छिन्नं तु 2 ढ - कटिहस्तं 3 ड - उरोमण्डलकं 4 न - कटिच्छेदं 5 ढ - करमावृत्य 6 ड - कार्यं सम्यङ्निकु 7 प - ततं न - तथा 8 ज - करिहस्तः कटिच्छेदो वामस्खलितके क - हतं।

दोलैः करैः प्रचलितैः स्वस्तिकापसृतैः [1] पदैः॥२१०
अञ्चितैर्वलितैर्हस्तैस्तल [2] सङ्घट्टितैस्तथा ।
निकुट्टितं च [3] कर्तव्यमूरूद्वृत्तं तथैव च ॥ २११
[4] करिहस्तं कटिच्छिन्नं मदाद्विलसिते भवेत् ।
मण्डलस्थानकं कृत्वा तथा हस्तौ च रेचितौ॥२१२
[5] उद्घट्टितेन पादेन [6] मत्तल्लिकरणं भवेत् ।
आक्षिप्तं करणं चैव [7] ह्युरोमण्डलमेव च ॥ २१३
[8] कटिच्छिन्नं तथा चैव भवेत्तु गतिमण्डले ।

अपविद्धं "आवर्त्य शुकतुण्डाख्य"मिति (४-६५), अपविद्धगतेनैव तलसंस्फोटितं "द्रुतं विक्षिप्य चरण"मिति (४-१३०), करिहस्तादिद्वयं पूर्ववत् ।

अथ मदविलसितः (१६)

दोलैरिति । दोलैः करैरिति मदस्खलितमेकोनशततमं करणम् । स्वस्तिकापसृतैः पदैर्मत्तल्लि सूचितम् । ततस्तलसंघट्टितैरिति तलसंस्फोटितमूनसप्तति करणम् । वलितशब्देन त्रीण्यपि करणानि बहुविधचित्रगुम्फानीति । ततो निकुट्टकादिकरणचतुष्कम् । अत्र केचिद् दोलादिकरणानां त्रयाणां त्रिरभ्यासात्त्रयोदशकरणानि वाहुः । अन्येतु करणसप्तकस्यापि त्रिरभ्यासादेकविंशतीति ।

अथ गतिमण्डलः (१७)

मण्डलमिति । मण्डलस्थानकेन मण्डलस्वस्तिकनिवेशे करणे उद्दिष्टे । तत उन्मत्तं रेचितावित्याह । पादेनोद्धट्टितारव्यं त्र्युत्तरशतम् । आक्षिप्तादीनि त्रीणि चाष्टौ करणानि गतिमण्डले ।

---

1 न - परैः 2 द - सङ्घट्टितैस्तदा 3 प - प्रकर्तव्य 4 न - करिहस्तः कटिच्छेदो मदाद्विलसितं 5 न - उद्घाटितेन 6 द - मत्तल्लीं सम्प्रयोजयेत् 7 न - उरोमण्डलकं तथा 8 प - कटिच्छेदम् ।

[1]समपादं प्रयुज्याथ [2]परिच्छिन्नं त्वनन्तरम् ॥ २१४
आविद्धेन तु पादेन [3]बाह्यभ्रमरकं तथा।
[4]वामसूच्या त्वतिक्रान्तं भुजङ्गत्रासितं तथा॥ २१५
[5]करिहस्तं कटिछिन्नं परिच्छिन्ने विधीयते।
शिरसस्तूपरि स्थाप्यौ [6]स्वस्तिकौ विच्युतौ करौ॥
ततः सव्यं करं [7]चापि गात्रमानम्य रेचयेत्।
पुनरुत्थापयेत्तत्र गात्रमुन्नम्य [8]रेचितम्॥ २१७
[9]लताख्यौ च करौ कृत्वा वृश्चिकं सम्प्रयोजयेत्।
रेचितं करिहस्तं च भुजङ्गत्रासितं तथा॥ २१८
आक्षिप्तकं प्रयुञ्जीत स्वस्तिकं [10]पादमेव च।

अथ परिच्छिन्नः (१८)

समपादमिति। "श्लिष्टौ समनखौ पादौ" (४-६६) इति समनखं प्रथमं कुर्यात्। ततश्छिन्नं पञ्चचत्वारिंशत्। आविद्धपादेनाविद्धचारी संभ्रान्तमेकोत्तरशतम्। ततो भ्रमरकमष्टत्रिंशत्। वामसूच्यार्धसूची वामपादेन, ततोऽतिक्रान्तं षट्षष्टितमम्। भुजङ्गत्रासितादीनि त्रीणि च, नवभिः परिच्छिन्नः।

अथ परिवृत्तकरेचितः (१९)

शिरसास्त्विति। शिरस उपरीति नितम्बं पञ्चाशीति।

"भुजावूर्ध्वविनिष्क्रान्तौ हस्तौ चाभिमुखाङ्गुली" (४-१४६) इति नितम्बम्। ततो स्वस्तिकरेचितं सप्तमम्। गात्रस्यानमनेन विक्षिप्ताक्षिप्तकमेकविंशति। पुनरिति लताख्यावित्यर्धेन लतावृश्चिकम् (४-१०५)

"अञ्चितः पृष्ठतः पादः कुञ्चितोऽर्ध्वतलाङ्गुलिः।
लताख्यस्तु" इति लतावृश्चिकम्।

---

1 न - समं 2 न - परिच्छिन्नस्त्वनन्तरम् 3 प - वात्याभ्रमरकं 4 ज - वामं सूचि त्वतिक्रान्ते 5 न - करिहस्तः कटिच्छेदः 6 ड - विधतौ विवृतौ 7 द वापि 8 द - रेचयेद् 9 न - लताख्यं च करं 10 न - पदमेव च।

[1]पराङ्मुखविधिर्भूय एवेमव भवेदिह ॥ २१९
[2]करिहस्तं कटिच्छिन्नं परिवृत्तकरेचिते ।
रेचितौ सह गात्रेण ह्यपविद्धकरौ [3]यदा ॥ २२०
पुनस्तेनैव देशेन गात्रमुन्नम्य रेचयेत् ।
[4]कुर्यान्नूपुरपादं च भुज त्रासितं तथा ॥ २२१
रेचितं मण्डलं चैव बाहुशीर्षे निकुञ्चयेत् ।
ऊरूद्वृत्तं तथाक्षिप्तमुरोमण्डलमेव च ॥ २२२
करिहस्तं कटिच्छिन्नं कुर्याद्वैशाखरेचिते ।

लताख्यश्च करो वामः (४-१०५) इति

रेचितमित्युन्मत्तकरणं "अञ्चितेन तु पादेन रेचितौ" इति (४-७५), "कुञ्चितं पाद"मिति (४-८५) भुजङ्गत्रासितम्, "आक्षिप्तहस्तपादा"-वित्याक्षिप्तकम् (४-११६), स्वस्तिकं पादमित्यस्यैव पादस्वस्तिकपर्यन्ततया बद्धां चारीं सूचयन्नितम्बकरणमाह—"भुजावूर्ध्वं विनिष्क्रान्ता"विति (४-११६)। पराङ्मुखेत्यङ्गहारेषु मध्ये परिभाषमाणो मुनिरेतदाह—सर्वेष्वेव चाङ्गहारेषु पाश्चात्यं करणद्वयं वर्जयित्वा वर्तनीयानि करणानि। तानि चतुर्दिङ्मुखेषु प्रयुज्य संमुखमन्त्ये करणद्वयेन पूरयेदिति ।

अथ वैशाखरेचितः (२०)

रेचिताविति। अनेन श्लोकेन क्रमेण वैशाखरेचितमङ्गमङ्गद्वयेन प्रयोज्य-मित्याह "रेचितं हस्तपादं" चेत्यादि (४-९८) वैशाखरेचितं करणम्।

"त्रिकं सुवलितं कृत्वा लतारेचितकौ करौ ।
नूपुरं च तथा पादं" (४-९७)

इति नूपुरोर्ध्वपादम्। कुञ्चितं पादमुत्क्षिप्येति भुजङ्गत्रासितम्। रेचितमित्यु-न्मुक्तकरणम्। "अञ्चितेन तु पादेन रेचिता"विति (४-७५), मण्डलमिति मण्डलस्वस्तिकम्—

---

1 न - पराङ्मुखे विधि भूय एष एव 2 प - करिहस्तः कटिच्छेदः 3 न - तथा 4 ठ - कार्यं नूपुर।

[1]आद्यं तु जनितं कृत्वा पादमेकं प्रसारयेत् ॥ २२३
तथैवालातकं कुर्यात्त्रिकं तु परिवर्तयेत् ।
अञ्चितं वामहस्तं च [2]गण्डदेशे निकुट्टयेत् ॥ २२४
[3]कटिच्छिन्नं तथा चैव [4]परावृत्ते प्रयोजयेत् ।

"स्वस्तिकौ तु करौ कृत्वा प्राङ्मुखोर्ध्वतलौ समौ ।
मण्डलस्थानकेने" ति (४-६९)

बाहुशीर्ष इत्यनेन निकुट्टितं करणमाह "निकुट्टितौ यदा हस्ता"विति (४-७०)। ऊरूद्वृत्तादिकरणजातं क्रमेणोक्ताङ्गहारवत् ।

अथ परावृत्तः । (२१)

आद्यन्त्विति ।

"एको वक्षः स्थितो हस्तो द्वितीयश्च प्रलम्बितः ।
तलाग्रसंस्थितः पादो जनिते" (४-१५५)इति । आद्यशब्दो दक्षिणाङ्गप्रयोज्यत्वमाह । पदमेकं प्रसारयेदिति शकटास्यं करणमाह—

"निषण्णाङ्गस्तु चरणं प्रसार्य तलसञ्चरम् ।
उद्वाहितमुरः कृत्वा शकटास्यं" (४-१६८)
"अलातं चरणं कृत्वा व्यंसयेद्दक्षिणं करम् ।
ऊर्ध्वजानुक्रमं कुर्यादलातकम्" (४-७१)

इत्यलातम् । त्रिकं तु परिवर्तयेदिति भ्रमरकम् ।

आक्षिप्तः स्वस्तिकः पादः करौ चोद्वेष्टितौ तथा ।
त्रिकस्य वलनाच्चे"ति (४-९८) ।

अञ्चितं वामहस्तं चेत्यनेनार्धेन करिहस्तं करणं गण्डदेशे निकुट्टयेदिति विशेषयुक्तमाह ।

"वामो वक्षःस्थितो हस्तः प्रोद्वेष्टिततलोऽपरः ।
अञ्चितं चरणं चैव प्रयोज्यः करिहस्तकः ॥ इति (४-१४८)

पर्यायश्च इति कटिच्छिन्नम् (४-७२)।

---

1 न - आद्यन्त 2 ढ - गण्डं चैव निकुट्टितम् 3 न - कटिच्छेदं 4 ढ - तृत्तं ।

स्वस्तिकं [1]करणं कृत्वा व्यंसितौ च [2]करौ पुनः ॥
अलातकं प्रयुञ्जीत ऊर्ध्वजानु निकुञ्चितम् ।
[3]ऊर्ध्वसूची च विक्षिप्तमुद्वृत्ताक्षिप्तके तथा ॥ २२६
[4]करिहस्तं कटिच्छिन्नमङ्गहारे ह्यलातके ।

अथालातकः (२२)

स्वस्तिकमित्यादि । स्वस्तिकाविति (४-६८) स्वस्तिकम् । व्यंसितौ चेति द्विवचनेन पुनश्शब्दे स्वस्तिकव्यवधानेन व्यंसितस्य द्विप्रयोगमाह ।

"आलीढस्थानकं यत्र करौ वक्षसि रेचितौ ।
ऊर्ध्वाधोविप्रकीर्णौ च व्यंसितं" (४-१०९)
"कुञ्चितं पादमुत्क्षिप्य जानुस्तनसमं न्यसेत् ।
प्रयोगवशगौ हस्तावूर्ध्वजानु" (४-८६)
"वृश्चिकं चरणं कृत्वा करं पार्श्वे निकुञ्चयेत् ।
नासाग्रे दक्षिणं"चेति निकुञ्चितम् (४-८७)
"अलपद्मः शिरोदेशे सूचीपादश्च दक्षिणः" । (४-१३८)

इत्यर्धसूची ।

"विक्षिप्तं हस्तपादं च पार्श्वतः पृष्ठतोऽपि वा
एकमार्गगतं यत्र तद्विक्षिप्तं" (४-११९)

आक्षिप्तहस्तमाक्षिप्तपादमुद्वृत्तगात्रमुद्वृत्तं करणं (४-१५२)

"आक्षिप्तं हस्तपादं च क्रियते यत्र वेगतः" (४-११६)

इत्याक्षिप्तम् ।

"वामो वक्षःस्थितो हस्तः प्रोद्वेष्टिततलोऽपरः ।
[1]अञ्चितश्चरणश्चैव" (४-१४८)

इति करिहस्तम् । "पर्यायशः कटी च्छिन्ने"ति (४-७२) कटीच्छिन्नम् ।

---

1 प - चरणं 2 ज - करौ ततः 3 प - अर्धसूच्यथ 4 न - करिहस्तः करिच्छेदो ह्यङ्ग ।

---

1 अञ्चितं च शिरश्चैव ।

निकुट्यवक्षसि करावूर्ध्वजानु [1]प्रयोजयेत् ॥ २२७
[2]आक्षिप्तस्वस्तिकं कृत्वा त्रिकं तु परिवर्तयेत् ।
उरोमण्डलकौ हस्तौ [3]नितम्बं करिहस्तकम् ॥ २२८
[4]कटिच्छिन्नं तथा चैव पार्श्वच्छेदे विधीयते ।
सूचीवामपदं दद्याद्विद्युद्भ्रान्तं च दीक्षणम् ॥
दक्षिणेन पुनः [5]सूची [6]विद्युद्भ्रान्तं च वामकम् ।

अथ पार्श्वच्छेदः (२३)

निकुट्येत्यादि । अनेन वृश्चिककुट्टितं द्विचत्वारिंशत्करणमाह ।

"वृश्चिकं चरणं कृत्वा द्वावप्यथ निकुट्टितौ ।
विधातव्यौ करौ" (४-१०३)

कुञ्चितं पादमित्यूर्ध्वजानु (४-८६), "आक्षिप्तं हस्तपादं च इत्याक्षिप्तकम्" (४-११६) "हस्ताभ्यामथ पादाभ्या" (४-७६)मिति स्वस्तिकम् । हस्तद्वारेणोरोमण्डलकरणम्—

"स्वस्तिकापसृतौ पादावाविद्धक्रमणं यदा ।
उरोमण्डलकौ हस्तौ" (४-११५)

नितम्बादित्रयं पूर्ववत् ।

अथ विद्युद्भ्रान्तः (२४)

सूचीमित्यादि । वामाङ्गप्रयोज्यमर्धसूचीकरणमाह "अलपद्मः शिरोदेश" इति (४-१२८), दक्षिणेन विद्युद्भ्रान्तं करणम्—

"पृष्ठतो वलितं पादं शिरोघृष्टं प्रसारयेत् ।
सर्वतो मण्डलाविद्धं विद्युद्भ्रान्तं" (४-१२६)

एतद्दक्षिणेन । पुनरेतदेव द्वयमङ्गविपर्ययेण । तदाह दक्षिणेन पुनरिति । परिच्छिन्नमिति छिन्नं करणम् ।

"पल्लवौ तु कटीदेशे छिन्ना पर्यायशः कटी ।
वैशाखस्थानकेने"ति (४-१०६)

---

1 न - प्रसारयेत् 2 द - आक्षिप्तं 3 द - नितम्बः 4 न - कटिछेदं तथा, द - कटिछेदस्तथा 5 न - सूचीं 6 द - विद्युद्भ्रान्तश्च वामतः ।

[1]परिच्छिन्नं तथा चैव त्रिकं तु परिवर्तयेत् । २३०
लताख्यं [2]सकटिच्छिन्नं [3]विद्युद्भ्रान्तश्च स स्मृतः ।
कृत्वा नूपुरपादं तु सव्यवामौ प्रलम्बितौ ॥ २३१
करौ पार्श्वे ततस्ताभ्यां [4]विक्षिप्तं सम्प्रयोजयेत् ।
ताभ्यां सूची तथा चैव त्रिकं तु परिवर्तयेत् ॥ २३२
लताख्य [5]सकटिच्छिन्नं कुर्यादुद्वृत्तके सदा ।

"अतिक्रान्तक्रमं कृत्वा पुरस्तात्संप्रसारयेत् ।
प्रयोगवशगौ हस्तावतिक्रान्तं" (४-१८७)

एतद्वामेनाङ्गेन लताख्यमिति लतावृश्चिकम् ।

"अञ्चितः पृष्ठतः पादः कुञ्चितोऽर्ध्वतलाङ्गुलिः ।
लताख्यश्च करो वामः" (४-१०५) इति

लतावृश्चिकम् । कटिच्छिन्नं प्राग्वत् ।

अथोद्वृत्तकः (२५)

कृत्वानूपुरपादमिति ।

"त्रिकं सुवलितं कृत्वा लतारेचितकौ करौ ।
नूपुरं च तथा पादं करणेनूपुरे न्यसेत्" (४-९७) । सव्यवामग्रहणेन पर्यायशः कराविति च द्विवचनेन यौगपद्यं सूचयन् भुजङ्गत्रासितं च द्वात्रिंशत् (भुजङ्गाञ्चितं चत्वारिंशत् ?) गृध्रावलीनकं चतुस्सप्ततिं करणं दर्शयति ।

"भुजङ्गत्रासितः पादो रेचितो दक्षिणः करः ।
लताख्यश्च करो वामः" इति (४-१०१)

"पृष्ठप्रसारितः पादः किञ्चिदाञ्चितजानुकः ।
यत्र प्रसारितौ बाहू तत्स्याद् गृध्रावलीनकम्" (४-१३५)

अतएवकरद्वयमेवोपसंहरातिताभ्यामनन्तरंविक्षिप्तमिति"विक्षिप्तंहस्तपादंचे" ति (४-११९) । तदपीच्छाङ्गपर्यायेणेत्युपसंहारेणाह ताभ्यामनन्तरं सूचीति । तेनाङ्गपर्यायेण योगस्याक्षेपोपलब्धेः तेन सन्धानायोद्वृत्तं करणम् । (त्रिकपरि

---

1 ह - परिच्छिन्नं च कर्तव्यमतिक्रान्तं च वामकम् 2 न - सकटिच्छेदो 3 न - विद्युद्भ्रान्तं च तत्स्मृतम् 4 न - विक्षेपं 5 न - सकटिच्छेदम् ।

आलीढव्यंसितौ हस्तौ बाहुशीर्षे निकुट्टयेत् ॥ २३३

[1]नूपुरश्चरणो वामस्तथालातश्च दक्षिणः[2] ।
तेनैवाक्षिप्तकं कुर्यादुरोमण्डलकौ करौ ॥ २३४

करिहस्तं [3]कटिच्छिन्नमालीढे सम्प्रयोजयेत् ।
[4]हस्त तु रेचितं कृत्वा पार्श्वमानम्य रेचयेत् ॥ २३५

पुनस्तेनैव योगेन [5]गात्रमानम्य रेचयेत् ।
कार्यं नूपुरपादं च भुजङ्गत्रासितं तथा ॥ २३६

रेचितं करणं [6]कार्यमुरोमण्डलमेव च ।
[7]कटिच्छिन्नं तु कर्तव्यमङ्गहारे तु रेचिते[8] ॥ २३७

वर्तनेन बद्धया चार्या नितम्बं करणम्। ततो "अञ्चितः पृष्ठतः पाद"इत्यादिना लताद्यश्चिकं चतुश्चत्वारिंशत् । ततः कटिच्छिन्नम् ।

अथालीढः (२६).

आलीढेति ।

"आलीढं स्थानकं यत्र करौ वक्षसि रेचितौ
ऊर्ध्वाधो विप्रकीर्णौ च व्यंसितम्"

इति व्यंसितं दर्शयति । बाहुशीर्ष इति निकुट्टकं नवमं करणम् । वामतो नूपुरं, षट्त्रिंशत्) "निकुट्टितौ यदा हस्ता"विति (४-६९) निकट्टितकरणम् । ततो "अलातं चरणं कृत्वा व्यंसये"दित्यलातकम् (४-७९) । तेनैवेति दक्षिणेन "आक्षिप्तं हस्तपादं चे"त्याक्षिप्तम् (४-११६) । उरोमण्डलकादिकरणत्रयं पूर्ववत् ।

अथ रेचितः । (२७)

हस्तं तु रेचितमिति । अनेन श्लोकेन सर्वाणि हस्तरेचनवन्ति करणानि सङ्गृहीते। तथा चोपसंहरिष्यति रेचितं करणमिति। जातावेकवचनेन हि किञ्चि-

---

1 द - नूपुरं चरणे 2 ड - वामस्तु दक्षिणः 3 ड - कटिच्छेदमालीढे- 4 ज - हस्तौ तु रेचितौ 5 न - गात्र मुन्नम्य 6 द - कुर्यादुरो 7 द - कटिच्छेदं 8 न - रेचयेत् ।

त्प्रतिपद्येत। रेचितं नाम करणमस्ति यदनेनोच्यते । कार्यमित्यनेन तावतां करणानां श्लिष्टाङ्गतया स्वबुध्या स्वकार्यवद्धि चित्रमेव योजनं कार्यमिति सूचयति। अत एवायं विचित्रभेदसङ्कीर्णोऽङ्गहारः। तथा चान्यत्र श्रूयते।

"पञ्चविंशति विचित्र(मातृका)—
प्रक्रमेण विविधं व्यरीरिचत्।
रेचिताङ्गहरणं महेश्वरो
योगमार्गमिव सप्तभिः स्वरैः" इति।

वक्षः स्वस्तिकमुन्मत्तश्चेति द्वादशादीनि त्रीणि, "हस्तो हृदि भवेद्वाम" इति (४-८१) आक्षिप्तरेचतम्। "स्खलितापसृतः पादः" इत्यर्धमत्ताल्लि (४-८९)। रेचकनिकुट्टकं च (४-९०)

"भुजङ्गत्रासितं कृत्वा यत्रोभावपि रेचितौ"

इत्यादित्रयं भुजत्राङ्गस्तरेचितं (४-९६) नूपुरं (४-९९), वैशाखरेचितं च (४-७८)

"भुजङ्गत्रासितः पादो रेचितो दक्षिणः करः" (४-१०१) इत्यादि-करणद्वयं भुजङ्गाश्चितकं दण्डरेचितकं च (४-१०२) "वृश्चिकं चरणं कृत्वा स्वस्तिकौ चे"त्यादि (४-१०७) वृश्चिकरेचितम्। "आलीढस्थानकं यत्रे"त्यादि (४-१०९) व्यंसितम्। आक्षिप्तं हस्तपादे" त्यादिद्वयम् (४-१२२) विवृत्तं विनिवृत्तं च (४-१२३)

"आक्षिप्तं हस्तपादं च त्रिकं चैव विवर्तितम्" (४-१२८) इति विवर्तितकम्। "पृष्ठप्रसारितः पाद" इत्यादि (४-१३१) गरुडप्लुतकम्।

"वृश्चिकं चरणं कृत्वा रेचितौ च तथा करौ" (४-१४२) इति मयूरललितम्। सर्पितकं च, (४-१४४)। "दोलापादक्रमः कार्य" (४-१४७) इत्यादि स्खलितम्। "एकस्तु रेचित"इति (४-१४९) प्रसर्पितकम्। दोलापादक्रम"मिति (४-१५४) तलसङ्घट्टितम्। "प्रयुज्यालातक"मित्यादिद्वयं (४-१६५) वृषभक्रीडितकं लोलितं च (४-१६६)। एवं करणपञ्चविंशतिर्वैचित्र्येण प्रयोज्या। चतुष्षडादिक्रमेण पुनरुक्ततया चतुर्दिङ्मुखेषु यावत्समाप्ता भवति। यत उक्तम्—

"द्वाभ्यां त्रिचतुराभिर्वाप्यङ्गहारस्तु मातृभिः" इति (४-३० "पुनस्तेनैव योगेन गात्रमानम्ये"त्यनेन मध्ये वैचित्र्यात्त्रक्रमण्डलेन (४-११४) व्यवहितेयं करणपरम्परा प्रयोज्येत्याह।

नूपुरं [1]चरणं कृत्वा त्रिकं तु परिवर्तयेत् ।
[2]व्यंसितेन तु हस्तेन [3]त्रिकमेव [4]विवर्तयेत् ॥ २३८
[5]पादं चालातकं कृत्वा [6]सूचीमत्रैव योजयेत् ।
करिहस्तं [7]कटिच्छिन्नं कुर्यादाच्छुरिते सदा ॥२३९
[8]रेचितस्वस्तिकौ पादौ [9]रेचितस्वस्तिकौ करौ ।
कृत्वा विश्लेषमेवं तु तेनैव विधिना पुनः ॥ २४०

"प्रलम्बिताभ्यां बाहुभ्यां यद्गात्रेण नतेन च
अभ्यन्तरापविद्धं स्यात्तज्ज्ञेयं चक्रमण्डलम्" । (४-११४)
आनम्येत्यादिरन्तर्भावितापविद्धप्रयोग । एवं प्रयुज्यः । प्राग्वदुरोमण्डलं कटिच्छिन्नं च ।

——*——

अथाच्छुरितः (२८)

नूपुरमित्यादि । परिमितं नूपुरं त्रिकन्तु परिवर्तयेदित्यनेन भ्रमरकम्— "आक्षिप्तः स्वस्तिकः पादः . . . त्रिकस्य वलनं चैव" (४-९९) इति । व्यंसितेन त्विति व्यंसितम्—"आलीढं स्थानकं यत्र"ति(४-१०९)। ततोऽलातकम्—"अलातं चरणंकृत्वे"ति(४-७९)। त्रिकमेवेत्येवकारेण नितम्बं "भुजावूर्ध्वं विनिष्क्रान्ता"विति (४-१४-६) सूचितम् ।। ततः करणद्वयं पूर्ववत् ।

——————

अथाक्षिप्तरेचितः (२९)

रेचितस्वस्तिकावित्यादि । यत्र यत्र करणे करयोः पादयोर्वा रेचितस्वस्तिकसाहित्यं तत्तदिहाप्यनुजानाति पृथगभिधानेन । रेचितं स्वस्तिकं ह्येतैनैव ह्येतानि करणानि । स्वस्तिकरेचितं स्वस्तिकरेचिताविद्धाविति पृष्ठस्वस्तिकं दिक्स्वस्तिकं च "विक्षिप्ताक्षिप्तबाहुभ्या"मित्यादि (४-७७,७८) कटीसमं "स्वस्तिकापसृतः पाद" इत्यादि (४-८०) । घूर्णितम्—

1 न - करणं 2 न - व्यासितेन 3 द - त्रिकं चैव 4 ज - निवर्तयेत् 5 ढ - वामं चालातकं 6 न - सूचीं तेनैव ढ - सूचीं तत्रैव 7 प - कटिच्छेदं 8 म - रेचितौ 9 प - रेचितौ ।

पुनरुत्क्षेपणं चैव रेचितैरेव[1] कारयेत् ।
उद्वृत्ताक्षिप्तके चैव[2] ह्युरोमण्डलमेव च ॥ २४१
नितम्बं करिहस्तं च कटिच्छिन्नं[3] तथैव च ।
आक्षिप्तरेचितो ह्येष[4] करणानां विधिः स्मृतः ॥

"वर्तिताघूर्णितः सव्यो हस्तो वामश्च दोलितः ।
स्वस्तिकापसृतः पादः" (४-९३) इति ।

भ्रमरकं "आक्षिप्तः स्वस्तिकः पाद" इति (४-९९)। वृश्चिकरेचितं "वृश्चिकं चरणं कृत्वा स्वस्तिकं चे"ति (४-१०७)। पार्श्वनिकुट्टकं "हस्तौ तु स्वस्तिकौ पार्श्वे" इति (४-१११), उरोमण्डलकं "स्वस्तिकापसृता" विति (४-११५)। सन्नतं । "उत्प्लुत्य चरणौ कार्यावग्रतः स्वस्तिकौ स्थितौ" (४-१३६) इति, सिंहाकर्षितकं "पृष्ठप्रसारित" इति (४-१५१), नागापसर्पितं "स्वस्तिकापसृतौ पादा"विति(४-१६७)। वक्षःस्वस्तिकादौ तु रेचनं नास्तीति न सङ्गृहीतम् ।

परे त्वङ्गपरिवर्तनक्रमेण तत्रापि रेचितमिच्छन्तस्तदपि सङ्गृह्णते। एवं हस्तपादस्वस्तिकश्च तद्रेचितश्च वैचित्र्येण विधाय तेनैवविधिनेत्यत्रुटितेनाङ्गेनोत्क्षेपणं हस्तपादस्य कार्यम्। अनेन यत्र यत्रैतदस्ति तत्तत्करणं सूचयति। तद्यथा, दण्डपक्षं "ऊर्ध्वजानुं विधायाथ तस्योपरि लतां न्यसेत्" इति(४-९५), ललाटतिलकं "वृश्चिकं चरणं कृत्वे"ति (४-१११), तलविलासितं "ऊर्ध्वाङ्गुलितलः पाद" इति (४-११७), निशुम्भितं—

"पृष्ठतः कुञ्चितः पादो वक्षश्चैव समुन्नतम् ।
तिलके च करः स्थाप्य" इति (४-१२५)

विद्युद्भ्रान्तं "पृष्ठतो वलितं पाद" मिति (४-१२६), गजक्रीडितं "कर्णेऽञ्चितः करो वाम"इति (४-१२९),नितम्बं "भुजावूर्ध्वं विनिष्क्रान्ता" विति (४-१४६), विष्णुक्रान्तं "ऊर्ध्वं प्रसारितः पाद"इति (४-१६१)। तत्र उद्वृत्तमित्यूरुद्वृत्तम्

---

1 न - रेचितेनैव 2 ढ - क्षिप्तकं चैव 3 द - कटिच्छेदं 4 प - रेचितस्त्वेष ।

[1]विक्षिप्तकरणं कृत्वा [2]हस्तपादं मुखानुगम् ।
[3]वामसूचीसहकृतं [4]विक्षिपेद्वामकं करम् ॥ २४३
[5]वक्षःस्थाने भवेत्सव्यो वलितं त्रिकमेव च ।
नूपुराक्षिप्तके चैव [6]ह्यर्धस्वस्तिकमेव च ॥ २४४
नितम्बं करिहस्तं च [7]ह्युरोमण्डलकं तथा ।
[8]कटिच्छिन्नं च [9]कर्तव्यं सम्भ्रान्ते [10]नृत्तयोक्तृभिः ॥

(४-१५९); अत्र समाक्षिप्तकरणमध्ये तस्य दृष्टत्वात् करमावृत्य तत्करण मिति । "आक्षिप्तं हस्तपादं चे"त्याक्षिप्तम् (४-११६) । "स्वस्तिकापसृतौ पादा" वित्युरोमण्डलम् (४-११५) । साहचकाराच्च (सहिचकाराच्च?) कटिच्छिन्नमध्यन्ते केचिदिच्छन्ति ॥

अथ सम्भ्रान्तः (३०)

विक्षिप्तमित्यादि । "विक्षिप्तं हस्तपादं चे"ति(४-११९) विक्षिप्तम् । "हस्त-पादं मुखानुग"मित्यञ्चितं(४-७४), गण्डसूची गङ्गावतरणं चेति दर्शयति ।

"व्यावृत्तपरिवृत्तस्तु स एव तु करो यदा ।
अञ्चितो नासिकाग्र" इति (४-८४)
"सूचीपादोन्नतं पार्श्वं" मिति (४-१३५) गण्डसूची ।

"ऊर्ध्वाङ्गुलितलः पादस्त्रिपताकावधोमुखौ ।
हस्तौ च सन्नतौ" (४-१६९)

इति गङ्गावतरणम् । वामसूचीसहकृतमित्यनेनार्धसूची दण्डपादं च दर्शयति । "अलपद्मः शिरोदेशे" (४-१३८) इत्यर्धसूची ।

"नूपुरं चरणं कृत्वा दण्डपादं प्रसारयेत् ।
क्षिप्राविद्धकरं" (४-१४३) इति

---

1 न - विक्षिप्तं 2 प - वामपादमुखानुगम्, न - वामहस्तमुखानुगम् 3 ढ - वामसूची समं कृत्वा, न - वामसूचीकरं कृत्वा 4 ढ - निक्षिपेत् ढ - निक्षिप्तं 5 न - वक्षःस्थश्च 6 न - अर्धं 7 ढ - स्या दुरोमण्डलं तथा 8 न - कटिच्छेदश्च 9 न - कर्तव्यः 10 क - नृत्तये त्कृतीः ।

अपक्रान्तक्रमं कृत्वा व्यंसितं हस्तमेव च ।
कुर्यादुद्वेष्टितं चैव [1]ह्यर्धसूची तथैव च ॥ २४६
विक्षिप्तं सकटिच्छिन्नमुद्वृत्ताक्षिप्तके तथा ।
[2]करिहस्तं कटिच्छिन्नं कर्तव्यमपसर्पिते ॥ २४७

दण्डपादम् । एतच्च वामेनाङ्गेन सव्य इति दक्षिणे वक्षसि वामस्योपयोगित्वात् । अनेन चतुरं करणं सूचयति—

"अञ्चितः स्यात्करो वामः सव्यश्चतुर एव च ।
दक्षिणः कुट्टितः पादश्चतुरं तत्प्रकीर्तितम्" इति (४-१००) ।

वलितं त्रिकमिति भ्रमरकम्-"आक्षिप्तः स्वास्तिक" इति (४-९९), "त्रिकं सुवलितं कृत्वे"ति(४-९७) नूपुरम् । "आक्षिप्तं हस्तपादं चे"त्याक्षिप्तम्(४-११६) ।

"स्वस्तिकं चरणं कृत्वा कटिहस्तं च दक्षिणम् ।
वक्षःस्थाने तथा वाममर्धस्वस्तिकम्" (४-८३)

इत्यर्धस्वास्तिकम् । नितम्बादिचतुष्कं पूर्ववत् ।

अथापसर्पितः (३१)

अपक्रान्तमित्यादि । अपक्रान्तं—

"कृत्वोरुवलितं पादमपक्रान्तक्रमं न्यसेत् ।
प्रयोगवशगौ हस्तावपक्रान्तम्" (४-१३०) इति,
"अलपद्मः शिरोदेशे सूचीपाद"इत्यर्धसूची (४-१३८) ।

व्यंसितमिति "आलीढं स्थानकं यत्र करौ वक्षसी"ति(४-१०९) । अतो व्यंसितात्करणात्करक्रियामेव गृह्णीयादित्येवकारेणाह । एकवचनं जातौ । उद्वेष्टितमिति करिहस्तकरणं निर्दिशति—

"वामो वक्षःस्थितो हस्तः प्रोद्वेष्टिततलोऽपरः" इति (४-१४८) । "अलपद्मः शिरोदेशे सूचीपाद" (४-१३८) इत्यर्धसूची । "विक्षिप्तं हस्तपादं चे"ति (४-११९) विक्षिप्तम् । "पर्यायशः कटी च्छिन्ने"ति (४-७२) कटिच्छिन्नम् । ऊरूद्वृत्तमिहोद्वृत्तशब्देनोक्तम् (४-१५९) । प्राग्वदन्ते(त्रीणि) करणानि ॥

---

1 न - अर्धसूची 2 प - करिहस्तः कटिच्छेदः कार्यस्त्वर्ध—

कृत्वा नूपुरपादं च [1]द्रुतमाक्षिप्य च क्रमम् ।
पादस्य चानुगौ पादौ [2]त्रिकं तु परिवर्तयेत् ॥ २४८
निकुट्य करपादं चाप्युरोमण्डलकं [3]पुनः ।
[4]करिहस्तं कटिच्छिन्नं कार्यमर्धनिकुट्टके ॥ २४९

अथार्धनिकुट्टकः (३२)

कृत्वा नूपुरपादमित्यादि । "त्रिकं सुवलितं कृत्वे"ति (४-९७) नूपुरपादम् । द्रुतमाक्षिप्येत्यादिना विवृत्तं करण माह

"आक्षिप्तहस्तपादं च त्रिकं चैव विवर्तितम् ।
रेचितौ च तथा हस्तौ विवृत्ते करणे द्विजाः" इति (४-१२२)

निकुट्येत्यनेन करपादनिकुट्टितं । यत्र तानि करणान्याह निकुट्टितार्धनिकुट्टकादीनि । उरोमण्डलकादित्रयं पूर्वाङ्गहारवत् ।

ये येऽङ्गहारास्तेषां प्रति करणं गुरुपरिमाणं कलानिवर्तनकालस्तावता सम्यक्करणं वर्तनाक्रमेण शक्यम् । तत्र ये षड्द्वादशचतुर्विंश(ति)रित्यादिकरणात्मका एकेन द्वाभ्यां वाभ्यसितेन युक्तास्ते त्र्यश्रमानेन बोद्धव्याः । एकस्य द्वयोर्वा मध्ये तु प्रवेशयितुं तालकलाद्यभिसन्धानेन शक्यत्वात्ते च षोडशात्र सन्ति । ये तु पूर्ववदेवाष्टषोडशादिकरणात्मका एकेन द्वाभ्यां वाभ्यसितेन किंचिदधिका वा ते चतुरश्रतालविषया द्रष्टव्याः । तेऽपि षोडशैव । एकस्य क्वचिदूनत्वेऽपि कस्य चित्पुनः क्रियया तालहरणं शक्यमिति मन्तव्यम् ।

तत्रापविद्ध उद्धट्टितो विष्कम्भस्तदपसृतः स्वस्तिकरेचितो वृश्चिकापसृतो मत्तस्खलितो गतिमण्डलः परिवृत्तकरेचितः परावृत्तकोऽलातक उद्धट्टितको रेचित आक्षिप्तरेचितः सम्भ्रान्तोऽर्धनिकुट्टकश्चेति त्र्यश्रतालकाः षोडश । एषां चतुरश्राश्रयास्तावन्तः । तत्र द्विभेदभिन्नेष्ववान्तरभेदेन षोडशसु पूर्वरङ्गाङ्गेषूत्थापनादिप्ररोचनान्तेषु बहिर्यवनिकागतेषु प्रयोगाद्द्वात्रिंशद्रूपतेत्येवं केचित् ।

एके त्वाहुः—चतसृणां नर्तकीनां प्रति प्रयोगं चत्वार इति पुनः पिण्डी रेचकन्यासापन्यासश्चतुर्धेति द्वात्रिंशत् । एतच्च पूर्वरङ्ग(अध्या-५)व्याख्याने स्पष्टयिष्याम इत्यलम् ।

1 न - दण्ड माक्षिप्य 2 न - त्रिकं च 3 द - मण्डलकः 4 ढ - करिहस्तः कटिच्छेदः कार्यस्त्वर्धे ।

द्वात्रिंशदेते [1]सम्प्रोक्ता ह्यङ्गहारा[1] द्विजोत्तमाः ।
चतुरो रेचकांश्चापि गदतो मे निबोधत ॥ २५०
पादरेचक [2]एकः स्याद्द्वितीयः कटिरेचकः ।
कररेचकस्तृतीयस्तु चतुर्थः कण्ठरेचकः ॥ २५१
रेचिताख्यः पृथग्भावे वलने चाभिधीयते ।
[3]उद्वाहनात्पृथग्भावाद्वलनाच्चापि रेचकः ॥ २५२

अन्ये तु गीतकानामङ्गनिबन्धानां च वस्तु त्रिविधम् ।(तद्) बद्ध(वर्ध)मान-करणानि (नव) चत्वारि आसारितानि पाणिकैकप्रकारेत्येवंभूतं च यतो ब्रह्म गीतिवैचित्र्यं द्वात्रिंशद्वासितं तस्मात्तत्प्रयोगात्मनोऽङ्गहारेऽपि तावदेवेत्याहुः । अन्ये तु परमेश्वरभाषितत्वादे यथा(दियता?) सफलसम्पत्तिहेतुत्वमित्याहुः । एतन्मनसि कृत्वोपसंहरति द्वात्रिंशदेत इति ।

अथ रेचकानाह पादरेचक इति। पादयो रेचनं न च पार्ष्णिभूतयोरन्त-र्बहिश्च [2]सन्नतं नमनोन्नमनह(व्यं?)सितं गमनमङ्गुष्ठाग्रस्य च, हस्तयोरेव चलनं हंसपक्षयोः पर्यायेण द्रुतभ्रमणं, ग्रीवायास्तु रेचितत्वं विधुतभ्रान्तता सर्वतो भ्रमणाच्चापि विज्ञेयं तु रेचिताङ्कक इत्यादिसङ्ख्योपादानात्पृथ-गेते वैशाखमण्डलादिस्थानकस्थेन प्रयोज्या इति दर्शयन् वैशाखरेचितेन कर-णेन सङ्गृहीतत्वमेषां दर्शयति। पृथग्दृष्टार्थताख्यापनार्थं चैषां करणाङ्गहारान्त-र्भूतानामप्युपादानम् । सुकुमारगीतवाद्यप्रधाने च प्रयोग एषां प्रयोगः । तुम्बु-रुणेदमुक्तम्—

"अङ्गहाराभिधानात्तु करणै रेचकान्विदुः" । इहाप्येतन्मुनेर्मतमिति लक्ष्यते, यत्सहशब्देन तत्र तत्र निर्दिशति "व्याख्यास्यामि सरेचकान् (४-१९)इति । नन्वेवंकरणाङ्गहाररेचकाः किं पूर्वरङ्गानेव वैचित्र्यकारित्व मात्रेणेहेवोपयुज्यन्ते ? नेह प्रस्तुमः ।

---

1 न - गदितास्त्वङ्ग 2 न - एव 3 न - पृथग्भावाश्चलनाच्चापि ।

---

1 पादयोरेव चलनं 2 सन्ततं ।

[1]पार्श्वात्पार्श्वे तु गमनं स्खलितैश्चलितैः पदैः[2]।
विविधैश्चैव पादस्य पादरेचक उच्यते ॥ २५३
त्रिकस्योद्वर्तनं चैव [3]कटीवलनमेव च ।
तथापसर्पणं चैव कटिरेचक उच्यते ॥ २५४
[4]उद्वर्तनः परिक्षेपो विक्षेपः परिवर्तनम् ।
विसर्पणं च हस्तस्य हस्तरेचक उच्यते ॥ २५५
उद्वाहनं सन्नमनं [5]तथा पार्श्वे च सन्नतिः ।
भ्रमणं [6]चापि विज्ञेयो ग्रीवाया रेचको बुधैः ॥ २५६
रेचकैरङ्गहारैश्च नृत्यन्तं वीक्ष्य शङ्करम् ।
सुकुमारप्रयोगेण [7]नृत्यन्तीं चैव पार्वतीम् ॥ २५७

कथं तर्हि देवतापरितोषत्वेनापि तदपि च वैचित्र्यमात्राद्यावत्तद्देवताध्वज प्रतिकृतिभूतपिण्डीबन्धनिष्पात्तिद्वारेणेत्यभिप्रायेण पिण्डीबन्धावतरणाय भरतमुनिः पुराकल्पमाह श्लोकचतुष्टयेन रेचकैरङ्गहारैश्चेत्यादिना । इह चत्वारश्चकाराः । तत्रैको हेतावन्ये समुच्चये । तत्रैवमभिसम्बन्धः यस्मात्प्रहर्षपरवशप्रमथाभिहतैर्मृदङ्गादिभिरुपलक्षिते दक्षयज्ञे निहते प्रहर्षपरवशान्नर्तिनि नृत्यन्तं नृत्यन्तीति धातुसम्बन्धे प्रत्यया इत्यनेन प्रयोगः । अन्यथा नृत्तवन्तमित्यादि स्यात् । दिनात्यय इति सन्ध्याकालेषु प्रमोदविकासमयेषु तत एव पुण्यात्मकेषु सततमतिशयेन भृशं च नृत्यति, तद्धेतौ रेचकैरङ्गहारैश्चैव, न तु सुकुमारं नृत्यन्तं शङ्करं वीक्ष्य सुकुमारप्रयोगमेव कृत्वा तु अर्थतत्त्वेन नृत्यन्तीं भगवतीं च वीक्ष्य तत एवेति, तावतामेवाङ्गहाररेचकाश्चेति तद्धेतुकान्पिण्डीबन्धान्दृष्ट्वा नन्दी तथा भद्रमुखवीरभद्रप्रभृतयो नन्दिभद्रदेवतागणस्तत्प्रमुखाः पिण्डीबन्धा नाम चक्रुः । आकारसादृश्येऽयं च पिण्डी तद्बन्धं प्रयोगं चक्रुः । सलक्षणं लक्षणपर्यन्तम्, अन्तवचनेऽव्ययीभावः । अङ्गहारप्रयोजनान्तरीयकतयाकारविशेषसम्पत्तिं दृष्ट्वा सम्यक्प्रयुज्य लक्षणं विदधिर इति यावत् । द्वयोः प्रयोक्तृ-

1 न - पश्चात्पार्श्वे 2 न - चलितैर्गतैः 3 न - कटीचलनमेव 4 ड - उद्वर्तनं 5 ढ - पश्चात्पार्श्वे त्व सन्नतिः 6 प - चेति 7म - नृत्यति स्म च पार्वती ।

मृदङ्गभेरी [1]पटहैर्झर्झ्याडिण्डिमगोमुखैः ।
[2]पणवैर्दर्दुरैश्चैव [3]सर्वातोद्यैः प्रवादितैः ॥ २५८

दक्षयज्ञे विनिहते सन्ध्याकाले महेश्वरः ।
[4]नानाङ्गहारैः [5]प्रानृत्यल्लयतालवशानुगम् ॥ २५९

[6]पिण्डीबन्धांस्ततो दृष्ट्वा नन्दिभद्रमुखा गणाः ।
[7]चक्रुस्ते नाम पिण्डीनां [8]बन्धमासां सलक्षणम् ॥

[9]ईश्वरस्येश्वरी पिण्डी नन्दिनश्चापि [10]पट्टसी ।

तया सुकुमाराद्वृत्तं (वृत्त?) नृत्तयोः समकालाप्रयोगेण पिण्डीबन्धनिष्पत्तिं सूचयति— नन्दिभद्रमुखाश्च गणा इत्यनेन चतुष्प्रभृति प्रयोज्यतामप्याह नन्दिभद्रमुखानामेवं गण इति।नन्दिकेश्वरं नियतस्थानं मृदङ्गः मुरजः भेरी कांस्यशकलान्तःपूर्णा महर्षकाभङ्गमर्दलः डिण्डिम करटिका गोमुखाभङ्गी अन्तरीयुक्तस्तन्त्रीयुक्तः पटहः पणवो दर्दरो महाघटिकाकार इति सर्व एते चर्मावनद्धभेदाः। लयो द्रुतमध्यविलम्बितात्मा तस्य यस्तालः प्रतिष्ठा (तल प्रतिष्ठायां) अपि च तत्त्वम् । विशिष्टवर्धमानगीतकादि नियतवैणस्वरविशेषात्मकधातुवाद्यशेषभूतशुष्कप्रयोगप्रकृतिकावनद्धवाद्य गीतिनियतप्रतिष्ठितलयात्मकत्वम् ।

ननु नाट्ये च प्रयोज्यचित्तवृत्तिपरिवृत्ता (वर्ता)नुसारेणान्यथाभावेन तस्य यो वशः सामर्थ्यं तस्यानुगमं कृत्वा तमनुसारितेन चानुगम्यमानः, अनुसृतं कृत्वेत्युभयथातन्त्रेण द्रष्टव्यम् । लयतालवशस्यास्य लयतालवशत्वानुगो यत्नेति ।

ननु च नाट्य एवाङ्गानुसारित्वे लयादि,न तु नृत्तएव,आङ्गिको नाट्यस्य भेदः । उच्यते— इहादृष्टविशेषसम्पत्तिहेतुत्वं वर्धमानादिप्रयोगस्य सोपकरणनृ-

---

1 द - पटहैर्भाण्ड, प - पटहैर्बम्भा 2 न - पणवै दर्दुराख्यैश्च 3 द - नानातोद्यैः 4 द - नानाङ्गहारैर्नर्नर्तं लय 5 न - प्रानर्तल्लय 6 न - डिण्डिमभ्रान्ततो 7 न - चक्रुर्नामानि 8 द - खण्डाश्चैव 9 ज - ऐश्वरी वृष पिण्डीं च 10 ज - यादृशी ।

त्तप्रयोगस्य च तत्र गुणप्रधानभावं प्रति कामचारम्। यदा गीतकादेः प्राधान्यं तदा तदनुसार्यङ्गं भवति। तदभिप्रायेणैव यद्वक्ष्यति—

"गत्या वाद्यानुसारिण्यास्तस्याश्चारीं प्रयोजये" दिति (४-२८२)। यदा तु नृत्तस्यादृष्टसम्पादकत्वे प्राधान्यं क्रियते तदा तदनुसारेण गीतकादेराश्रयणं। यदाश्रयेण वक्ष्यति—

"गीतानां मद्रकादीनां योज्यमेकं तु गीतकम्।
वर्धमानमथापीह ताण्डवं यत्र युज्यते"(५-१३) इति।

अनेन हि चतुर्थेन पादेन ताण्डवस्य प्राधान्यं तदुपयोगित्वं च गीतकादेरुक्तम्। न च नाट्यात्तु भेदः,नाट्ये ह्यङ्गं गीतकं चेत्युभयमप्यप्रतिष्ठितम्। तथा च करचरणचारीमण्डलादि यत्तत्राङ्गोपयोगि तत्स्वरूपेण लयादिव्यवस्थाया वा अनियतमेव यथारसं प्रयुज्यमानत्वेन [1]विपर्ययात्। एवं ध्रुवागानादावपि द्रष्टव्यम्। सैव हि ध्रुवा कदा चिद्द्रुता प्रयुज्यते कदाचिद्विलम्बितेति द्वयमपि क्वचित्। तत्रापि गीतं च प्रयोज्यचित्तवृत्ति(परिवर्तत्वं)तन्त्रम्। इह तु गीतमङ्गं च द्वयमपि स्वप्रतिष्ठितम्। तथा हि यस्य यादृशं [2]लययतिस्वरूपादिकं निरूपितं तन्न विपर्येति मन्त्रादिवद्वेदवत्। न वा योग्यतयाङ्गाङ्गिभावः। तथा हि— "अपविद्धं द्रुतं चैव"(४-२०९) इत्यङ्गहारे गीतकादावपि मध्ये स्रोतोगतलयादिरित्यादिकं नान्यथा क्रियते। तेन "प्रधानमनुभिद्यन्ते गुणा" इत्येतदिह सङ्कुचयति। किन्तु स्वप्रतिष्ठितेऽपि द्वये येन यत्संमीलनयोग्यं तत्तत्र प्रयुज्यत इत्येतावानङ्गाङ्गिभावः। एवं शत्रुज्वलनप्रवृत्तामर्षाभिमाननरपतिद्वितीयवत्। अत एव प्रयुज्यत इत्युक्तम्। तेनैव तथाकरणं सूच्यते। तत्र दक्षयज्ञे निहते मृदङ्गादिवाद्यं प्रमथैः प्रवर्तितमिति तदनुगं नृत्तम्। सन्ध्याकालेषु हृदयभूतानन्दोल्लासात्मकेषु भगवन्नृत्तप्राधान्ये स्थिते वाद्यादिप्रवृत्तिरेतदर्थमेव। इत्थंभूतलक्षणतृतीयया साधारण्येनार्थोऽभिहितः। अवसरद्वयाभिधानं चैतदर्थमेव लक्षणमर्थत्वे तथैव दृश्यते। तथा हि—गीतमेव तदान्यार्थं तदन्यगत्वेन नृत्तादि। यथा डोम्बिकादौ तत्र हि परिष्करणाद्यपि सुकुमारेणैवाङ्गेन, तत्रापि वर्णाङ्गं प्राधान्यं क्वचिद्यथा प्रस्थानादौ क्वचिद्गीयमानं रूपकाभिधेयप्राधान्यं यथा * शिल्पकादौ क्वचिद्वाद्यं प्राधान्यं भाणकादिषु भग्नतालपरिक्रमणादौ। क्वचिन्नृत्तप्राधान्यं यथा डोम्बिकादिप्रयोगानन्तरं हुडुक्कावाद्याव-

---

1 विपर्यासात् 2 क्षययति।

* शिल्पक इति शब्दः शिंगकशिंगटक सिंगठक षिद्गकादिभेदेन दशरूपकलक्षणग्रन्थेषु दृश्यते।

चण्डिकाया भवेत्पिण्डी [1]तथा वै सिंहवाहिनी ॥२६१
तार्क्ष्यपिण्डीभवेद्विष्णोः पद्मपिण्डी स्वयम्भुवः ।
शक्रस्यैरावती पिण्डी [2]झषा स्यान्मन्मथस्य तु ॥२६२
शिखिपिण्डी कुमारस्य [3]रूपपिण्डी भवेच्छ्रियः ।
[4]धारापिण्डी च जाह्नव्याः पाशपिण्डी यमस्य च ॥
वारुणी च नदीपिण्डी [5]याक्षी स्याद्धनदस्य [6]तु ।

सरः अत एव तत्र लोकभाषया चिल्लिमार्ग[1] इति प्रसिद्धिः । चारीमार्गे ह्यसा-वङ्गप्राधान्यात् तत्रापि वैचित्र्येण मध्ये मध्ये गीतवाद्यादेरपि प्राधान्यम् । वाद्यस्यापि रूप(तु धन ?)सुषिरावनद्धभेदेन प्राधान्यं यथायोगं विवेचनीय-मित्यलं बहुना ।

तत्रैते पिण्डीबन्धा आधाराङ्गप्रयोगसाधकतमभेदाद्बहुप्रकारं भिद्यन्ते । तत्र भूमिर्दिशः आकाशद्वयं[2] भेदात्सप्त सप्तभेद एकैक इत्याधारभेदाः सप्त । हस्तौ पादावक्षिणी शिर इत्यङ्गभेदा अपि सप्तेत्येकान्न पञ्चाशत् । एकोऽनेको वा प्रयोक्ता; सोऽपि समप्रयोगो विषमप्रयोगो वेति चतुर्धा, करणेन सम्पाद्यते अङ्गहारेण वेत्यष्टाभिरेकान्न पञ्चाशतो गुणनाद् द्विनवत्यधिकं त्रिशतं पार-मेश्वराः (पिण्डीबन्धाः) ।

"कल्पापायनिशान्तसान्ध्यसमये सद्योमरङ्गाङ्गणं (रङ्गं गणैः ?)
सम्प्राप्य प्रतताङ्गहारवलनावैचित्र्यचित्रास्थितिः ।
आकाशे स्वत्रपुष्यके(?)च विविधां सृष्टिं समास्तूतयन्
त्रैलोक्यस्थपतिस्त्वमेव भगवन्विश्वाकृतिर्जृम्भसि इति"

अनया च दिशापिण्डीबन्धानांतत्तद्देवतातत्तत्प्रकृतिमन्तर्भागादिमूचनद्वारेण केव-लमपिकरणंप्रयुज्यमानमेव हर्षदायि भवत्येव। तत्र प्रधानदेवतोद्देशेन तावत्पिण्डी-बन्धान्दर्शयति श्लोकपञ्चकेनेश्वरस्येत्यादिना । भगवत एव प्राधान्यात् परि-तोषणीयतेति तस्याव्यक्तं यदीश्वरशब्दवाच्यं निर्विशेषं रूपं तस्य तादृश एव

1 न - तथैव 2 न - झषपिण्डी तु मान्मथी 3 ढ - ऊरुपिण्डी 4 ढ - सारपिण्डी तु 5 ड - यक्षा 6 प - च ।

1 चल्लिमार्ग 2 भेदा त्स्युयसूय एकभेद!एक ।

[1]हलपिण्डी बलस्यापि सर्पपिण्डी [2]तु भोगिनाम् ॥२६४
गाणेश्वरी महापिण्डी [3]दक्षयज्ञविमर्दिनी ।
त्रिशूलाकृतिसंस्थाना रौद्री स्यादन्धकद्विषः ॥ २६५
एवमन्यास्वपि [5]तथा देवतासु यथाक्रमम् ।

शिवलिङ्गाकृतिः पिण्डीबन्धः, पिण्डी याधाराङ्गादिसङ्घातः तया बध्यते बुद्धौ प्रवेश्यते तनुभावेन सङ्कलनया वा व्योमादाविति पिण्डीबन्ध आकृतिविशेषस्तस्यैकदेशान्निबन्धनं पिण्डीति । यदि वा पिण्डीविशिष्टान्येव तान्याहेति [1]अवबध्यते पुनरनेनेति पिण्डीबन्धः करणाङ्गहारादिः । अन्ते च भगवत एव व्यक्तरूपस्य पिण्डीबन्धो भविष्यति । परमेश्वरानन्तरं च प्रधानभूतस्य पिण्डीबन्धलक्षणविधायिनो नन्दिनः [2]पट्टसः । उभयत्र त्रिशूलाकृतिरायुधविशेषः । तदनन्तरं भगवत्याः, सिंहश्चासौ वाहश्च तस्यैवमिति, आक्रान्ततया भूमिर्वालिङ्गस्य सिंहस्तदाकृतिकत्वं दर्शयति । तदनन्तरं विष्णोर्ब्रह्मणश्च । ऐरावतीति गजाकारा रूपपिण्डी (पद्मा)कारा धारापिण्डी पुनः पुनः प्रयुज्यमाना नदीपिण्डी भवति । याक्षी वैश्रवणायुधं मुद्गराकारा ।

एवं प्रतिपाद्यानभिधायान्यानतिदिशत्येवमित्यादिना । अन्यास्विति तृतीयाध्याये पूज्यत्वेन निरूपितासु, तदभिप्रायेणैव यथाक्रममित्युक्तम् । ध्वजपूजाहुत्यायुधवाहनविशेषरूपाः । सचिह्नका इत्यनेनापि केनचित्कर्मादिसूचकेन रूपेणोपलक्षिताः ।

एतदुक्तं भवति—या काचिद्देवतेत्युच्यते तस्याः पश्चान्नृत्तेन परितोषणं कार्यम् । तन्मध्ये च तदीयायुधवाहनकर्मभावाभ्य(द्य?)नुकारी [3]अङ्गप्रयोगो विधेयः। अत एव "पादाग्रस्थितया"(रत्ना १-१)इत्यत्र तलपुष्पपुटकरणेन कर्मणा विशेषणसूचकेन भगवत्याः परितोषणं सम्पाद्यते । "तिलके च करः स्थाप्य" (६४ करणम्) इत्यभिनयेन भगवतः परितोषः । "निकुट्टितौ यदा हस्तौ" (९ करणम्) इत्यनेन त्रिशूलाकृतीय कायसम्पत्तिः । गरुडप्लुतकेन तार्क्ष्याकारगतिसूचनम् । गङ्गावतरणेन धारापिण्डी । नागापसर्पितेन भोगि-

1 प - गालिपिण्डी 2 न - भोगिनाम् 3 प - गाणेश्वरा 4 द - कालपिण्डी च लोहिती 5 न - तथा पिण्डीबन्धाः स्वचिह्नकाः ।

1 सम्पद्यते 2 पट्टसी 3 अङ्गप्रदेशो ।

[1]रेचका अङ्गहाराश्च पिण्डीबन्धास्तथैव च ॥ २६६
[2]सृष्ट्वा भगवता [3]दत्तास्तण्डवे मुनये [4]तदा ।

पिण्डी । "प्रसार्योत्क्षिप्य च करा"वित्यङ्गहारेण (४-१७५) आक (धा?) रीयभौमत्रिशूलशिवलिङ्गादिपिण्डीनिष्पत्तिः । रेचितेनाक्षिप्तरेचितेन च समस्तानामुक्तानां चा(धा)राद्यनन्तभेदानां निष्पत्तिः तथा च नन्दिमत उक्तम्—

"रेचिताख्योऽङ्गहारो यो द्विधा तेन ह्यशेषतः ।
तुष्यन्ति देवतास्तेन ताण्डवे तं नियोजयेत् ॥" इति

एवमन्यदप्यूह्यमित्यनुपयोगात्समस्तं न लिखितम् । आगमभ्रंशरक्षणाय तु दिङ् निरूपिता ।

एतदुपसंहरति रेचका इति । पिण्डीबन्धग्रहणेन शिखिपिण्डिप्रभृत्युपायमयूरललितादिकरणसङ्ग्रहः । अतएवानया केवलस्यापि करणस्य देवतापरितोषणेनादृष्टार्थप्रयोगो, यथा विष्णुक्रान्तस्य चक्रमण्डलस्य च वैष्णवक्रीडासूचकस्य सः, एवकारेणाङ्गहारप्रयोगनान्तरीयकपिण्डीबन्धः सम्बद्धः । अङ्गहारा एव पिण्डीबन्धाः,तथान्येऽपि पिण्डीबन्धा इति केवलकरणसंग्रहः । चकारात्पिण्डीबन्धनिष्पत्त्युपायत्वं करण(स)मूहात्मनः कल्पितस्याङ्गहारस्य वा । तस्यापि प्रयोगे भत्यनुज्ञानमाह । एतदर्थमेव नृत्तमातृकाया लक्षणमङ्गहाराणां च सामान्यलक्षणं प्रणीतम् ।

सृष्ट्वेति । ननु स्मृतं नृत्तं सन्ध्याकालेष्वित्यनेनैतद्विरुध्यते । न, स्थानकचारीनृत्तहस्तभ्रूतारकर्मादीनां वर्णानामिव प्रवाहानादित्वेऽपि [1]विशिष्टपरमात्मनाशोभाविशेषेण भगवता नृत्तनिर्माणं वेदानामिवेत्यविरोधः । वेदरचनापि हि वर्णानादित्वेऽपि प्रतिप्राणिस्थानकरणाभिघातसम्पत्त्यभिव्यक्तपौर्वापर्यनिबन्धना कृतका । सा परं पूर्वपूर्वरचनासजातीयत्वप्रवाहेण नित्या । तथा नृत्तमपीति न किञ्चि(कश्चि?)द्विरोधः। दत्ता इति या तन्ध्या(यत्तण्डु?)मनुजानानो निजबुद्धिकृतं यत्नेन तत्र वैचित्र्यमनुप्रवेशितं न तददृष्टप्रतिघातीति दर्शयति । तेन शोभाप्राधान्यमेवात्र ज्याय इत्यनत्र्यान इति यावत्, लक्ष्यं न विरूपमिति मन्तव्यम् । मुनय इत्यूहापोहादिकुशला ये । हिर्यस्मादर्थः । यतो

1 न - रेचकांश्चाङ्गहारांश्च पिण्डीबन्धांस्तथैव 2 द - सृष्टा 3 प - दत्तास्ताण्डवाय 4 न - तथा

1 विशिष्टपरयात्मना ।

[1]तेनापि हि ततः सम्यग्गानभाण्डसमन्वितः ॥ २६७
नृत्तप्रयोगः [2]सृष्टो यः स ताण्डव इति स्मृतः ।

दत्ता अतो नृत्तात्मकः प्रयोगः सम्यग्वैचित्र्येण स्प(सृ?)ष्टः सम्यगतिसमश्वित-तालसाम्यातिका? सङ्गेति गच्छन्तीति सम्यग्भूतं यद्गानं गीतं, भाण्डं च भण्डते शब्दः (ब्दं?) करोतीति, भडितव्याण्ण(?)इत्यनया वा पुष्कराध्यायोदितया-व्युत्पत्त्या तदादि । इह तद्गीतं वाद्यं च सम्यगश्वितं तदनुसारि तत्प्रधानतया नृत्तप्रधानत्वेन गीतेन वाद्येन च समन्वितः । अत एव तण्डोरयं ताण्डव इति वैयाकरणैः स्मृतम् ।

अत्र भरतमुनिरेव परकीयामाशङ्कामुपनिबध्नाति, अनभिज्ञानाच्च मुनीनामभिनयादीनामप्यविदुषां कथमभिनयः कृत इति गीतकार्थेति गीतेष्वासारितेष्विति च न वचनोपपत्तिःस्यात्। तस्मान्मुनिरेवेदं स्वयमाशङ्कते। पूर्वपक्षत्वेन वा शङ्क्यमिति प्रकटयितुं सुकुमारमिति मध्ये ऋषय ऊचुरिति प्रक्षिप्तम् । तत्रेत्थमाशङ्का नृत्तं नाट्याद्भिन्नमभिन्नं वा । भिन्नत्वेऽपि सप्रयोजनमप्रयोजनं वा । न तावद्भिन्नं, अङ्गविक्षेपनृत्तगीतवत्त्वेनात्रैलक्षण्यात् । अभिनयप्रयोगस्य गीयमानपदार्थवाक्यार्थगत[1]नाट्यार्थगतविषयत्वे भाव्यविकलस्य दर्शनमस्ति तावत् । अवान्तरवैलक्षण्यं च दशरुपकेण न विद्यते । [2]एकपात्रहार्यत्वमसन्निहितेऽपि च [3]प्रियतमसखीप्रभृतौ तद्विषयोक्ति[4]प्रत्युक्त्यादिप्रयोगो नाट्येऽप्याकाशभाषितादौ भाणरूपके च विद्यते च। यथाह राहुलः—

"[5]परोऽक्षेऽपि हि वक्तव्यो नार्या प्रत्यक्षवत्प्रियः ।
सखी च नाट्यधर्मोऽयं भरतेनोदितं द्वयम्" । इति

तथा भाणे चैकाकी वा योज्योऽनेकाङ्गहारिण्यपि। मुनिना हि वक्ष्यते "भाणकवच्चैकहार्यं स्या"दिति । वार्तिककृताप्युक्तम्—

"वाच्यानुगतेऽभिनये प्रतिपाद्येऽर्थे च गात्रविक्षेपैः ।
उभयोरपि हि समाने को भेदो नृत्तनाट्यगतः"

1 न - ताण्डिनापि ततः 2 ढ - संसृष्टो यस्ताण्डवमिति ।

1 नाट्यविषयस्य 2 पात्राहार्ये 3 प्रियसम 4 प्रयुक्त्यादि 5 परोक्षेऽपि च ।

अत्रोच्यते। (यदि)साक्षात्कारबुध्द्यभावान्नाट्यं, तदसत्— इयं प्रियतमगुण कीर्तनपरा नृत्यति, खण्डिता नृत्यति, कलहान्तरिता नृत्यति— इत्येतद्बुद्धेः सम्भवात्। यदाह—याच

"एवं विधगुणकीर्तनवचनेषु प्रियतमस्य संरक्ता।
सख्याः समक्षमुच्चैः प्रमदा सैवानुकार्यात्र॥"

एतेनोत्साहगतव्यानामर्थेऽनुकार्यत्वं दर्शितम्।

अथ गीयमानरूपकाभिनयदर्शनं नाट्यतो वैलक्षण्यं, तत्तावद्वैलक्षण्य-मात्रप्रयोजकावान्तरभेदस्य सर्वत्र सम्भवाद्धितिह्युक्तम्। न चेदं वैलक्षण्यं नाट्येऽपितस्यभावात्,वक्ष्यतेअङ्गोपाङ्गकशारीराभिनयलक्षणाविधौ(अ-२२)—"स्थाने ध्रुवास्वभिनयोयत् क्रियतेहर्षशोकरोषाद्यैःभावरससंप्रयुक्तंज्ञेयंनाट्यायितं त"दिति। उपरञ्जकमपितत्र गीतं नाट्यावयवरूपकवाद्याभिनययोश्चव्यक्तइति तत्प्रयोगस्य सर्वत्र डोम्बिकाप्रस्थानशिल्पकभाणकभाणिकारागकाव्यादेर्दशरूपकलक्षणेनासङ्ग्रहान्नाट्याद्भेद इति चेन्न, तदनैकान्तिकं; तोटकप्रकरणरासकप्रभृतेस्तद-सङ्ग्रहितं,तथापि नाट्यरूपत्वात्कोहलस्तु ब्रवीतीति च परिहारस्य समानत्वात्। वाचिकोऽप्यभिनय आसीनपाठ्यादौ क्वचिदस्त्येव।"अहोगाणगाणबुाल्लभाण" इत्यादौ। आहार्यस्तु प्राधान्येनैकः कृतः भाणादावपि न क्षणे क्षणे परिवर्तते। सात्त्विकोऽप्यङ्गीकृत एव कोहलाद्यैः "सत्त्वातिरिक्तोऽभिनय" इत्यादिवचन-मालिखद्भिः। आङ्गिकस्तु स्फुट एव। अस्त्री(?) डोम्बिकाषिद्रकानामन्योन्यान-न्वितत्वं [3]वाक्यानामिव,समवकारेऽप्यङ्गानामस्त्रीप्रधानेऽर्थे तत्रान्वय इति चेदि-हापि समानम्। देवतास्तुतेः स्त्रीपुंभावाश्रयस्य च शृङ्गारस्य सर्वत्रानुगमा-त्तस्यैव च प्राधान्याद्वक्ष्यति—"देवस्तुत्यात्र(श्र)यकृतं स्त्रीपुंभावसमाश्रय"-मिति। अत एव च चूडामणिडोम्बिकायां प्रतिज्ञातं "विंदुगुणं वामि सहि इहोदिवचो अमिदुणधं। महसारकः गेते उं(?)" अत एव सहृदयाः "स्मरान्ति वध(स)मचूडामणिआ" तस्मान्नृत्तं नाट्यादभिन्नं तल्लक्षणोपेतत्वात्।

---

1 पद्मकशारीरा 2 डोम्बी काचिद्ग्रन्थकाठिन्यानन्वितत्वम् 3 अनुचि-तत्वं।

(ऋषय ऊचुः)

यदा [1]प्राप्त्यर्थमर्थानां तज्ज्ञैरभिनयः [2]कृतः ॥ २६८
[3]तस्मान्नृत्तं कृतं [4]ह्येतत्कं स्वभावमपेक्षते ।

एतदाह यदा प्राप्त्यर्थमिति । यतो हेतोरर्थानां काव्यार्थानां प्राप्त्यर्थं साक्षात्कारबुध्यास्वीकारार्थं तज्ज्ञैः प्रयोक्तृभिराङ्गिकाद्यभिनयः कृतस्तत्तत(क?)-स्मादेतन्नृत्तं कृतं नृत्तशब्देन व्यपादिष्टं । न तु नाट्यशब्दे नैवेत्यर्थः । भवतु वा भिन्नं तथापि कं स्वभावं लक्षणं च स्वात्मन्यङ्गीकरोति लौकिकत्वं लोकोत्तरत्वं वा । लौकिकत्वे घटादिवस्तुतुल्यत्वं तदनुकारत्वं प्रतिबिम्बादिरूपता वा । तत्रापि नाट्यच्छायात्मकतैव, नाट्यस्यैव ह्यमी भागनिष्पन्दाश्चित्रपुत्रिकापुस्त-प्रभृतयो ग्रन्थिकरिकल्पितं (?) साक्षात्कारकल्पप्रत्ययसम्पदा कथापर्यन्तम् । तथा लोकोत्तरत्वे तु नाट्यस्यैवावान्तरभेदमात्रं तत्, तथाविधमपि च तन्न निष्प्रयोजनम् । तद्भावा(वो?)ह्युपलक्षणीयः स्यात् । असिद्धमेतत्—चतुर्व-र्गोपदेशस्य राघवविजयादिकरागकाव्येषु दृष्टत्वात्, डोम्बिकादौ तु कामस्यैव प्रच्छन्नरागपरमरहस्योपदेशात्, "यद्वामाभिनिवेशित्व"मित्यनेन (२२-१९३) सामान्याभिनये प्रच्छन्नरागस्यातीव देव(मन्मथ)सारसर्वस्वत्वेनाभिधा-नात्, सिंहसूकरभल्लूककासरादिवर्णनेनापि भाणप्रेरणभाणिकादावप्रस्तुत-प्रशंसार्थान्तरन्यासदृष्टान्तादिना पुरुषार्थस्यैवोपदेशदर्शनादिति प्रयोजनभेदा दपि न भेदः । तदोभयतोऽर्थानां धर्मादीनां प्रयोजनादीनां प्राप्त्यर्थं तज्ज्ञै-रनृता(नुवा?)दिभिः कविभिरभिनय इत्यभि नीयमानो रागकाव्यादिः कृतः । तस्मात्कस्माद्धेतोरेतन्नृत्तं न नाट्यं, नाट्यं च कस्मान्नृत्तं गात्रविक्षेपात्मकं हि तदपि तुल्ये च तथार्थे कं भेदकं स्वभावमपेक्षते । नास्त्यसौ भिन्नस्वभाव इति यावत् । यद्वार्तिकम्—

"एवमवान्तरवाक्यैरुपदेशो रागदर्शनीयेषु ।
सिंहादिवर्णकैर्वा क्वचिदप्यर्थान्तरन्यासात्"

तस्मात्स्वभावस्य प्रयोजनस्य चाभेदान्नृत्तं नाट्यादभिन्नमिति । राघवविज-यादिरागकाव्यादिप्रयोगो नाट्यमेवाभिनययोगात् । यत्त्वभिनयादिशून्यत्वं

---

1 न · प्राप्यर्थं 2 ढ - स्मृतः 3 - कस्मान्नृत्तम् ह्येतत्किंस्व भावमपेक्षते, ढ - ह्येतत्तत्स्वभावमपेक्षते ।

केवलं वलनावर्तनाभ्रूक्षेपताराचलनचरणधारणकम्पस्फुरितकटीच्छेदरेचकादि तदस्माकं नृत्तं भविष्यति, यत्र नाट्यशङ्कापि नास्ति । ननु किन्तेन मोक्षितेन प्रयोजनम्। ननूक्तं नाट्योपयोगित्वं—

"तस्य शाखा च नृत्तं च तथैवाङ्कुर एव च ।
वस्तून्यभिनयस्ये"ति (८-१४) ।

एतद्दूषयति यदा प्राप्त्यर्थमिति । इह "योऽयं स्वभावो लोकस्ये"ति (१-१२२)लक्षणेन नाट्यं लक्षितं तत्राभिनयानामुपयोग उक्तोऽर्थोऽभिमुख्यप्राप्तिः [1]तस्य तूक्तस्य न किञ्चित्प्रयोजनम् । उपरञ्जकतया गीतवाद्यादिवदुपयोग इति चेद्गीतस्य तावत्—

"यत्तु काव्येन नोक्तं स्यात्तद्गीतेन प्रसाधयेत्" इति,
"यदि वाक्यैस्तु न ब्रूया"दिति, "न तैरेव तु वाक्यार्थै"रिति न्यायेन प्रकृतिचित्तवृत्तिकथावस्थादिसूचकोऽस्त्युपयोगः । वाद्यस्यापि गीतसाम्याक्षिप्ततालोद्दीपकत्वेन । एतन्मध्यात्तु नृत्तं कर्तृ कं स्वभावमपेक्षते, न युद्धनियुद्ध गतिपरिक्रमादावस्योपयोग इत्युक्तम् । तत्रापि कं स्वभावं लौकिकमलौकिकं वाप्यपेक्षते । लौकिकत्वेन प्रयोज्यत्वे लोकधर्म्या सङ्गहोऽस्यचारीमण्डलादि क्रमेण च तस्याङ्ग एव निरूपणं भविष्यति । अथाप्यलौकिकस्तथापि सिद्धम् । ऊर्ध्वेन तु कुर्यादित्यादि चतुरहस्ताभिनेतव्यविषयविभागन्यायेनाभ्यधिकं सुन्दरोपरञ्जकभागानुप्रवेशेन नाट्यधर्म्यनुप्रवेशे पुनरपि नाट्यादभ्यधिकता ।

अथोच्यते—पूर्वरङ्गप्रयोगस्य वैचित्र्यसिद्ध्यै तदेतादिति । तत्रापि पूर्वरङ्गप्रयोज्यया ब्रह्मगीत्या साकमस्याङ्गाङ्गिभावेन वा । तत्राद्ये पक्षे स्यादासमञ्जस्यम्—

"महागीतेषु चैवार्थान् सम्यगेवाभिनेष्यसि" इति (४-१४) ।

अत्राह यदा प्राप्त्यर्थमिति । अर्थानां गीतकपदाभिधेयानां प्राप्त्यर्थमभिमुखं नयनार्थं । यदयं नृत्ताभिमतोऽभिनयो विहितस्तत्कस्मादभिनयत्वे तुल्ये नृत्तमेतन्न नाट्यम् । तथाहि—गीतकार्थाभिनये कर्तव्ये क्रमन्यमाङ्गिकहस्तकार्याद्यभिनयव्यतिरिक्तं स्वभावमपेक्षते न कश्चिदन्यमित्यर्थः—

1 अन्ये तु ।

न गीतकार्थसम्बद्धं[1] न [2]चाप्यर्थस्य भावकम् ॥
[3]कस्मान्नृत्तं कृतं ह्येतद्गीतेष्वासारितेषु च ।
अत्रोच्यते न खल्वर्थं [4]कंचिन्नृत्तमपेक्षते ॥ २७०
किं तु शोभां [5]जनयतीत्यतो [6]नृत्तं प्रवर्तितम् ।

अथोच्यते न गीनकादिपदार्थाभिनयतयास्योपयोग इति किन्तर्ह्यन्यथा गीतकादावस्योपयोग इति तत्राह—न गीतकार्थसम्बद्धं न चाप्यर्थस्य भावकमिति । इह गीतकार्थास्तदारम्भकाः वस्त्वङ्गप्रभृतयस्तेषु न संबद्धं तन्मध्ये न परिगणितामित्यर्थः । यदि ह्यङ्गवस्त्वादितन्मध्यपरिगणनमस्य भवेन्न तद्भवेदप्यन्यतदुपयोगस्तदारम्भकत्वात्, नचैतदुपगतम्, न च युक्तं नृत्तस्य गीतद्वितीयजातीयत्वात् ।

ननु यथा तत्सुषिरादिवाद्यं तदङ्गसम्बन्धमपि तत्रोपयोगि तथेदं भविष्यतीत्याशङ्क्याह न चाप्यर्थस्येति । [2]अर्थ्यते प्रधानतया गीतकादौ निरूप्यत इत्यर्थः । स्वरूपपदतालादिस्तस्याप्येतद्भावकं प्रापकं न भवति ।

एतदुक्तं भवति—स्वरात्मके भागे प्रतिबिम्बरूपतया लग्नस्वरत्वेन स्थानप्रदायितया स्वरपरमार्थप्रापकतया स्वरात्मगीतिभागे स्तुतः सुषिरोपयोगोः अवनद्धस्यापि तत्साम्योपायतालांशप्रापकत्वेन पदपातादभिधेयोपयोगित्वेप्यभिनयरूप(त)या नाट्यादभेद एव स्यादित्युक्तम् ।

अथोच्यते रेचकाङ्गहारनिबन्धात्मकं यन्नृत्तं न तेन कश्चिदर्थोऽभिनीयते । अपि तु यथा विशिष्टैर्मन्त्रैस्तथातद्गीते चाभ्यधायि । भवाभ(ब्रह्म?)गीताङ्गवस्तुषु सप्तविंशतिसङ्ख्येष्वासारितेषु वर्धमानारम्भकेषु चतुर्षु चकारात्पाणिकायामित्येतेषु सम्बद्धमेतदङ्गहारात्मकं द्वात्रिंशत्प्रकारं नृत्तमिति तत्संबन्धं चेदानीं न किंश्चत् । एवं पृथङ्निवृत्त(नृत्त?) काव्यादौ नाट्यरूपतैव नाट्योपयोगित्वेनापि नृत्ततालगीतकाद्युपयोगोऽपि दुर्घट इति त्रिधा पूर्वपक्षसंक्षेपः ।

एतत्परिहर्तुमाह अत्रोच्यत इत्यादिश्लोकत्रयेण । अस्मिन्पूर्वपक्षे तूच्यते प्रत्युत्तरमिति शेषः । तत्र यदुक्तमङ्गविक्षेपं नृत्तगीतमयत्वान्नाट्यादेर्भेदो रागका-

---

1 न - संबन्धं 2 ज - वाच्यर्थस्य 3 ढ - तस्मान्नृत्तं 4 न - नृत्तं कंचिदपेक्षते 5 न - जनयतामिति नृत्तं 6 ढ - नृत्तमिदं स्मृतम् ।

2 अन्ये तु ।

व्यादिवृत्तस्येति तदनैकान्तिकम्, अस्य हेतोः लौकिकनृत्तेऽपि स्फुटं नाट्यादिलक्षणसदृशोपपने तु लौकिके गात्रविक्षेपणं पठ्यमानमभिनीयमानं वा यत् पदजातमर्थो नाभिनीयते इति किं नानुसन्धीयते, किं वा न साक्षात्क्रियायोग्यतां न नीयते। भाव्यकल्पोऽसिद्धः, लोकेऽपि सौमनस्याभावादङ्गोपाङ्गे परिक्षेपानुयातस्य वाक्योदीरितस्य दृष्टत्वात् गीयता पदार्थसंवादकृतं तन्मयीभाववद्धायाश्च स्फुटमेव सात्त्विकाङ्गतावलोकनात्।

अथापरः पक्षस्तु नृत्तेऽपि समानम्(नः?)। तथाहि—नृत्तकाव्ये डोम्बिकादौ वर्णच्युतादिव वर्णादिप्रयोगे तावदभिनयकथैव नास्तीति किं तत्र विचार्यते। केवलं नृत्तस्वभावमात्रमपि हि तत्केवलंभावितकाव्यार्थगतार्थतत्त्वसौकुमार्यकृतमङ्गस्य तथात्वमिति निर्णेष्यत इत्यास्तां तावदेतत्। तदनन्तरं तु धारापरिक्रमपूर्वकलयप्रयोगावसरे "पाआलअलोससाहिणिहुजयजयलञ्छिमच्चमालिआ" इत्यादि यद्गीयते तत्कस्योक्तिरूपम्। यदि तावन्नर्तितुमागताया लौकिक्या डोम्बिकाप्रवृत्तनर्तक्यास्तदा सैवेदानीमेवंभूतं वस्तुरूपं लौकिकं वचनमभिधत्ते गायनादिसङ्क्रमितस्ववाक्यत एकवाक्यतः साक्षात्कारकल्पार्थः; साक्षात्कारकल्पानुव्यवसायगोचरीकार्यत्वं च नाट्यस्य लक्षणमित्यवोचाम। तेन यथा कश्चित्कंचिदन्यापदेशगानादिक्रमेण वस्तूद्बोधनकरणद्वारेण वा [2]छन्दानुप्रवेशितया वा कस्यचिन्मनस्यावर्जनातिशयं विधत्ते नृत्यन्नपि गायन्नपि तद्वदेव डोम्बिकादौ द्रष्टव्यम्। विडम्बिडोम्बीत्यादावपि(?)वचसि सैव डोम्बिका नरपतिपरितोषककथाभिधायिवचननिष्ठेन गीतेन नृत्तेन [3]वान्येन च राजानमनुरञ्जयितुं गृहीतमंत्रित्वेन पूर्वं स्थित्वा मध्ये काचिदीदृशी चौर्यकामुककेलिलालसमानसादि, कापि पुनरेवंविधा, कश्चिदेवम्भूतश्चौर्यकामुकैः कोऽप्येवम्भूतस्तत्र काचिदेवम्भूता मौढदूतीत्येवमादि राजपुत्रहृदयानुप्रवेशयोग्यं तत्प्रसादेन धनार्जनोपायमभिदधती, तमेव राजपुत्त्रं परत्वेन तथैव वा धनमुद्दिश्यान्यदपि चेष्टितमभिधीयन्ते (धायान्ते?) डोम्बिकाकृत्यमेवोपसंहरति। गुणमालायां "जामि हराधांतुं गिअपुण्णं चिसमी" त्यादौ, तत्र सा नृत्यती डोम्बिका च बहुतरोपरञ्जकगीतादिपटचेटकपरिवृता त्वां प्रत्येवमहमुपश्लोकितवतीति तन्मध्यवर्तिगायनमुखसङ्क्रमितनिजवचना लौकिकेनैवरूपेण तद्गीयमानरूपकगतलयतालसाम्येन तावन्नृत्यति; तद्गीयमानपदार्थस्य च सातिशयमावर्जनीये राजादौ हृदयानुप्रवेशितां दर्शयितुं लौकिकव्यवहारगतहस्तभ्रूकर्मरोमाञ्चाक्षिविकारतुल्ययोगक्षेमतयैवाङ्गविकारादिसंभवमप्याक्षिपति।

---

1 तानादि 2 छन्दोऽनु 3 वाद्येन।

एवं गीतेन रञ्जनं प्राधान्येन विधाय तदुपयोगिनं चाङ्गव्यापारं प्रदर्श्य नृत्तेन पुनस्तच्चित्तग्रहणं कुर्वती नृत्तं प्रधानभावं गीतं च तदुपसर्जनभावं नयन्ती तत एव तदभिनयमनाद्रियमाणा तद्गीयमानाङ्गभावाक्षिप्ततत्समुचितभावमेवाङ्गविक्षेपं करोति लयपरिष्वक्तकरणादौ। तत्रेयत्यंशे लौकिकमात्रस्वभाव एव रामनटादिव्यवहारवत् काप्रयोज्यप्रयोजकभावाशङ्का, कस्य वा सामाजिकस्य व्युत्पादनमभिसंहितंतदनन्तरं च यथैव सा गीतनृत्तादि प्रायुङ्क्त तथैव। सदृशं न नर्तकी प्रयुङ्क्ते। न तु डोम्बिका साक्षात्कारकल्पेन दर्शयति तदीयाहार्यादिना स्वात्मरूपप्रच्छादनाद्यभावात्। तत एव न डोम्बिका साक्षात्कारकल्पेन सा दर्शयति, अपि तु तथैव नृत्तं साभिनयं केवलं च प्रदर्शयति। तेन नाट्याङ्गतायां यद्दृष्टं पताकादि तद्दर्शनमात्रतया। अतो नाट्यं संस्कारकं वृत्तस्येत्यङ्गादिव्यपदेश इत्युपचाराादुच्यते।नाट्यस्य प्रस्तावनाप्राणप्रतिबिम्बकल्पं नृत्य(त्त?)मित्ययमपि व्यवहारस्ततस्त्य एव।नाट्यस्यात्र नामाप्यस्ति पदमूर्ध्वादौ चातुरश्रचभङ्गाभावे तद्भावाद्ययोगात्,नाट्यरूपत्वे हि साक्षात्कारकल्पानुव्यवसायसम्पत्त्युपयोगिनः पात्रं प्रति भाषानियमस्य छन्दोऽलङ्कारादिनियमोऽवश(श्य?)रूपाद्योगयोगिन आहार्यविषयस्य जात्यंशकादेति; परिक्रमादेश्च स नास्यैवोपयोगो भवेत्; न चैवमस्ति। मूलभूतस्य च पाठ्यस्य सम्भावनानुपक्रमाकाशभाषितमपि स्यात् पादताडितकादि भासा(णा?)रूपक इव। इह तु मूलत एव न केन चित्किञ्चिदुच्यते। "अहो गाणे"त्यादि गायनं यच्चोक्तं "प्रमदा सैवानुकार्यात्रे"ति तदप्यनेन प्रतिसमाहितं नर्तक्याः स्वरूपानाच्छादनात्। कलहान्तरितेयं खण्डितेयं नृत्यतीति व्यवहार औपचारिकः, तदर्थगीयमानरूपकगतगीतवाद्यानुसारित्वात्तन्नृत्यस्य; न तु मुख्यः, लम्बालकत्ववेणीधारणमङ्गलवलयापरिग्रहादितदुचितवेषादिपरिग्रहवैकल्यात्। यच्च नाट्यायितत्वमाशङ्कितं, तदस्थाने भ्रान्तम्। सहृदयैर्नाट्यायित इति हि तावन्तं गीयमानमभिनीयते असङ्गत्यापत्तेः। अपि तु यादृशा लयतालादिना यादृगर्थसूचनयोग्याभिनयः सात्त्विकादिप्रधानः सानुसारितया प्रयोगयोग्यस्तदुचितार्थपरिपूरणध्रुवागीतेन क्रियते। सूच्यो ह्यमी पल्लवप्रकारा अङ्कुरादयो निवृत्त्यङ्कुरान्ता ये विघ्नायितवच्च नाट्यायितम्, एतच्च स्वक्षेत्र एव वितनिष्यामः। एवं नाट्यायितशङ्काप्यत्र न काचित्, मूलभूतस्याभिनयस्यैवाभावात्। तद्भावे यथा— "मुंचइ वळवि अंअअ इरोअगुहंसणाळिण अग्गि चिङ्ज" इत्यादौ मूर्च्छादि-

[1] गुणमालायां डोम्बिकायाम् [2] नचैवमुक्तमस्तीत्यसत्।

साक्षात्कारः शय्यायाश्चाङ्गनिपतनादि वाहुस्तथा नृत्तकाव्येऽपि स्यात् "होर्श दणषक हमहुमाइपक" इत्यादौ। नचैवमस्तीत्युक्तमसकृत्। एतेन प्रयोजनभेदोऽपि गत्यासः। नहि सामाजिकाः पोयिकां पीयतां(?) व्युत्पद्यन्तां वेत्यभिसन्धिना (नृ) त्तप्रयोगः। तत्संपत्तिस्तु नान्तरीयकत्वाद्भवतु ज्योतिष्टोमादिप्रयोगसङ्गीतापनोदादिवदृष्टं; विशेषोद्देशेनैव हि तस्य प्रयोगः, डोम्बिकादेर्दृष्टोद्देशेन राजपुत्रादिप्रीतये। यद्यपि प्रवृत्तिर्लौकिकी तु सा अद्यत्वे तु न द्वयं, नर्तकयाः प्रवृत्तिः प्रवर्तना वा देवतापरितोषणफलैव। यथोक्तं तत्र—

"यत्किञ्चिल्लास्यमेतेन देवस्तु(ष्टी तु?)ष्यति नित्यशः।
यत्किञ्चित्ताण्डवं तेन सोमः सानुचरः शिवः" इति।

मूले च सूदादेरिव वस्तुभूतरूपरसादिमध्यपातिविषयाविशेषयोजनया कृता प्रीतिः साध्या डोम्बिकावर्णनगतस्यैवालौकिकरूपान्तरप्रादुर्भावान्तरयेति व्युत्पत्त्यभिसन्धानं चानुभवतीति केयं सम्भावना गेयेऽपि नाट्ये तु तदेव प्रधानं भरतमुनिप्रभृतीनां तथैव मूलतः प्रवृत्तेः। अन्यत्वे तु जीविकापर्यवसितत्वमिति पुरुषमिति पुरुषदौरात्म्यमेतद्धर्मादिचतुष्टयोपदेशि पुराकल्पोपदेशनमिव पुस्तकवाचकानां मूलेन प्रवर्तनात्तत्र व्युत्पत्त्यभिसन्धेरेवेति फलभेदः। अन्योऽपि लक्षणभेदो नाट्यरूपताशङ्कापराकरणहेतुग्रन्थव्याख्यानावसरे वक्ष्यते। तन्नाट्यलक्षणप्रयोजनाभेदादित्यसिद्धो हेतुः, तदाह नृत्तं कर्तृ कंचिदर्थमर्थ्यमाणं साक्षात्कारं प्राप्यमाणं नाट्यवेदमपेक्षते येन लक्षणभेदः स्यात्। तथा न कश्चिदर्थः सामाजिकान्प्रति व्युत्पादनीयधर्माद्युपायान्यतमं व्यपेक्षते, येन प्रयोजनाभेदोऽपि स्यादित्यतो हेतोरेतन्नृत्तं प्रवर्तितं नृत्तवाचोयुक्त्यैव व्यवहृतम्।

ननु नाट्यमिति किञ्चिदपि शुद्धं नाट्याङ्गं पूर्वरङ्गादिकं वेति पाठो वा यदा प्राप्त्यर्थमित्यादिप्रतिसमाहितम्। ननु भवत्वेवंभूतं नृत्तं, नाट्ये तु कथमस्योपयोग इत्युक्तं गीतकस्यापि कथमुपयोगः, उक्तं—"यानि वाक्यैस्तु न ब्रूया"दिति "यत्तु काव्येन नोक्तं स्या"दिति ध्रुवायास्तु सम्पाठमात्रमेवास्तु। अलं वर्णालङ्कारयोजनात्मकगानक्रियादिप्रसारायासेन।

ननु रामरावणादिगताग्राम्यत्याज्यरूपचरितार्थडम्बरस्य हृदयानुप्रवेशद्वारभूतं हृद्यं तत्सूचीकल्पं स्वयं हृद्या(हृदया?)नुप्रवेशित्वादित्युक्तं प्राक्। स एव तर्हि नृत्तस्य वलनावर्तनादेरन्तरङ्गोऽस्य नाट्य उपयोगः। विशेषतो हि तद्विना

प्रायेण सर्वलोकस्य नृत्तमिष्टं स्वभावतः ॥ २७१
मङ्गल्यमिति कृत्वा च नृत्तमेतत्प्रकीर्तितम् ।
विवाहप्रसवावाह [1]प्रमोदाभ्युदयादिषु ॥ २७२
विनोदकारणं [2]चेति नृत्तमेतत्प्रवर्तितम् ।
अतश्चैव [3]प्रतिक्षेपाद्भूतसङ्घैः प्रवार्तिताः ॥ २७३

लातचक्रप्रतिमत्वे तैर्बुद्धिग्राह्यमेव नाट्यं न स्यात् । तत एव विमलाभिनयमाणिक्यगुम्फविधायिसूत्रस्थानीयं वलनादिरूपनृत्तसजातीयत्वान्निकटत्वादान्तरङ्गगीतादिव्यापि नाट्यम् ।

तदेतदाह किन्तु शोभां प्रजनयेदिति । नृत्तं प्रवर्तितं प्रकृष्टमत्रुटितं वर्णनाविलासवलनादिदक्षिणं यद्वर्णितं काया(ग्या?)वयवानां काय(ग्य?)स्य च विलासचेष्टावस्थापनात्मकं वर्तितं तदात्मकं यन्नृत्तं तच्छोभां रञ्जनायोग्यत्वं शोभ(भा?)नान्तरीयकचमत्कारं प्रकर्षेण गानादिना वैलक्षण्येन जनयेदिति नृत्तं प्रवर्तितमित्यन्तेनाभिसम्बन्धः । हेतौ लिङ् ।

ननु रञ्जकत्वं भोजनादीनामप्यस्ति, तत्तदनुप्रवेशनियमोऽस्त्वित्याशङ्कां मध्येऽपाकरोति प्रायेणेति । विवाहप्रसवावाहादिषु सर्वस्य लोकस्य स्वभावतः स्वभावेष्वात्माभिमते स्वदेहेनात्मना नर्तनमिष्टं वल्लभम् सर्वोऽपि जनो विवाहादौ नृत्यतियोऽपि वादयन्नृत्यति तेनापि दर्दुरुढेनापि(रेणापि?)। मङ्गल्यमिति विवाहो वध्वा आनयनम् । तत्पूर्वकः सर्व उत्सवः । पुत्त्रजन्म प्रसवः । ततो [1]जामातुः सवधूकस्य सर्वत्र श्वशुरभवनगमनमावाहः प्रमोदा राज्ञामर्थकरणादयः। अभ्युदयो मनोरथप्राप्तिरभिलषितस्योदय इति आदिग्रहणेनानाकाङ्क्षितशुभप्राप्त्यादि। एतेन नि(वि?)निमिति श्लोकत्रयस्य सम्बन्धः । एतच्च "कैशिकीमप्यत्र योजय" (१-४२)इत्यत्र दर्शितम् ।

कं स्वभावमपेक्षत इति प्रतिसमाधातुमाह — अतश्चैवेति । अतश्च क(का?)रणान्नृत्तं प्रवर्तितम् । प्रारम्भे पूर्वरङ्गे लक्षणवर्तितं योजितमिति संबन्धः

1 न - प्रमोहा 2 ड - चैव 3 ड - प्रतिक्षेपा भूतसङ्घैः ड - प्रतिक्षेपा पूजासङ्घैः 4 ड - प्रकीर्तिताः ।

1 सवधूकस्य ।

ये गीतकादौ युज्यन्ते सम्यङ्नृत्तविभागकाः[1] ।
देवेन चापि [2]सम्प्रोक्तस्तण्डुस्ताण्डवपूर्वकम् ॥ २७४

एवकारो हेतौ । यस्मात्प्रतिक्षेपाज्झण्डुमाद्याः शुष्काक्षराः देवैः प्रतिक्षिप्तत्वान्नूतसङ्घैश्च दैत्यादिभिः प्रवर्तिताः ।

"निर्गीतं तु सवादित्रमिदं गृह्णीमहे वयम्" (५-३५)

इति वक्ष्यते । अत एवंभूता गीतानां मद्रकादिनामादौ सम्यङ्नृत्तस्याभिनेय पदार्थाभावेनाभिनयशून्यतया नाशङ्किता नाट्याङ्गस्य शुद्धस्य विभागका विभागप्रापका आदौ प्रयुज्यन्ते।एतदुक्तं भवति -गीतकानां यान्युपोहनानि तत्र तावन्नृत्तं शुद्धमेवं कर्तव्यम् ; यद्वक्ष्यति —

"तत्रावतरणं कार्यं नर्तक्याः सर्वभाण्डकम् ।
क्षेपप्रतिक्षेपकृत"मिति (४-३०२)

तद्गतश्च गीतकाङ्गमध्ये तु प्रवेशाभावोऽसिद्धः; विचारीणांयस्य चावापनिष्क्रामादेरगीतकाङ्गत्वमस्यैः यद्यपि "महागीतेषु चैवार्था"नित्युक्तं * वक्ष्यते च "ततोऽभिनयमाचरेत्" $ । प्रथमत्वेऽवतरणेऽस्यापि तथापि तत्र न मुख्यो नाट्यप्रसिद्धोऽभिनयार्थ इत्युक्तम् ।

किञ्चाभिनेयत्वेन (न स्यात्) नाट्याङ्गत्वदशायामवलोकनात् । तथा वाचोयुक्तिलौकिककथास्विवाङ्व्यवहारादावभिमुखीभावमात्रनयनश्चापि स्वार्थो यथावाच्यमभिनीतं नहि तत्र साक्षात्कारकल्पतापादनमभिनयार्थः । किन्तु तल्लयाद्याहारित्वमात्रम्, एवमत्रापि तदर्थानुसारित्वमात्रं परप्रतिपत्तिमात्रस्यात् ... दस्थेनैवाङ्गभूतत्वेप्यनुगर्यिते कालात्पृथग्भूत एवादौ प्रयुज्यमानो लोकप्रसिद्धप्रथमगीयमानाक्षिप्तिडोम्बिकाप्रायः प्रचुरस्तुतिपदयुक्तो गीतिविशेषः प्रतिक्षेप इत्याह । इदं भरतमुनिना न क्वचिल्लक्षितम् । अन्ये तु गीतान्ते [1]प्रयोज्याश्छन्दकादय एव नृत्तवैचित्र्याश्रया यथारुचि प्रतिक्षिप्यमाणाङ्गकाः प्रतिक्षेपाः । आदिशब्द व्यवस्थायामासारितादिसङ्घहास्तथार्थे, प्रयुक्ते, सतीति चाध्याहार इ[ति] । मुनिमतं चाद्य तयोरनुग्राहकम् ।

एवं नाट्याङ्गता नृत्तस्य गीतादिवदुपयोगश्च समर्थितः। अधुना नृत्तप्रधानरागकाव्यादि विषय काव्यश्च (व्यं च?)' नाट्याङ्गमिति दर्शयन्पुराकल्पच्छायया प्रकारान्तरमपि नृत्तस्य समर्थयितुमाह देवेनेत्यादि । चकार एवकारार्थे ।

1 ड - विभावकाः 2 ड - सम्प्रोक्तस्ताण्डवः ।

1 प्रयोज्याश्छन्दाद्याः । * (४-१५) $ (४-२७६)

गीतप्रयोगमाश्रित्य [1]नृत्तमेतत्प्रवर्त्यताम्[2] ।
प्रायेण ताण्डवविधिर्देवस्तुत्याश्रयो भवेत् ॥ २७५
सुकुमारप्रयोगश्च शृङ्गाररससम्भवः ।

देवेनैव महेश्वरेणैव तण्डुः सन्तोषपूर्वकं प्रकर्षेणादरेणोक्तः । किमित्याह गीयत इति गीतं काव्यं, तस्य यः प्रकर्षेण योगस्तदर्थानुप्रवेशलक्षणमाश्रित्य न छायाम्, आसमन्ताच्छ्रित्वा अङ्गविक्षेपिताङ्गत्वं सामरस्यलयसत्वादिना नृत्यैतच्छब्दस्वभावमपि यदभूत्ताण्डवप्रभृतिनृत्तगीयमानरूपकगतवर्णालङ्कारलयपदार्थवाक्यार्थसम्मिलितं यत्तत्प्रवर्त्यताम् । तदुक्तं कोहलेन

"सन्ध्यायां नृत्यतः शम्भोर्भक्त्याद्रौ नारदः पुरा ।
गीतवांस्त्रिपुरोन्माथं तच्चित्तस्त्वथ गीतके ।
चकाराभिनयं प्रीतस्ततस्तण्डुंच सोऽब्रवीत् ।
नाट्योक्त्याभिनयेनेदं वत्स योजय ताण्डवम्" । इति

अथशब्दान्नकेवलमिदं शुद्धमेव, नापि गानक्रियया भाण्डवाद्यमात्रसम्बन्धमेव यावद्गीत्याधारपादानुसार्यपि तदर्थानुसारणाच्च तदनुसारणमिति ।

ननु किं तत्ताण्डवप्रवृत्तिनिमित्तमित्याशंक्याह प्रायेणेति । ताण्डवविधिरिति सर्वं नृत्तमुच्यते लास्यशब्देन सन्निधौ गौबलीवर्दन्यायेन प्रवर्तते तत्र विधीयतेऽस्मिन्नृत्तमितिविधिःविधीयमानं काव्यं सदेवस्तुतिं वर्णनीयत्वेन चाश्रयति। तेन धर्मवीरप्रधानं तत्र काव्यमित्युद्धतरूपतासूचनेनान्यरसपरिग्रहः । प्रयुज्यत इति प्रयोगः । काव्यं सुकुमारो मसृणोऽनुसृतो यस्य तं दर्शयति, शृङ्गाररसस्य सम्भवो विद्यमानत्वमस्मिन्, शृङ्गाररसाच्च परिपूर्णात्सम्भवो यस्य, कामावस्था मनसोऽस्मिन्नस्तीति शृङ्गारेण पूर्णापूर्णरूपेण मसृणप्रयोगोपलक्षणम् । यद्यपि च नाट्यान्नान्यत्र रस इति वक्ष्यते तथापि काव्यान्नाट्यं निष्पद्यत एवेति । अस्ति रसानुप्रवेशोऽनेन च रसाङ्गान्नृत्तस्य नाट्यं, प्रायेणेति वचनान्नरपतिचाटुकाद्यपि सङ्गृहीतम् । चकारान्मसृणमप्युद्धतमिश्रमुद्धतं च मसृणमिश्रमित्यादिकमपि सङ्गृहीतं भविष्यतीति सर्वं लक्ष्यमनेन सूचितम् । तथाहि—डोम्बि-

---

1 ड - नृत्य । 2 - प्रकीर्त्यताम्

---

1 ताण्पवमिति ।

कासु नरपतिचाटुकप्राधान्येन प्रवृत्तासु सुकुमारमेव शुद्धं रूपम् । भाणकेषु नृसिंहादिचरितवर्णनमुद्धतमेव । यत्पुनर्मसृणेऽप्युद्धतं प्रविशति [1]तदुचितमेव । ततोऽप्यल्पत्वबहुत्वकृतो भेदः पूर्वः प्रस्थान प्रबन्ध उत्तरः[2] षिद्गकभेदः । उद्धते तु मसृणानुप्रवेशाद्भाणिकाभेदः । अन्यदपि प्रेरणरामाक्रीडकरासकहल्लीसकादिक-मल्पत्वबहुत्ववैचित्र्यकृतमिहैव प्रविष्टं वेदितव्यम् । तदुक्तं चिरन्तनैः—

"छद्मानुरागगर्भाभिरुक्तिभिर्यत्र भूपतेः ।
आवर्ज्यते मनः सा तु मसृणा डोम्बिका मता ॥
नृसिंहसूकरादीनां वर्णनां जल्पयेद्यतः ।
नर्तकी तेन भाणः स्यादुद्धताङ्गप्रवर्तितः ॥
गजादीनां गतिं तुल्यां कृत्वा प्रवसनं तथा ।
अल्पाविद्धं सुमसृणं तत्प्रस्थानं प्रचक्षते ॥
सख्याः समक्षं भर्तुर्यदुद्धतं वृत्तमुच्यते ।
मसृणं च क्वचिद्धूर्तचरितं षिद्गकस्तु सः ॥
बालक्रीडानियुद्धादि तथा सूकरसिंहजा ।
ध्वजादिना कृता क्रीडा यत्र सा भाणिका मता ॥
हास्यप्रायं प्रेरणं तु स्यात्प्रहेलिकयान्वितम् ।
ऋतुवर्णनसंयुक्तं रामाक्रीडं तु भाष्यते ॥
मण्डलेन तु यन्नृत्तं हल्लीसकमिति स्मृतम् ।
एकस्तत्र तु नेता स्याद्गोपस्त्रीणां यथा हरिः ॥
अनेकनर्तकीयोज्यं चित्रतालयान्वितम् ।
आचतुष्षष्टियुगलाद्रासकं मसृणोद्धतम् " ॥

इत्यादि । एते प्रबन्धा नृत्तात्मकाः, न नाट्यात्मकनाटकादिविलक्षणाः । राघव-विजयमारीचवधादिकं रागकाव्यम् । एतच्च ग्रन्थविस्तारभीत्या बहुतरं यथा-सम्भवं न लिखितमनुपयोगाच्च । यत्तूपयोगि तद्यथावसरं वर्णयिष्यामः । एष तावत्पदगते छोद्यकप्रकारस्तत्र तु परस्परमसङ्गतिदोषोऽयं कैश्चिदुद्भाव्यते । स पूर्वादिनैव प्रतिसमाहितः । एष एव तु प्रकारः(क)लाविधिना निषध्य(वध्य?)-मानो राघवविजयमारीचवधादिकं रागकाव्यभेदमुद्भावयतीति । यथोक्तं कोह-लेन—

1 तत्तदुचित 2 प्रबद्ध 3 शिङ्गटक 4 हे-आचर्यंत ।

तस्य [1]तण्डुप्रयुक्तस्य ताण्डवस्य [2]विधिक्रियाम् ॥२७६
वर्धमानकमासाद्य संप्रवक्ष्यामि लक्षणम् ।

" लयान्तरप्रयोगेण रागैश्चापि विवेचितम् ।
नानारसं सुनिर्वाह्यकथं काव्यमितिस्मृतम् ॥

लयतश्चास्य गीत्याधारत्वेनाप्राधान्ये गीतेरेव प्राधान्यमिति न काव्यार्थविपर्यासवशेन रागभाषादिविपर्यासो नाट्य इव । तथा हि राघवविजयस्य हि ठक्करागेणैव विचित्रवर्णनीयत्वेऽपि निर्वाहः, मारीचवधस्य ककुभग्रामरागेणैव, अतएव रागकाव्यानीत्युच्यन्ते एतानि रागो गीत्यात्मकत्वात्स्वरस्य तदाधारभूतं काव्यमिति । एवमिदं नृत्तं सप्तकृतिप्रकारैर्भगवत एव प्रसृतम् । तथाहि—शुद्धमेव नृत्तं रेचकाङ्गहारात्मकं ततो गीतकाद्यभिनयोन्मुखं ततोऽपि गानक्रियामात्रानुसारि वाद्यतालानुसारि [1]च बाहुप्रेङ्खणोरःकम्पपार्श्वनमनोन्नमनचरणसरणस्फुरितकम्पितभ्रू तारापरिस्पन्दकटिच्छेदाङ्गवलनमात्ररूपं । यत्रोक्तं—

" तण्डुनापि ततः सम्यग्गानभाण्डसमन्वितः ।
नृत्तप्रयोग " इत्यादि

गीतिर्गानमिति ह्यत्र व्युत्पत्तिरुक्ता । ततोऽप्युद्धतसुकुमारमिश्रात्मकभेदचतुष्टयभिन्नकाव्यार्थानुसारितया चतुर्विधम् । तत्र प्रथमो भेदो लौकिके स्वतन्त्रनृत्ते देवतातोषणादौ वा । द्वितीयः पूर्वरङ्गविधौ परिशिष्टनृत्तलक्ष्यतया वास्य ताण्डवादि विश्वं व्याप्तमितीह पूर्वमुक्तम् ।

" प्रयोगमङ्गहाराणामाचक्ष्व भरताय वै "

इति भगवता तत्र तण्डुनाङ्गहाराः सप्रयोगाः प्रोक्ताः । तत्रैवंभूतास्तावदङ्गहारा मह्यं प्रोक्ता इति रेचकैः पिण्डीबन्धैश्च सहितं मुनिना निरूपिताः;करणान्यपि । तदुपयोगित्वेनाशङ्कितचोद्यनिराकरणप्रसक्तानुप्रसक्तं नृत्तस्वरूपं दर्शितम् । अधुना तु प्रयोगः कीदृशोऽङ्गहाराणां प्रोक्त इति प्रकृतमेवानुसन्धातुमाह तस्य तण्डुप्रयुक्तस्येति । तत्र पूर्वरङ्गोचितत्वायाङ्गहारप्रयोग इत्युक्तम् । तत्र च

---

1 ड - ताण्डवप्रयुक्तस्य 2 प - विधिक्रिया ।

---

1 चञ्चलप्रेङ्खणोरः ।

कलानां वृद्धिमासाद्य [1]ह्यक्षराणां च वर्धनात् ॥ २७७
[2]वर्धनान्नर्तकीनां च वर्धमानकमुच्यते ।

"ताण्डवं यत्र युज्यत" (५-१३) इति वर्धमानकताल एव ताण्डवयोगयोग्य इत्यादि । पूर्वं वर्धमानं गृह्णाति । तदनन्तरं तु गीतकादिविषयो विधिर्वक्ष्यते तस्येति व्यवहितानुसन्धानार्थः परामर्शः । तण्डुम-युक्तग्रहणं समनन्तरोक्तनृत्तकाव्यादिविषयताण्डवशङ्कां निरस्यति । विधी-यतेऽनेनेति विधिर्गीतं— तं दृष्ट्वा येयं क्रिया प्रयोगः सैव लक्षण-मन्यतोऽप्य(व्य?)वच्छेदकत्वात्तत्र क्रियात्मकं लक्षणं वक्ष्यामीति सम्ब-न्धः । ननु सा क्रियोक्ता करणाङ्गहारविषया, सत्यम् ; गीततालसंमिश्रा तु नोक्ता, इह तु वर्धमानाख्यं तालमासाद्य साम्यापादनायोपायतां नीत्वा तत्प्रमितिगीत्याधारत्वाच्च, वर्धमानशब्दवाच्यं "देवं देवैः संस्तुतमीशं" (३१-१०४) इत्यादिवाक्यसमूहमासाद्याभिनेयतयाश्रित्य, तदाक्षिप्तश्च गीतविशेषमासाद्याङ्गस्य वलनावर्तनादिगतभ्रूताराादिनियमकारित्वेनावलम्ब्य, वक्ष्यामीति सम्बन्धः । वर्धमानकगीततालाभिनयसम्बन्धतयोदितं ताण्डवं-वक्ष्यतीति यावत् । तत्र वर्धमानस्य भविष्यल्लक्षणानुवादेन (अ-३१) ताण्डव-योगाभिधानायाद्य रूपमाह कलानामित्यादि । सप्तदशकलः कनिष्ठासारितकः । स एव द्विगुणलयो लयान्तरः, लयस्त्रिशत्कलो मध्यमः, पञ्चषष्टिकलो ज्येष्ठः । तेन कलानां लयद्वारेण सङ्ख्याद्वारेण च वृद्धिः । तद्वध्यैव च हीयमानपद-वृत्ति(द्धि?)राक्षिप्ता, यद्वक्ष्यते—"चत्वारस्तु गणा युग्मे ओज" इत्यादि (३१-१०२) । इह त्वक्षराणि, तेषां वृद्धिः कलानुसारेणैव ; नर्तकीनां च वृद्धिः, एका हि प्रथमासारिते नृत्तप्रयोक्त्री, द्वितीये द्वे इत्यादिक्रमेण । अतो वृद्धियोगाद्वर्धमानकम् [ततः] संज्ञायां कन् । कण्डिकानां च दशपरिवर्त-क्रमो भविष्यति । प्रयोगे तथा यथाक्षरं विनिवृत्तमित्यपि यो भेदो भविष्यति, तेनापि क्रमेण कलादीनां वृद्धिः । अतोऽत्राङ्गहारप्रयोगस्य परिपूर्णस्य च पिण्डीबन्धविधेः सम्यङ्निष्पत्तिर्भवतीति तात्पर्यम् ।

---

1 ड - त्वक्षराणां 2 ड - लयस्य वर्धनाच्चापि ।

कृत्वा कुतपविन्यासं यथावद्‌द्विजसत्तमाः[1] ॥ २७८

[2]आसारितप्रयोगस्तु ततः कार्यः प्रयोक्तृभिः ।

एवं लक्षणानुवादेन ताण्डवोपयोगमभिधाय विधिदृष्टां क्रियां प्रतिज्ञानपूर्वमाह कृत्वेत्यादि । पूर्वरङ्गविधौ वक्ष्यते—

"कलापात(द?)विभागार्थं भवेदासारितक्रिया ।
कीर्तनाद्देवतानां च ज्ञेयो गीतविधिस्तथे"ति (५-२१) ।

तत्र प्रथमार्धेन शुष्काक्षरैरासारितप्रयोगमाह । तथा च वक्ष्यति—

"एतानि तु बहिर्गीते त्वन्तर्यवनिकागतै"रिति(५-११) ।

बहिर्गीतशब्देन द्वितीयार्धेन स्तोभकपदयुक्तमासारितप्रयोगमाह । तत्रैव चोच्यते

"ततः सर्वैस्तु कुतपैः संयुक्तानीह कारयेत् ।
विघाट्य वै यवनिकां नृत्तपाठ्यकृतानि तु" (५-१२) ।

गीतानां मद्रकादीनामित्यादि तस्मिन्नवसरेऽयं नृत्तप्रयोग इति । तमेवावसरं दर्शयति कृत्वेत्यर्धेन। कुतं शब्दं पातीति चतुर्विधमातोद्यं कुतपम् । तत्प्रयोक्तृजातश्च तस्य विशेषेणाव्यवस्थापकानांतत्र विशेषेण न्यासो यथायोगं स्वरताललयकलादानिवेशनम् । स एव प्रत्याहारादिरासारितक्रियान्तः परिपूर्णो विन्यासः । आसारितक्रिययाभिघातातोद्ये तत्प्रयोक्तरि च प्रयोक्ष्यमाणासारितगतकला[1]पादप्रस्ताव एवं क्रियत इत्युक्तम् । स च परिपूर्णो विन्यासो यथावच्छब्देन दर्शितः । अनुपूर्वश इति पाठे प्रत्याहारावतरणाद्यङ्गजातं सूचयति । तेन (ए)तदुक्तं भवति--अन्तर्यवनिकागते शुष्काक्षरप्रयोगः प्राणा भविष्यदातोद्यप्रयोगप्रस्तावनात्मके दृष्टफले दैत्यादिसपरितोषणया तद्विघ्नशमनशास्त्रीयफले च प्रयुक्तेऽङ्गकलापेऽयं प्रयोगविधिः । आसारितप्रयोग इति स्तोभकपदतो य इत्यर्थः । प्रयोक्तृभिरित्यातोद्यान्तरसाहित्यं बहुवचनेनाह ।

प्रयोगक्रमं दर्शयति तत्र त्वित्यादिना । उपोहनं शुष्काक्षरं कनिष्ठासारिते पञ्चकलम् । उपोह्यन्ते समासव्यासतः पदकलातालसमभिहिताः स्वरा यस्मिन्नङ्गे तत्तथोक्तम् । गानं सुषिरातोद्यम्, गीयते यतः स्थानस्वरादिति

---

1 प - दनुपूर्वशः । 2 ड - आसारितः

---

1 पातप्रस्तावः ।

[1]तत्र तूपोहनं कृत्वा [2]तन्त्रीगानसमन्वितम् ॥ २७९
कार्यः प्रवेशो [3]नर्तक्या [4]भाण्डवाद्यसमन्वितः ।
विशुद्धकरणायां तु [5]जात्यां वाद्यं प्रयोजयेत् ॥ २८०
गत्या [6]वाद्यानुसारिण्या तस्याश्चारीं प्रयोजयेत् ।
वैशाखस्थानकेनेह [7]सर्वरेचकचारिणी ॥ २८१
पुष्पाञ्जलिधरा [8]भूत्वा प्रविशेद्रङ्गमण्डपम् ।
पुष्पाञ्जलिं [9]विसृज्याथ रङ्गपीठं [10]परीत्य च ॥ २८२
प्रणम्य [11]देवताभ्यश्च ततोऽभिनयमाचरेत् ।

गानम्, तेन घनावनद्धातोद्यद्वयस्यात्र निरासः । उपोहनसमाप्तौ नर्तक्याः प्रवेशस्तत्र भाण्डवाद्यं पुष्करवाद्यं तच्च विशुद्धकरणजातौ, सा च मध्यस्त्रीणां लक्ष्यते । तत एवात्रानुकारसाक्षात्कारशङ्कानिराकरणम् । तथा हि सति परमेश्वरस्य रामादिवत्प्रयोज्यत्वे प्रथमप्रकृत्यादविचितजातिप्रसङ्गस्तत्र—

"एकाक्षरं विशुद्धायां वाद्यं स्यात्सर्वमार्गिकम्"

"द्धं द्धं खो खो णा णादि या विहितवाक्या ।
सा शुद्धा विज्ञेया मध्यस्त्रीणां सभा जातिः" (३४-१३७)

इति । आद्यत्वे अयमेव वर्णस्तत्तत् "रुन्दाहि रुन्दाहि" इत्यादि । तथाविधवाद्यानुसारिण्या (गायति) तदुपलक्षणा चारीति संबन्धः । करणाङ्गहारान्प्रयुञ्जीतेति भाण्डवाद्यस्यानुप्रयोज्यता प्राधान्येनोक्ता । यथोक्तं भवति भट्टतोतेन "पर्यायशस्त्र्यश्रस्य प्रयोग"इति । तदनन्तरं प्रयोगमाह वैशाखस्थानकेनेत्यादि । वैशाखरेचितकरणमनेन लक्षयति—

"रेचितं हस्तपादं च कटिग्रीवं च रेचित"मिति (४-९८)

पुष्पाञ्जलिधरेति तलपुष्पपुटकरणमनेन लक्ष्यते विसृज्येति । पुष्पाक्षेपमङ्ग प्र(क्र?)मेण प्रदर्शयेत्यर्थः। अन्ये तु सद्य एव पुष्पाञ्जलिं तन्मोक्षं चाहुः—रङ्गपीठे

---

1 प - ततस्तूपोहनं 2 ड - तन्त्रीभाण्ड 3 क - नर्तव्य 4 ड - भाण्डवाद्य 5 ड - जात्यं 6 ड वाद्यानुसर्पिण्यास्ततश्चारीं 7 च - सर्वे रेचक 8 ड - धरो भूत्वा 9 न - प्रसज्याथ 10 न - परिक्रमेत् 11 ड - देवताभ्यस्तु ।

यत्राभिनेयं [1]गीतं स्यात्तत्र वाद्यं[2] न योजयेत्॥ २८३
अङ्गहारप्रयोगे तु [3]भाण्डवाद्यं [4]विधीयते।
समं रक्तं विभक्तं च [5]स्फुटं शुद्धप्रहारजम्॥ २८४
नृत्ताङ्[6]ग्राहि वाद्यज्ञैर्वाद्यं[7] योज्यं तु ताण्डवे।

यः परिगमः समन्ततः परिष्वङ्ककरणं मध्य एव देवतानां पूर्वपूजितानां प्रणामाभिनय इत्येककालत्वं. चशब्देनोक्तत्वाद्द्वयं चाचरेदिति । एतदुपेक्ष्यं, पौर्वकाल्यमाश्रित्य ततोऽभिनयमिति भक्त्यतिशयेन तदर्थभावनया विशिष्टविषयतां प्रदर्शयितुमासारितवाक्यस्य पदार्थवाक्यार्थविषयोऽभिनयः स्वात्मन्याभिमुख्यनयनात्, न तु सामाजिकान्प्रति। यत्रेति निपातो यतो हेतोरित्यर्थे तेन यतो गीतमिति गीयमानं वाक्यमभिनेयं; स्वात्माभिमुख्यं नयन्तं च गानं वर्णालङ्कारलक्षणमाभिमुख्यमङ्गसाम्यं नेयम्, ततो हेतोस्तस्यैव प्राधान्यात्तस्मिन्काले ऽवनद्धवाद्यं तदाच्छादनकरी भवतीति स्वातन्त्र्येण न योजयेदतिशयेन नयनं स्यात् यत्रेति च वीप्सयेति परिभाषां सार्वत्रिकीमाह।

अनुवादमुखेन परिशिष्टं प्रयोगमाह अङ्गहारप्रयोगे त्विति । तुशब्द एवकारार्थे। अङ्गहारस्य शुद्धस्यैवाभिनयशून्यस्य प्रयोगे नृत्तप्राधान्ये तदनुसारि वाद्यम्। विशेषेणान्तरयोगानन्तरयोगापेक्षया स विधेयो विधीयते धार्यते। अत एव चानुपादानात्—

"तदेव हि पुनर्वस्तु भूयो नृत्तेन योजयेत्"

इति वक्ष्यमाणस्य नर्तक्या समाकर्षणे पुनरासारितगाने शुद्धनृत्तमिति वाद्यस्य गीयमानसहितस्य गानस्य नृत्तस्य च क्रमेण प्राधान्येन प्रयोगो दर्शितः।

भाण्डवाद्यं विधीयत इत्युक्तम् । तदीदृशमिति दर्शयति सममिति। अक्षराङ्गताललययतिपाणिग्रहन्यासाविकृतमष्टविधं कालदेशसमतात्मकं साम्यं पुष्कराध्याये च वक्ष्यते। तत्र षोढा ता(का?)लकृतं द्विधा स्वरोच्चारणस्थानदेशकृतं तद्योगात् समरक्तभावः शब्दस्य हृद्यतास्वरूपता सा च मायूर्यादिमति (त्रि?)विधमार्जनायोगात्तेन [सम्यग्दामार्जनायोगात्] रक्तं विभक्तमनुहा- ‍ानन्तरं च पीडितयोगेन विच्छेदप्रतिभासमानाक्षरं, स्फुटमिति कादिवर्णाना-

1 न - गेयं 2 ड - नियोजयेत् 3 च - ताण्डवाद्यं 4 ड - प्रयोजयेत्
5 न स्फुटं शुद्धं 6 न - ग्राहवाद्यज्ञै 7 ड - योज्यं वाद्यं।

प्रयुज्य [1]गीतवाद्ये तु [2]निष्क्रामेन्नर्तकी ततः॥ २८५
अनेनैव विधानेन प्रविशन्त्यपराः [3]पृथक् ।
[4]अन्याश्चानुक्रमेणाथ पिण्डीं बध्नन्ति [5]याः स्त्रियः ॥

मनुहारो यत्र स्पष्टो भवति। महारजा वर्णिते शुद्धविशुद्धका(क?)रणान्तौ स्थिता, यदि वा आलिखिकादिमार्गादन्यतम एव मार्गे स्थिताः यत्र नृत्तमङ्गहारात्मकं तदङ्गानीव करणानि यदि वा गीताङ्गानि मुखादीनि गृह्णाति सम (तायां) स्वीकुरुते । एतच्च सममिति गतार्थम् । तेनायमर्थः——नृत्तकर्मभूतमङ्गकर्तृभूतं यद्वाद्यं ग्राहयति नृत्तं तन्नृत्यतेति यदङ्गानि प्रयुङ्क्त इव स्वयं वैचित्र्यप्रयोगात्सविलासमिव श्रूयमाणमेव यद्बलादङ्गानि नर्तयतीति तत्तथोक्तम् । तद्यथा कर्तृककतकर्णककुन्दन्तरकरहतत्तततहींकिटिच्छिदशतहीत इति चचत्पुटे [य] एवंविधं यद्वाद्यं पुष्कराध्याये वक्ष्यते तत्ताण्डवे इहावसरे योज्यम् । पुष्कराध्याये त्वीदृश एव श्लोको भविष्यति(३४-१७२) । तत्र विध्यनुवादाविह द्वौ विपर्यसनीयौ ताण्डवमुक्तं प्राक् । तत्रैवंविधं वाक्यं (द्यं?) कार्यमिति ।

एवं प्रथमासारितस्य प्रयोगमुपसंहरत्यर्धेन प्रयुज्येत्यनेन । एषां च प्रयोगे प्रथमपरिभाषां करोति श्लोकत्रयेण अनेनैवेत्यादिना करणान्वितमित्यन्तेन । गानमिति गीयते च गीतं । गीतवाद्ये प्रधानतया स्थिते नर्तकी नृत्तेन प्रयुज्य तथा स्वरागतनृत्तप्राधान्ये तदौचित्याय गीतवाद्यं प्रयुज्य स्वानुसारिणीकृत्य नर्तकी, न तु नाट्य इव साक्षाद्ग्रामादिरूपताप्रच्छन्नात्मिका सा निष्क्रामेदपसरेत् । न तु सर्वथैव निर्गच्छेत्, द्वे द्वितीयमिति (४-२८८) वक्ष्यमाणत्वात् । अपराः किं युगपत्प्रविशन्ति, नेत्याह पृथगेकैका क्रमेण प्रविशेदित्यर्थः ।

ननु कियत्यस्ता अपरा या अनेनैव विधिना प्रविशन्तीत्याशङ्क्याहान्याश्चेति । अनुक्रमेण कनिष्ठादिषु चतुर्ष्वासारितेषु यथासङ्ख्यं वक्ष्यमाणाश्चतुरः पिण्डीबन्धप्रकारान्याबध्नन्ति [1]ताः अपराः । अनेन चतस्र एवेत्युक्तं भवति । पिण्डीमिति जातावेकवचनम् ।

---

1 ड - गीतमेवं तु, न - नृत्तवाद्ये च 2 न - निष्क्रमं नर्तकी ड - निष्क्रामो नर्तकी 3 ड - पुनः 4 च - अन्याश्चानुग्रहेणैव 5 ड - ताः स्त्रियः

---

1 प्रयोगो 2 ता अन्यास्तेन ।

[1]तावत्पर्यस्तकः कार्यो यावत्पिण्डी [2]न बध्यते ।
[3]पिण्डीं बध्वा ततः सर्वा निष्क्रामेयुः [4]स्त्रियस्तु ताः ॥
[5]पिण्डीबन्धेषु वाद्यं तु कर्तव्यमिह वादकैः ।
[6]पर्यस्तकप्रमाणेन [7]चित्रौघकरणान्वितम् ॥ २८८

एवं [1]प्रवेशपृथक्त्वं परिभाष्य परिभाषान्तरमाह तावत्पर्यस्तक इति । यावद्यावदिति भिन्नक्रमो यावत्पर्यस्तकः केवलासारिताभी(भिहि?)तलक्षणः प्रयोगः कार्यः ता(या)वन्न पिण्डी बध्यते तावत्पन्डीवन्धो न कार्यः। तदनन्तरं तु कर्तव्य इत्यर्थः। [2]पूर्वं प्रविष्टया नर्तक्यापरा परियज्यते। महावाक्यानुसारादेकघन एवाहिन्या(भिन्ना?)त्मकोऽङ्गविक्षेपो यत्र प्रयोगे स पर्यस्तको नृत्ताचार्यभाषया पर्यस्तक इति प्रसिद्धः । अभिनयशून्यमा(आ?)ङ्गिकविधिः पर्यस्तकः । स च पिण्डीबन्धे न कार्यः, तदनन्तरं तु कर्तव्य इत्यर्थः। पूर्वप्रविष्टाया नर्तक्याः शिक्षार्थमित्याद्यसङ्गतमेव कैश्चिदुक्तं, तदुपेक्ष्यमेव । यावच्च पिन्डीबन्धोपयोगि नृत्तं न प्रवर्तते तावत्प्रविष्टनर्तकीनिवर्तनेनैकाकिन्यैवासारिताभिनयः प्रयोक्तव्य इति परिभाष्यते ।

परिभाषान्तरमाह पिण्डीं बध्वेति । तस्यासारितस्य नृत्तप्रयोगं कृत्वा सर्वास्ता निष्क्रामेयुरपसरेयुः । अत एवैतत्स्थानोपजीविभिरेव श्रीराणकादिकविभिर्डोम्बिकादौ चतुरपसारकः प्रयोगः ।

परिभाषान्तरमाह पिण्डीबन्धेष्विति । यावदेव पर्यस्तक आसारितप्रयोगाभिनये वाद्ये तावदेव तदन्तरतापि(पाति ?)नि पिण्डीबन्धोपयोगिन्यङ्गहारप्रयोगे किन्तु चित्रं विचित्रं नानाप्रकारं प्रयोजितम् । ओघे च वाद्यविधौ(अ-३४) वक्ष्यमाणानि यानि करणानि क्रिया याभिर्वध्या भगवत्यारूपास्ताभिरन्वितम् । द्विमात्रा यत्र कला स चित्रमार्ग ओघशब्दादेव लब्धः। तत्रैव ह्योघो लक्ष्यते ।

एवं पृथक्प्रवेश एकाकिन्या अभिनयप्रयोगे सम्भूयाङ्गहारप्रयोगं तदनन्तरमपसारस्तावत्कालं नृत्तस्य [3]वाद्यस्य वैचित्र्यमिति परिभाषाषट्कं कृत्वा

---

1 प - तावत्पर्यन्ततः ड - पर्यस्ततः 2 ड - प्रयुज्यते न - प्रबध्यते 3 च - पिण्डीबद्धास्ततः 4 ड - स्त्रियं तु 5 ड - पिण्डीबन्धे तु 6 ड - पर्यस्तत 7 ड - चित्रपि 8 ड - करणान्वितम् ।

---

1 प्रवेशापृथक्त्वं 2 पूर्वप्राविष्टाया नर्तक्याः परापरिवर्ज्यते 3 वैचित्र्यमिति ।

[1]तत्रोपवहनं भूयः कार्यं पूर्ववदेव हि।
ततश्चासारितं भूयो [2]गायनस्तु प्रयोजयेत्॥ २८९
पूर्वेणैव विधानेन प्रविशेच्चापि नर्तकी।
[3]गीतकार्थं त्वभिनयेद् द्वितीयासारितस्य तु ॥ २९०
[4]तदेव च पुनर्वस्तु [5]भूयो नृत्तेन योजयेत्।
[6]आसारिते समाप्ते तु [7]निष्क्रामेन्नर्तकी ततः ॥२९१
[8]पूर्ववत्प्रविशन्त्यन्याः प्रयोगः स्यात्स [9]एव हि।
एवं पदे पदे [10]कार्यो विधिरासारितस्य तु ॥ २९२

द्वितीयस्य लयान्तरस्यासारितप्रयोगमाह तत्रोपवहनमिति। तत्रैवं परिभाषयति तावद्यत्रेति पूर्वं कनिष्ठासारितप्रयुक्तं भूय इति बहुतरं षट्कलमित्यर्थः--भूय इति लयाधिकत्वात्कला तस्या आधिक्यमित्यर्थः। पूर्वेणैवेति। तत्र तूपोहनमित्यादिना अपिशब्दात् "गत्या वाद्यानुसारिण्ये"त्यादि "प्रणम्य देवतां चे"त्यनन्तरमुद्दिष्टम्, तद्विधानेनेत्यर्थः । ततः सा द्वितीया नर्तक्यासारितस्य तालविशेषसंबन्धि यद्गीतकं गीयमानं च वाक्यं तस्यार्थमभिनयेत्। पुनस्तदेव लयान्तरासारित-लक्षणं वस्तु, सा द्वितीया, चकारात्पूर्वप्रविष्टा च, नृत्तेन केवलाङ्ग-हारात्मनाभिनयस्तत्साम्येन प्रदर्शयेत् । आसारितप्रयोगानन्तरं तया सह साप्यपसरेत् ।

अथ तृतीयचतुर्थयोरासारितयोरतिदेशेन प्रयोगमाह पूर्ववदिति पृथक्त्वेनेत्यर्थः । स एवेति तत्र तूपोहनं कृत्वेति य उक्तो यश्च परिभाषाषट्केनोक्त इत्यर्थः ।

अथ यदैकमेवापसारितं प्रयुज्यते तदायं प्रयोगवैचित्र्यक्रम इत्यतिदेशेन दर्शयत्येवमित्यादिना । एकवचनमतन्त्रम् । एकमप्यासारितं यदा प्रयुज्यते

---

1 ड - अथोपवाहनं, प - तत्रैवोपोहनं 2 न - गायकस्तत्र योजयेत् ड - ड - गायनं तु प्रयोजयेत् 3 ड - गीतकार्थप्रयोगश्च द्वितीया 4 ड - तदेव तु 5 ड - नृत्तेनापि प्रयोजयेत् ख - नाट्येनाभि प्रदर्शयेत् 6 ड - आसारित-समाप्तौ च 7 न - निष्क्रमेन्नार्तकी 8 ड - पूर्ववत्प्रविशेच्चान्या 9 ड - एव तु 10 न - कार्यौ।

[1]भाण्डवाद्ये कृते[2] चैव तथा [3]गानकृतेऽपि च ।
[4]एकं तु [5]प्रथमं युञ्ज्याद्द्वे द्वितीयं तथैव च ॥ २९३
तिस्रो वस्तु तृतीयं तु चतस्रस्तु चतुर्थकम् ।
पिण्डीनां विधयश्चैव चत्वारः सम्प्रकीर्तिताः ॥ २९४
पिण्डी [6]शृङ्खलिका चैव लताबन्धोऽथ भेद्यकः[7] ।

तदास्य यानि पदानि च्छेदाश्चत्वारो मुखप्रतिमुखशरीरसंहरण(३१-८५)लक्षणास्तदाश्रयेणायं वर्धमानवच्चतुरपसारप्रयोगो भाण्डवाद्यक्रियायां गीतिक्रियायां च कार्यः, यद्वक्ष्यति "इत्येवं चतुरङ्गानी"ति (३१-८७)। एतदेव स्पष्टयत्येकं त्वित्यादिना । वस्त्वित्यङ्गम् । युञ्ज्यादिति नृत्तेनेति शेषः। त्रिमात्रादिकं यदत्र वस्तु केचिद्द्विः कुर्वते,तदसदेव। अन्ये त्वेवं पदे पद इत्यादि सार्धश्लोकमुपसंहारवाक्यं वर्धमानप्रयोगस्येति वर्णयाश्चक्रुः। अपरे पुनराहुः—आसारितस्य पदमभिव्यक्तिस्थानं का(क?)ण्डिकानां दशपरिवर्तितेन प्रयोगः। तथा हि--विशाला सङ्गता सुनन्दा सुमुखीति चतस्रः कण्डिका वक्ष्यन्ते (अ-३१) क्रमेण नवाष्टौ षोडश द्वात्रिंशत्कलाः। तस्य विशालामनुसङ्गता, अनु विशालां सुनन्दा सङ्गता, विशालामनु सुमुखी सुनन्दा सङ्गता, विशालेति दश परिवर्ताः । तत्र विशालादिपरिवर्तत्रये [1]सङ्गताः पारिवर्ताः काकाक्षिवदुभयत्र संबन्ध इति सप्तदशकलस्य द्विः प्रयोगे कनिष्ठलयान्तरितयोः स्थानं भवति। ततः सुनन्दादिपरिवर्तत्रये त्रयस्त्रिंशत्कलस्य मध्यमासारितस्य स्थानं भवति । ततः सुमुख्यादिचतुष्टये पञ्चषष्टिकलस्य ज्येष्ठासारितस्य। एवमासारितस्य पदेषु स्थानेषु कण्डिकादिपरिवर्तेषु चतुरपसारको नर्तकीप्रयोगः। तदाहैकापीति । वस्त्वासारितस्थानमित्येवं कण्डिकावर्तमानस्यायं प्रयोगोऽतिदेश इति तृतीयव्याख्यानतात्पर्यम्। द्वितीये तु व्याख्याने न किञ्चिदधिकमुक्तमिति—तदुपेक्ष्यमेव ।

पिण्डीबन्धप्रकारा अनुक्रमेणासारितेषु प्रयोज्या इत्युक्तम्। के त इत्याह पिण्डीनामित्यादि । विधयः प्रकारास्तत्र विशेषान्तरहृद्यमेकप्रयोज्यं पिण्डीबन्धरूपमित्येकः प्रकारो विशेषनामधेयविरहात्सामान्यशब्देनोक्तः । तदाह

---

1 च - ताण्डवाद्ये 2 ड कृतश्चैव 3 ड - गानकृतोऽपि च 4 ड - एकां तु, न - एका तु 5 ड - प्रथमां कुर्याद्द्वे द्वितीयं तु वस्तुकम् 6 ड - शृङ्खलिता 7 ड - भेद्यतः ।

1 सुंहता ।

पिण्डीबन्धस्तु [1]पिण्डत्वाद्गुल्मश्रृङ्खलिको[2] भवेत् ॥
[3]जालोपनद्धा चलता सनृत्तो भेद्यकः [4]स्मृतः ।
[5]पिण्डीबन्धः कनिष्ठे तु श्रृङ्खला तु [6]लयान्तरे ॥२९६
मध्यमे च लताबन्धो ज्येष्ठे [7]चैवाथ [8]भेद्यकः ।
पिण्डीनां [9]विविधा [10]योनिर्यन्त्रं भद्रासनं तथा ॥२९७
[11]शिक्षायोगस्तथाचैव [12]प्रयोक्तव्यः प्रयोक्तृभिः ।

पिण्डीवन्धः पिण्डत्वादिति । नर्तकीयोज्यः परस्परसंवन्ध एव पिण्डीवन्ध-द्वयप्रकारसजातीयो वैकनालावबद्धकमलयुगलवद्विजातीयो वा हंसवदनपरि-गृहीतनालनलिनवत् गुल्मश्रृंखलिकाशब्दवाच्यो नर्तकीत्रयप्रयोज्यस्तु । ततोऽपि वैचित्र्यसहिष्णुत्वाज्जालवद्विचित्रतां गच्छत्पूर्ववत्सजातीयविजातीयात्मा लताबन्धश्चतुष्टयप्रयोज्यस्तु गतोऽत्र रूपत्रयो महावाक्यं तावद्भिः प्रकारैर्भेद-नीय इति तेभ्य एकसत्त्वयोजनाच्चाज्ञातो भेदो [1]भेद्यकः । महावाक्यार्थ इति चैकस्यां योजनायां प्रविष्ट इत्यर्थः, तदाह सनृत्त (इति) एकै(तै?)स्त्रिभिर्नृत्तैः सहवर्तते ।

एकादिप्रयोज्यत्वं स्पष्टयति पिण्डीबन्धः कनिष्ठे त्वित्यादिना । ननु कथमेते पिण्डीबन्धा निष्पद्यन्त इत्याशंक्याधारादिभेदकृतां निष्पत्तिं दर्शयति पिण्डीनां विविधा योनिरित्यादिना । तत्र यत्र पुत्रकादीनां यथा पृथग्भूता-ङ्गानामनुसन्धिस्तथैव भूमिदेहाकाशाद्याधारखण्डलकाद्यनुसन्धानं यन्त्रम् । तस्य भूयसां सम्भवात्पूर्वमभिधानम् । अनेन मिश्रा भेदाः सङ्गृहीताः । भद्रं

---

1 ड - पिण्डत्वाद्गुरु 2 न - शृङ्खलिका 3 ड - तालोपनद्धा प्रलता 4 प - भेदकः 5 ड - पिण्डीबन्धा 6 च - लयोऽन्तरे 7 ड - चैवाद्य 8 प - भेद्यतः 9 ड - द्विविधा· न - त्रिविधा 10 ड - योनिर्यज्ञं, न - योनिर्यन्त्रं 11 ड - शिक्षाः कार्यास्तथा 12 ड - प्रयोक्तव्या

---

1 भेदकः ।

एवं प्रयोगः कर्तव्यो वर्धमाने [1]तपोधनाः ॥ २९८
गीतानां [2]छन्दकानां च भूयो वक्ष्याम्यहं विधिम् ।

स्फुटमेवेत्यस्यासनं स्थानं भूम्यादौ स्फुटमेव दर्शनादित्येकभेदसङ्ग्रहः । अनेनाधाराङ्गभेदो दर्शितः। प्रयोक्तृप्रयोगभेदस्तु पूर्वमेव दर्शितः, इहापि चोक्तः। शिक्षायोग इति करणाङ्गहारविशेषेष्वङ्गविक्षेपवैचित्र्याभ्यास इति साधकतमभेदो दर्शितः। इत एवोपजीव्यास्माभिर्वित्तल्योक्तं "रेचकैरङ्गहारै" श्चेत्यादिव्याख्यानावसरे । विविधग्रहणेन तद्व्यामिश्रणया भेदानन्त्यं सूचयति तच्चास्माभिः पूर्वमेव दर्शितम् ।

ननु सर्वोऽयं पिण्डीबन्धप्रकार इहोपयोगी वा नवेत्याशंक्याह तथा चैव प्रयोक्तव्य इति । तैः सर्वैरेव प्रकारैः पिण्डीश्रृङ्खलकादिबन्धो योज्यत इति यावत् । यत्र च्छेद्यकर्म चर्मयन्त्रं काष्ठमयी प्रकृतिर्भद्रासनमिति केचिदत्र व्याख्यां कुर्वन्ति; युक्तायुक्ततां तु सहृदया एव विदुः।

एवं गीतकाङ्गवाद्यनर्तकीपिण्डीबन्धादिदर्शनादपि नाट्यान्नृत्तमभिन्नमित्यपि सूचितम् । न चायं पिण्डीबन्धप्रकारो लक्ष्ये विच्छिन्नः । केवलतृणकपक्षयोः पतितमहौषधिवदनवस्थितैरभ्युद्धर्तुं न शक्यते, सावधानतया तु शक्यतएवेति,नात्रालस्यं श्रयितव्यम् । अन्यथा प्रयोगमाहुः। तथा हि—एकं तु प्रथममित्यत्र प्रथमासारित अभिनयति । ततो द्वितीया द्वितीयासारितं तत्समकालं तु प्रथमा केवलमङ्गहारं करोतीति। एवं तृतीया तृतीयासारितार्थमभिनयति तदा द्वेऽङ्गहारं प्रयुञ्जाते। चतुर्थी चतुर्थाभिनयं यदाकरोति तिस्रोऽङ्गहारं रञ्जयन्ति । अन्ये त्वभिनयप्रयोगेऽपि सहिततामाहुः, जालश्रृंङ्खलिकादिपिण्डीबन्ध जातं चान्योन्यं बाहुबन्धवैचित्र्यरचितमिच्छन्ति ।

अथ वर्धमानकमासाद्येति प्रतिज्ञातमुपसंहरत्येवमित्यादिना । एवं प्राधान्याद्वर्धमानप्रयोगमभिधाय "गीतानां मद्रकादीना"मिति यद्वक्ष्यते तन्निर्णयाय प्रतिजानीते गीतानामित्यादि। चकारः सर्वशेषतां [1]द्योतयति । अन्वाचयं चासारितादिपर्यन्तप्रयोज्यानां छन्दकादीनां तच्छेषतयैव लक्षणं वक्ष्यते। तथाहि तालाध्याये (अ-३१) वर्धमानासारितकगीतकपाणिकान्ते च्छन्दकप्रयोगश्चतुष्पदाप्रयोगश्चाभिधास्यते ।

1 पु - प्रयोक्तृभिः 2 न - जन्दकानां ।

1 दर्शयति ।

यानि [1]वस्तूनि मुनयः सन्ति चाङ्गकृतानि तु[2] ॥ २९९
गीतानि तेषां वक्ष्यामि प्रयोगं [3]नृत्तवाद्ययोः ।
[4]तत्रावतरणं कार्यं [5]नर्तक्याः सर्वभाण्डिकम् ॥ ३००
[6]क्षेपप्रतिक्षेपकृतं [7]तन्त्रीगानसमन्वितम् ।
प्रथमं त्वभिनेयं [8]स्याद्गीतके [9]सर्ववस्तुकम् ॥ ३०१

"सर्वेषामेव गीतानामन्ते छन्दक इष्यते ।
चतुरङ्गस्ततस्त्र्यङ्गोनवाङ्गो युग्म एव च. . . चतुष्पदा तथैकाङ्गा" इत्यादौ तेन प्रधानतया तावद्गीतकादिविशेषाणां विधिस्तत्प्रयोगेन तु स्वतन्त्राणां गीतकगतवस्त्वङ्गादि यत्र स्वेच्छया समाश्रित्यैकद्वित्र्याद्यनियमेन प्रयुज्यते । तानि च्छन्दकानि यान्यद्यत्वे नृत्ततालात्मना डोम्बिकानर्तकीलयचरणादिरूपेण प्रसिद्धानि । भूय इति । उक्तो हि वर्धमानविधिस्तत्राप्यस्त्यधिकं वस्तु वक्ष्यते । तत्र गीतकतालाश्रितनृत्तविधिं तावद्दर्शयितुमुपक्रमते यानीति । भूयांसि खण्डलकादिवस्तूनि स्वल्पानि त्वङ्गानि तत्र वस्तुनिबद्धानि त्रीणि गीतकानि मद्रकमपरान्तकं प्रकरी च । अन्यानि चत्वार्यङ्गान्युल्लोप्यकं रोविन्दकमोवेणकमुत्तरं च, तेषां क्रमेणाह तेषामिति नृत्ते वाद्ये च यो विधिस्तं वक्ष्यामि । तत्र गीतकेषु ये क्षेपाः प्रथमवस्त्वादावुपोहनानि, ये च प्रतिक्षेपाः द्वितीयवस्त्वादिषु प्रत्युपोहनानि, मतान्तरे त्वनन्तर्भूतपृथक्कालात्मकगीतशेषरूपाणि तानि तन्त्रीगतानि तेन युक्तानि प्रयुज्य नर्तक्या अवतरणं भाण्डवाद्यसहितं पुष्कराध्यायभाविना प्रविरलचलदङ्गुलि (९-२०)दलाभिहन्यमानाङ्किकप्राधान्येन कार्यम् ।

एतदुक्तं भवति । प्रथमे वस्तुन्याक्षिप्तिकामुपोहनं च प्रयुज्य नर्तकीप्रवेशः । द्वितीयादौ प्रत्युपोहनं पदयोजना तु तन्त्रीगानान्वितं कृत्वा क्षेपप्रतिक्षेपयोः कृतं परिसमाप्तता यत्र तादृगवतरणात्कार्यं सर्वभाण्डवाद्याद्याविर्भावं । प्रथममित्यादावित्यर्थः । वस्त्वेव वस्तुकं तत्सर्वमादावभिनेयं पुनर्नृत्तेन योज्यम् ।

1 ड - वस्तुनिबद्धानि 2 ड - कृतानि च 3 प - नृत्य 4 ड - यत्रावतरणं 5 ड - नर्तक्या सार्वं 6 ड - छेदप्रतिक्षेप 7 ड - भाण्डो दोहनसंस्कृतम् न - भाण्डापोहनसंस्कृतम् 8 ड - तु गीतके 9 च - कर्मवस्तुकम् न - सार्ववस्तुतत् ड - सार्ववस्तुकम् ।

तदेव च पुनर्वस्तु [1]नृत्तेनापि प्रदर्शयेत् ।
यो विधिः पूर्वमुक्तस्तु नृत्ताभिनयवादिते[2] ॥ ३०२
आसारितविधौ [3]स स्याद्गीतानां [4]वस्तुकेष्वपि ।
[5]एवं वस्तुनिबन्धानां [6]गीतानां च विधिः स्मृतः ॥ ३०३
[7]शृणुताङ्गनिबद्धानां गीतानामपि लक्षणम् ।
य एव [8]वस्तुषु विधिर्नृत्ताभिनयवादिते[9] ॥ ३०४
[10]तमेवाङ्गनिबद्धेषु च्छन्दकेष्वपि योजयेत् ।
वाद्यं गुर्वक्षरकृतं [11]तथाल्पाक्षरमेव च ॥ ३०५
मुखे [12]सोपोहने कुर्याद्वर्णानां [13]विप्रकर्षतः ।

कथमित्याह यो विधिरिति । आसारितविधौ यः प्रकारः स एवात्र प्रकारः । यथासारितेष्वपि सङ्ख्यानियमो नर्तकीवृद्ध्या नृत्तप्रयोगः, पूर्वं चैकाकिन्यभिनयं, नृत्ते च भाण्डवाद्यादिप्रयोगस्तथात्रापि तेन वस्तुसङ्ख्यां नर्तक्य इहेति मन्तव्यम् ।

एतदुपसंहरन्नन्यदुपक्रमते एवं वस्तुनिबन्धानामित्यादि । वादिते च विशुद्धकरणायामित्यादि योजयेत् । तदेवाङ्गनिबन्धेषु योजयेत्तथा सर्वशेषभूतेषु स्वतन्त्रेषु छन्दकेष्वपि ।

विशेषं तु दर्शयति वाद्यमिति । घिंघिं ढन् तृन् इत्यादीनि रूपाणि गुरूण्यपि कदाचित्प्रयत्नशीघ्रतया ताले प्रयुक्तानि बहूनि भवन्ति । यथोत्साहच्छटादौ त्थीत्थीत्थीत्थन् धृत् दत्थक्कुदहिं—एषैका कला । अत आहाल्पाक्षरमयेऽपि च भवत्यर्धादौ वाद्ययोजनात्कलार्धादेश्च शून्यत्वात्, नाथा ?

1 न - नृत्तेनापि 2 प - वादितैः 3 न - सम्यग्गीतानां 4 ड - वास्तुतेष्वपि न - वास्तु केष्वपि 5 ड - एष वस्तु 6 ड गीतकानां विधिः 7 प - शृणुताङ्गानि बद्धानां, ड - शृणुताङ्गानि स्पर्धानां 8 ड - वस्तुकाविधि 9 च - नृत्याभिनय 10 ड - सर्वं एव तु कर्तव्यश्छन्दकेषु प्रयोक्तृभिः, न - सर्वं एव तु कर्तव्य श्छन्दोऽङ्गेषु प्रयोक्तृभिः 11 ड - तथान्याक्षर 12 प - सापोहने 13 ड - विप्रकर्षकः ।

यदा गीतिवशादङ्गं भूयो भूयो निवर्तते॥ ३०६

तत्राद्यमभिनेयं स्याच्छेषं [1]नृत्तेन योजयेत्।

चच्चत्पुटे प्रथमकलायां हिविदा(?)एव। तत्परिहारार्थमाह वर्णानां गुरुणां विशेषेणानु पर्यन्तं त्रिमात्रचतुर्मात्रतया प्रकृष्टं तद्वाद्यं कर्तव्यम्। मुखनाम्न्युपवहसंज्ञके चाङ्गे वस्तुनिबन्धेष्वप्युपोहनेऽङ्गेऽयं वाद्यविधिः। अङ्गाल्पत्वात्तु तत्र नाङ्गनिबन्धव्यपदेशः।

अथ वक्तव्यसर्वशेषत्वेनाह यदा गीतिवशादङ्गमित्यादि। मुखाद्यङ्गानि यदा पुनः पुनरावर्तन्ते; कथं गीतेश्चतुर्विधाया मागध्यादिकाया वशात्सामर्थ्यात्। वक्ष्यते हि ध्रुवाध्यायान्ते (अ-३२)—

"अनिवृत्त्या पदानां तु मागधी समुदाहृता"। इत्यादि

गीतवशादित्यपि पाठ एवमर्थः। गीतिं वा गीयमानं वा तत्र विधिमिति तालाध्याये वक्ष्यते "यथाक्षरं द्विसंख्यातं त्रिसंख्यातमथापि च"(३१-१०८) इति। तत्रेति निवर्तने। आद्यमिति,आद्यआवर्तः। शेषमित्यादि। आवर्तान्तराणि शुद्धनृत्तप्रयोज्यानि। तेन न केवलं वस्त्वङ्गादिसमाप्तौ नृत्तं यावन्मध्येऽपि कदाचित्परिवर्तेषु भवतीति दर्शनम्। यत्तु राहुलकेनोक्तमपौनरुक्त्येनाभिनयनं तदेवंविधमेव मन्तव्यम्। यत्तु "अहं जळणिहिचुळुए माइमा" इत्यत्र, जलनिधिचुलुके मानितेन चोन्मीयत इत्यादि कैश्चिदपेक्षितम्; तन्न सर्वत्र निर्वहतीत्यास्तां तावत्। तत्र वाद्यविधिमाहावर्तमानगीतवशादङ्गं शाखाचारीप्रयोगात्मकं यदावर्तते तदा वाद्यप्राधान्येन नृत्तम्; वाद्यस्य यथासम्भवं वैचित्र्यं प्रदर्शनीयम्। पूर्वं हि तद्वैचित्र्यं काव्यार्थेन नियन्त्रितम्। अधुना तु सङ्कोचोऽस्य नास्ति; तथा च लक्ष्ये प्रावेशिक्यां पात्रकृतसङ्कोचाद्यभावं मन्यमाना गीताचार्या द्वयं प्रयोगमाहुः। एतच्च विचारयिष्यत इत्यास्तां तावत्।

समपाणिरुपरिपाणिरर्धपाणिश्चेति त्रिधा पाणिः, तालस्तदभिव्यङ्ग्यत्वात्। सङ्गीतनृत्ताभ्यां सह या पूर्वं वेति त्रिधा छन्दोऽक्षरपदानां साम्यं लयः कलाकालान्तरकृते द्रुतादिभेदस्त्रिविधः, एतच्च त्रैविध्यं यदि मार्गादिभेदस्याप्युपलक्षणम्।

---

1 द - नृत्येन।

त्रिपाणिलयसंयुक्तं तत्र वाद्यं प्रयोजयेत् ॥ ३०७
यथालयस्तथावाद्यं [1]कर्तव्यमिह वादकैः ।
[तत्वं चानुगतं [2]चापि [3]ओघं च करणान्वितम् ॥
स्थिरे तत्त्वं प्रयोक्तव्यं मध्ये चानुगतं भवेत् ।
[4]भूयश्चौघः प्रयोक्तव्यस्त्वेष वाद्यगतो विधिः ॥ ३०९
छन्दो गीतकमासाद्य [6]त्वङ्गानि परिवर्तयेत् ।
एष कार्यो [7]विधिर्नित्यं नृत्ताभिनयवादिते ॥ ३१०
यानि वस्तुनिबद्धानि तेषामन्ते [8]ग्रहो भवेत् ।
अङ्गानां तु [9]परावृत्तावादावेव ग्रहो मतः ॥] ३११

ननु प्रथम आवर्ते कीदृशं वाद्यमित्याशंक्याह यथालय इति प्रथमे ह्यावर्ते काव्यार्थाभिनयवशादङ्गस्य य उचितो लयो द्रुतादिस्तदनुसार्येव वाद्यं कार्यम् । अन्ये तु यथातथाशब्दावविचार्यास्य पूर्वशेषत्वेनैव श्लोकार्थं गमयन्ति—यथा वाद्यं त्रिपाणिलयवैचित्र्ययुक्तं तथाङ्गस्य गीतस्य च लयः कार्य इति । नचैवं तद्व्यतिक्रमणीयमिति सहेतुकं दर्शयति पादोनेन श्लोकेनैवमेष इति । हि यस्माद्देवस्य भगवतो महादेवस्य स्तुतिनिमित्तं परितोषणप्रयोजनमेतन्नृत्तं- अतो हेतोर्नियमाद्दृष्टसम्पत्त्यै।एष एव गीतकासारितेषु तच्चैषु च च्छन्दकेषु विधिः। पाणिका तु परिमितशरीरत्वात्स्वयं ताण्डवभाजनं न भवति। सा हि सुकुमारे पूर्वरङ्गे लास्यप्रधाने तत्सत्तावैदग्ध्यायोक्ताल्लास्यस्वरूपादेव निश्चीयते । अन्यथा पूर्वरङ्गोपयोगे प्रक्रान्ते तत्राध्याये लास्यस्य कोऽवसरः । वाद्य-(द्या?)ङ्गमाले तदनुपयोगीति चेत्तत्र दशाङ्गस्य चेत्प्रयोज्यता तदतिप्रसङ्गः, स च निषेत्स्यते; तदप्रयोगे कृतानि गेयपदानीति न विद्मः । तालाध्याये चैतद्भविष्यति । गीतकादिशेषत्वे तु छन्दकसङ्गृहीतैवेति नात्रोक्ता । गीतकं च स्वत-

1 न - कर्तव्यं त्वङ्गसंश्रितम् ड - कर्तव्यं त्वङ्गसंश्रयम् 2 न - चैव 3 न - ओष्ठं च 4 न - द्रुते चौघः 5 न - प्रयोक्तव्य एष 6 न - त्वङ्गानां परिवर्तने 7 ड - विधिर्नृत्य 8 ड - गृहो 9 ड - :परावृत्ता पादावत्र प - परावृत्त्या वादावेव ।

एवमेष विधिः कार्यो गीतेष्वासारितेष्वपि[1] ।
देवस्तुत्याश्रयं ह्येतत्सुकुमारं निबोधत ॥ ३१२
स्त्रीपुंसयोस्तु [2]संलापो यस्तु कामसमुद्भवः ।
[3]तज्ज्ञेयं सुकुमारं हि शृङ्गाररससम्भवम् ॥ ३१३

न्तेऽप्यासारिते भवति । ताण्डवप्रयोगस्तु यदा त्वेष पिण्डीवन्धैर्विकल्प्यते प्रत्येकमङ्गविन्यासस्तदा तेषां पृथक्पृथग्गति त . . . दोतातिदेशेनासारितेष्वप्येवमेव मुखाद्यङ्गचतुष्टयविभागेन नर्तकीक्रमप्रवेशादिप्रयोगः । एतदर्थमेव वर्धमानेऽप्युक्ते पुनरासारितसङ्कीर्तनं पूर्वरङ्गे चापिशब्दात्तत्सङ्ग्रहो व्याख्येयः । "सर्वेषामेव गीतानामन्त" (३२-३३६) इत्युपक्रम्य

"चतुष्पदा तथैकाङ्गा . . . . युग्मौजा वा प्रमाणतः" (३१-३३९) ।

"तथा शृङ्गारभूयिष्ठा" (३१-३५९) "त्रिलया वा(३१-३७२)"

इति निरूप्य दशांशं लास्यं तालाध्याये निरूपयिष्यते । मुनेश्चतुष्पदान्तर्भूतं लास्यगानमित्यादि भूयो भविष्यत एव। विशाखिलादिप्रणीतं लास्यगानान्तरं मुनिनाभिहितं चतुष्पदाया एव सङ्गृहीतत्वात् । सा चतुष्पदा गीतकानामन्ते पाणिकान्ते वा प्रयोज्येति दर्शितम्। तदभिप्रायेणोपक्रममाहसुकुमारं निबोधतेति। तुशब्द उत्तरतोऽपेक्षणीयः । सुकुमारं त्वत एवोक्तां रञ्जकतां विधिं निजयोहापोहधिया कल्पय । तत्रापि ह्यङ्गवृद्ध्या नर्तकीवृद्धिरित्यादि सर्वमुन्नेयमितीत्यर्थः ।

ननु किं तत्सुकुमारमित्याह स्त्रीपुंसयोस्त्वति। एकस्तुशब्दः [1]पूर्वत्र नीतः द्वितीयः सुकुमारकं विशेषयति । तदेवहि सुकुमारं न तु करुणहास्यादिमयम् । किंतदित्याह स्त्रीपुंसयोर्यः कामः स्त्रिया पुरुषस्य कामना पुंसा वा स्त्रियास्तस्मात्कविहृदयस्थिताद्विवक्षाक्रमेण समुद्भवो यस्य लापस्य काव्यव्यु(त्पादकवा)क्यस्य तत्सुकुमारं तत एव परस्परहेतुकत्वं भवति । अत एवाह शृङ्गाररसस्य परस्परहेतुकत्वे संभवमात्रमयोगव्यवच्छेदनंयत्र तेन "[2]तदवस्थामात्रोपनिबन्धोऽपि" डोम्बिकादि कविरुद्वेष्टितादौ चावगन्तव्योत्साहादौ शृङ्गाररसस्याव्यापत्ति-

1 ड - सारितेषु च 2 च - संलापो यत्र 3 ड - तज्ज्ञेयं स्वकृतारम्भि ।

1 सर्वत्र 2 कामावस्था 3 निबद्धोऽपि ।

यस्यां यस्यामवस्थायां [1]नृत्तं योज्यं प्रयोक्तृभिः ।
[2]तत्सर्वं सम्प्रवक्ष्यामि तच्च मे शृणुत द्विजाः ॥ ३१४
अङ्गवस्तु निवृत्तौ तु यथा[3] वर्णनिवृत्तिषु ।
तथा चाभ्युदयस्थाने [4]नृत्तं [5]तज्ज्ञः प्रयोजयेत् ॥
[6]यत्तु संदृश्यते किञ्चिद्दम्पत्योर्मदनाश्रयम् ।
[7]नृत्तं तत्र प्रयोक्तव्यं [8]प्रहर्षार्थगुणोद्भवम् ॥ ३१६

बन्धः । परमेश्वरे हि तपस्यति भगवती तदेकहृदया बभूवेति तावति परस्परार्थाबन्धात्मकरत्यभावे कामावस्थामात्रकं परतस्त्वर्धशरीराक्रमणादौ शृङ्गारहा(इ?)त्येवं परमेश्वरचरिते सुकुमारस्य विशाखत्वेनाप्रसरात्तस्यैवाद्यापि पक्षे स्थितिः । करुणादिर्भगवति न सम्भवति । नापि तत्तत्र तदु(अनु?)चितमिति न तत्सुकुमारम् । यत्तु राघवविजयादौ सीतामूर्च्छादिव्यावर्णनान्तं ताण्डवं न च तत्र तारचि? तत्सुकुमाराङ्गहारात्मकनृत्तयोजना, अपि तु गीतकार्थभावनान्यायेन रौद्रस्य चैव यत्कर्म स करुण इति प्रसक्त्या तत्र तथाविधाभिनययोग इत्यलं बहुना ।

वक्तव्यशेषमाह यस्यां यस्यामित्यादि । सुकुमारं यत्काव्यं तदाश्रितं गानमपि तथान्तर्लग्नं नृत्तमपि तत्र यदुक्तं तदेव हि पुनर्वस्त्विवाति । तथा "यथा गीतिवशादङ्ग"मिति नृत्तयोजनं तु तदनुवादपूर्वकं नियम इति । अङ्गवस्तुनिवृत्तौ त्विति । तुर्भिन्नक्रमोऽवधारणे । वर्णानां स्थाय्यादीनां गीतक्रियाविस्ताररूपाणां निवृत्तिर्यथापरान्तकादौ प्रतिशाखायां यद्वक्ष्यते "प्रतिशाखाद्यपि चे"ति तेनाङ्गवस्तुवर्णा परावर्तेषु यत्तथाभूतेनैव वाद्यादिवैचित्र्यप्रकारेण नृत्तमुक्तं तदध्यायाभ्युदयस्थानभेदभावज्ञो नृत्ताचार्यः प्रयोजयेत् ।

तदनु(तदु?) दाहरति यत्तु संदृश्यत इति । [1]यत्काव्यमखण्डं दम्पत्योः स्त्रीपुंसयोः [2]कामकृतं वाच्यत्वेनाश्र(श्री?)यते, अन्यच्च प्रहर्षप्रयोजनो यो गुणः

1 च - नृत्यं 2 ड - सर्वगीतकसंबन्धं तच्च 3 ड - निवृत्तौ च तथा
4 प - नृत्यं 5 च - तज्ज्ञैः 6 ड - यत्र संदृश्यते प - वस्तु संदृश्यते
7 च - नृत्यं तत्र, ड - तत्र नृत्तं 8 ड - प्रहृष्टार्थे ।

1 यत्काव्यमबन्धं 2 कायकृतं ।

यत्र सन्निहिते कान्ते [1]ऋतुकालाभिदर्शनम् ।
गीतकार्थाभिसंबन्धं नृत्तं [2]तत्रापि चेष्यते ॥ ३१७

खण्डिता विप्रलब्धा वा कलहान्तरितापि वा ।
यस्मिन्नङ्गे तु [4]युवतिर्न नृत्तं तत्र योजयेत् ॥ ३१८

[5]सखीप्रवृत्ते संलापे तथासन्निहिते प्रिये ।
नहि [6]नृत्तं प्रयोक्तव्यं यस्या वा प्रोषितः प्रियः ॥ ३१९

आस्थाबन्धो वचनं दूतीवचनाकर्णनादिरंशस्तदुद्भवं तदारम्भं तत्र नृत्तं योज्यमिति कामावस्थासु मन्तव्यम् । शृङ्गारेऽप्यनेन वासकसज्जाभिसारिकाविषयनृत्तमुक्तम् ।

स्वाधीनभर्तृकाविषयमाह यत्र सन्निहित इति । यस्मिन्नङ्गे गीतकस्य गीयमानस्य काव्यस्यार्थत्वेन वाच्यत्वेन संबन्धः कान्तसन्निधाने ऋतोर्वसन्तादेः कालस्य चन्द्रोदयादेरवलोकं (कनं?) भवति तत्र नृत्तम् ।
नियमफलं दर्शयितुमाह खण्डितेत्यादि ।

"व्यासङ्गादुचिते यस्या वासके नागतः प्रियः ।
सा खण्डिता" (२२-२०३)

"यस्या दूतीं प्रियः प्रेष्य दत्त्वा सङ्केतमेव च ।
नागतः कारणेनेह विप्रलब्धा तु सा" (२२-२०४)

"ईर्ष्याकलहनिष्क्रान्तो यस्या नागच्छति प्रियः ।
सानुतापवशप्राप्ता कलहान्तरिता" (२२-२०२)

अङ्ग इति । तदाधारभूते काव्यखण्डे किमित्येव न नृत्तमित्याशङ्क्याह सखीप्रवृत्त इति यथा असन्निहिते प्रिये [1]यद्विषयकसल्लापतत्समागमोपायपर्यालोचनादिरूपवृत्त (त्ति?)स्तत्रापि न नृत्तं योज्यम् । अनेन विरहोत्कण्ठिता लक्षिता । वासकसज्जा प्रियानागमने तथोक्ता । खण्डिता ज्ञाततदिन्द्रियव्यलीकेति विशेषः । यस्या वा प्रोषितः पिय इति प्रोषितभर्तृका । कामाव-

---

1 ड - ऋतुकालादि, न - ऋतुमाल्याभि 2 प - नृत्त्यं 3 न - चात्रापि 4 न - युवति र्न नृत्त्यं तत्र योजयेत् ड - युवतिर्नृत्तं तत्र प्रयोजयेत् 5 ड - संप्रवृत्ते संलापे च 6 प - नृत्त्यं ।

---

1 सखीविषयक ।

दूत्याश्रयं [1]यदा तु स्याद्दतुकालादि[2]दर्शनम् ।
[3]औत्सुक्यचिन्तासंबन्धं न नृत्तं तत्र योजयेत् ॥ ३२०
[4]यस्मिन्नङ्गे [5]प्रसादं तु गृह्णीयान्नायिका क्रमात् ।
ततःप्रभृति नृत्तं तु शेषेष्वङ्गेषु[6] योजयेत् ॥ ३२१

स्थास्वपि यदा प्रियोऽसन्दुर्लभः खिलो वेति हृदयेऽनिहितो वेति तदा नृत्तम् । तत्र हि कारणानन्तरमेव परिसमाप्तिः, तथा विधेययथाक्षरत्वात्तत्र तदेवाश्रयणीयम् । न तु द्विसङ्ख्यातं त्रिसंख्यातं वेत्युक्तं भवति;व्यतिरेकलब्धो व्युदाहरणप्रदर्शितोऽप्यर्थो नृत्तस्येह प्राधान्येनाभीष्टत्वान्न स्वकण्ठेनोच्यते । यस्मिन्नङ्ग इति। प्रसादमिति प्रसन्नहृदयत्वं येन प्रकारेण युवतिर्लभेतेति तेन खण्डिताविषयमेवैतदपि तु सर्वविषयं मन्तव्यम् । ततःप्रभृति शेषेष्वङ्गेष्वित्यस्यायं भावः । लब्धास्थावन्धा यदि भवति तत इति प्रियोऽसन्निहितो भवति तदा नृत्तं योज्यमेव । एतस्मिन्प्रकरणे नाट्यगतानि नाटकोदाहरणानि कैश्चिद्दत्तानि तान्ययुक्तानीति मन्तव्यम् । खण्डितादयो नायिका यत्र साक्षात्क्रियन्ते तत्र वलनावर्तनादिरूपनृत्तं न योज्यमिति यदुच्यते तदनवकाशमेव । तथाहि--

"चिन्तानिश्वासखेदेन हृद्दाहाभिनयेन च ।
सखीभिः सह संलापैरात्मावस्थावलोकनैः ॥
ग्लानिदैन्याश्रुपातैश्च रोषस्याभिनयेन च ।
निर्भूषणामृजात्वेन दुःखेन रुदितेन च ॥
खण्डिता विप्रलब्धा च कलहान्तरितापि च ।
तथा प्रोषितनाथा च भावानेतान्प्रयोजयेत् " ॥ (२२-२०८—२१०)

इति सामान्याभिनये (अ-२२) वक्ष्यते ।

"विषण्णे मूर्च्छिते भीते जुगुप्साशोकपीडिते ।
ग्लाने सुप्ते विहस्ते च निश्चेष्टे तन्द्रिते तथा ॥
मत्ते प्रमते चोन्मत्ते चिन्तायां तपसि स्थिते ।
[1]व्याधिते रुग्ज्वरार्ते च भयार्ते शीतविप्लुते ॥
न हस्ताभिनयः कार्यः कार्यः सत्त्वसमाश्रयः" ॥ (९-१६२—१६५)

1 च - यदा च 2 न - कालाभि 3 प - औत्सुक्यं चित्तसंबद्धं 4 ड - तस्मिन्नङ्गे न - यस्मिन्नङ्गे 5 ड - प्रयोगं 6 प - शेषेष्वर्थेषु ।

1 व्यतिरेकबुद्धो । 2 व्याधिग्रस्ते ज्वरार्ते ।

देवस्तुत्याश्रयकृतं यदङ्गं तु भवेदथ[2]।
माहेश्वरैरङ्ग[3]हारैरुद्धतैस्तत्प्रयोजयेत् ॥ ३२२
यत्तु शृङ्गारसंबद्धं गानं स्त्रीपुरुषाश्रयम्।
देवीकृतैरङ्गहारैर्ललितैस्तत्प्रयोजयेत् ॥ ३२३
चतुष्पदा नर्कुटके खञ्जके [4]परिगीतके।
विधानं सम्प्रवक्ष्यामि [5]भाण्डनृत्तविधिं प्रति ॥ ३२४
[6]खञ्जनर्कुटसंयुक्ता भवेद्या तु चतुष्पदा।
पादान्ते सन्निपाते तु तस्यां भाण्डग्रहो भवेत् ॥ ३२५

इत्याङ्गिकाभिनये वक्ष्यति। तदेवं स्थिते हस्ताभिनयस्यैवात्रावकाशो नास्तीति कस्तत्र तत्संमीलनात्मनो वलनावर्तनादेराशङ्कावकाशोऽयं निषेधोऽत्र वचनीयः स्यात्। न चेह नाट्यं प्रकृतमित्यास्ताम्। एवं गीतकादेरन्ते च्छन्दकं, पाणिकायास्तु लास्यगानस्वीकारिणी चतुष्पदा प्रयोज्या। इयता गीतकादिपूर्णं प्रयुक्तम्। एतदर्थमेव "वीक्ष्य शङ्करम्। सुकुमारप्रयोगेण नृत्यति स्म च पार्वती" (४-२५७) इत्युपक्रमात्प्रभृति द्विशाखत्वेनैव नृत्तस्वरूपमुपदर्शितम्।

तदत्र द्विविधे नृत्तविभागमाह श्लोकत्रयेण देवस्तुत्याश्रयमिति। यदङ्गमिति च्छन्दकसंबन्धि। उद्धतैरिति विद्युद्भ्रान्तगरुडप्लुतकादिप्रधानैः। अत्र हेतुर्यतस्ते महेश्वरप्रयुक्ताः। यद्द्वितीयचतुष्पदासंबन्धं। ललितैरिति तलपुष्पपुटलीननितम्बाद्यारब्धैः। अत्र हेतुः यतस्ते देवीकृताः।

एवं नृत्तविधिश्चतुष्पदायां सलास्यगानस्वीकारिण्यामुक्तः। अधुना भाण्डविधिर्वक्तव्यः। तत्र चतुर्भिः पादैर्ध्रुवा क्रियते ते च पादादौ शुष्काक्षरैर्झण्टुमादिभिः स्विन्ना(दिग्ल इत्या)दिभिर्वा। यद्वक्ष्यते।

"आसनेषूपविष्टैर्यत्तन्त्रीगानसमन्वितम्।
गायनैर्गीयते शुष्कं तद्वेयपदमुच्यते" (१९-अ)

---

1 ड - गतं 2 ड - भवेदिह 3 ड हारैरुद्यतै 4 न - परितातके प - परिधानके 5 न - भाण्डत्वाय 6 न - खञ्जनं कुट।

या ध्रुवा छन्दसा युक्ता समपादा समाक्षरा ।
तस्याः पादावसाने तु प्रदेशिन्या ग्रहो भवेत् ॥ ३२६
कृत्वैकं परिवर्तं[1] तु गानस्याभिनयस्य[2] च ।
पुनः[3] पादनिवृत्तिं[4] तु भाण्डवाद्यैर्नियोजयेत्[5] ॥ ३२७

इति सार्थकपदैर्वा तत्रापि वर्णवृत्तकृता वा पादा मात्रावृत्तकृता वा समा अर्ध समा विषमा वा । ते च प्राधान्येन [1]खञ्जनर्कुटकवृत्तैर्योज्यन्ते । यद्वक्ष्यते ध्रुवाध्याये (३२)

"अष्टौ नर्कुटकानां तु तिस्रः खञ्जकजातयः" (३२-३००) इत्युपक्रम्य

"आभ्यो विनिस्सृताश्चान्या युग्मौजा विषमास्तथे"ति (३२-३२८) एतद्विषयं भाण्डवाद्योपक्रमं करोति । चतुष्पदा नर्कुटक इति । चतुष्पदापि सन्निधानाच्चतुष्पदायां, परिगीतमपि ध्रुवाध्याये त्रिवृत्तकं यदि वा शुष्कगीतं तत्रैव । तदेतेषु त्रिषु प्रकारेषु भाण्डवाद्यस्य पुष्करवाद्यस्य विधिं वक्ष्यामि । खञ्जकजात्या नर्कुटकजात्या वा या चतुष्पदा ध्रुवा क्रियतेऽस्यां प्रथमपादस्य यावदुपान्त्या कला तावच्च त्रिवशान्वितं गानम् । अन्ये तु या सन्निपाताख्या हस्तद्वयसमायोगशब्दपरिच्छेद्या कला तद्गानसमये भाण्डवाद्यमारम्भणीयम् । येषामर्धसमाविषमो(मा?)वृत्तात्मकं (को?) नर्कुटकखञ्जकजात्यारब्धायां विधिर्वर्णवृत्तसमवृत्तात्मकतज्जात्यारब्धायां तु विधिमाह या ध्रुवेति । समपादा चतुष्पादा । तदयमर्थः । या चतुष्पदा छन्दसा युक्तेति युक्तजातिगतवर्णवृत्तयोजिता। समाक्षरेति तज्जातिकसमवृत्तमयी तस्याः प्रथमे प(पा?)दे परिसमाप्ते द्वितीयपादे या प्रदेशिनी तर्जनी तदुपलक्षिता या चातीतकलम(?)प्रभृतिभाण्डवाद्यं योज्यम् । तत्र युग्मेन मानेन यदा चतुष्पदा भवति, यद्वक्ष्यते"युग्मोजा वा प्रमाण,(अ-३१)इति द्विकलश्च मार्गः तदा द्वितीयपादे सप्तमी या निष्क्रामकला सा तर्जनीप्रयोज्यत्वात्तर्जनी चतुष्कलमाने तु त्रयोदशी आवापकालतर्जनी यदा तु त्र्यश्रेण मानेन तदा द्विकले पञ्चमी कनिष्ठा निष्क्रामकलातर्जनी । चतुष्कले तु नवमी । आवापकला तर्जनी । एतच्च तालाध्याये वक्ष्यते—"कनिष्ठाङ्गुलि-

1 ड - परिवृत्तं 2 न - नागस्याभि 3 प . नय पुनः 4 न निवृत्तौ 5 द - भाण्डवाद्यं ।

1 खण्डनात्कटकः ।

अङ्गवस्तुनिवृत्तौ[1] तु वर्णान्तरनिवृत्तिषु ।
तथोपस्थापने चैव भाण्डवाद्यं प्रयोजयेत् ॥ ३२८

येऽपि चान्तरमार्गास्तु[2] [3]तन्त्रीवाक्करणैः कृताः ।
तेषु सूची प्रयोक्तव्या भाण्डेन सह ताण्डवे ॥ ३२९

निष्काम" (३१-४१) इत्याद्युपक्रम्य "तर्जनीकृतो निष्काम" (३१-४१) इत्यादिना । दत्तिलाचार्येण तु संक्षिप्योक्तमेतत्—

"आद्यद्वितीयमध्यान्तात्पादभागार्द्विदुः क्रमात् ।
कनिष्ठानामिकायुक्तमध्यमादेशिनीकृतात् ॥

अयुग्ममध्यहीनः स्या"दिति ।

एवं तर्जनीप्रयोज्या । योऽसौ द्वितीयपादे कलापातो त(तस्त?)त्र भाण्डग्रहस्तदुपलक्षितश्च नर्तकीप्रवेश इत्युक्तं भवति । अन्ये त्वाकाशग्रहासु निश्शब्दकलातो ग्रहं मन्यमानाः सन्निपातप्रकरणात्सशब्दात्पातादेव ग्रह इहेति वदन्तः प्रदेशिनीशब्देन तदुपलक्षितपादभागगमनं सशब्दमेव पादग्रहावधिकेनाचक्षते । पञ्चपाणिप्रपाता ये पुष्कराध्याये वक्ष्यन्ते तन्मध्यात्प्रदेशिनीपातेन भाण्डग्रह इति व्याख्यानं "सन्निपातोऽनुग्रह" इति प्रकरणेन तथा ध्रुवाध्याये वक्ष्यमाणेन "चतुर्ग्रहा ध्रुवे"त्युपक्रम्य,

"सन्निपातग्रहाः काश्चित्तथाकाशग्रहाः पराः ।
प्रदेशिनीग्रहास्त्वन्यास्तथैवान्याः समग्रहाः" । (३२-४२३)

इति विधिना विरुद्धमित्युपेक्षितं लक्ष्यवेदिभिः ।

नन्वेवं नर्तकी प्रविष्टा ततः प्रभृत्यभिनयं तावत्करोति, यस्त्वसावाद्यः पादस्ततोऽधिकोऽपि वा भागस्तत्र नर्तकी नैव प्रविष्टेति वा तत्र वार्तेत्याशङ्क्याह कृत्वैकमिति । योऽसौ शुद्धविभागः पूर्वं गीतः स परावर्तनीयो भाण्डवाद्येन सहाभिनेतव्य इति पश्चादसौ प्रयोज्य इत्युक्तं भवति । पादग्रहणमुपलक्षणम् । तेन यावान्भागो भाण्डवाद्येन प्राङ्नियोजितोऽत एव नाभिनीतस्तावतो निवृत्तिः परावर्तनं कार्यमित्युक्तं भवति ।

अथात्र चतुष्पदायां भाण्डवाद्यविशेषाभिधानव्याजेन नृत्तस्थानं दर्शयत्यङ्गवस्तुनिवृत्तौ त्विति । तुर्भिन्नक्रमोऽवधारणे । अङ्गस्यैकस्य वा वस्तुनो वा सर्वस्य ध्रुवाशरीरस्य स्थाय्यादिविशेषस्य वा प्रतिशाखान्यायेन तत्परावर्तनं

---

1 प - निवृत्तौ च 2 ड - मार्गाः स्युः 3 ढ - वाक्षरणैः ।

महेश्वरस्य चरितं य इदं सम्प्रयोजयेत् ।
सर्वपापविशुद्धात्मा शिवलोकं स गच्छति ॥ ३३० ॥

यच्चोपस्थानमोहनात्मकं तेषु प्रकर्षेण भाण्डवाद्यं वैचित्र्ययुक्तं योजयेत् । तद्वशाच्च तत्र नृत्ताङ्गहारयोजनां कुर्यादित्यर्थः ।

अथ शुष्काक्षरायाश्चतुष्पदाया विधिर्वक्तव्यः । सा च पूर्वमेव प्रयुज्यते "आसनेषूपविष्टेष्वि"त्युक्तत्वात् । अत एव गेये गातव्ये काव्ये पदमवगमयन्त इति । तत्पीठबन्धरूपत्वं तस्याः । तथा चान्यत्र [1]सिद्धकेषु गातव्यात्पूर्वं तावतीति नाकारः [शुष्काक्षरायाश्चतुष्पदाया विधिर्वक्तव्यः । सा च पूर्वमेव प्रयुज्यते आसनेषूपविष्टेष्वित्युक्तत्वात्] अत एव गेये ध्रुवागीते गेयं गातव्यमिति ह्येकोऽर्थः । तं विधिमाह येऽपि चान्तरमार्गा इति । अन्तरं परस्परवैलक्षण्यं मान्यते येनोपायेन सोऽन्तरमार्गः संवाद्यनुवादिन्या स स्वर उपलक्षणात्मकोऽर्थप्राधान्याभावाच्च तेनैव व्यपदेशः । अत एवाह तन्त्रीक्रियया वाक्क्रियया तदेव निरर्थकतया योजितास्तेषु समग्रहस्तेनैव भाव(ण्ड?)प्रयोगः । नर्तक्या रचहाद्वि (?)लास्याङ्गगतकाव्यार्थानुसारिहस्ताभिनयशून्यः सात्त्विकाङ्गवलनादिमात्रेण सूच्याभिनयः । यद्वक्ष्यति "वाक्यार्थो वाक्यं वस्त्वङ्गैर्योज्यते यदा पूर्व "मिति पश्चाद्वाचाभिनय इत्ययं त्वङ्ग इहोपलक्ष्यः । एतच्च गातव्यप्रयोगे त्रिप्रकारकृततावन्मात्रतालगानसूच्याभिनयनमद्यापि दृश्यते । एवं वर्धमानकप्रयोगो गीतकप्रयोगो वा छन्दकप्रयोगेन चतुष्पदाप्रयोगेण च सहेतुकः परिपूर्णो भवति । अत एव तालाध्याय इत्यु(एतदु?)पक्रमानुसारेणैव वर्धमानासारितकगीतकच्छन्दकचतुष्पदातदन्तर्भूतलास्यगानस्य विधेः क्रमेण निरूपणं भविष्यतीतीयता "गीतानां मद्रकादीना" (५-१३) मिति पूर्वरङ्गाध्याये श्लोको भविष्यति । तस्यार्थः पुरस्तादेव निर्णीतः । तेन तदपसारे एतदप्यालोच्योदीरितोऽयमर्थोऽनुष्ठेयः ।

नन्वत्र पूर्वरङ्गगतप्रधानफलेनैव किं फलवत्ता,उत फलान्तरमप्यस्तीत्याशङ्क्याह (क्य) पृथक्फलवत्त्वं च दर्शयन् स्वातन्त्र्येण प्रयोज्यमिदमिति दर्शयति महेश्वरस्येति । चरितमिति चेष्टितं प्रयोजयेदिति स्वार्थे हेतुमति च

1 षिद्दिभिशितेषु ।

एवमेष विधिः सृष्टस्ताण्डवस्य प्रयोक्तृभिः ।
भूयः किं कथ्यतामन्यन्नाट्यवेदविधिं प्रति ॥ ३३१

इति श्रीभारतीये नाट्यशास्त्रे ताण्डव-
लक्षणं नाम चतुर्थोऽध्यायः

तन्त्रेण णिचि (चू?) । तेन प्रयोक्तुं (क्तुः?) प्रेक्षाप्रवर्तयितुश्चार्थपतेः सामाजिकवर्गस्य च पापविशुद्धिः शिवलोकगतमनन्तफलं नृत्तस्येति नान्यदृष्टैकप्रयोजनाद्भिन्नप्रयोजनत्वमुक्तम् । स्वातन्त्र्येण प्रयोगे च छन्दकानां चतुष्पदायाश्च केवलत्वेनापि प्रयोगो ह्यनुज्ञातो भवति । तदङ्गानां च पुनः "पुष्पाञ्जलिधरा भूत्वे"त्याद्यनुसारेण वर्णानां लोके प्रयोगः । "तस्याः पादावसाने' त्वित्याद्यनुसारेण धारापरिक्रमादे"यदा गीतवद्या"दिति (४-२०६) सारेण द्विगुणाद्यर्थः गुणावयवारणकशुञ्जियकादेश्चतुरपसारकादिविधा (?) च डोम्बिकादिषु क्रमेण नर्तकीवृद्धिराचार्यैराधेया । तालानुसारेण च त्रिपाणिलयसंयुक्तमित्याद्यनुसारेण धारापरिक्रमादेः लयपरिष्वङ्कितलयतालपरिक्रमादेः । तदेतत्सर्वमीश्वरपरितोषं[2] कार्येवेति ।

तथैतदुपसंहारपूर्वकमध्यायान्तरावकाशं करोत्येवमेष इत्यादिना । एवं पूर्वोक्तेन प्रकारेण प्रयोग इति प्रयोगं नाट्यात्मकमपेक्ष्य ततोऽन्यस्तद्विलक्षणो विधिः प्रकारो दृष्टः । तथा नाटकादि सामाजिकवत्प्रयोक्तृतन्मयीभाववशेन नाट्यसंस्कारमपेक्ष्याभिनयादि विधिर्दृष्टो न तु साक्षात्कारकल्प्यनाट्यरूपतात्रास्ति । चतुर्विधाभिनययोगाभावाद्रसभावाप्राधान्याद्गीतवाद्यनृत्तानां यथेष्टं प्राधान्यं नर्तकीवृद्धेः काव्ये वस्त्वपेक्षत्वान्नाट्यप्रस्तावनाप्राणप्रतिबिम्बात्मकतात्रिविधत्वान्मदमूर्च्छादौ तत्त्वापत्त्ययोगाद्गीतकादेश्च नियमादृष्टप्रयुक्तत्वाद्गीतादिप्राधान्येनैव प्रयोगात्कुलकाच्छेद्यात्मनः काव्यस्य गीत्याधारतानान्तरीयकत्वमात्रेण गमनापि(त्पि?)ण्डीबन्धप्रकारे वैचित्र्यान्ते नृत्तमात्रविश्रान्तः प्रयोक्तृप्रवर्तयितृ गात्रदृष्टफलप्राधान्याच्च तद्विलक्षणं नाट्यं तद्वृत्तिभिद्यत इत्येवंशब्दस्यार्थ इत्युपाध्यायमतम् । "रसभावदृष्टहस्तशिरश्चाद्य यदङ्गं पूर्णं वापूर्णं वा कृत एव नाट्यनृत्तयोर्भेदस्तुल्यानुकारत्व"इति हर्षवार्तिकम् ।

---

1 ठ - कथ्यतां विप्रा नाट्ययोग 2 ड - कार्ये चेति ।

1 गुणलयवारणक 2 गात्रदृष्ट ।

"शिक्षार्हस्वेच्छान्यनृत्तकतिपयनाट्याङ्गकृतं नृत्तमभ्यासफल"मिति भट्टयन्त्रः। "समयमात्र इत्यादिमङ्गलवद्विवाहादा"विति भट्टलोल्लटः। दशरूपकभेदवल्लास्यताण्डवप्रयोगो नाट्यभेद एव च तत्र पूर्णानुकाररूपत्वात्। तथाहि—प्रवेशेऽश्वत्थाम्नः सूचीविद्धोर्ध्वजान्वादि। पुरूरवसोऽलपल्लवसूची। गरुडस्य गरुडप्लुतकम्। रावणस्य पुष्करो वैशाखरेचितकः। वत्सराजस्याग्निसम्भ्रमोऽ(तिक्रा)न्तः जटायुषो गृध्रावलीनकमेलकाक्रीडितं चेति,। "चित्राभिनयेन बाल्येन करणप्रयोग एवाभिनेयपदादीनां च नाट्येऽपि सक्ते"ति [1]नाट्यमेवेदमिति कीर्तिधराचार्यः। एतच्च स्वमतानुसारेण एवंशब्दार्थमाहुः। युक्तायुक्ततां तत्र परीक्षका एव विदुरित्यलं बहुना। प्रसङ्गाङ्गतया नृत्ततया प्रसक्तानुप्रसक्तत्वेन नृत्तगतमेवान्यत्किञ्चित्प्रसिद्धिः प्रकृता नाट्यगतानां विच्छेदीत्यभिप्रायेणाह नाट्येति। नाट्यमेव वेदस्तस्य यो विधिः प्रयोगस्तं प्रतीति शिवम्।

रविशशिहुतभुक्कल्पित नयनत्रयकिरणदलिततिमिरततिः।
अभिनवगुप्तस्ताण्डवविधिमेनं व्यवृणुत स्पष्टम्॥

इति माहेश्वराचार्याभिनवगुप्तविरचिताया-
मभिनवभारत्यां नाट्यशास्त्रविवृतौ
ताण्डवविधानाध्यायश्चतुर्थः

---

1 नाट्यमेव वेद।

॥ श्रीः ॥

नाट्यशास्त्रम्

अथ पञ्चमोऽध्यायः

[1]भरतस्य वचः श्रुत्वा नाट्यसन्तानकारणम् ।
पुनरेवाब्रुवन्वाक्यमृषयो हृष्टमानसाः ॥ १

यथा नाट्यस्य जन्मेदं[2] जर्जरस्य च सम्भवः ।
विघ्नानां शमनं[3] चैव देवतानां च पूजनम् ॥ २

[4]तदस्माभिः श्रुतं सर्वं गृहीत्वा चावधारितम् ।
निखिलेन[5] यथातत्त्वमिच्छामो वेदितुं पुनः ॥ ३

पूर्वरङ्गं महातेजः[6] सर्वलक्षणसंयुतम् ।
यथा बुद्ध्यामहे ब्रह्मंस्तथा व्याख्यातुमर्हसि ॥ ४

तेषां तु वचनं श्रुत्वा मुनीनां भरतो मुनिः ।
प्रत्युवाच पुनर्वाक्यं [7]पूर्वरङ्गविधिं प्रति ॥ ५

संसारनाट्यनिर्माणे यावकाशविधानतः ।
पूर्वरङ्गायते व्योममूर्तिं तां शाङ्करीं नुमः ॥

अध्यायसङ्गतिं कर्तुं पुराकल्पेनोपक्रमते भरतस्येति । नाट्यसन्तानमिति, नाट्यस्य सन्तानान्नृत्तक(था)या विच्छेदाशङ्कानिरासेनाविच्छेदः । नाट्ये पृष्टे दैववशात् महाफलं नृत्तमिति तद्विवेकेन ज्ञातम् । तज्ज्ञानाच्च तद्विविक्तं [1]नाट्यमिति सुष्ठु ज्ञातं, तदनुरक्तं नाट्यं हृदयावर्जनमिति हृष्टमानसत्वं, स्वगत(त)त्वग्रहणधारणादिसामर्थ्यात्मकशिष्यसम्पद्दर्शनायां गुरुप्रोत्साहनमित्यभिप्रायेणाहुस्तथेति । पूजामध्य एव नृत्तं प्रविष्टमित्यध्यायचतुष्टयतात्पर्यं प्रत्यनुभावितम् । ऊहापोहविज्ञानादिकमपि दर्शयति गृहीत्वेति । चकारा-

---

1 द - वाद्यसन्तानलक्षणम् 2 ङ - वै जन्म 3 ङ गमनं, प - शामनं 4 ङ - त्वत्तः श्रुतं गृहीतं च, 5 घ - निखिलं तु 6 ज महातेजाः 7 प ततो वाक्यं.

1 नाट्यमपि.

पूर्वरङ्गं महाभागा [1]गदतो मे निबोधत ।
पादभागाः कलाश्चैव परिवर्तास्तथैव च ॥ ६

द्धारयित्वावधारितं निश्चितं । निखिलेन साकल्येनेति । यथातत्त्वमिति तत्त्वाभिनिवेशनमाहुः । पूर्वरङ्गं वेदितुमिच्छाम इति जिज्ञासा दर्शिता । यथा सर्वलक्षणसंयुक्तं बुध्यामहे तथा व्याचक्ष्वेति व्याख्याप्रकारविषये[1]ऽप्याचार्यान्ववेक्षणम् । महत्तेजो ज्ञानात्मकमस्य, तदामन्त्रणं गुरुप्रोत्साहनार्थम् ।

"पूर्वरङ्गे कृते पूर्वं तत्रायं द्विजसत्तमाः" ॥ (४-१०)

इति जिज्ञासादर्शनपूर्वप्रयोज्यतया तथैव जिज्ञासा जाता ;

"पूर्वरङ्गविधावस्मिंस्त्वया सम्यक्प्रयुज्यताम्" ॥ (४-१४)

इति "यस्त्वयं पूर्वरङ्गस्तु त्वया शुद्धः" (४-१५) इति परमेश्वरादरवचनेन सुष्ठुतरां द्रढीकृता ; तथैव तावदवश्योपासनीयेति तात्पर्यम् । गदत इति शब्दमात्रेण तावन्निरूपयत इत्यर्थः । आश्रावणादिस्वरूपं हि गेयाधिकारे (२९) सम्यङ्निर्णेष्यते । अनादरे षष्ठी, [2]निगदन्तमनादृत्य स्वबुद्ध्या बुध्यध्वम् । यद्यपि मयात्र [3]क्रमेण नैतदुक्तं, गेयाधिकारस्यापि सुदूरत्वात्तथापि यस्य येनार्थसम्बन्ध इत्यर्थक्रम आदर्तव्यो न शब्द इति [4]गदनक्रमानादरणं गदितरि सङ्क्रमय्योक्तम् ।

तत्र पूर्वरङ्गशब्दं निरुक्त्या तावद्व्याचष्टे पादभागा इत्यादिना । इह बहिर्यवनिकाङ्गान्येव पूर्वरङ्गः, तानि च गीतकानीत्युत्थापनानि ध्रुवारूपाणि तद्द्विकलचच्चत्पुटचाचपुटतालेन विशिष्टगतिगतेनेति(गतानीति?), तदेव पूर्वरङ्ग इति तावत्तात्पर्यम् । तत्र मात्रायाः षोडशो भागः, तदारब्धा मात्रा तदारब्धं वस्तु । एवं वस्तुनिबन्धेषु गीयमानं तावत्स्वीकृतम् । भागश्च द्विकलचतुष्कलयोर्मार्गस्य चच्चत्पुटादीनां सङ्ख्याद्भवति । यथाक्षरेषु तु चच्चत्पुटादिषु कलादिभागलग्ना इति यथाक्षरमार्गः कलाग्रहणेन सङ्गृहीतः । यथाक्षरद्विकलचतुष्कलतया सर्वमेव गीतकवर्धमानादिगतं गीयमानं गेयं रूपं सङ्गृहीतम् । कला-

---

1 क - वदतो

---

1 विषयमप्याचार्यान्वेक्षणम् 2 गदितमनादृत्य 3 क्रमेणैतदुक्तम् 4 गदनक्रमानादरणं ; गमनक्रमानादरणं 5 यः षोडशो ।

[1]यस्माद्रङ्गप्रयोगोऽयं [2]पूर्वमेव प्रयुज्यते[3]।
[4]तस्मादयं पूर्वरङ्गो विज्ञेयो द्विजसत्तमाः[5] ॥

शब्देन च सप्तविधा तालकला निष्कामादिरुच्यते। तया समस्तो मानात्मकस्तालमार्गो गृहीतः। भिन्नार्थानामपि च [1]सरूपाणामेकशेषः पादा इत्यादि। एवं [परिवर्तन्त इति। परिवर्ताः द्विसङ्ख्यातत्रिसङ्ख्यातादिषु परिवर्तैः सकलेतिकर्तव्यता परिगृहीता। चकारात्केवलं तन्त्र्यादि। एवकारेण केवलः प्रयोगः। तथाशब्देनाङ्गाङ्गिभावप्रयोगो यथायोगं दर्शितः। द्वितीयेनैवकारेण नाट्याङ्गता सूचिता। द्वितीयेन चकारेण च पाठ्यादिनृत्तं च। तेन (स)गीततालवाद्यनृत्तपाठ्यं व्यस्तसमस्ततया प्रयुज्यमानं यन्नाट्याङ्गभूतं स पूर्वरङ्ग इत्युक्तं भवति, यः स्याद्रङ्गे मण्डपे आधारे नाट्ये वा रङ्गबुद्धिस्थे भविष्यति युज्यत एव च पूर्वं गत्याहारादिकेन ह्यङ्गेन विना गायनादिसामग्र्यसम्पत्तेः कथं नाट्यप्रयोगः। न ह्यहो किल तन्तुतुरीवेमादेः(विना) शक्यः पटः कर्तुम्। केवलं प्राङ्मुखान्नभोजनवन्नियोजनत्वेऽपीति वक्ष्यते। तेन पूर्वो रङ्ग इति पूर्वरङ्गः सुप्सुपेति समासः, राजदन्तादित्वाद्वा परनिपातः।

श्रीहर्षस्तु रङ्गशब्देन तौर्यत्रिकं ब्रुवन् [2]नाट्याङ्गप्रयोगस्य तस्यैव पूर्वरङ्गतां मन्यमानः पूर्वश्चासौ रङ्ग इति समासममंस्त। यदाह—

"[3]दृष्टा येऽवस्थार्थे (वस्त्वर्थे?) नाट्ये रङ्गाय पादभागाः स्युः।
पूर्वं त एव यस्मिन् शुद्धाः स्युः पूर्वरङ्गोऽसौ" ॥

इत्यादि। रङ्गस्य पूर्वो भाग इति त्वसत्; न ह्ययं मण्डपस्यैकदेशः, नापि नाट्यस्य। नह्ययं भावानुकीर्तनात्मकव्याख्यानानुकारस्वभावः, अपि तु शिक्षादिवत्पारमार्थिक एव प्रयोगसम्पत्त्युपकरणभूतो भोजनादितुल्यः प्रत्याहारादिरर्थः। नृत्तमप्यत्र वैचित्र्यकारित्वेन प्रविशन् "नाट्यरूपगतं नृत्त"मित्यङ्कुरसूचितनृत्तन्यायेनानुकारधुरारोहि। अपि तु देवतापरितोषणफलं धूपविलेपनादिदानवत्। सत्यमेवेति पूर्वो रङ्ग इत्येष एव संन्यासः।

1 ट - यः स्याद्रङ्ग न - यस्याद्रङ्गे प्रयुज्यन्ते 2 द - सर्वमेतत्प्रयुज्यते 3 ड - प्रयोज्यते न - प्रयोक्तृभिः। 4 न - पूर्वरङ्गो ह्ययं तस्माद्विज्ञेयो द्विजसत्तमाः 5 ड - विज्ञेयोऽत्र द्विजोत्तमाः।

1 स्वरूपाणां 2 तौर्यत्रिकमब्रुवन् 3 दृष्टा एव स्वार्थे

अस्याङ्गानि तु कार्याणि यथावदनुपूर्वशः ।
तन्त्रीभाण्डसमायोगैः [1]पाठ्ययोगकृतैस्तथा[2] ॥ ८
प्रत्याहारोऽवतरणं[3] तथा ह्यारम्भ एव च ।
आश्रावणा[4] वक्त्रपाणिस्तथा च परिघट्टना[5] ॥ ९

नन्तु प्रत्याहाराद्यङ्गसमूहः पूर्वरङ्गस्तत्कथमुक्तं गीतादिः पूर्वरङ्ग इत्याशङ्क्याह अस्याङ्गानि त्वित्यादि पूर्वरङ्गे भवन्ति हीत्यन्तेन श्लोकसप्तकेन सार्धेन महावाक्यम् । तुर्हेतौ । [1]लक्षिष्यमाणानि प्रत्याहारादीन्यासारितान्तानि अन्तर्यवनिकाङ्गानि नव प्रयोज्यानि । यानि च यवनिकाया बहिर्गीतकप्रयोगादीनि प्ररोचनान्तानि दश तानि सर्वाण्यपरभागाद्युपलक्षितादिरूपस्योक्तस्य सम्बन्धित्वेन यस्मात्कार्याणि तस्माद्गागादिरेव पूर्वरङ्ग इति पूर्वेण सम्बन्धः । अङ्गानां न्यूनाधिकभावे हि भूयांसः पूर्वरङ्गभेदाः । ते च गेयाधिकारे(अ-२९)दर्शयिष्यन्ते । इह तु द(तूह्नि?)श्यमानास्तन्त्रभावानभिज्ञानां सम्प्रमोहफला एव । उक्तं च वार्तिके, "बुद्ध्यायषट्कचेदिज (?) रङ्गभेदः, न तु प्रत्याहारावतरणे [2]आद्ये, रङ्गद्वारादीनि पाश्चात्यानि न पादभागाद्यारब्धानी"ति । सत्यम् । किन्तु समुदितत्वेनात्र रङ्गतारमणीयभावः सम्बन्धोऽपि तु सद्भावमात्रं; तच्च सर्वत्रैव विद्यत इति वक्ष्यते । यदाह यस्मादेतानि पूर्वरङ्गे संभवन्ति तस्मादस्य संबन्धित्वेन कार्याणि । तत्र यवनिका रङ्गपीठतच्छिरसोर्मध्ये,तस्या अन्तरागतैः प्रयोक्तृभिर्नटैः प्राधान्याद्यदि वा वैणिकादिभिरेव प्रयोक्तृभिः प्रयोज्यानि प्रत्याहारादीनि गीतकपिण्ड्यादीनि तु, यवनिकायामपसारितायां "गीताना"मित्यादिना श्लोकेन गीतकवर्धमानान्यतरप्रयोग उक्तः । अन्ये तु "अथापि"स्थाने(५-१३) "अतोऽपी"ति पठन्त उभयप्रधानमनुजानते । तच्चान्त्यपदार्थेन विरुद्धम् । निर्देशविधौ चैकमेवाङ्गं भविष्यति न तु द्वे ।

---

1 ड - समायोगात् - प समायोग 2 ड - पाठ्ययोगैः कृतानि च, न - कृतानि तु 3 ज - अवतरणस्तथा 4 ड - आश्रावणं 5 क - परिवन्दना ।

---

1 लक्ष्यमाणानि 2 आद्यो

सङ्घोटना[1] ततः कार्या [2]मार्गासारितमेव च ।
ज्येष्ठमध्यकनिष्ठानि[3] तथैवासारितानि च[4] ॥ १०
एतानि तु बहिर्गीतान्यन्तर्यवनिकागतैः ।
प्रयोक्तृभिः प्रयोज्यानि तन्त्रीभाण्डकृतानि च[6] ॥ ११
[7]ततः सर्वैस्तु कुतपैः संयुक्तानीह कारयेत् ।
[8]विघट्य वै यवनिकां [9]नृत्तपाठ्यकृतानि तु[10] ॥ १२
गीतानां मद्रकादीनां [11]योज्यमेकं तु गीतकम् ।
वर्धमानमथापीह [12]ताण्डवं यत्र युज्यते[13] ॥ १३
ततश्चोत्थापनं कार्यं परिवर्तनमेव[14] च ।
नान्दी [15]शुष्कावकृष्टा च रङ्गद्वारं तथैव च ॥ १४
चारी चैव ततः [16]कार्या महाचारी तथैव च ।
[17]त्रिकं प्ररोचना चापि[18] पूर्वरङ्गे भवन्ति हि ॥ १५
एतान्यङ्गानि कार्याणि पूर्वरङ्गविधौ तु च[19] ।
एतेषां लक्षणमहं व्याख्यास्याम्यनुपूर्वशः ॥ १६

"कीर्तनाद्देवतानां च ज्ञेयो गीतविधिस्तथा" (५-२१)इति उभयात्मकं तावदेवैकमङ्गमस्तीति केचित्। अपिशब्दाद्यानि कान्युद्देशावसर एव ताण्डवं यत्रेत्यभिधानमस्याङ्गस्य नृत्ते विनियोगं दर्शयति, तेन नाट्याद्यङ्गानि नृत्तशून्यान्यपि भवन्तीति दर्शयतीति । तद्देव स शुद्धत्वव्यवहारो, यद्वक्ष्यति "शुद्धं चित्रमथापि चे"ति ।

---

1 ड - सङ्घोटना ग - 2 ड - मार्गोत्सारितमेव च. न मार्गात्सारित 3 ड - आसारिताक्रिया प - आसारिताक्रिया 5 ड - च 6 ड - तु। 7 ड - ततश्च सर्वकुतपैर्युक्तान्यन्यानि 8 ड - उद्घाट्य, द - विष्वज्य 9 क वृत्तपाठ्य न - नृत्य 10 ड - च 11 ड - एकं योज्यं तु 12 न - ताण्डवस्तत्र, 13 ढ - योज्यते 14 ड - परिवर्तकमेव 15 क शुष्कापकृष्टे, न - शुष्काच 16 न - तथा 17 न - त्रिगतं प्ररोचना च, 18 द - चैव 19 ड - द्विमाः द - पूर्वरङ्गे द्विजोत्तमाः

कुतपस्य [1]तु विन्यासः प्रत्याहार इति[2] स्मृतः।
तथावतरणं प्रोक्तं गायकानां[3] निवेशनम्॥ १७

एवं पूर्वरङ्गसामान्यलक्षणसमानार्थे विभावितानि यान्यङ्गानि तेषामयमेवोद्देशो भवतीति दर्शयत्येतानीति। क्रमं कथयन्नेवैतानि सङ्ख्याता-न्ये(त्ये?)त्र चेत्यर्थः। चोऽप्यर्थः। यथोद्देशं लक्षणं कर्तुमुपक्रमते एतेषामिति।

तत्क्रममाह कुतपस्य त्विति। नेपथ्यगृहद्वारयोर्मध्ये पूर्वाभिमुखो मार्दङ्गिकः, तस्य पाणविकौ वामतः, रङ्गपीठस्य दक्षिणतः उत्तराभिमुखो गायनः, अस्याग्रे उत्तरतो दक्षिणाभिमुखास्थिता गायन्यः। अस्य वामे वैणिकोऽन्यत्र वंशकारिकावित्येवं [2]कुतं पाति, कुतः शब्दविशेषः। कुं तपतीति कुतपो न शब्दविशेषः। शब्दविशेषपालकस्य नाट्यभूमिकोज्ज्वलताधायिनश्च वर्गस्य यो विचित्रो न्यासः स विप्रकीर्णानामेकत्र ढौकनात्मना प्रत्याहारः। यद्यपि कुतपस्य विन्यासो मध्य एव गायकस्याभिमुख्यो रङ्गपीठस्योत्तरतो गायन्य इति गायकानां विन्यासस्तथापि त्ववतरणं नाम पृथगुक्तम्, अङ्गानां गीतस्यावश्यंभावित्वं रञ्जकवर्गे ख्यापयितुम्, यद्वक्ष्यते—

"यद्यपि पुरुषो गायति गीतविधानं तु लक्षणोपेतम्।
स्त्रीविरहितः प्रयोगस्तथापि न सुखावहो भवति" (३२-अ)

इति। यद्वा "नारदाद्यैस्तु गन्धर्वै" (५-३३) रिति, भाविश्लोके केवलपुरुषाणां गातृत्वं वक्ष्यमाणमिहाशंक्य पृथगवतरणमुक्तम्, तस्यैतदवकाशं गन्धर्व्यश्च गन्धर्वाश्चेत्येकशेषेण स्त्रीगीतस्याप्यत्र संभावनात्। एवमवतरणान्तं वस्तुत एकमेवाङ्गम्। अत एव प्रयोग एक उभयत्र कृतो भवति, यद्वक्ष्यति पुष्कराध्याये (३८) "उपविष्टेषु मार्दङ्गिकादि"ष्वित्युपक्रम्य प्रथमं—

"त्रिप्रकारं त्रिगुणितं तथैवात्राङ्गिताश्रयम्।
त्रिकलं षट्कलंचैव"

त्रिसामत्वात्रिसामस्तु त्रिसामान्वितः (त्रिसामाक्षरविद्धस्तु गुरुलध्वक्षरान्वितः)

1 क - स 2 द - विधि॰ 3 द - गायिकानां॰

1 गायन्यः 2 कुतकुपाणिकृतशब्दविशेषपालकस्य 3 यावदवदनिर्णयकारीति॰

परिगीतक्रियारम्भ आरम्भ इति कीर्तितः ।
आतोद्यरञ्जनार्थं तु[1] भवेदाश्रावणाविधिः ॥ १८
वाद्यवृत्तिविभागार्थं वक्त्रपाणिर्विधीयते ।
तन्त्र्योजः क·णार्थं[2] तु भवेच्च[3] परिघट्टना[4] ॥ १९

यकारश्च मकारश्च त्रिकैस्त्रिगुणितो भवेत् ।
यस्त्रिसामा स प्रत्याहारो "यावदवतीर्णकोटीनि, अवतरणकोटौ छन्दसोऽक्षर-समं वामवद्दिर्गीतानुवर्ति वाद्यं स्त्रीबालमूर्खादिकुतूहलादिजननं प्रयोज्यम् ।

अन्ये मन्यन्ते निवेशनं स्थानस्वरादौ न तूपवेशनमत्र । तथा च सप्त-स्वरपरिग्रहोऽवतरणादौ ऋगित्यादिरूपाङ्गसप्तकेन शुद्धसप्तकेन शुद्धसप्तकगीतिज्ञ प्रयोज्यमिति । एतद्घनतालविधौ (अ-३१) वितत्य विचारयिष्यते ।

ननु च परिगीतक्रियाद्यारम्भो न कृतस्तावत् त्रिसाम-प्रयोगोऽपि कथम् । सत्यम् । किञ्चिदर्थमयं प्रयोगक्रम इत्यवधार्यम् । इह दृष्टार्थान्येव तावदेतान्यङ्गानि । तथा हि— पूर्वं रञ्जकवर्गढौकनं ततो गेयमेव तद्गीतस्योपरञ्जकस्य प्राधान्यात् । तस्य च विम्बभूतं शारीरं शारीरस्वराणां मूलभूतत्वात् । तदनुसन्धानायालापाख्य आरम्भः । ततोऽपि मानरूपताल-प्रधानसर्वातोद्यगर्भतानुसन्धानमासमन्ताच्छ्रा[य]यतीत्याश्रावणा । ततोऽपि प्रतिविम्बभूतवैणवस्वरस्वरूपानुसन्धानाय दक्षिणादिवृत्तिविभागानुसन्धाना-त्मना वक्त्रपाणिः। वक्त्रे प्रारम्भे हस्ताङ्गुलिव्यापारः। ततस्तु[वृत्तिविभागस्तु], वृत्तिविभागगतशुष्कप्रयोगानुसन्धानाद् ज्यापारघट्टना,घट्ट चलन इति पाठात् । पश्चाद्वीणावाद्योपजीवकत्वादवनद्धस्यानुसन्धानसंवाद्यादिना प्रहारपञ्चकयो गेन क्रियत इति सङ्घोटना । घुट परिवर्तने । यतः पुष्कराध्यायेऽभिवक्ष्यते—

पूर्वं शरीरादुद्भूता ततो गच्छति दारवीम् ।
ततः पुष्करजं चेति । (अ-३४)

ततोऽपि प्रकृतिमेव यन्मानान्नुहार्यानुहर्तृरूपस्य वैणवपौष्करशब्दस्य परस्पर-संमेलनं कार्यमिति मार्गासारितं, मार्गे प्रकृत्यादिलक्षणादिगोचरे विकाररूपस्य

1 द - च 2 न जस्करणार्थं; ड - तन्त्रौजस्तरणार्थं 3 न - च्चु 4 द - परिघट्टनम् ।

1 पूर्वरङ्गौकवर्गढौकनं 2 प्राधान्यं·

तथा पाणिविभागार्थं भवेत्संघोटनाविधिः[1] ।
तन्त्रीभाण्डसमायोगान्मार्गासारितमिष्यते ॥ २०
[2]कलापातविभागार्थं भवेदासारिताक्रिया ।
[3]कीर्तनाद्देवतानां च ज्ञेयो गीतविधिस्तथा ॥ २१

पुष्करवाद्यस्यासमन्तात्सारणं गमनं यत्रेति । [1]पश्चान्मेयमानस्वरूपे तु संहिते गेयवस्तुगततालस्वरूपोपक्षेपः, कलानामा(वा)पाद्यानां पातानां शम्यादीनां चानुसन्धितेत्यासारितविधिः ।

एवं तावदन्तर्यवनिकाङ्गानां दृष्टार्थ एव प्रयोगः, तान्यन्तरेण प्रयोगस्यैवासम्पत्तेः । तथा च भेज्जलनाम्ना कविना निजरूपक उक्तम्—"मेघाशङ्किशिखण्डिताण्डवविधा"वित्यादि ।

एवं दृष्टार्थे प्रयोगे पूर्वं कृते पश्चाद्दृष्टार्थाङ्गानुसारेणैव बहिर्गीतविधिस्तदनुसारेण च विशेषधातुवाद्ये विधिः । तत्र प्रत्याहारावतरणयोस्त्रिसाम्ना प्रयोगः, रङ्गपीठस्येति [2]चतसृषु दिक्षु कुतपविन्यासात् ।

तालस्त्रिकलस्त्वादौ शम्यैककला कलाद्वये तालः ।
द्विकला च पुनः शम्या तालो द्विकलस्तु कर्तव्यः ।
द्विकलश्च सन्निपातः पुनः पिता पुत्रकश्च षट्पूर्वः ।
चच्चत्पुटस्तथा चेदारम्भे तालयोगस्तु ।
त्रिशम्योपरिपाणौ ताल।वित्येवमेककलः ।
समपाणौ द्वे शम्ये तालावप्येवमेवाथ ।
भूयश्शम्या तालाववपाणावुत्तरस्तथा चैव ।
चच्चत्पुटस्तथास्यादेवं ह्याश्रावणातालः ॥ (अ-२९)
शङ्कुकस्तु पठति "उत्तरस्तथाचैवे"ति स्थाने "उत्तरस्तथा द्विकलः" इति, "एककल" इत्यत्र च स्थाने "निर्दिष्ट"इति । केचिदत्राष्टाविंशेऽध्याये

---

1 ड - भवेत्संखोटनाविधिः 2 छ - कालपाठ, ड - कलाभाग, क - कलापात, ट - कलापान, 2 न - कीर्तनं देवतानां, द - कीर्तने ।

---

1 पश्चात्स्वरूपे 2 च तिसृषु 3 पठित उत्तर ।

अतः परं प्रवक्ष्यामि [1]ह्युत्थापनविधिक्रियाम्[2]।
यस्मादुत्थापयन्त्यादौ[3] प्रयोगं नान्दिपाठकाः॥ २२

आश्रवणायाः पूर्वमभिधानादिह चारम्भस्य पूर्वपाठाद् ज्ञापकाद्विकल्पमिच्छन्ति। अतः सर्वातोद्यस्वरूपानुसन्धिनिर्गीतालापक्रिया चेति (निर्गीततालप्रक्रियाचेति?)

"द्विकले मद्रके यत्तु शम्यातालादियोजनम्।
तत्सर्वं वक्त्रपाणौ तु कार्यमष्टकले मुखे॥
... ...
तस्याधस्तात्पुनः कार्यं पञ्चपाणिचतुष्टयम्।
वक्त्रपाणेरयं तालो मुखप्रतिमुखाश्रयः" (२९-९७)

केचित्तु वक्त्रवार्ध(पाण्यर्ध?)गतमिच्छन्ति। तैर्वस्तुक्रमो वृत्तिशब्दश्च न चर्चितः। संपिष्टकवच्चास्यास्ताल (२९-११२) इति परिघट्टनातालस्तत्र।

"सप्ताङ्गे द्वादशकलं द्वादशाङ्गे दशैव तु।
निष्क्राममादितः कृत्वा शम्यास्तिस्रः प्रयोजयेत्॥ (३१-२८२)
तालत्रयं ततश्चैव शम्यातालौ ततः परम्।
शम्यातालौ ततः कार्यौ सन्निपातोऽन्त्य एव च।
ओवेणके तु सप्ताङ्गे सम्पिष्टकमिदं मतम्
द्विशम्यातालयोगेन द्वादशाङ्गे कला दश" इति। (३१-२८४)

शङ्कुकस्तु [1]"सम्पक्वेष्टकवदस्यास्ताल (२९-११२)" इति पठति।

"तालादिस्त्र्यश्रभेदोऽन्यो ज्ञेयः पक्वेष्टको बुधैः।
गुरुपञ्चाक्षराभ्यान्तु प्लुतमात्रासमन्वितः" (३१-२१) इति,

अन्ये तु पठन्ति—

"गुरुपञ्चाक्षरेऽन्ते च प्लुतमात्राद्वयान्विते" इति॥

तथा द्वौ संपिष्टशब्देतुव (शब्दवा?)त्करणवाचकं शीर्षकवदितिवत्, नहि तस्य च तदानीमङ्गता, केवलप्रयोगात्प्रकरणं चात्र साक्षी। शीर्षकवद्धालासारितवदिति चानयोर्मध्ये पठितमेतत्।

---

1 ङ - चो, ख - उ 2 ङ - क्रिया, क - क्रियाः 3 न - यन्त्यत्र, द - यत्यत्र—पाठकः।

1 सम्पन्नेषु पदस्यास्ताल इति।

पूर्वमेव तु रङ्गेऽस्मिंस्तस्मादुत्थापनं स्मृतम् ।
यस्माच्च लोकपालानां परिवृत्य[1] चतुर्दिशम् ॥ २३

पञ्चेष्टकस्य तथैव तालाद्य(प्लुत)द्वयेत्यर्थो ? न सङ्गतः । सङ्कोटनायाः,
"तालस्तु शीर्षवत्पञ्चपाणिना" (२९-१०७)
अनयोरप्यङ्गयोः पूर्ववत्केचित्क्रमविकल्पमिच्छन्ति ।
"बालासारितवच्चैव तालोऽस्य परिकीर्तितः" । (२९-११६)
इति मार्गासारितस्य तालः, । अभिसृतपरिसृतान्यप्यत्र मार्गासारित-मध्य एव तत्स्थाने वा विकल्पेना(वा?)प्रयोक्तव्यानि । लीलाकृतं नाम यत्ततातोद्यविधौ(अ-२९)वक्ष्यते तदिह न सङ्गृहीतम् । आसारितानां च त्रयाणा-मेकस्तालाध्याये (३१-१५० १७०) वितत्य वक्ष्यत इत्येवं प्रयोगक्रमः । अत एव पूर्वरङ्गे सद्भावमात्रेण समप्रत्याहारका(रादा?)वपि सामान्यलक्षण-मनुगतमेव । अत्र च शुष्काक्षरधातुवाद्यविधिरष्टाविंशेऽध्याये ततातोद्यविधौ (च) भविष्यति । 'त्रिसाम्नि' पुष्कराध्याये (३४-१९९) तत एवावधार्यमिति विस्तरभयात्तु न लिखितम् ।

अत्र च वैचित्र्यार्थं [1]समुचितमात्रमित्यादिप्रवृत्तिमपि भाविरूपको-चितं काव्यमपि पठ्यमानं केचिदिच्छन्ति । तथा हि सति "पाठ्ययोगकृतैस्त-थे"ति न सङ्कोचितं भविष्यति । युक्तं चैतत् । यथाहि रमण्याद्युपकरणभूत-शयनविरचनादौ प्रति पादुकस्तम्भधूपवस्त्रादिष्वपि तदुचितनायकयुगलाभि-प्रायविचित्राकृतियोगो युद्धोचितसन्नाहकङ्कटादौ च कातरजनभयभावनं नृसिंह-गरुडादिरचनाकृतियोगस्तथैव ह्यतिरमणीये नाट्ये भविष्यन्ति यदुपरञ्जकवर्ग-ढौकनादौ—एतदपि सुकुमारं तदुक्तगीतपाठ्याभिनययोगेनैव कार्यम् । तच्चा-पसारितायामेव यवनिकायामुत्थापनाङ्गमध्ये ह्यस्यैककलः पाठ्यसहितः प्रयोगः। तथा हि वक्ष्यति "यस्मादुत्थापयन्ती"त्यादि, रङ्गे यः पूर्वं प्रयोगः कृतः प्रत्या-हारादिस्तं, [2]यस्मादुत्थापयन्ति फलस्वरूपनिरूपकपाठ्यतदभिनयादिना स्फुटीकुर्वन्ति तस्मादित्यर्थः । पाठ्यावकाशदानार्थमेव चात्रेदं देवताविनीति-फलविशेषभिधानम् ; अन्यथा देवतापरितोषायैतत्प्रयोज्यमिति सामान्येन वक्तव्यं स्यात, विशेषोपदेशस्य प्रयोगे विफलत्वात् ।

1 द - परिवर्त्य

1 समुचितमात्रवित्यादि 2 यः स्यादुत्थापयन्ति-

वन्दनानि प्रकुर्वन्ति[1] तस्माच्च[2] परिवर्तनम् ।
आशीर्वचनसंयुक्ता नित्यं यस्मात्प्रयुज्यते[2] ॥ २४
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ।
[3]नान्दीपादानामन्तरेषु चित्रे पूर्वरङ्गे वर्धमानं प्रयोज्यं प्रागुक्तलक्षणम् ।
अन्ये तु--गीतकप्रयोगादनन्तरं शुद्धे चित्रे पूर्वरङ्गे वर्धमानप्रयोगमिच्छन्ति ।

अन्येतु प्रत्यङ्गं पश्चात्तत्प्रयोगमाहुः । तैस्तु प्रयोक्ता कस्तदेति निरूप्यम् । अत्र त्विदमित्यर्थः । कृतामित्युक्तिभङ्ग्या पाठ्यं तद्गीतप्रयोगः पदयुक्तोऽपि केवलमन्तर्यवनिकागतप्रत्याहारादिविषयत्वात्पाठ्ययोगादीनामप्यन्तर्यवनिकार्थमुच्यते.

एवं नवाङ्गान्युक्तानि । अथ "विघाट्य वै यवनिका"मित्यादिना यद्गीतकमित्याद्यङ्गदशकं दर्शितं तत्क्रमेण लक्षयति कीर्तनादित्यादि । कीर्तनं स्तुतिः । तस्मात्पाठ्याद्धेतोः,ततः परं शुष्काक्षरानिर्वृत्तं च शब्देननिर्गीतकाना।-मन्यतमं वर्धमानं वा । तत्र च तालस्तालाध्याये (एक)त्रिंशे वक्ष्यते - यस्मादेति । तत्र प्रत्याहारादीनि चेदत्र प्रयोज्यानि तत्पूर्वरङ्ग इत्यनुवादोऽयं स्यात्, क्रमस्य सिद्धत्वात् । नान्दीपाठका इति तदुपलक्षितपूर्वक्रमद्वारेणैव पुराणकवयो लिखन्ति स्म "नान्द्यन्ते सूत्रधार" इति । अहरहश्चैषा प्रयोगे प्रयोज्या । एवं च नित्यमेवंरूपमेव । [2]अन्यपाठ्यादीनामुत्थापनादीनां प्रयोगवशादन्यथात्वोपपत्तिर्दृश्यते। न तु नान्दीपाठस्येति[3] नित्यशब्दस्याभिप्रायः। आदिग्रहणात्प्रेक्षापातिप्रभृतयः । एषैव च नान्दी भारत्यङ्गनिरूपणे प्ररोचनेति निर्देक्ष्यते—"जयाभ्युदायिनी चैव मङ्गल्ये"(२०-२७)त्यादिना । इह तु सा प्ररोचना तत्र भविष्यति। अत्र नान्दीपदानामन्तरेषु चित्रे पूर्वरङ्गे वर्धमानं यत्प्रयोज्यं, तत्पञ्चममङ्गं गणयति ।

नन्वेवं गीतकाविधिः प्रथमाङ्गानन्तरमन्याङ्गमध्येऽपि च वर्धमानप्रयोगस्य चित्रेऽपि भावात्सङ्ख्याया अनवस्थानं न पदे पतेदिति न पुनर्गणनार्हमिति न दोषः ।

---

1 प - प्रकुर्वंति, ड - त्तु, द - तस्माद्धि, न - तस्मात्तत्परि, 2 ड - प्रवर्तते, 3 एतद्द्वयं ज, ट, ड, त, द, न, प, ब, भ, प्रभृतिषु नास्ति

1 चात्र 2 अन्ये 3 पाठ्यस्येति.

अत्र[1] शुष्काक्षरैरेव ह्यवकृष्टा[2] ध्रुवा यतः ।
तस्माच्छुष्कावकृष्टेयं जर्जरश्लोकदर्शिका[3] ॥ २६
[4]यस्मादभिनयस्त्वत्र[5] प्रथमं ह्यवतार्यते[6] ।
रङ्गद्वारमतो ज्ञेयं वागङ्गाभिनयात्मकम् ॥ २७

केचिदाहुः--[1]शुष्कावकृष्टैवादिष्टा, [2]असावेव च लक्षिता । [3]अवकृष्टायास्त्वनुवादद्वारेण लक्षणं मन्तव्यम् । [4]अन्यथा वक्ष्यमाणं,

"युक्तायामवकृष्टायां प्रीता नागा भवन्ति हि ।
तथा शुष्कावकृष्टायां प्रीतः पितृगणो भवेत्" (५-५१)

इति तन्निर्विषयं स्यात् । तत्रावकृष्टाया लक्षणं—

"सुखमतिसुखोपेता ह्यवकृष्टा विधीयते"(३२-१२)इति तालाविधिः ।
"अन्यभावेषु कृष्टश्च [5]द्रव्यहेतुषु पठ्यते ।
यस्मात्कारुण्यसंयुक्ताह्यवकृष्टा भवेत्ततः[9] ।" (३२-३४१)

इति वाक्यार्थगानेऽपीतिकर्तव्यताविधिवृत्तस्वरूपं शम्यादेर्योजनं चाग्रेऽस्या वक्ष्यते । तदेतस्यां प्रयुक्तायां तदनन्तरं नान्द्यामभिहृश्यैव शुष्काक्षरैः प्रयोज्या । तत्रापकृष्टात्वसामान्यात् पृथक्ककगवाते (क्रमपातैः?)जर्जरश्लोकदर्शिका, यत्तदनन्तरं शुष्कावकृष्टेयमिति असाववकृष्टे ध्रुवा,सा तस्माच्छुष्कावकृष्टा,तामाह,हि यस्मात् । अत्रेति अस्याङ्गतायामपकृष्टस्य समस्ततल्लक्षणोपेता केवलं [8]शुष्कैरक्षरैरनर्थकैः झण्टुमाद्यैः । अन्ये त्वेकस्यामेव ध्रुवायां शुष्कावकृष्टत्वधर्मद्वयविषयोऽयं "युक्तायामपकृष्टाया"मिति श्लोको भविष्यतीति मन्यन्ते ।

उपाध्यायास्तु शुष्कायामवकृष्टायामेवान्तर्भूतं फलं वक्ष्यते । अत्र तु शुष्कैव लक्ष्यते । अनेन च लक्षणेनावकृष्टापि सूचितात्रेतीयमिति च पदाभ्याम् । अभिनीयत इत्यभिनयो रूपकविशेषः । सोऽवतार्यते संक्षेपेण तस्यार्थप्रयोजनादिनिरूपणपाठ्यद्वारेण, तथैव चाभिनयः क्रियते यत्र, तदङ्गस्यैव भाविनो

1 ड - यत्र 2 न - ह्यपकृष्टा, 3 ड - दर्शितम् 4 थ - नवगुर्वक्षराणीह षल्लघूनि द्वयं गुरोः । शुष्कावकृष्टा तु भवेत्कलात्वष्टौ प्रमाणतः ॥ यथा— दिग्ले दिग्ले दिग्ले दिग्ले जंबुकजगतिक झण्टुम् ॥ यस्मा . .. 5 द - नयस्तत्र न - नयोह्यत्र 6 द - धर्मते·

1 शुष्कानुकारेणादिष्टा 2 इहचासावेव 3 अन्यात्वनुवादद्वारेण 4 अन्या-वान्तरकालं·यद्वक्ष्यते युक्तायामपकृष्टायां 5 कृष्टहेतोस्तु गीयते 6 ह्यपकृष्टास्तु पापतः 7 कस्मात् 8 शुष्कैर्धैं·

शृङ्गारस्य प्रचरणाच्चारी सम्परिकीर्तिता ।
रौद्रप्रचारणच्चापि[1] महाचारीति कीर्तिता[2] ॥ २८
विदूषकः सूत्रधारस्तथा वै पारिपार्श्वकः ।
यत्र कुर्वन्ति सञ्जल्पं तच्चापि त्रिगतं मतम्[3] ॥ २९
उपक्षेपेण काव्यस्य[4] हेतुयुक्तिसमाश्रया[5] ।
सिद्धेनामन्त्रणा या तु[6] विज्ञेया सा प्ररोचना ॥ ३०

रूपकस्य द्वारमिव । रङ्गद्वारादुत्थापनाङ्गे सामान्येन नाट्यमुत्थापितम् । इह तु रूपकविशेषेणेति भेदः । शृङ्गारस्येति । शृङ्गारप्रधानं भगवतो महादेव्या सह यत्र चरितं वर्ण्यते काव्ये च तत्स्तुतिप्रधाने तदेव यत्राङ्गहारचार्यादेना प्रदर्श्यते सा चारी । [1]भगवतस्त्रिपुरमर्दनादिव गीतं रौद्ररसभूयिष्ठं यत्र काव्ये वर्ण्यते स्तुतिरूपेण तद्यत्र तदुचितैरेवोद्धतैर्मण्डलाङ्गहारैः प्रयुज्यते सा महाचारी ।

विदूषक इति । पारिपार्श्विकयोरन्यतरो विदूषकवेषभाषाचारो विदूषकः । सञ्जल्पो भविष्यन्नाटकादिविशेषो यद्यप्युक्तः तथापि तद्विशेषो नागानन्दादिविवक्षित इत्यपौनरुक्त्यम् । स एव काव्योपक्षेपस्त्रिषु समाप्तत्वात्त्रिगतशब्देनोक्तः । तेन काव्योपक्षेपेण हेतुभूतेन तद्विषये सामाजिकानां या आमन्त्रणा निमन्त्रणं सिद्धेन सिद्धयोपलक्षितमित्यर्थः । यस्मात्खल्वतः प्रीत्युत्पत्तिर्भविष्यति तस्मादवलोक्यतामेतदिति सा प्ररोचना प्रकृष्टरुचिहेतुभूतत्वात् । न च तद्वचनात्प्रवृत्तिर्भविष्यतीत्याह हेतुयुक्तिरिति । हेतोर्वा युक्तिर्योजना संक्षेपेणाभिधानं तन्निमित्तमस्या इति ।

एवमेतानि बहिर्यवनिकाङ्गान्यपि दश दृष्टफलान्येव । तथा हि गीतकवर्धमानान्युपजीव्य ध्रुवागानं "नाट्यमतिप्रकृतेरुपजीव्यत्वादवश्यं प्रथमं ["बुद्धौ क्वाति(कर्तव्यम् ?) .... ततोऽपि यदारभ्यते तदा] बुद्धौ

---

1 द - रौद्रप्रचलनाच्चापि 2 न - संज्ञिता 3 द - स्मृतम् 4 ड - कार्यस्य 5 क - हेतुयुक्तिव्युपक्रिया 6 न यान्तु, ड - या च.

---

1 रुद्रस्य त्रिपुरान्तकप्रभृतिपूजाकर्ण्यवस्तून् रोचयते यत्कर्म तत्प्रध्वंसनादि तदभिधायकं काव्यं यत्र(क) 4 या च 7 बुद्धया ।

अतः परं प्रवक्ष्याम्याम्याश्रावणाविधिक्रियाम् ।
[1]बहिर्गीतविधौ सम्यगुत्पत्तिं कारणं तथा ॥ ३१
चित्रदक्षिणवृत्ते तु[2] सप्तरूपे प्रकीर्तिता[3] ।
सोपोहने सनिर्गीते देवस्तुत्यभिनन्दिते ॥ ३२

निवेश्यं तावत्सामान्ये, ततः सदाचारपालनाय देवतावन्दनं, ततः परमाशीर्वादनमभिमुखीकरणार्थं, ततोऽपि शङ्क्यमानविघ्नशान्त्युप[1]करणीभूतस्योत्तेजनं, ततोऽपि [2]पुराकल्पद्वारेण प्रयोक्तव्यानुसन्धानं, ततोऽपि शृङ्गारवीरयोः सर्वत्र रञ्जकपरमपुमर्थताप्रकर्षादुपक्षेपः तदपि नाट्यविनेयसुकुमारजने स्वच्छन्दता (हारि) सर्वरञ्जकहास्यप्राधान्येन काव्यविशेषोद्भवनाभिधेयानुसन्धानं, तस्यापि प्रयोजननिरूपणम् । एवं यथाशास्त्रं [3]कुर्वतः आदिवाक्यपरिग्रहो लौकिकस्य वा कर्तव्यविषयमनुसन्धानं । तथैव नाट्यारम्भे गीतकपिण्ड्यादिप्ररोचनान्तं लौकिकानुसार्येव । नात्र कस्यचिदङ्गस्य सामर्थ्यलक्ष्यत्वादि चोदनीयं। सुकुमारजनविषयत्वादस्य प्रयोगस्य, तस्मान्नालौकिकं किञ्चिदेतत् । केवलं नाट्यस्य रचनाप्राधान्याद्वैचित्र्येण योजनीयमदृष्टसम्पत्तये चोति मन्तव्यमित्यलं बहुना ।

ननु भवत्येवं ; किञ्चारम्भाश्रावणादौ वेगर्गी(बहिर्गी?)तशब्दस्वरूपपदार्थः, कोऽत्र पदार्थः,कश्च(न)। तदयमर्थः—तेषामाश्रावणादीनां विधौ क्रियां प्रयोगरक्षात्मिकां, बहिर्गीतशब्दस्य च [4]वाचकत्वेन विधाने उत्पत्तिं, [5]बहिर्गीतस्य च विधौ प्रयोगे प्रयोजनरूपं कारणं वक्ष्यामि ।

तत्पुराकल्पद्वारेणाह चित्रेत्यादिना श्लोकैकादशकेन बहिर्गीतमिति स्मृतमित्यन्तेन (५-४२)। गीतवाद्यगीतोभयप्रधानक्रमेण चित्रादयो वृत्तिमार्गा चित्रदक्षिणसहिता वृत्तिरिति मध्यमपदलोपी समासः । तद्विषयं यद्गीतकं सहोपोहनप्रत्युपोहनैः, वर्धमाननिर्गीतेन च "आश्रावणा तथारम्भ" इत्यादिना अष्टाविंशे (एकोनत्रिंशे ?)ऽध्याये वक्ष्यमाणेन सहितं, देवस्तुत्या च

1 क - बहिर्गीतविधिः । 2 क - व्यक्ते तु, द - वृत्तौ तु 3 द - प्रवर्तते.

1 करण 2 विशेषणद्वारेण 3 कुर्वन्तः 4 पावकत्वेन 5 उपपत्तिं.

नारदाद्यैस्तु[1] गन्धर्वैः सभायां देवदानवाः ।
निर्गीतं[2] श्राविताः सम्यग्लयतालसमन्वितम्[3] ॥ ३३
तच्छ्रुत्वा[4] तु सुखं गानं देवस्तुत्यभिनन्दितम् ।
अभवन्क्षुभिताः सर्वे मात्सर्याद्दैत्यराक्षसाः[4] ॥ ३४
सम्प्रधार्य च तेऽन्योन्यमित्यवोचन्नवस्थिताः ।
[5]निर्गीतं तु[6] सवादित्रमिदं गृह्णीमहे वयम् ॥ ३५
सप्तरूपेण सन्तुष्टा देवाः कर्मानुकीर्तनात् ।
[7]वयं गृह्णीम निर्गीतं तुष्यामोऽत्रैव सर्वदा[8] ॥ ३६
ते तत्र तुष्टा दैत्यास्तु साधयन्ति पुनः पुनः ।
[9]रुष्टाश्चापि ततो देवाः प्रत्यभाषन्त नारदम् ॥ ३७

वाच्यभूतयाभिनन्दितं समृद्धं [1]युक्तं, तस्मिन्प्रवर्तिते प्रयुक्ते सति, तद्गानं गीयमानं सुखजनकमपि श्रुत्वा दैत्याः क्षुभिताः, कुतः मात्सर्यात्, तदपि कुतः, आह—देवैरहो रम्यं साधुसाध्वित्यादिभिः स्तुतिभिरभिनन्द्यमानं यतः। तुरप्यर्थः । केन वा प्रवर्तितं तदित्याह नारदाद्यैरिति, तदधिष्ठितैरित्यर्थः। तदिति सप्तरूपम् । लयो द्रुतादिः । तालाः शम्यादिविशिष्टाः, त्र्यश्रश्चतुरश्रो मिश्रश्च। सम्प्रधार्येत्यनेन परितोष्टव्यम् । अन्ये(न्यत्र?) त्वत्रेति स्थितिं कृत्वावस्थिता मिश्रा । इति शब्दसूचितमुच्यमानं निर्दिशति । [त्वमिति] निर्गीतमिति। वादित्रं, तद्गतं, शुष्काख्यं वीणावाद्यम् ।

ननु किं तस्य ग्रहणे निमित्तमित्याह तुष्याम इति, स्तुतिकीर्तनाभावेऽप्याभिमानिकेन परितोषेणेत्यर्थः। दृष्टो ह्यभिमानकृतः [2]प्रीतिविशेषो यथा राजाकर्णनेऽपि । तत्रेति निर्गीते। साधयन्ति साधनं सिद्धं ब्रुवते। धातुवाद्या-

---

1 ड - नारदाद्यैश्च 2 द - उद्गीतं 3 न - प्रमुखं गानं, ड - तु समं ट - तुमुखं नागं द - तु शुभं 4 ट - सर्वं रक्षसाः। 5 ट - निर्जितं 6 ट - सुवादित्रं 7 ड - एवं 8 प - अत्र तुष्यामहे तराम् द - निर्जित्य तुष्यामोऽत्रैव वै वयम् 9 ड - तुष्टाश्चापि·

---

1 युद्धं 2 प्रीतौ विशेषो 3 धातवस्तत्र.

एते तुष्यन्ति निर्गीते दानवाः सह राक्षसैः ।
[1]प्रणश्यतु प्रयोगोऽयं कथं वै[2] मन्यते भवान् ॥ ३८
देवानां वचनं श्रुत्वा नारदो वाक्यमब्रवीत् ।
धातुवाद्याश्रयकृतं निर्गीतं मा प्रणश्यतु ॥ ३९
किन्तूपोहनसंयुक्तं धातुवाद्यविभूषितम् ।
भविष्यतीदं निर्गीतं सप्तरूपे[3] विधानतः ॥ ४०
[4]निर्गीतेनावनद्धाश्च दैत्यदानवराक्षसाः ।
न क्षोभं न विघातं च करिष्यन्तीह तोषिताः ॥ ४१
[5]एवं निर्गीतमेतत्तु दैत्यानां स्पर्धया द्विजाः ।
देवानां बहुमानेन [6]बहिर्गीतमिति स्मृतम् ॥ ४२

श्रयकृतमिति [3]धातवस्तन्त्रीविशेषाङ्गुलिविशेषसंयोगजा वैण[व]स्वरा, रञ्जनया अदृष्टाविशेषस्य, क्रमेण चतुष्टयपृथक्कृता, विस्तारव्यञ्जनाविद्धकरणसंज्ञाधातुवाद्यं सप्तभेदलक्षणं तस्य, यदाश्रयणं तेन हेतुना कृतमिति चित्तं तत्तादृशेनादृष्टको गुणो न त्वनष्टे स्तुतिनिरूपणेषु यद्विधानं तेन हि पूर्वमध्यान्तेषु प्रयुज्यमानेन वीणावाद्यवैचित्र्यावकाशदायिना हृद्यतागातिकादिकन्यायादिगुणान्तरमप्याह निर्गीतेनेति । अव अवखेलनमयत्नेन बालहेवाकपोषणन्यायेन बद्धाः स्वीकृता इत्यर्थः ।

एवमविनाशकारणं प्रतिपाद्य संज्ञानिर्वचनं रूपयति एवमिति । निर्गीतमिति तावद्वाद्यं नाम, निरर्थकं गीतमिति । तत्तु गन्धर्वैर्बहिर्गीतमिति स्मृतम् । कुतो दैत्यानां स्पर्धयेति । तत्कृतोऽयं स्वीकारः, ततो हेतोः ।

ननु यदि स्वीकृतं ततः किमित्येषा संज्ञा कृता, अत आह देवानामिति । देवकर्मकं यद्बहुतयोत्कृष्टतया मननं तेन प्रयोजनभूतेन वयं देवान्दानवेभ्यो बहुत्वेन मन्यामहे तथा चेदं नाभ्यन्तरं बाह्यं गीतमस्माभिर्गीयत इति तैरेव वेदितव्य इत्यर्थः ।

1 द - प्रणश्यतां 2 न - वा 3 ड - सप्तरूपविधानतः 4 न - निर्गीतानां च बन्धाश्च 5 ड - एतन्निर्गीतमेवं तु 6 ड - बहुगीत-

धातुभिश्चित्रवीणायां गुरुलघ्वक्षरान्वितम्।
वर्णालङ्कारसंयुक्तं प्रयोक्तव्यं बुधैरथ ॥ ४३
निर्गीतं गीयते यस्मादपदं [1]वर्णयोजनात्।
असूयया च देवानां [2]बहिर्गीतमिदं स्मृतम्॥ ४४
निर्गीतं यन्मया प्रोक्तं सप्तरूपसमन्वितम्।
उत्थापनादिकं यच्च तस्य कारणमुच्यते ॥ ४५
आश्रावणायां युक्तायां दैत्यास्तुष्यन्ति [3]नित्यशः।
[4]वक्त्रपाणौ कृते चैव नित्यं तुष्यन्ति दानवाः॥ ४६

ननु सप्तरूपक एव किमिदं प्रयोज्यं, नेत्याह धातुभिरिति । चित्रा नाट्योपरञ्जनार्था या वीणा तस्यामप्येतद्धातुभिरुक्तस्वरूपैः करतलनिष्कोटितादिभिरुपलक्षितं प्रयोज्यम्। कथं, भाण्डवाद्ये गत्यर्थे यानि गुरूणि "घृत् दृङ्" इत्यादिकानि, लघूनि "मटकट" इत्यादिकानि, तत्रान्वितं कृत्वा। अनेन भाण्डवाद्योपरञ्जकत्वमुक्तम् । तथा ध्रुवागाने ये स्थाय्यादयो वर्णाः, ये च प्रसन्नादिप्रभृतयोऽलङ्कारास्तत्र सम्यग्युक्तं संनद्धं कृत्वा, अनेन गानोपरञ्जकत्वं दर्शितम्। अथशब्दोऽप्यर्थे। योजितः बुधैरिति योजनाकुशलैः ।

ननु निर्गीतसंज्ञास्य या पुराणी तत्र किंनिमित्तमित्याशङ्क्याह निर्गीतमिति। पदमित्यर्थप्रत्यायकमित्यर्थः, वर्णा झंङ्मादयः स्थाय्यादयश्च। ननु लक्षणाभ्यन्तर एव तदिति कथं बाह्यमित्याशङ्क्याह असूयया चेति तैर्यतोऽसूयितं बलादेवाविष्कृतबहुमानैः, अतस्तदीयहृदयग्रहणायैवं व्याहृतम्। न च सर्वथा निर्णिबन्धनमेवेदमिति दर्शयितुं चकारेणान्वर्थताप्यस्तीति सूचयति, गीयमानेभ्यः पदेभ्यः सार्थकेभ्यः पदेभ्यो बहिर्गीतमिति।

एवमविनाशिकारणं संज्ञानियोजननिमित्तं च तेनैव क्रमेणाभिधाय प्रतिजानीते निर्गीतमित्यादिना। [1]आश्रावणादिनिर्गीतं सप्तरूपसमन्वितमिति गीतकविधिः। उत्थापनादिकमित्यवशिष्टं बहिर्यवनिकाङ्गं तस्य कारणं प्रयोजनं तद्दर्शयति आश्रावणायामित्यादिना भूतगणो भवेदित्यन्तेन श्लोकाष्ट

---

1 ङ. वर्णयोजनम्। 2 च. बहिर्गीतमिति। 3 ङ. सर्वशः। 4 ङ. वज्रपाणौ।

परिघट्टनायां[1] तुष्टा युक्तायां रक्षसां गणाः ।
[2]सङ्घोटनाक्रियायां तु तुष्यन्त्यपि च गुह्यकाः ॥ ४७
मार्गासारितमासाद्य [3]प्रीता यक्षा भवन्ति हि ।
गीतकेषु प्रयुक्तेषु [4]देवास्तुष्यन्ति नित्यशः ॥ ४८
वर्धमाने[5] प्रयुक्ते तु रुद्रस्तुष्यति सानुगः ।
[6]तथा चोत्थापने युक्ते ब्रह्मा तुष्टो भवेदिह ॥ ४९
तुष्यन्ति लोकपालाश्च प्रयुक्ते परिवर्तने ।
नान्दीप्रयोगेऽथ[7] कृते [8]प्रीतो भवति चन्द्रमाः ॥ ५०
युक्तायामवकृष्टायां प्रीता नागा भवन्ति हि ।
तथा शुष्कावकृष्टायां प्रीतः पितृगणो भवेत् ॥ ५१
रङ्गद्वारे प्रयुक्ते तु विष्णुः प्रीतो भवेदिह ।
जर्जरस्य प्रयोगे तु तुष्टा विघ्नविनायकाः ॥ ५२
तथा चार्यां प्रयुक्तायामुमा तुष्टा भवेदिह ।
महाचार्यां प्रयुक्तायां तुष्टो भूतगणो भवेत् ॥ ५३

केन । प्रत्याहाराद्याश्रावणायामेवान्तर्भूतं अवधित्वादस्याः । कस्मिंश्चित्पुस्तके—

"प्रत्याहारे यातुधानाः प्रीयन्ते सह पन्नगैः
तुष्यन्त्यप्सरसस्तत्र कृतेऽवतरणे द्विजाः
तुष्यन्त्यपि च गन्धर्वा आरम्भे सम्प्रयोजिते"

इति सार्धश्लोको दृश्यते. यादृच्छिकसम्प्रधारितपरिग्रहबहुमानकृतः परितोषविशिष्टविषयो मन्तव्यः। मार्गासारितशब्देनैकदेशेन सर्वमङ्गं लक्षितम्। आसारितशब्देनासारितविधिरिति समाहारद्वन्द्वेन द्वयोरङ्गयोः फलमेतन्निरूपितम्। देवा रुद्र इति। तदियंकर्मस्तुतेः। एतच्च गीतकवर्धमानयोरन्यतरप्रयोगे वैकल्पिकं फलद्वयम्।

---

1 प - परिघट्टनया 2 ड - सङ्घोटनक्रियायां च 3 न . तुष्टा 4 ड - गीतास्तुष्यन्ति 5 न - वर्धमान प्रयुक्तेषु 6 तथोत्थापनके 7 च - प्रयोगे च 8 त तुष्टो। 9 न - भूता भवन्ति हि ड - रङ्गप्रयोगमाचार्यं।

(प्रत्याहारे यातुधानाः प्रीयन्ते सह पन्नगैः ॥ ५४
तुष्यन्त्यप्सरसस्तत्र कृतेऽवतरणे द्विजाः ।
तुष्यन्त्यपि च गन्धर्वा आरम्भे सम्प्रयोजिते ॥५५
आश्रावणादिचार्यन्तमेतद्दैवतपूजनम् ।
पूर्वरङ्गे [1]मया ख्यातं तथा चाङ्गविकल्पनम् ॥ ५६
[2]येन तुष्यति यो देवो यस्य यन्मनसः प्रियम् ।
तत्तदा पूर्वरङ्गे तु मया प्रोक्तं द्विजोत्तमाः ॥ ५७

ब्रह्मेति ब्रह्मादिप्रथमसृष्टिव्यापारःतत्र नाट्यविषयः,स चात्र पुष्पाञ्जलिना पूज्यते चन्द्रमा इति "जितं सोमेने"ति (१-९९) नान्द्यां पाठात् । नागा इत्यवकृष्टगतिः, जर्जरस्येति शुष्कावकृष्टालक्षणस्यैवाङ्गस्य शेषभूतो जर्जरस्तुतिप्रदर्शकः श्लोको वक्ष्यते "ततः श्लोकं पठे देक"(५-११५)मिति । तस्येदं प्रयोजनं—विघ्नानां यो विनायको निवारयिता स तुष्टो भवति । तन्निवारणोपकरणसमुत्तेजनाद्विघ्नविनायका विरूपाक्षादयः ते विघातं न कुर्वन्तीति । सैव फलसाम्यात्तुष्टिरेषामिति केचित् । उमेति तस्या एव स्वरूपकीर्तनात् ।

एतत्सर्वमुपसंहर्तुमाहाश्रावणादीत्यादि कृतानित्वित्यन्तं श्लोकचतुष्टयम् । प्रत्याहारादीनामाश्रावणायामन्तर्भावः चारीशब्देनेह महाचारीत्रिगतप्ररोचनयोर्दृष्टैकप्रयोजनमिति तात्पर्यम् । पूर्वरङ्ग इति तदुपश्लिष्टमित्यर्थः । ख्यातमित्युद्देशेनाङ्गानां चैषां विकल्पनं लक्षणमित्यर्थः । देवस्तुष्यतीत्यादिना प्रयोजनोपसंहारः । मनसः प्रियमित्यभिमानपरिग्रहबलादित्यर्थः । प्रशंसामस्य दर्शयति सर्वैर्दैवतैः पूजार्हं प्रशंसनीयं, अत्र हेतुः—यतो दैवतान्यनेन पूज्यन्तेऽत एव प्रेक्षापतिप्रयोक्तृप्रभृतीनामेव । तद्धनेषु यशस्यायुषि तत्साधु,तत्कारित्वान्नात्र कश्चिदपि (काचिदपि?) विरक्तिरिति ।

---

1 न - समाख्यातं 2 न - येन तुष्यन्ति ये देवा, ड - देवस्तुष्यति ।

सर्वदैवतपूजार्हं सर्वदैवतपूजनम् ।
[1]धन्यं यशस्यमायुष्यं पूर्वरङ्गप्रवर्तनम् ॥ ५८
दैत्यदानवतुष्ट्यर्थं सर्वेषां च दिवौकसाम् ।
निर्गीतानि सगीतानि पूर्वरङ्गकृतानि तु ॥ ५९
[या विद्या यानि शिल्पानि या गतिर्यच्च चेष्टितम् ।
लोकालोकस्य जगतस्तदस्मिन्नाटकाश्रये ॥] ६०
निर्गीतानां सगीतानां वर्धमानस्य चैव हि ।
ध्रुवाविधाने वक्ष्यामि लक्षणं कर्मचैव हि ॥ ६१
प्रयुज्य गीतकविधिं वर्धमानमथापि च[2] ।
गीतकान्ते ततश्चापि कार्या ह्युत्थापनी ध्रुवा ॥ ६२
आदौ द्वे च चतुर्थं चाप्यष्टमैकादशे तथा ।
गुर्वक्षराणि जानीयात्पादे ह्येकादशाक्षरे ॥ ६३

दैत्येति निर्गीतं दैत्यादिकस्य तुष्टिकृत्, गीतकादि च देवानां, नन्वस्य लक्षणं कुतो ज्ञेयं, यत इह तावन्नोक्तं, न चाङ्गप्रसङ्गतः लक्षणमस्य पश्यामो वयमित्याशङ्क्य प्रसङ्गादत्र लक्षणं वक्ष्यामीति प्रसङ्गावकाशं दर्शयितुमाह निर्गीतानामिति । तेषां लक्षणं "तथा रुन्द्रे"ति लक्ष्यमुदाहरणं वक्ष्यामि ध्रुवाणां विधाने (२९-३२) कर्तव्ये सतीत्यर्थः, न तु ध्रुवाध्याये [च वक्ष्यामि]।

एतदुक्तं भवति—ध्रुवागानस्येहोपरञ्जकज्येष्ठतया तस्य वक्तव्यप्रकृतिभूतं गान्धर्वं ज्ञातुं यत्तल्लक्षणं वक्ष्यते तत्रैतत्ततातोद्यविधाने तालाध्याये च वक्ष्यामि। एतदविदितत्वद्ध्रुवाशब्दोऽत्र छन्दोनिबद्धनिमित्ता(त्त?)निर्गीतत्वे वर्तत इत्याहुः। तदसत्, अनुक्तसमत्वादस्य तद्विधाने तल्लक्षणं वक्ष्यामीति न किञ्चित् । अनार्षेयः श्लोक इति तु महत्साहसम् ।

अथोत्थापनादीनां लक्षणशेषः पूरयितव्यः । तत्रोत्थापनस्यानुवादपूर्वकध्रुवालक्षणतत्प्रयोगद्वारेण पूरणं कर्तुमाह प्रयुज्येत्यादि

---

1 ड धर्म्यं 2 वर्धमानं तथैव च ।

चतुष्पदा भवेत्सा तु [1]चतुरश्रा तथैव च ।
चतुर्भिस्सन्निपातैश्च[2] त्रिलया त्रियतिस्तथा ॥ ६४
परिवर्ताश्च चत्वारः पाणयस्त्रय एव च ।
जात्या चैव हि विश्लोकास्तांश्च तालेन योजयेत् ॥
[3]शम्या तु द्विकला कार्या तालो द्विकल एव च ।
पुनश्चैककला [4]शम्या सन्निपातः [5]कलात्रयम् ॥ ६६

योजयेदित्यन्तं श्लोकचतुष्टयम् । तत्र प्रथमः श्लोकोऽनुवादकः । गीतकवर्धमानयोरन्यतरत्प्रयुज्यते गीतकान्ते ततो वा वर्धमानादनन्तरमुत्थापनी ध्रुवा कार्येत्यनुवादः । चो भिन्नक्रमो वार्थे । अन्ये तु समुच्चये निपातसमुदायं युगपद्गीतकवर्धमानप्रयोगाशयेनाहुः । ध्रुवाया लक्षणमादौ द्वे चेति, शेषाणि तु लघूनि । एवम्भूताश्चत्वारोऽस्याः पादाः । तालश्चास्याश्चच्चत्पुटः द्विकलो भाविविधिना तल्लाभेऽपि चतुरश्रग्रहणाद् द्विकलचच्चत्पुटपादभागविषयो वक्ष्यमाणाङ्गुलिनियमोपजीवनार्थः । सर्वपादान्ते यतोऽस्याः सन्निपातस्तेन चतुस्सन्निपाता । द्रुतादयो लयाः स्रोतोगतादयो यतयः । [1]परिवर्ता गानक्रियाभ्या(सा)वृत्तयः[2] । ते चत्वारः । समपाणिरवरपाणिरुपरिपाणिश्चेति त्रयः पाणयोऽस्यां कार्या इति शेषः । किम (मि?)यं ध्रुवा वृत्तजातिमध्ये न गणितेत्याशङ्क्याह विश्लोकाख्यवृत्तजातिरियम्—

"आद्यं चतुर्थमपि चाष्टमकं सैकादशं यदि भवेच्च गुरु ।
सा त्रैष्टुभे भवति पादविधौ विश्लोकजातिरवक्रष्टकृता" (३२-१४९)

चतुरश्रेति । तालेन योजयेदिति च यदुक्तं तत्स्पष्टयति, शम्या त्वित्यादि, द्विकलचच्चत्पुटस्य शम्यादेः स्वरूपमनेन दर्शितम् । स तत्र सापि सशब्दपातगतहस्तं निर्वर्त्यैव पूर्वादिशब्दाद्द्विकलेति दर्शयति द्विकलेत्यादिना । तेन निष्क्रामशम्ये दक्षिणेन, पुनः निष्क्रामतालौ, वामेन, ततो दक्षिणेन शम्या, ततो द्वाभ्यां प्रवेशनिष्क्रामसन्निपाताः । तत्र —

1 न - चतुरस्रे प्रमाणतः 2 ढ - सन्निपातैस्तु 3 प - शम्पा तद्द्विकला
4 प - शम्पा 5 न - कलात्रये । ड - कलाश्रये ।

1 परिवृत्ताः 2 क्रियावावृत्तयः ।

एवमष्टकलः कार्यः सन्निपातो विचक्षणैः ।
चत्वारः सन्निपाताश्च[1] परिवर्तः स उच्यते ॥ ६७
पूर्वं [2]स्थितलयः कार्यः परिवर्तो विचक्षणैः ।
तृतीये सन्निपाते तु [3]तस्य भाण्डग्रहो भवेत् ॥ ६८
एकस्मिन्परिवर्ते तु गते प्राप्ते द्वितीयके ।
कार्यं मध्यलये तज्ज्ञैः सूत्रधारप्रवेशनम् ॥ ६९
पुष्पाञ्जलिं समादाय [4]रक्षामङ्गलसंस्कृताः ।
[5]शुद्धवस्त्राः सुमनसस्तथा चाद्भुतदृष्टयः ॥ ७०
स्थानन्तु वैष्णवं कृत्वा सौष्ठवाङ्गपुरस्कृतम् ।

आवापसंज्ञकं ज्ञेयमुत्तानाङ्गुलिकुञ्चनम् ।
अधस्तलेन हस्तेन निष्क्रामोऽन्त्य(ल्प?)प्रसारणम् ।
भूयश्चाकुञ्चनं ज्ञेयं प्रवेशाख्यमधस्तलम् ।
शम्या दक्षिणपातस्तु तालो वामेन कीर्तितः ।
उभयोः सन्निपातः स सन्निपात इति स्मृतः ॥ (अ-३२?)

चत्वारः सन्निपाता इति । पादचतुष्टयस्यापि परिवर्तनमाह स्थितलयो विलम्बितलय उक्तः तृतीय [उक्त] इत्यन्त्यकलावर्जितपादत्रयं तन्त्रीगानसमन्वितं प्रयुज्य तृतीयपादान्त्यकला, ततः प्रभृति पुष्करवाद्यप्रयोगो यावच्चतुर्थपादसमाप्तिः, पुनर्मध्यलयेन गानं, तत्समये सूत्रधारप्रवेशः । तस्येति प्रथमपरिवर्तस्य । प्रथममपि च गानमन्यद्द्वितीयादिसाहचर्यात्परिवर्तशब्देनोच्यते । अन्यद्द्विः पचतीति [1]त्रयः पाकाः स्युः । सकृत्पचतीति द्वौ स्याताम् । सूत्रधारशब्देन तत्साहचर्यात्पारिपार्श्विकावपि। तेषां [2]प्रयोग इति वक्तव्यतामाह पुष्पाञ्जलिमित्यादिना । पूर्वपुष्पाञ्जलिः सूत्रधारस्यैव, इतरयोर्भृङ्गारजर्जरधरत्वेन वक्ष्य-

---

1 द - सन्निपातास्तु 2 ड - स्थितिलयः । न - सितलयः ढ - स्थितलये । 3 न - तस्या 4 न - रक्षां मङ्गलसंस्कृताम् । ड - रक्ष्यमङ्गलसंस्कृताः । 5 ड - शुद्धवर्णाः ।

---

1 भूयः 2 प्रवेश इति ।

दीक्षिताः शुचयश्चैव प्रविशेयुः समं त्रयः ॥ ७१
भृङ्गारजर्जरधरौ भवेतां [1]पारिपार्श्विकौ ।
[2]मध्ये तु सूत्रभृत्ताभ्यां [3]वृतः पञ्चपदीं व्रजेत् ॥ ७२
पदानि पञ्च गच्छेयुर्ब्रह्मणो यजनेच्छया ।
सूचीं वामपदं दद्याद्विक्षेपं दक्षिणेन च ॥ ७३

माणत्वात्। शुद्धं शुक्लम्। शोभनं सविस्मयं मनः येषां विस्मयश्च,ये श्रुत्यादिभिः दुर्विनयास्तेऽस्माभिः सुखेन विनीयन्त इति।

"या चाकुञ्चितपक्ष्माग्रा साश्चर्योद्वृत्ततारका।
सौम्या विकसितान्ता च साद्भुता दृष्टिरद्भुते" (८-४८)

सौष्ठवेत्यादिना। लक्षणैकदेशेन वैष्णवमेव स्फुटयति। अन्यथा विष्णुत्वादावपि कस्य चित्सम्भावना भवेदन्वर्थतया।

"द्वौ तालावर्धतालश्च पादयोरन्तरं भवेत्।
तयोः समस्थितश्चैकः त्र्यश्रः पक्षगतोऽपरः।
किञ्चिदञ्चितजङ्घं च सौष्ठवाङ्गपुरस्कृतम्।
वैष्णवं स्थानमेतद्धि" (१०-५२)

दीक्षिता इति कृतोपवासाः। भृङ्गारः शौचाय। जर्जरो विघ्नशान्त्यै। परिपार्श्वे भवौ परिपार्श्विकौ। अत एव सूत्रधारो मध्ये द्वाभ्यां वृतस्सन्निति त्रयोऽपि पञ्चपदीं व्रजेदित्यर्थः। तत्प्रयोजनमाह पदानीति। त्रयस्ताला अन्तरं मानं यस्य तादृशो विष्कम्भः। ऊर्ध्वगमने परिमाणं यस्य चरणस्य तं पार्श्वोत्थानेन न तु स्पष्टतरोर्ध्वतयोत्थितं चरणं मध्ये द्वयोः पातयेत्, गमनस्य प्रक्रान्तत्वात्। किञ्चित्पुरत, इत्थमेवान्यानि चत्वारि पदानि।

अथ यदर्थं पञ्चपदविक्षेपः कृतस्तं पुष्पाञ्जलिविमोक्षं सेतिकर्तव्यताकमाह सूचीमित्यादि।

कुञ्चितं पादमुत्क्षिप्य जानूर्ध्वं सम्प्रसारयेत्।

---

1 न - पारिपार्श्वकौ 2 न - मध्येच 3 न - वृत्तः 4 ड - व्याख्यास्यामि यथाक्रमम्।

1 स्पष्टतरोर्ध्वतया।

त्रितालान्तरविष्कम्भमुत्क्षिपच्चरणं शनैः ।
[1]पार्श्वोत्थानोत्थितं चैव तन्मध्ये [2]पातयेत्पुनः ॥ ७४

[3]एवं विष्णुपदीं कृत्वा सूत्रधारः सहेतरः ।
सूचीवामपदं दद्याद्विक्षेपं [4]दक्षिणेन च ॥ ७५

पुष्पाञ्जल्यपवर्गश्च कार्यो [5]ब्राह्मेऽथ मण्डले ।
रङ्गपीठस्य मध्ये तु स्वयं ब्रह्मा प्रतिष्ठितः ॥ ७६

ततः सललितैर्हस्तैरभिवन्द्यः[6] पितामहः ।
[7]वन्दनान्यथ कार्याणि त्रीणि हस्तेन भूतले ॥ ७७

[8]कालप्रकर्षहेतोश्च [9]पादानां [10]प्रविभागतः ।
सूत्रधारप्रवेशाद्यो [11]वन्दनाभिनयानुगः ॥ ७८

द्वितीयः [12]परिवर्तस्तु कार्यो मध्यलयाश्रितः[13] ।

"पातयेच्चाग्रयोगेन सा सूची परिकीर्तिते"ति (१०-३२)

पृष्ठदेश इति शेषः । तस्य पादस्य वहिः क्षेपः, मण्डलं स्थानं, किन्तद्। ब्राह्ममित्याह, रङ्गपीठस्येति; अभिवादनानीत्यर्थः । त्रीणीति । प्रत्येकं कथं वन्दनं कार्यमित्याह—कालस्य यः प्रकर्षो बहुतरत्वं तत्र । चो हेतौ। नृत्तहस्तकरणप्रयोगात्मकमवलम्ब्य ननु किलासौ कालप्रकर्षः, आह पादानामिति । तदुपलक्षितानां कलानां यः प्रविभागः, कालपरिमाणान्तरमाश्रित्य ।

ननु तासामपि को विधिरित्याशङ्क्याह सूत्रधारप्रवेशाद्य इति । एतदुक्तं भवति—द्वात्रिंशत्कलानां मध्ये प्रवेशः पञ्चपदीगमनं पुष्पत्यागोऽभिवादनत्रयं चेति निर्वर्तनीयम् । तत्र यावतीषु कलासु पञ्चपदीगमनान्तं कर्म सम्पन्नं ततो या अवशिष्यन्ते कलास्तदभिवादनयोग्यं व्यावर्तितपरिवर्ति-

---

1 न - पार्श्वं स्थानोत्थितं चैव 2 म - स्थापयेत्पुनः । 3 ड - एवं पञ्चपदीं-गत्वा 4 ड दक्षिणेन तु । म - दाक्षिणस्य तु 5 य - ब्राह्मे च 6 ड - अभि-वन्द्य पितामहम् 7 ड - अभिवादनानि 8 न - कालप्रहर्षहेतोस्तु 9 पातानां 10 त - प्रविभागशः । 11 न - वन्दनाभिनयान्ततः कः 12 न - परिवर्तश्च 13 प - मध्यलयान्ततः । ड - मध्यलयाश्रयः ।

[1]ततः परं तृतीये तु मण्डलस्य प्रदक्षिणम् ।
भवेदाचमनं चैव जर्जरग्रहणं तथा ॥ ७९

उत्थाय मण्डलात्तूर्णं दक्षिणं पदमुद्धरेत् ।
[2]वैधं तेनैव कुर्वीत विक्षेपं वामकेन च ॥ ८०

पुनश्च दक्षिणं पादं पार्श्वसंस्थं समुद्धरेत् ।
[3]ततश्च वामवेधस्तु विक्षेपो [4]दक्षिणस्य च ॥ ८१

इत्यनेन [5]प्रकारेण सम्यक्कृत्वा प्रदक्षिणम् ।
[6]भृङ्गारभृतमाहूय शौचं चापि समाचरेत् ॥ ८२

यथान्यायं तु कर्तव्या तेन ह्याचमनाक्रिया ।
आत्मप्रोक्षणमेवाद्भिः कर्तव्यं तु यथाक्रमम् ॥ ८३

तादिकरणमुद्वृत्तनलिनीपद्मकोशादिनृत्तहस्तजातं वावलम्ब्य सललितमभिवादनत्रयं कार्यम् ।

एवं द्वितीये परिवर्ते कर्मत्रयं प्रदर्श्य, तृतीयपरिवर्ते द्रुतलये कर्मकलापमुपदिशति ततः परमिति । मण्डलस्येति, ब्रह्मस्थानस्य तत्कर्मत्रयं क्रमेण लक्षयन्प्रथमस्य लक्षणमाहोत्थायेति । अभिवादने हि जानुशिरोविनमितभूश्लेषपर्यन्तं कृतमुद्धरेदिति "कुञ्चितं पाद" (१०-३२) मित्यादि सूचीं सूचयति वेधमिति, द्वितीयपादपार्ष्णिपृष्ठे पातनं । पार्श्वसंस्थमिति पार्श्वक्रान्तां (१०-३०) चारीमाह ।

एतत्कर्मोपसंहरन्द्वितीयं शौचाख्यं लक्षयतीत्यनेनेति । आहूयेति वचनाद्भृङ्गारधारिणः प्रदक्षिणभ्रमणे तूष्णींभावेन स्थितिरिति लक्ष्यते । शौचप्रयोजनं वक्ष्यते । यतोऽभिवादने श्लिष्टं शिर इत्यादिन्यायस्मृतितः प्राङ्मुख उपविश्याबहिर्जानुरित्यादिक्रमः ।

---

1 द - अतः परं तृतीयस्तु 2 द - तेनैव वैधं 3 न - पुनश्च
4 द - दक्षिणस्य तु 5 द - विधानेन 6 द - भृङ्गारधारमाहूय

प्रयत्नकृतशौचेन सूत्रधारेण यत्नतः ।
[1]सन्निपाते समं ग्राह्यो जर्जरो विघ्नजर्जरः ॥ ८४
प्रदक्षिणाद्यो विज्ञेयो [2]जर्जरग्रहणान्तकः ।
तृतीयः परिवर्तस्तु विज्ञेयो वै [3]द्रुते लये ॥ ८५
गृहीत्वा जर्जरं [4]त्वष्टौ कला [5]जप्यं प्रयोजयेत् ।
[6]वामवेधं ततः कुर्याद्विक्षेपं [7]दक्षिणस्य च ॥ ८६
ततः पञ्चपदीं चैव गच्छेत्तु कुतपोन्मुखः ।
वामवेधस्तु तत्रापि [8]विक्षेपो दक्षिणस्य [9]तु ॥ ८७
जर्जरग्रहणाद्योऽयं [10]कुतपो निगमान्तकः ।
चतुर्थः परिवर्तस्तु [11]कार्यो द्रुतलये पुनः ॥ ८८

तृतीयं कर्म दर्शयति प्रयत्नेति । कस्मिन् सन्निपाते तद्ग्रहणमित्याशङ्कामपाकर्तुमाह प्रदक्षिणाद्य इति । तेन तुर्यपदा(परिवर्ता?)द्यसन्निपातकाले तद्ग्रहणमित्युक्तं भवति ।

अथ द्रुतलय एव चतुर्थे परिवर्ते कर्मद्वयं दर्शयति । गृहीत्वेति, । ग्रहणं धारणमिह । अष्टौ कला इति प्रथमपादगतपर्यन्तमित्यर्थः । जप्यं जपनीयं तृतीयाध्यायोक्तम् । "अत्र विघ्नविनाशार्थमित्यादि (३-७०) श्लोकचतुष्टयं प्रतिकलमर्धश्लोक इत्यनेनावसानप्रकर्षेण योजयेदुच्चारयेदिति यावत् ।

ननु पञ्चपद्यां [1]कियान्विक्षेपकाल इत्याशंक्याह जर्जरग्रहणाद्य इति, इहापि ग्रहणं धारणम् तेन चतुर्विंशत्या कलानां कुतपागमनं [2]कुर्यादिति

---

1 ड - सन्निपातसमं 2 य - जर्जरग्रहणात्ततः 3 न - द्रुतोलयः 4 न - चाष्टौ 5 न - जाप्यं 6 ड - वामवेधस्ततः कार्यो 7 ड - दक्षिणेन तु 8 न - विक्षेपोत्सर्पणान्तिकम् 9 प - च 10 ड - कुतपाभिमुखान्त गः (क) म - कुतपाभिमुखान्ततः त - कुतपोत्सर्पणान्तिकम् 11 ड - विक्षेयो वै द्रुते लये ।

---

1 कियान्कालविक्षेप 2 कार्यमिति ।

[1]करपातनिपातास्तु भवन्त्यत्र तु षोडश ।
त्र्यश्रे [2]तु द्वादशपदा भवन्ति [3]करपादयोः ॥ ८९

वन्दनान्यथ कार्याणि त्रीणि हस्तेन भूतले ।
आत्मप्रोक्षणमद्भिश्च त्र्यश्रेनैव[4] विधीयते ॥ ९०

एवमुत्थापनं कार्यं ततश्च परिवर्तनम् ।
[5]चतुरश्रं लये मध्ये [6]सन्निपातैरथाष्टभिः ॥ ९१

[7]यस्यां लघूनि सर्वाणि केवलं [8]नैधनं गुरु ।
भवेदतिजगत्यान्तु सा ध्रुवा [9]परिवर्तनी ॥ ९२

वार्तिकेन तु मार्गेण [10]वाद्येनानुगतेन च ।
ललितैः [11]पादविन्यासैर्वन्द्याद्देवान्यथादिशम्[2] ॥

[13]द्विकलं पादपतनं [14]पादचार्यां गतं भवेत् ।
वामपादेन वेधस्तु कर्तव्यो [15]नृत्तयोक्तृभिः ॥ ९४

द्वितालान्तरविष्कम्भो [16]विक्षेपो दक्षिणस्य च ।

तात्पर्यम् । षोडशेति कलाद्वयेनैकं पतनमिति यावत् । त्र्यश्र इति । प्रसङ्गादेतदुक्तम् । न चैतावत्प्रयोगात्मकमेतदङ्गमिति दर्शयितुमाहैवमित्यादि, [1]एवम्भूतायामितिकर्तव्यतायां "कृतायां यस्मादुत्थापयन्त्यत्र प्रयोगं नान्दिपाठकाः, । पूर्वमेव तु रङ्गेऽस्मि"न्निति (५-२३) श्लोकलक्षितं प्रत्याहारादीनां गीतकविध्यन्तानां प्रयोगस्य च नाट्यस्योत्थापनं व्याख्यातरूपं कार्यम् । चशब्दस्तुशब्दस्यार्थे । ततस्तु परिवर्तनं न तु ध्रुवायोगानन्तरमेव ।

---

1 ड - करपाद 2 न - द्वादशपाताहि 3 ड - करपादजाः 4 न - नहि 5 ड - चतुरश्रे 6 ड - सन्निपातैस्तथाष्टभिः 7 ड - यस्या 8 ड - निधनं 9 ड । परिवर्तिनी 10 म - वाद्येनानुहतेन - 11 ड - पदविन्यासैः 12 द न - वन्दे देवान्यथादिशाम् 13 न - विकलं 14 प - पादपर्यातं न - पादचार्यां गतिर्भवेत् 15 द - नृत्ययोक्तृभिः । 16 न - विक्षेपाद्दक्षिणस्य तु ।

1 एवं भूतायामिवेति ।

ततः पञ्चपदीं गच्छेदतिक्रान्तैः पदैरथ ।
ततोऽभिवादनं कुर्याद्देवतानां यथादिशम् ॥ ९५
वन्देत प्रथमं पूर्वां दिशं [1]शक्राधिदैवताम् ।
द्वितीयां दक्षिणामाशा वन्देत [2]यमदैवताम् ॥ ९६
वन्देत पश्चिमामाशां ततो [3]वरुणदैवताम् ।
[4]चतुर्थीमुत्तरामाशां वन्देत धनदाश्रयाम् ॥ ९७
दिशां तु वन्दनं कृत्वा वामवेधं प्रयोजयेत् ।

ये तूपसंहारग्रन्थत्वेनैतद्व्याचक्षते तस्मादुत्थापयन्तीति न तैः किञ्चिदनुस्मृतं स्यात् । न हि ब्रह्माभिवादनजर्जराभिमन्त्रणमात्रेण किञ्चिदप्युत्थापितं भवति । विघ्नशमनोपयोगित्वेनोत्थापकत्वं परिवर्तनादावपि स्यात्, उत्थापनीत्यन्वर्थत्वात्, नाट्यायितेन च प्रयोगोत्थापनान्तस्य च ध्रुवाभिनयरूपतयोचितार्थाक्षेपात् । "यत्तु काव्येन नोक्तं स्या द्गीतेने"ति तथा "गीतं प्राणाः प्रयोगस्ये"ति,

"परिक्रमेण रङ्गस्य तथैवार्थवशेन च ।
परिवर्तास्तु"

इति वचनेन गान्धर्व इव ध्रुवागाने परिवर्तनानामदृष्टार्थैतिकर्तव्यतारूपाभावात्, स्फुटश्चैषामुपाये निर्दिष्टेनोचितेनार्थचतुष्टयेन युक्तेयं सुकाविना ध्रुवा कार्येति वृद्धाः । ततश्चेति । चतुरश्रतालयुक्तध्रुवायोगात्परिवर्तनं चतुरश्रम् । पादैर्गीयत इति सन्निपाताच्च पादचतुष्टययोगात् सन्निपाताष्टकमत्र लक्षयति यस्या इति, अतिजगती त्रयोदशाक्षरा । तेन परिवृत्तिर्न (र्तनं?) चतुष्टयं गुरुः(रोः ?) वार्तिकमार्गे यत्र चतुर्मात्रा कला । गीतं यदनुगच्छत्यनुगतमेतद्भवेद्वाऽयं । पादचार्यां भौम्यामाकाशिक्यां वा कर्तव्यायां पादपतनं द्वेकले व्याप्नोति । एकस्यामुत्क्षेपोऽन्यस्यां पतनमिति यावत् । अन्ये तु शोभार्थं कलायां द्वौ पादपातौ वार्तिकमार्गे वर्णयन्ते । इत्थं व्याचक्षते—द्वित्वे वर्तयाति । एको योऽभिवर्तते न विद्यते कले यस्य पादपतनस्य तद्विकलमिति । एवं च वदन्तः पूर्वोक्त उक्ते त्यर्थः (?) (पूर्वोत्तराविरुद्धतानाभिज्ञाः?)।

---

1 ड - देवताम् 2 ड - यमदेवताम् 3 ड - वरुणदेवताम् 4 च - चतुर्थी ।

दक्षिणेन [1]च कर्तव्यं [2]विक्षेपपरिवर्तनम् ॥ ९८

प्राङ्मुखस्तु ततः कुर्यात्पुरुषस्त्रीनपुंसकैः[3] ।

[4]त्रिपदीं[5]सूत्रभृद्रुद्रब्रह्मोपेन्द्राभिवादनम्[6] ॥ ९९

दक्षिणं तु पदं [7]पुंसो वामं [8]स्त्रीणां प्रकीर्तितम् ।

[9]पुनर्दक्षिणमेव [10]स्यान्नाभ्युत्क्षिप्तं नपुंसकम् ॥ १००

वन्देत पौरुषेणेशं [11]स्त्रीपदेन जनार्दनम् ।

यस्यां लघूनि कार्याणि केवलं नैघनं गुरु ॥ १०१

पादे त्वतिजगत्यां हि सा ध्रुवा परिवर्तनी ।

नपुंसकपदेनापि तथैवाम्बुजसम्भवम् ॥ १०२

परिवर्तनमेवं स्यात्तस्यान्ते प्रविशेत्ततः ।

[12]चतुर्थकारः पुष्पाणि प्रगृह्य विधिपूर्वकम् ॥ १०३

शक्रोऽधिष्ठात्री देवता अस्या इति तां पूर्वाम् । यजेतेति विशेष्येण वा विशेषेण वेदं बध्नातीति [1]सविशेषं वन्द्यमानत्वं शक्रस्य गम्यते ।

विक्षेपपूर्वकं परिवर्तनं येनोत्तराभिमुखं स्थित्वा परिवृत्य पूर्वाभिमुखो भवति तत्र किं कुर्यादित्याह प्राङ्मुखस्त्विति । त्रिपदीं दर्शयति दक्षिणन्त्विति । तया त्रिपद्या ।

अभिवादनं दर्शयति वन्देतेति । एवं दिग्देवतावन्दनं परिवर्तन्या ध्रुवया विद्युद्दीयमानपदया कार्यम् । तस्यान्त इत्यादि । तस्येति परिवर्तस्य । सूत्रधारस्य पारिपार्श्विकयोश्च तिस्रः क्रियाः तद्व्यतिरिक्तश्चतुर्थं कर्म करोतीति चतुर्थकारो विधिः । स्थानन्तु वैष्णवमित्यादि सूत्रधारोक्तं पुष्पाणां प्रवि-

---

1 ड - तु 2 न - विक्षेपं 3 ड - स्त्रीनपुंसकौः 4 ड - त्रिपद्या 5 ड - सूत्रधृग्रुद्रं 6 च - वादिनीम् 7 ड - नृणां, न - पुंसां 8 च - स्त्रीपदमुच्यते न - स्त्रीपदमेव च । 9 ड - पुनर्दक्षिणपादं, न - पुनश्च दक्षिणं पादं ड - दक्षिणं तु पदं ज्ञेयं 10 न - जात्युत्क्षिप्तं । 11 म - स्त्रिपदेन 12 न - चतुष्पकारः ।

1 सद्विशेषं ।

[1]यथावत्तेन कर्तव्यं पूजनं जर्जरस्य तु।
[2]कुतपस्य च सर्वस्य सूत्रधारस्य चैव हि॥ १०४
तस्य [3]भाण्डसमः कार्यस्तज्ज्ञैर्गतिपरिक्रमः[4]।
न तत्र गानं कर्तव्यं तत्र [5]स्तोभक्रिया भवेत्॥ १०५
[6]चतुर्थकारपूजां तु [7]स कृत्वान्तर्हितो भवेत्।
ततो गेयावकृष्टा तु चतुरश्रा [8]स्थिता ध्रुवा॥ १०६
गुरुप्राया तु सा कार्या तथा [9]चैवार्धपाणिका।
[10]स्थायिवर्णाश्रयोपेता [11]कलाष्टकविनिर्मिता॥ १०७
चतुर्थं पञ्चमं चैव सप्तमं चाष्टमं तथा।
लघूनि पादे पङ्क्त्यान्तु सावकृष्टा ध्रुवा स्मृता॥
सूत्रधारः [12]पठेत्तत्र मध्यमं स्वरमाश्रितः।

किरणमाह यथावदिति तृतीयेऽध्याये पुष्कराध्याये(३४)च निरूपितदेवतापूजाक्रमेण। भाण्डेनैव सम इति पुष्करवाद्यमेवास्य गत्यर्थे परितः क्रमेण कार्यम्। गीयत इति गान(गीत?)मर्थवद्वाक्यम्। स्तोभानां शुष्काक्षराणां क्रियागानमित्यर्थः। स्थितेति विलम्बितलया गुरुप्रायेति। "नवगुर्वक्षराण्यादा"विति यच्छुष्कावकृष्टाया लक्षणं भविष्यति तदेवास्यामिति यावत्। "स्थिताः स्वराः समा यत्र स्थायी वर्णः सः" (२९-१९), तमाश्रिता येऽलङ्कारा वक्ष्यन्ते तैरुपेताः कलाष्टकद्विकलचच्चत्पुट उक्तपूर्वः।

एवं पूर्वामितिकर्तव्यतामभिधाय नान्दीमाह सूत्रधार इति। तत्रेत्यवकृष्टायां गीतायामित्यर्थः। तच्चत्रागानगतेन मध्यमस्वरेण पाठ इत्यतस्तस्या

---

1 ड - यथावर्तेन। 2 ड - भाण्डस्यैव च 3 ड - भाण्डगतः 4 न - गीतपरिक्रमः। 5 च - स्नानाक्रिया 6 न - चतुष्प्रकार पूजां तु 7 ड - निष्क्रमेत्सम्प्रयुज्य हि। 8 प - स्थिरा 9 ड - चैवावपाणिका 10 च - वर्णाश्रयोपेतां 11 च - विनिर्मिताम् 12 ड - पठेन्नान्दीं।

[1]नान्दीं पदैर्द्वादशभिरष्टभिर्वाप्यलंकृताम् ॥ १०९

नमोऽस्तु सर्वदेवेभ्यो [2]द्विजातिभ्यः शुभं तथा ।
जितं सोमेन वै राज्ञा [3]शिवं गोब्राह्मणाय च ॥ ११०

ब्रह्मोत्तरं तथैवास्तु हता ब्रह्मद्विषस्तथा ।
[4]प्रशास्त्वेमां महाराजः पृथिवीं च ससागराम् ॥ १११

[5]राष्ट्रं प्रवर्धतां चैव [6]रङ्गस्याशा समृद्ध्यतु ।
प्रेक्षाकर्तुर्महान्धर्मो[7] भवतु [8]ब्रह्मभावितः ॥ ११२

[9]काव्यकर्तुर्यशश्चास्तु [10]धर्मश्चापि प्रवर्धताम् ।
इज्यया चानया नित्यं प्रीयन्तां [11]देवता इति ॥ ११३

नान्दीपदान्तरेष्वेषु [12]ह्येवमस्त्विति नित्यशः ।
[13]वन्देतां सम्यगुक्ताभिर्वाग्मिनौ[14] पारिपार्श्विकौ ॥

ध्रुवाया [1]मध्यमांशको [2]जात्यंशको गृहीत इत्युक्तं भवति । एतदुपजीवनेनोक्तं कश्यपाचार्येण "पूर्वरङ्गे तु षाडव" इति ।

नान्दीं पठति नमोऽस्त्वित्यादि देवता इत्यन्तम् । पदममलावान्तरवाक्यं तदन्तरे । एवमार्येति । अन्तरशब्दो विशेषे नान्दीपदविशेष उक्त इत्यर्थः । मध्येवाचिनीत्यन्तरशब्दोऽन्त्यं पदं न स्व(स्वी?)कृतम् । वाग्रहणादपिशब्दाच्चतुष्षोडशपदत्वं चतुरश्रे पूर्वरङ्गे, त्र्यश्रे तु षट्पञ्चत्वमपि लभ्यते । एतच्च प्रथमाध्याय एवास्माभिरुक्तम् । रङ्गस्येति नटकुशीलववर्गस्य । धर्म इति "य इमं पूर्वरङ्ग"मिति वक्ष्यमाणः । एवमिति चतुर्थकारप्रवेशादितिकर्तव्यतेयमित्यर्थः ।

---

1 ड - ततः 2 ड :- द्विजातिभ्यश्च वै नमः 3 न - आरोग्यं गोभ्य एव च 4 ड - प्रशास्त्विमां महाराजः । 5 ड - राज्यं 6 ड - रङ्गश्चायं समृध्यताम् । 7 ड - महाधर्मो 8 न - ब्रह्मभाषितः म - बह्मभाषिनः 9 ड - यशश्चात्र 10 ड - नित्यमेव 11 प - दानवा 12 न - धीरो हर्षसमन्वितः 13 ड - वन्देतां न - देवतां 14 ड - सम्यगुक्ताभिर्गीर्भिः ।

---

1 मध्यमाङ्को 2 जात्यङ्को ।

एवं नान्दी विधातव्या [1]यथावल्लक्षणान्विता ।
[2]ततश्शुष्कावकृष्टा [3]स्याज्जर्जरश्लोकदर्शिका ॥ ११५
नवगुर्वक्षराण्यादौ [4]षड्लघूनि गुरुत्रयम् ।
[5]शुष्कावकृष्टा तु भवेत्कला ह्यष्टौ प्रमाणतः ॥ ११६
[6]यथा
दिग्ले दिग्ले झण्टुझण्टु जम्बुकवलितकते तेजाः ।
कृत्वा [7]शुष्कावकृष्टां तु यथावद्द्विजसत्तमाः ॥११७
तत्र श्लोकं पठेदेकं गम्भीरस्वरसंयुतम् ।
देवस्तोत्रं पुरस्कृत्य यस्य पूजा प्रवर्तते ॥ ११८
[8]राज्ञो वा यत्र भक्तिः स्यादथ वा ब्राह्मणस्तवम् ।
[9]गदित्वा जर्जरश्लोकं [10]रङ्गद्वारे च यत्स्मृतम् ॥११९

एवं नान्दीं लक्षणतः पूरयित्वा शुष्कावकृष्टाख्यमङ्गं पूरयति ततश्शुष्कावकृष्टेत्यादिना । एतत्प्रयोगानन्तरं जर्जरस्तुतिश्लोको यतः सूत्रधारेण पठ्यतेऽतो जयतेर्दर्शिका तत्पुरस्सरीत्यर्थः । शुष्कावकृष्टामात्राः, नवगुर्वक्षराणीत्युदाहरणम् । पठतीदं देव इत्यादि । यथावदित्यनेन तदनन्तरं जर्जरश्लोकपाठं सूचयति, तद्दर्शनेन तस्या उक्तत्वात् । तत्र श्लोकमित्यनेन रङ्गद्वारमङ्गं निरूपयति । देवस्य विष्णोः स्तोत्रं पूर्वं कृत्वा यां देवतामुद्दिश्योत्सवादौ नाट्यं कृतं सा तत्र स्तोतव्या । अथैव (थवैव?) मेव नाट्यं प्रवर्तितं तत्प्रेक्षापतेर्नाट्यप्रवर्तकस्याराध्यदेवता । स चेदुदासीनस्तर्हि ब्राह्मणः, अयमसौ रङ्गद्वारमुपसंहरंश्चार्याख्यमङ्गं पूरयितुम् । तत्र पूर्वेतिकर्तव्यतामाह । गदित्वेति । जर्जरश्लोकं गदित्वा यो रङ्गद्वारे श्लोकस्तं च गदित्वा जर्जरोऽपि नाम्यते, वक्ष्यमाणतुलाधृतरूपतया [2]येन श्लोकेन संवाद्यते । तादृशमन्यं श्लोकं पठेत् । अत्र

---

1 ड - यथोक्ता लक्षणैर्मया 2 न - तथा 3 न - जर्जरेणैकदर्शिका 4 म - द्विर्ले 5 ड - कलाश्चाष्टौ:प्रमाणेन पादैर्ह्यष्टादशाक्षरैः 6 ड - झण्टुं झण्टुं दिग्लेदिग्ले जम्बूकवलिततकंतेतेचाः 7 म - शुष्कापकृष्टं तु 8 ड - राज्ञो भक्तिश्च यत्रस्यादथवा 9 ड - नन्दित्वा 10 ड - रङ्गद्वारमिति स्मृतम् ।

1 तेन ।

[1]पठेदन्यं पुनः श्लोकं जर्जरस्य [2]विनाशनम्।
जर्जरं [3]नमयित्वा तु [4]ततश्चारीं प्रयोजयेत् ॥ १२०
पारिपार्श्विकयोश्च स्यात्पश्चिमेनापसर्पणम्[5] ।
[6]अड्डिता [7]चात्र कर्तव्या ध्रुवा [8]मध्यलयान्विता ॥
चतुर्भिः [9]सन्निपातैश्च चतुरश्रा प्रमाणतः ।
[10]आद्यमन्त्यं चतुर्थं च पञ्चमं च [11]तथा गुरु ॥ १२२
[12]यस्यां [13]ह्रस्वानि शेषाणि सा ज्ञेया त्वड्डिता बुधैः ।

विघ्नविनाशार्थमित्युक्तश्लोकाव्यतिरिक्तनाम्नार्थाभिधायिनं श्लोकं चार्यङ्गभूतं पठेदिति यावत् । अन्ये तु शुष्कावकृष्टानन्तरं देवतास्तोत्रमिति श्लोकः, ततो जर्जरश्लोकः, ततो विष्णुस्तुतिकृद्रङ्गद्वारश्लोकः, ततो जर्जरश्लोक इत्याहुः । पश्चिमेनेति । प्राङ्मुखावेव पृष्ठनिवृत्तिभिः पदैः पारिपार्श्विकावपसर्पेतामित्यनेन केवलसूत्रधारप्रयोज्यमानाश्चारीमहाचार्यः सूचिताः ।

ध्रुवामाहाड्डिता चात्रेति । रङ्गद्वारे चार्या चेति केचित् । अन्ये तु सन्निधानाद्रङ्गद्वारेऽवकृष्टैवेत्याहुः । अध्रुवमेव रङ्गद्वारमित्येके । चतुरश्र इति । [1]प्रस्ताराश्रित एव चच्चत्पुटे स्यात् । इह छन्दोविशेषाभिधानेऽपि नियमो वक्ष्यते । उष्णिगनुष्टुब्बृहती पङ्क्तिश्चेत्यड्डिताजातिरिति । अन्ये तु पठन्ति—

"आद्यं चतुर्थं दशममष्टमैकादशे तथा ।
गुरूणि दोधके या स्यादड्डिता नाम सा स्मृता" इति ।

"आद्यमन्त्यं चतुर्थं च पञ्चमं च तथा गुरु" । (५-२)

---

1 न - पठेदस्य 2 द - प्रकाशकम् 3 ड - मानयित्वा 4 प - ततश्चारिं 5 च - पश्चिमेनापि सर्पणम् 6 च - अहिता 7 प - चानुकर्तव्या 8 प - मध्यलयाश्रिता 9 ड - सन्निपातैस्तु 10 ड - आद्यं मध्यं नं - आद्यमन्तं 11 ड - सदा न - यदा 12 न - पङ्क्त्यां 13 ड - तु जागते पादे सा भवेदड्डिता ध्रुवा ।

---

1 प्रस्ताराश्रित ।

[1]अस्याः प्रयोगं वक्ष्यामि यथा पूर्वं महेश्वरः ॥१२३
सहोमया क्रीडितवान्नानाभावविचेष्टितैः ।
[2]कृत्वावहित्थं स्थानं तु वामं चाधोमुखं भुजम् ॥
चतुरश्रमुरः कार्यमञ्चितश्चापि मस्तकः ।
नाभिप्रदेशे विन्यस्य जर्जरं च [3]तुलाधृतम् ॥१२५
वामपल्लवहस्तेन पादैस्तालान्तरस्थितैः[4] ।
गच्छेत्पञ्चपदीं चैव [5]सविलासाङ्गचेष्टितैः ॥ १२६
वामवेधस्तु कर्तव्यो विक्षेपो [6]दक्षिणस्य च ।
[7]शृङ्गाररससंयुक्तां पठेदार्यां [8]विचक्षणः ॥ १२७

इत्यन्ये । अस्या इति चार्याः । सहोमयेति । "शृङ्गारस्य प्रचरणादुमा तुष्टे"ति चोक्तत्वादिति भावः । क्रीडितवानिति स्त्रीचेष्टितेनेति भावः । कृत्वावहित्थं स्थानन्त्वाति, अवहित्थं स्त्रीणां स्थानकम्—

"[1]पूर्वो विरचितस्त्यश्रस्तदन्योऽपसृतः समः ।
पादस्तालान्तरन्यस्तस्त्रिकमीषत्समुन्नतम् ॥
पाणिर्लताख्यो यत्रैकस्तदन्यस्तु नितम्बगः ।
अवहित्थं समाख्यातम्" (१२-१४६)

जर्जरमिति कटकामुखमध्ये स्त्रीगतौ हि वक्ष्येते ।

"नाभिप्रदेशे विन्यस्य [2]सव्यं च कटकामुखम्" इति (१२-१६०)।

वामपल्लवः—"मणिबन्धनमुक्तौ तु पताकौ पल्लवाविति" (९-१८१)। पञ्चपदीं पूर्वोक्तमेव स्मारयति । वामवेधस्त्वति । आर्यामिति । यत्र देव्या सह भगवतःपार्वतीप्रियस्य प्रणयकोपादिवर्ण्यतेऽनेनेति श्लोक आर्यैवात्र ।

---

1 न - तस्याः, ड - यस्याः 2 न - कृत्वा वहित्थं 3 ड - तुलावृतम् 4 न - तालान्तरोत्थितैः 5 प - विलासाङ्गविचेष्टितैः 6 ड - दक्षिणेन तु 7 न - ततः शृङ्गारसंयुक्तं 8 ड संयुक्तं पठेच्छ्लोकं ।

---

1 पुरा 2 सव्यं च ।

चारीश्लोकं [1]गदित्वा तु [2]कृत्वा च परिवर्तनम् ।
[3]तैरेव च पदैः कार्यं [4]पश्चिमेनापसर्पणम् ॥ १२८

[5]पारिपार्श्वकहस्ते तु न्यस्य जर्जरमुत्तमम् ।
महाचारीं ततश्चैव प्रयुञ्जीत यथाविधि ॥ १२९

चतुरश्रा ध्रुवा [6]तत्र तथा [7]द्रुतलयान्विता ।
चतुर्भिस्सन्निपातैश्च [8]कला ह्यष्टौ प्रमाणतः ॥ १३०

[9]आद्यं चतुर्थमन्त्यं च सप्तमं दशमं गुरु ।
[10]लघु शेषं ध्रुवा पादे चतुर्विंशतिके भवेत् ॥ १३१

यथा ।

[11]पादतलाहतिपातितशैलं ।
क्षोभितभूतसमग्रसमुद्रम् ॥
ताण्डवनृत्तमिदं [12]प्रलयान्ते ।
पातु [13]जगत्सुखदायि हरस्य ॥ १३२

भाण्डोन्मुखेन कर्तव्यं पादविक्षेपणं ततः ।
सूचीं [14]कृत्वा पुनः कुर्याद्विक्षेपपरिवर्तनम् ॥ १३३

अथ महाचारीप्रयोगमवतारयति पारिपार्श्विकहस्तेत्विति । तत्र ध्रुवामाह चतुरश्रेति द्विकलेनोक्तेन चच्चत्पुटेन । आद्यं चतुर्थमिति ध्रुवालक्षणम् ।

अस्याः प्रयोगमाह भाण्डोन्मुखेनेति । पश्चिमाभिमुखेन महेश्वरत्वं(यस्य)ऽ न्यस्यात्मनि तस्यात्मनीच्छता । ऊनचतुस्तालता तच्चेष्टितानुसरणाच्च । मध्यत्वेऽपि तद्द्वितालतेत्यौचित्यात्तालान्तरत्वमुक्तम् ।

---

1 ड - विदित्वा 2 न - कृत्वा तु 3 तैरेव तु 4 ड - प्राङ्मुखेनाप 5 ड - पारिपार्श्विकयोर्हस्ते 6 ड - यत्र 7 प - द्रुतलवाश्रया 8 ड - कलास्त्वष्टौ 9 ड - आद्यं चतुर्थमन्यस्य, न - आद्यमन्तं चतुर्थं च 10 लघुं चैव ध्रुवायोगे त्रैष्टुभे चरणे यथा 11 ड - पादतलाहत 12 न - प्रलयाभं 13 ड - हरस्य सदा सुखदायिं 14 न - कृत्वा ततः ।

अतिक्रान्तैः सललितैः [1]पादैर्द्रुतलयान्वितैः ।
[2]त्रितालान्तरमुत्क्षेपैर्गच्छेत्पञ्चपदीं ततः ॥ १३४
तत्रापि वामवेधस्तु विक्षेपो दक्षिणस्य च ।
तैरेव च पदैः कार्यं प्राङ्मुखेनापसर्पणम् ॥ १३५
पुनः पदानि त्रीण्येव गच्छेत्प्राङ्मुख [3]एव तु ।
ततश्च वामवेधः स्याद्विक्षेपो दक्षिणस्य च ॥ १३६
ततो [4]रौद्ररसश्लोकं [5]पादसंहरणं पठेत् ।
तस्यान्ते तु [6]त्रिपद्याथ व्याहरेत्पारिपार्श्विकौ ॥ १३७
तयोरागमनं कार्यं गानं [7]नर्कुटकं बुधैः ।
तथा च भारतीभेदे त्रिगतं सम्प्रयोजयेत् ॥ १३८
विदूषकस्त्वेकपदां [8]सूत्रधारस्मितावहाम् ।
[9]असम्बद्धकथाप्रायां [10]कुर्यात्कथनिकां ततः ॥ १३९

अथ महाचारीं सूचयति ततो रौद्ररसमिति, रुद्रस्यायं रौद्रप्रायः स रसः । यत्र पादानां च संहरणं समासयोजनयैक्यं यत्रेत्योजःप्रधानत्वं दर्शितम् । तस्येति पाठस्यान्ते । त्रिपद्येति पारिपार्श्विकावामुखरूपया । अत्र ध्रुवाया अनुक्तत्वात्पूर्वोक्तैवाङ्गिता संश्रयणीया ।

अथ त्रिगतमङ्गं दर्शयति तयोरित्यादिना । तयोः पारिपार्श्विकयोः । नर्कुटकध्रुवा [1]लक्ष्यते ।

---

1 म - पादैर्गीत 2 ड - त्रिकालान्तरमुक्षिप्ते 3 ड - एव च 4 ड - रौद्रपदं, ढ - रौद्ररवं 5 म - पदसंहरणं 6 ज - त्रिपद्यास्तु 7 न - नकुटकं 8 ड - स्मितावहाम् 9 ड - असंबन्ध्र 10 ड - कुर्यात्कथितकां ।

1 वक्ष्यते ।

(वितण्डां [1]गण्डसंयुक्तां नालीकं च प्रयोजयेत् ।
कस्तिष्ठति जितं केनेत्यादिकाव्यप्ररूपिणीम् ॥
पारिपार्श्विकसञ्जल्पो विदूषकविदूषितः[2] ।
स्थापितः सूत्रधारेण त्रिगतं सम्प्रयुज्यते) ॥ १४१
[3]प्ररोचना च कर्तव्या सिद्धेनोपनिमन्त्रणम्[4] ।
रङ्गसिद्धौ पुनः कार्यं [5]काव्यवस्तुनिरूपणम् ॥ १४२
[6]सर्वमेव विधिं कृत्वा सूचीवेधकृतै[7]रथ ।
[8]पादैरनाविद्धगतैर्निष्क्रामेयुः समं त्रयः ॥ १४३
[9]एवमेष प्रयोक्तव्यः पूर्वरङ्गो यथाविधि ।
चतुरश्रो द्विजश्रेष्ठा स्त्र्यश्रं [10]वापि निबोधत॥ १४४
अयमेव प्रयोगः स्यादङ्गान्येतानि चैव हि ।
तालप्रमाणं [11]विक्षिप्तं केवलं तु विशेषकृत् ॥ १४५
शम्या[12] तु द्विकला कार्या तालो ह्येककलस्तथा ।
पुनश्चैककला [13]शम्या सन्निपातः[14]कलाद्वयम् ॥
अनेन हि प्रमाणेन कलातालल्यान्वितः[15] ।

"अष्टौ नर्कुटकानां तु विज्ञेया मूलजातयः ।
रथोत्थता बुद्बुदकं" इत्यादि (३२-२९०)
तदन्यतमध्रुवोपलक्षितं गानं नर्कुटकम् ।

---

1 म - दण्डसंयुक्तां नहि गां 2 ढ - विरूषितः 3 प - प्ररोचने च, न - प्ररोचनार्थे 4 न - निमन्त्रणा 5 म - कार्यवस्तु 6 ड - सर्वमेवं 7 ड - कृतैरथ 8 न - अनाविद्धगतैः पादै 9 ड - एवमेव 10 ज - चापि 11 ढ - संक्षिप्तं 12 प - शम्पा 13 प - शम्पा 14 न - कलाद्वये 15 ड - तालकलयान्वितः ।

कर्तव्यः पूर्वरङ्गस्तु [1]त्र्यश्रोऽप्युत्थापनादिकः ॥
आद्यं चतुर्थं दशममष्टमं [2]नैधनं गुरु ।
यस्यास्तु [3]जागते पादे सा [4]त्र्यश्रोत्थापिनी ध्रुवा ॥
वाद्यं [5]गतिप्रचारश्च [6]ध्रुवा तालस्तथैव च ।
[7]संक्षिप्तान्यत्र कार्याणि [8]त्र्यश्रनृत्तप्रवेदिभिः[9] ॥ १४९
वाद्यगीतप्रमाणेन [10]कुर्यादङ्गविचेष्टितम् ।
[11]विस्तीर्णमथ साक्षिप्तं [12]द्विप्रमाणविनिर्मितम् ॥ १५०
हस्तपादप्रचारस्तु [13]द्विकलः परिकीर्तितः ।
चतुरश्रे [14]परावर्ते [15]पाताः स्युः षोडशैव तु[16] ॥
[17]त्र्यश्रे द्वादशपातास्तु भवन्ति करपादयोः[18] ।
एतत्प्रमाणं [19]विज्ञेयमुभयोः पूर्वरङ्गयोः ॥ १५२
केवलं परिवर्ते तु [20]गमने त्रिपदी भवेत् ।
दिग्वन्दने पञ्चपदी चतुरश्रे विधीयते ॥ १५३
आचार्यबुद्ध्या कर्तव्यस्त्र्यश्रस्तज्ज्ञैः[21] प्रमाणतः ।
[22]तस्मान्न लक्षणं प्रोक्तं पुनरुक्तं भवेद्यतः ॥ १५४
एवमेष प्रयोक्तव्यः पूर्वरङ्गो द्विजोत्तमाः ।

---

1 ड - त्र्यश्र उत्थापनादिकः ज - त्र्यश्रश्चोद्भवनादिकः 2 न - नवमं 3 ड - जायते 4 न - त्र्यश्वेप्युत्वापना मता (?) 5 न -गीतप्रकारश्च ज - प्रचारंच 6 न - ध्रुवताल 7 ड - संक्षिप्तान्येव 8 ड - त्र्यश्रे 9 न - प्रचोदिभिः । 10 न - कुर्याद्गति 11 न - विस्तीर्णमथवा क्षिप्तं 12 ड - प्रमाणं च विनिर्मितम् 13 ज - द्विकलं परिकीर्तितम् 14 प - परिभ्रान्ते ड - परिक्रान्ते 15 ड - पादाः 16 ड - हि 17 ड - त्र्यश्रे तु द्वादश पदाः 18 ड - करपादजाः 19 ड - निर्दिष्टमुभयोः न - उद्दिष्टमुभयोः म - निर्दिष्टमुदारं 20 म - गमने तु पदी 21 ज - त्र्यश्रस्तालः 22 च - तस्मात्तल्लक्षणं ।

त्र्यश्रश्च चतुरश्रश्च शुद्धो भारत्युपाश्रयः ॥ १५५
एवं तावदयं शुद्धः पूर्वरङ्गो मयोदितः ।
चित्रत्वमस्य वक्ष्यामि यथाकार्यं प्रयोक्तृभिः ॥ १५६
[1]वृत्ते ह्युत्थापने विप्राः कृते च परिवर्तने ।
[2]चतुर्थकारदत्ताभिः [3]सुमनोभिरलङ्कृते ॥ १५७
[4]उदात्तगानैर्गन्धर्वैः [5]परिगीते प्रमाणतः ।
देवदुन्दुभयश्चैव निनदेयुर्भृशं ततः ॥ १५८
[6]शुद्धाः कुसुममालाभिर्विकिरेयुः समन्ततः ।
[7]अङ्गहारैश्च देव्यस्ता उपनृत्येयुरग्रतः[8] ॥ १५९
यस्ताण्डवविधिः प्रोक्तो [9]नृत्ते पिण्डी समन्ततः ।
रेचकैरङ्गहारैश्च न्यासोपन्याससंयुतः[10] ॥ १६०
नान्दीपदानां मध्ये तु एकैकस्मिन्पृथक्पृथक् ।
प्रयोक्तव्यो [11]विधिः सम्यक्चित्रभावमभीप्सुभिः[12] ॥

भारतीभेद इति । भरतीवृत्त्यङ्गमुपसंहरत्येवमेष इति चतुरश्रस्त्र्य॰ शुद्धाश्चित्र इति चतुर्धा पूर्वरङ्गः, यद्वक्ष्यति ।

"त्र्यश्रं वा चतुरश्रं वा शुद्धं चित्रमथापि वा" इति चित्र एव विशेषान्वितो भवति । तदागमनकाले ततोऽनन्तरं निष्क्रान्तासु नर्तकीषु ततः परं शुष्कावकृष्टादि यदङ्गजातं मरोचनान्तं तैरेव सूत्रधारादिभिस्तदपरं कृत्वाङ्गहारव्यामिश्रेण प्रयोक्तव्यम् । नान्य (अन्ये) च "नास्ति पुरुषस्य नृत्त"मित्याशयेन सर्वास्वित्यत्र नान्दीपदवैचित्र्याय याः प्रविष्टास्तासामेव निष्क्रामणमत्र

---

1 प - वृत्ये च - नृत्ते 2 त - चतुष्प्रकार 3 प - सुमनोभिरलङ्कृताः 4 ड - उदात्तगानैर्गान्धर्वैः 5 - परिणीते ड - परिगीतैः 6 न - सिद्धाः 7 ज - अङ्गहारांश्च दिव्यास्ताः 8 द - प्रणृत्येयुर्यथार्थतः 9 न - नृत्तपिण्डीसमन्वितः 10 न संयुतैः 11 युवैः 12 न चित्रो लक्षणसंयुतः ।

एवं कृत्वा यथान्यायं [1]शुद्धं चित्रं प्रयत्नतः।
ततःपरं प्रयुञ्जीत नाटकं लक्षणान्वितम्॥ १६२

ततस्त्वन्तर्हिताः सर्वा भवेयुर्दिव्ययोषितः।
निष्क्रान्तासु च सर्वासु नर्तकीषु ततःपरम्॥ १६३

पूर्वरङ्गे प्रयोक्तव्यमङ्गजातमतः परम्[2]।
एवं [3]शुद्धो भवेच्चित्रः पूर्वरङ्गो विधानतः॥ १६४

कार्यो नातिप्रसङ्गोऽत्र [4]नृत्तगीतविधिं प्रति।
गीतवाद्ये च नृत्ते च [5]प्रवृत्तेऽतिप्रसङ्गतः॥ १६५

खेदो भवेत्प्रयोक्तॄणां प्रेक्षकाणां तथैव च।
खिन्नानां रसभावेषु स्पष्टता [6]नोपजायते॥ १६६

पूर्वासां चतसृणाम्, तेन तत्कृतमेव गानं तेषु चित्रत्वमिति मन्यन्ते। नातिप्रसङ्ग इति, तत्रैकाङ्गहारप्रयोग एव कार्य इत्यर्थः। अत एवा(न)न्तरं गणनया षोडशैवाङ्गहारास्तथा चोत्थापनं परिवर्तनमवकृष्टागानं नान्दीपाठः शुष्कावकृष्ट जर्जरश्लोकाः ध्रुवा रङ्गद्वारमड्डिता आर्यापाठो ध्रुवा रौद्रश्लोकपाठो नर्कुटकं त्रिगतं प्ररोचना चेत्येतेऽङ्गहारषोडशकमेव त्र्यश्रेऽपीति नान्दीपादान्तरेषु बहुतरं नृत्तम्। अन्ये तु तत्रैव नृत्तमिच्छन्ति मार्गान्तरेषु। तच्चासङ्गतम्। एवं च सति वृत्ते ह्युत्थापन इत्यादि तथा निष्क्रान्तासु च सर्वास्वित्यादि चानुपात्तसममेव स्यात्। न चैकाङ्गविचित्रत्वाद्विमिश्रचित्रव्यपदेशे दृष्टान्तं ह्येकस्य तन्तोर्वर्णस्य वा वैचित्र्यं पटेऽपि वा तथा व्यपदेशः। एताद्विमिश्र इति चोक्तं प्राक्। तदलमनेन। प्रेक्षकाणामित्यनेन सामाजिकानां। पूर्वरङ्गे स्फुटैव [1]नटवृत्तिर्भवतीति दर्शयति, तत्संस्कारसंस्कृतत्वात्तन्तु(त्त्व?)धीर्भ्रान्त्यादिबुद्धिश्च

---

1 प - शुद्धो लक्षणसंयुतः 2 प - अङ्गजातं ततः परम्; न - जातं तथा पुनः 3 न - शुद्धे भवेच्चित्रे पूर्वरङ्गे 4 ढ - गीतनृत्तविधिं 5 ढ - प्रवृद्धेऽतिप्रसङ्गतः न - विवृद्धे 6 द - नैव।

---

1 नट बुद्धिश्च।

ततः शेषप्रयोगस्तु न रागजनको भवेत्।
लक्षणेन विना बाह्यलक्षणाद्विस्तृतं [1]भवेत् ॥ १६७
लोकशास्त्रानुसारेण [2]तस्मान्नाट्यं प्रवर्तते।
त्र्यश्रं वा चतुरश्रं वा शुद्धं चित्रमथापि वा ॥ १६८
प्रयुज्य रङ्गान्निष्क्रामेत्सूत्रधारः सहानुगः।
देवपार्थिवरङ्गाणामाशीर्वचनसंयुताम् ॥ १६९
कवेर्नामगुणोपेतां वस्तूपक्षेपरूपिकाम्।
लघुवर्णपदोपेतां [3]वृत्तैश्चित्रैरलङ्कृताम् ॥ १७०
अन्तर्यवनिकासंस्थः कुर्यादाश्रावणां ततः।
आश्रावणावसाने च नान्दीं कृत्वा स सूत्रधृत् ॥ १७१
पुनः प्रविश्य रङ्गं तु कुर्यात्प्रस्तावनां ततः।
प्रयुज्य विधिनैवं तु पूर्वरङ्ग प्रयोगतः ॥ १७२

नाट्यधर्मीभवतीति सूचयति। यदि हि तेषु नाट्यबुद्धिरेवोपपादनीया स्यात्प्रत्युत प्रयत्नेन नटबुद्धिसम्पादकं पूर्वरङ्गप्रस्तावनादि तान्प्रति गोपनीयं स्यात्। दर्शितं चैतदस्माभिः प्रथमाध्याये। प्रयोक्तारः करणादेः प्रयोगे यत्र खिन्नाः प्रेक्षकाश्चादौ ततः शेषः प्रयोगः प्रीतिं न कुर्यात्। तत्प्रधानं चेदं नाट्यं व्युत्पत्तिप्रदमित्युक्तम्। शुद्धमिति। यत्र गीतकवर्धमानविधावेव नृत्तं न तु सर्वथा शुद्धमधुना प्रयोगार्हम्।

एवं प्ररोचनान्तमङ्गजातमुक्त्वा यत्पूर्वमुक्तं—

"रङ्गसिद्धौ पुनः कार्यं काव्यवस्तुनिरूपण"मिति (५-१२६)

तद्वितत्य निरूपयति प्रयुज्येति। प्रयोगेण प्रयोगतः स्थापयति समस्तं रूपकवृत्तिमिति स्थापकः। सूत्रधारस्य गुणाः सौमनस्याविस्मयाद्भुतदाष्टित्वरक्षादिभिराकृतिश्च वैष्णवादिरित्येतत्स्थाप(न?)कभूयिष्ठं गतस्यापि भवति।

---

1 ज - विस्तरं 2 ज - सरणात् 3 न - वृत्तैश्चित्रैर्विभूषिताम्।

स्थापकः प्रविशेत्तत्र सूत्रधारगुणाकृतिः ।
स्थानं तु वैष्णवं कृत्वा सौष्ठवाङ्गपुरस्कृतम् ॥ १७३
प्रविश्य रङ्गं तैरेव [1]सूत्रधारपदैर्व्रजेत् ।
स्थापकस्य [2]प्रवेशे तु [3]कर्तव्यार्थानुगा ध्रुवा ॥ १७४
[4]त्र्यश्रा वा चतुरश्रा वा तज्ज्ञैर्मध्यलयान्विता ।
[5]कुर्यादनन्तरं चारीं देवब्राह्मणशंसिनीम् ॥ १७५
सुवाक्यमधुरैः श्लोकैर्नानाताललयान्वितैः[6] ।
प्रसाद्य रङ्गं विधिवत्कवेर्नाम [7]च कीर्तयेत् ॥ १७६

तदेव स्पष्टयति स्थानन्त्वित्यादिना । सूत्रधार एव स्थापक इति सूत्रधारः पूर्वरङ्गं प्रयुज्य स्थापकः प्रविशेदिति न भिन्नकर्तृकतया । अर्थानुगेति । सारसचक्राह्वाद्युपमानक्रमेण तत्र प्रावेशिकी । तदर्थमप्येवमुत्थापनादि[1]वत्कार्या मध्यलयान्विता इत्यद्यतनानामिष्टत्वाच्छोकाद्याविष्टे हि विलम्बितलया, रोषाद्याविष्टे च द्रुतचक्रलया, प्रावेशिकी । ततः प्रभृति हि सामाजिकानां हृदयं समुचितास्वादनयोग्यतां यैः संस्कर्तव्यमिति त्रिभिर्लयैर्न्याय्यम् । अन्यत्वे सर्वप्रावेशिकीगानं स्वातन्त्र्याभिप्रायेण, तदविचारितं बाण (भाण?) प्रसिद्धिमात्रमिति मन्तव्यम् । कुर्यादनन्तरं चारीमिति महाचारीगतौ श्लोकौ वक्ष्येते ; तेन शृङ्गाररसप्रधानं वीररसप्रधानं वा देवद्विजस्तोत्रोद्देशश्लोकं पठेदित्यर्थः । अन्तरचारीमित्यन्ये पठन्ति । व्याचक्षते—स्वस्थानादन्यचारी, अनन्तरप्रतिहारासनिकादिवत् । तत्र पुनः प्ररोचनं या जयाशीर्वादादिक्रमेण रङ्गस्थसामाजिकवर्गप्रसादनं देवद्विजस्तोत्रोद्देशेन श्लोकं पठेत् । हृदये निर्मलीकरणं रसास्वादोचितसंस्काराद् ग्रहणयोग्यताधानार्थं कुर्यात् । ततः कविनाम कीर्तयेत् । चशब्दात्तद्गुणादिकं येन प्रसिद्धादरणीयत्वं भवति । [2]ततो रूपक-

---

1 च - सूत्रधारपदं व्रजेत् 2 च - प्रयोगेतु 3 प - कर्तव्यास्थानगा 4 ड - चतुरश्राथवा त्र्यश्रा तत्र मध्यलयाश्रिता 5 न - कुर्याद्वानन्तरं स्तोत्रं देवब्राह्मणसंश्रयम् ड - कुर्यादन्तरंचारीं 6 ड - भावरसान्वितैः 7 प - तु ड - नामानुकीर्तयेत् ।

---

1 कार्यमध्यलयान्वितेत्यद्य 2 ततः काव्यं प्रख्यापनमाश्रित्येति ।

प्रस्तावनां ततः कुर्यात्काव्यप्रख्यापनाश्रयाम् ।
उद्घातकादि कर्तव्यं काव्योपक्षेपणाश्रयम् ॥ १७७
दिव्ये [1]दिव्याश्रयो भूत्वा मानुषे [2]मानुषाश्रयः ।
दिव्यमानुषसंयोगे [3]दिव्यो वा मानुषोऽपि वा ॥
मुखबीजानुसदृशं नानामार्गसमाश्रयम् ।
नानाविधैरुपक्षेपैः काव्योपक्षेपणं भवेत् ॥ १७९
प्रस्ताव्यैवं तु निष्क्रामेत्काव्यप्रस्तावकस्ततः[4] ।
एवमेष[5] प्रयोक्तव्यः पूर्वरङ्गो यथाविधि[6] ॥ १८०

विशेषप्रख्यापनमाश्रित्येति तत्प्रख्यापनव्याजेन भाविरूपकार्थस्य प्रस्तावनामुपक्रमोपक्षेपपर्यायां कुर्यात्, येन प्रथमत एवं प्रभृति सामाजिकाः संक्षेपेण संस्कारवन्तो भवन्ति, साधारणलोकवृत्ताभिधानसंस्कारवन्तश्च । तथा हि दिव्ये काव्यार्थे डिमादौ तत्सदृशवस्तूपक्षेपः । दिव्यमानुषो रामादिः । वाग्रहणं समुच्चये ।

ननूपक्षेपात्मा प्रस्तावना मुखसन्ध्यङ्गादुपक्षेपाद्बीजलक्षणाया अर्थप्रकृतेश्च कथं भिद्यत इत्याशङ्क्याह मुखबीजानुसदृशमिति, मुखाङ्गे ह्युपक्षेपे तदेवोपक्षिप्यते, बीजे च । तदेवं स्वल्पमात्रमिह तु तत्सत्यम् । तथा हि—नटीविदूषकपारिपार्श्विकैः समन्तादिति विचित्रभेदेन स्वकार्यनिरूपणव्याजेन ये नानाविधा उपक्षेपाः उपांशुच्छन्नत्वेन रूपकार्थबीजस्य सामाजिकहृदयभूमौ प्रक्षेपास्तैः काव्यं प्रस्ताव्य प्रस्तावकस्थापकौ निष्क्रामेताम् ।

नन्विह पूर्वरङ्गशेषभूता चेत्प्रस्तावना तर्हि भारत्यङ्गभूतत्वेन पुनः किमित्यामुखं प्ररोचना चाभिधास्यते । उच्यते । द्विविधा प्रस्तावना भवति—पूर्वरङ्गस्याङ्गभूतान्यस्य वा । तत्र पूर्वरङ्गाङ्गेऽस्याः कविरुदासीनः, स्थापक एव स्वतन्त्रो निर्माता त्वन्यो वा कविर्ध्रुवागानादावपि पदम् । यदाह श्रीहर्षः—अत एव हा(भा?)सो नाम (कविः) कस्मिंश्चिन्नाटके* "दिवं यातश्चित्तज्वरेण

---

1 न दिव्याश्रयकृतं ङ - दिव्याश्रयैर्भूत्वा 2 ङ - मानुषाश्रयैः 3 ङ - संयोगो 4 ङ - काव्यप्रस्थानको द्विजाः 5 ङ - एवमेव 6 न - तज्ज्ञैः प्रस्तावनाविधिः *नलविलासे ।

य इमं पूर्वरङ्गं तु विधिनैव [1]प्रयोजयेत् ।
[2]नाशुभं प्राप्नुयात्किञ्चित्स्वर्गलोकं च गच्छति ॥
[3]यश्चापि विधिमुत्सृज्य यथेष्टं संप्रयोजयेत् ।
प्राप्नोत्यपचयं घोरं तिर्यग्योनिं च गच्छति ॥
न तथाग्निः प्रदहति प्रभञ्जनसमीरितः ।
यथा ह्यपप्रयोगस्तु प्रयुक्तो दहति क्षणात् ॥ १८३
[5]इत्येषोऽवन्तिपाञ्चालदाक्षिणात्यान्ध्रमागधैः[6] ।
कर्तव्यः पूर्वरङ्गस्तु द्विप्रमाणविनिर्मितः ॥ १८४
एष वः कथितो विप्राः [7]पूर्वरङ्गाश्रितो विधिः ।

कलिरित एवाभिवर्तते । अशक्यमस्य पुरतोऽवस्थातु"मित्यादि । सा द्वितीया सा वृत्तिभेदमध्ये पठिता । एवं प्ररोचनादावपि मन्तव्यम् । यदाह "तत्र काचित्कार्याभिमुखं नीयते पूर्वरङ्गविधिः तदभिमुखं वा कार्यारम्भस्तद्भवति सा द्विविधे"त्यादि—एतच्च वृत्त्यध्याये व्याख्यास्यते (२०-२८) "नटी विदूषकौ वापी"त्यादौ । शास्त्रत्यागे मनागपि न वर्तितव्यमिति दर्शयितुमेवमेष इति ॥

यथाविधि प्रयोगेऽभ्युदयः स्यादित्याह य इममिति । अन्यथापि प्रयोगे प्रत्यवायमाह यश्चापीति । शुभमित्यादिना शुभमिति । दृष्टेऽभ्युदयं स्वर्गमित्यदृष्टेऽपचयमिति । दृष्टे प्रत्यवाय इति । तिर्यग्योनिं चेत्यदृष्टे । दृष्टप्रत्यवायभीरुबाहुल्येन लोक इति । तमेवाधिकमवश्यंभावित्वेन दर्शयति न तथाग्निरिति ।

ननु पाठ्यादियोजना च वेषाचारयोजना चात्र पूर्वरङ्गेणोक्तेत्याशङ्क्य तामनुवादद्वारेणाभिधातुं शुद्धश्चान्यत्वेन योज्य इत्याख्यातुं समुचितमुपसंहारं करोति इत्येषोऽवन्तिपाञ्चालेत्यादि । यादृक्प्रवृत्तिविशेषे नियतो रूपकनायको भविष्यति तादृक्प्रवृत्तिसमुचितवेषभाषाचाराभिनयादिकमनुवर्तमानैः सूत्रधारादिभिः स्थापकान्तैः पूर्वरङ्गो द्विविधस्त्र्यश्रश्चतुरश्रश्च । एष इत्यनन्तरोक्त-

1 ड - प्रपूजयेत् 2 त - प्राप्नुयान्नाशुभं 3 ड - यश्चेनं, ज - यश्चामुं 4 ज - यथा शुष्कं दहत्यग्निः 5 ड - इत्येववान्ति 6 - दाक्षिणात्यौद्र 7 न - पूर्वरङ्गकृतो विधिः ढ - पूर्वरङ्गविधो कृतिः ।

भूयः किं कथ्यतां [1]सम्यङ्नाट्यवेदविधिं प्रति ॥
[पुनश्चित्रे तथा मिश्रे शुद्धे चैव ब्रवीम्यहम् ।
यथा योज्या ध्रुवाः पञ्च तथा वक्ष्यामि तत्त्वतः ॥
[3]आदावुत्थापनी कार्या [4]परिवर्तस्तथा भवेत् ।
[5]अवकृष्टाड्डिता चैव विक्षिप्ता चैव पञ्चमी ॥ १८७
एवं पञ्च ध्रुवा ज्ञेया उपोहनसमन्विताः ।
कर्तव्यास्तु प्रयत्नेन पूर्वरङ्गे प्रयोक्तृभिः ॥ १८८

स्वभाव एव कर्तव्यो न शुद्धः । अन्ये मन्यन्ते आवन्त्या सात्त्विकीकौशिकीमिश्रेति सा सूत्रधारस्य पाञ्चालमध्यमा ।

....

(इति महामाहेश्वराचार्याभिनवगुप्तविरचितायां
नाट्यवेदविवृतौ पूर्वरङ्गविधानं नाम पञ्चमोऽध्यायः)

* (पुनश्चित्र इति । चतुरश्रत्र्यश्रभेदाच्चित्रशुद्धभेदाच्च पूर्वरङ्गश्चतुर्धोक्तः । मतान्तरेण शुद्धचित्रमिश्रात्मकस्य त्रयस्यापि भेदस्य उत्थापन्यादिषु ध्रुवाविधानं पातभागकलातालवाद्यनियमं चाह पुनरित्यादिना । उपोहनेति । उपोहनं वस्तुगीतप्रयोगात्पूर्वं क्वचिच्च वस्तुकलिकयोर्मध्ये स्वरकलानियमार्थं शुष्काक्षरप्रयोगः । उक्तं च तालाध्याये मुनिना—

उपोह्यन्ते स्वरा येन यस्माद्गीतं प्रवर्तते ।
तस्मादुपोहनं प्रोक्तं शुष्काक्षरसमन्वितम् ॥(३१-१२०) इति

1 न - सम्यङ्नाट्यवेदप्रयोक्तृभिः 2 न - उत्थापनी तथा 3 न - परिवर्तनमेव च 4 न - अपकृष्टासिता ।

* टीकाया आदर्शयोर्द्वयोरपि पञ्चमाध्यायान्तषष्ठाध्यायप्रारम्भव्याख्याभागे एकतालपत्रपरिमितग्रन्थभागस्त्रुटितः । पुनश्चित्र इत्यादिचत्वारिंशच्छ्लोकपरिमितस्तु कोहलमतानुयायिभिः कैश्चित्प्रक्षिप्त एव भवेत् । "क ग घ च ज" चिन्हितादर्शेष्वनुपलम्भात् टीकायास्त्रुटितभागस्याल्पत्वाद् व्याख्यातृभिरपि प्रक्षिप्त इति न व्याख्यात इति मन्यामहे । तथाप्यत्र पारिभाषिकपदटीका काचिद्बालकसौकर्याय विरच्यते ।

अतः परं [1]प्रवक्ष्यामि ह्युपोहनविधिक्रियाम् ।
उत्थापनस्याष्टकलं परिवर्तस्य षट्कलम् ॥ १८९

[2]अवकृष्टं पुनः कार्यं कलाभिः पञ्चभिर्युतम् ।
ध्रुवायामड्डितायां च चतुष्कलमथापि च ॥ १९०

क्षिप्तायां चैव विज्ञेयं कलात्रयसमन्वितम् ।
एवं ह्युपोहनानां तु प्रमाणं समुदाहृतम् ॥ १९१

गुरुलाघवसंयुक्तं कलातालसमन्वितम् ।
[3]पूर्वरङ्गं सदा ज्ञेयं चित्रमार्गे प्रहेनम् ॥ १९२

चित्रे चैत्राः कला ज्ञेया मिश्रे वार्तिकमाश्रिताः ।
शुद्धे दक्षिणमार्गेण प्रयोक्तव्याः प्रयोक्तृभिः ॥

चतस्रो गीतयः[4] कार्या [5]मागधी ह्यर्धमागधी ।

पञ्चसु ध्रुवासूपोहने कलाक्रममाह उत्थापनस्येत्यादिना । वक्ष्यमाणध्रुवालक्षणं केवलं चित्रभेदस्येति नियमयति गुर्वित्यादिना । ननु शुद्धमिश्रभेदयोश्चापि तथैवेत्याशङ्क्याह चित्र इति । चित्राख्ये पूर्वरङ्गभेदे चैत्राः चित्रमार्गाश्रिताः कलाः मिश्रे तु वार्तिकमार्गाश्रिताः शुद्धे तु दक्षिणमानप्रतीता एव प्रयोक्तव्याः । चित्रादिमार्गलक्षणं तूक्तं मुनिना --

चित्रे द्विमात्रा कर्तव्या वृत्तौ सा द्विगुणा स्मृता ।
चतुर्गुणा दक्षिणे स्यादित्येवं त्रिविधा कला ॥ (३१-६) इति ।

वस्तुविधानमाह चतस्र इति । गीतयो वर्णालंकाराश्छन्दोक्षरसमन्विता मागध्यादयो गेयाधिकारे (अ २९) सलक्षणं निरूपयिष्यन्ते ।

---

1 ड - प्रवक्ष्यामि उत्थापनविधिं प्रति   2 द - अप-कृष्टा पुनः कार्या ।
3 न - पूर्वरङ्ग   4 प - गितरः   5 ड - मागध्यव्यस्त ।

संभाविता तथा चैव पृथुला च प्रकीर्तिता ॥ १९४
मागधी त्वथ [1]कर्तव्या त्वथवा त्वर्धमागधी ।

"त्रिर्निवृत्तप्रगीता या सा ज्ञेया मागधी बुधैः ।
अर्धतः संनिवृत्ता च विज्ञेया ह्यर्धमागधी ॥
संभाविता च विज्ञेया गुर्वक्षरसमन्विता ।
लघ्वक्षरकृता नित्यं पृथुला सा प्रकीर्तिता" ॥ इति (२९-५०)

गीतयो रागाङ्गतयोक्ताः कैश्चित् । ता वर्णालंकारा एव । उक्तं नान्यदेवेन स्वभरतभाष्ये—"अत्र वर्णशब्देन गीतिरभिधीयते । नाक्षरविशेषः, नापि षड्जादिसप्तस्वराः पदग्रामे त्वनियमादेव स्वेच्छया प्रयुज्यन्ते । षड्जादिस्वरान्तानामप्यविशेषेण वावरोहादिधर्माणं प्रत्येव समुपलम्भते । अतो वर्ण एव गीतिरित्यवस्थितम् । सोऽपि चतुर्विधो मागध्यादिः" इति । मगधदेशोद्भवत्वान्मागधी । विदर्भादिषु दृष्टत्वात्सा समाख्येत्यन्ये । अर्धनिवर्तनादर्धमागधी । द्वे अपि निवृत्तिप्रधाने । संभाविता पृथुला च मात्राप्रधाना ।

यदुक्तं मतङ्गेन—

द्विगुरु द्विनिवृत्ता च चित्रे गीतिस्तु मागधी ।
लघुप्लुतकृता चैव तदर्धे चार्धमागधी ।
संभाविता गुरुर्वृत्तौ पृथुला दक्षिणे लघुः ॥ इति

तदसमञ्जसमित्यभिनवगुप्ताचार्यः। आसामेव चतसृणामालप्तादिभेदाः पुष्कराध्यायवक्ष्यमाणाः परिकल्पिताः । आसां कलातालमानेन लक्षणमुक्तं रघुनाथेन—

"प्रस्तावने जातिनिरूपणस्य या गीतयः पूर्वमिहोपदिष्टाः ।
तासामिदानीं किल लक्षणानि वक्ष्यामहे गायकबोधहेतोः ॥
त्रिषष्ट्यलंकारयुता चतुर्भिः स्थाय्यादिभिः संमिलिता च वर्णैः ।
विलम्बितेनापि च मध्यमेन द्रुतेन शोभां दधती लयेन ॥
गानक्रियागीतिरिहोपदिष्टा चतुर्विधा सा गदिता मुनीन्द्रैः ।
स्यान्मागधीनामवती किलाद्या तथार्धमागध्यभिधा द्वितीया ॥
संभाविताख्यानवती तृतीया भवेच्चतुर्थी पृथुलाभिधाना ।

1 ग - कर्तव्याप्यथवा ।

क्रमेण लक्ष्माणि पदानि तासां सा मागधीलक्षणमुच्यतेऽत्र ॥
विलम्बितेनैव पदेन युक्तं गायेत्कलायां पदमादिमायाम् ।
पदान्तरेणापि युतं तदेव गायेत्पदं मध्यलयेन युक्तम् ॥
कलां द्वितीयामधिकृत्य सम्यक्कलां तृतीयामधिकृत्य पश्चात् ।
ते द्वे कृती स्वेनपदेन युक्ते गायेद्द्रुतेनैव लयेन सार्धम् ॥
इति त्रिरावृत्तपदां वदन्ति तां मागधीं मागधराजहृद्याम् ।

गामाधा वन्दे	धनिधनिसनिसा देवं०रुद्रं००रुद्रं००	रिगरिगमागारिसा देवं०००रुद्रं०००वन्दे०००

अथार्धमागध्यपि लक्ष्यतेऽत्र विलबितेनैव पदेन युक्तम् ॥
गायेत्कलायां पदमादिमायां पदान्तरेणाथ युतं तदर्धम् ।
गायेत्पुनर्मध्यलयेन युक्तं कलां द्वितीयामधिकृत्य सम्यक् ॥
कलां तृतीयामधिकृत्य पश्चादर्धं द्वितीयस्य पदस्य गायेत् ।
पदान्तरं च द्रुतमानयुक्तं सैवार्धमागध्यभिधावती स्यात् ॥

मारीगासा देवं०००१	सासाधानी वं रुद्रं—२	पाधामामा द्रं वन्दे—३

इत्यर्धमागधी

संभावितालक्षणमत्र वक्ष्ये संक्षेपितैश्चात्र पदैश्चतुर्भिः ।
गुर्वक्षरैर्भूरिभिरन्विता च कलादिमा स्यात्सत्रिलम्बिता च ॥
तथैव मध्यस्थपदद्वयस्य प्रत्येकमुच्चारणतो द्विवारम् ।
आद्यान्तिमे चापि पदे विहाय परा कला मध्यलयान्विता स्यात् ॥
पदैश्चतुर्भिः सहिता द्रुतेन लयेन युक्ता तु कला तृतीया ।
एतत्त्रयं यत्र चकास्ति चैषा संभाविता गायकसंमता स्यात् ॥

इतिं संभाविता

लक्ष्मोच्यतेऽधो पृथुलाख्यगीते संभावितावत्सकलं च वेद्यम् ।
लघ्वक्षराणां बहुलः प्रयोगोऽपरं भवेदेष तयोर्विशेषः ॥

प्रस्तारः

1	2	3	4
मागारिगा सुरनत	माधनिधाधा हरपद	सासाधानी युगलं	पानिधपमामा प्रणमत

पूर्वरङ्गे भवेच्चित्रे [1]चित्रमार्गसमाश्रिता ॥ १९५
यथा मिश्रस्तु योक्तव्यः [2]पूर्वरङ्गे भवेदिह ।
मिश्रे सम्भाविता कार्या तदा वार्तिकमाश्रिता ॥
शुद्धे च पृथुला कार्या दक्षिणं मार्गमाश्रिता ।
अतः परं प्रवक्ष्यामि गुरुलाघवतः क्रियाम् ॥ १९७
उपोहनक्रियायां तु यथायोज्यं प्रयोक्तृभिः ।
दिग्ले दिग्ले पुनः कार्यमन्ते [3]झण्टुं सदा बुधैः ॥

इति पृथुला

पदाश्रयं लक्षणमुक्तमासां तालाश्रयं लक्षणमामनामः ।
ताले गुरुद्वन्द्वलघुप्लुताख्ये चच्चत्पुटे त्वाद्यगुरुद्वयं तु ॥
तद्वाक्यरीत्या च गुणेन युक्तं चितार्हमेकैकमनु प्रयुज्य ।
तद्दक्षिणाख्ये ध्रुवकादिभिस्तु मात्राभिरष्टाभिरथ प्रयुञ्ज्यात् ॥
सा मागधीगीतिरुदाहृतैवं तालाश्रयेणापि तथा मुनीन्द्रैः ।
चच्चत्पुटस्यात्र लघुं तृतीयं प्रयुज्य पूर्वं जगणार्धयुक्तम् ॥
आद्येन मात्राद्वितयेन युक्तं मात्राद्वयेनापि युतं प्रयुञ्ज्यात् ।
प्लुतं तु सार्धं च गणेन युक्तं मात्राभिरष्टाभिरथ प्रयुञ्ज्यात् ॥
द्विरीरितान्त्यद्वितयान्विताभिस्तदार्धमागध्युदिता मुनीन्द्रैः ।
तालान्तरे गीतिरितीयमूह्या संभावितालक्षणमुच्यतेऽत्र ॥
चच्चत्पुटे तु द्विकले तु वृत्तिमार्गे मता भूरिगुरुः किलैषा ।
चच्चत्पुटे तत्र चतुष्कले तु स्याद्दक्षिणे भूरिलघुस्तथान्या" ॥ इति

मिश्रस्त्विति । यदा चित्रमार्गे वार्तिकमार्गाश्रिता संभाविता भवेत्तदा सा मागधीत्युच्यते लयस्य भिन्नत्वात्, तथा वार्तिकमार्गे दक्षिणमार्गाश्रिता पृथुलाचेत्तदा सा संभावितेत्युच्यते । चतस्रोऽपि गीतयः न केवलं पूर्वरङ्गे प्रयोज्याः, अपि तु नाट्येऽपि । तदुक्तं मुनिना—

गानयोगे चतस्रस्तु योज्याः सर्वत्र गायनैः । इति (३१ अ)

दिग्ले इति शुष्काक्षराणि तान्येवोपोहनोदितानि कलानां पूरकाणि स्तोभाक्षरा-

---

1 न - चित्रमार्गेच मागधी 2 प - पूर्वरङ्गो 3 म - झण्टुं ।

मध्ये लघ्वक्षराणि स्युः षोडशैव तु नित्यशः ।
एवं ह्युपोहनं कृत्वा [1]तथा वस्तु समाचरेत् ॥ १९९
उत्थापन्यां प्रयोगेऽस्मिन्कलाकालसमन्वितम् [2] ।
अक्षराणां कलायास्तु गुरुलाघवमेव च ॥ २००
पूर्वं [3]तु कथितं यस्मात्तस्मान्नाभिहितं भवेत् ।

यथा—

देवं विभुं त्रिभुवनाधिपतिं कैलासपर्वतगुहाभिरतम् ।
शैलेन्द्रराजतनयादयितं मूर्ध्ना नतोऽस्मि पुरनाशकरम् ॥

एवमुत्थापनी कार्या [5]पूर्वरङ्गप्रयोक्तृभिः ।
अतोऽन्यत्परिवर्ताया लक्षणं संविधीयते ॥ २०२
अस्यास्तूपोहनं कार्यं षट्कलं परिसङ्ख्यया ।
अदौ [6]दिग्ले द्विरुक्तस्तु अन्ते झण्टुं सदा भवेत् ॥
मध्ये लघ्वक्षराण्येव द्वादशैव प्रयोजयेत् ।
वस्तुनोऽत्र प्रवक्ष्यामि गुरुलघ्वक्षरक्रमम् ॥ २०५
द्वे चादौ [7] च चतुर्थं च अष्टमं दशमं तथा ।
चतुर्दशं पञ्चदशं पादे गुर्वक्षराणि तु ॥ २०६

णि । झण्टुं जगतिपवलितक कुचझलगितिकलपशुपति दिगिनिगि दिग्लेतेते इति दशपदात्मकस्तोभा उपोहने स्वरकलाद्योतकाः । वस्त्विति मागध्यादिगीतिः । नाटकादन्यत्रापरान्तकादि सप्तविधा गीतिः । पूर्वमिति ५९ श्लोके । तस्योदाहरणं देवमित्यादि । त्रिलयेति कलाभेदेन द्रुतमध्यविलम्बितादि भेदः स्यात् ।

---

1 न - ततो 2 द - समन्वितम् 3 ज - सङ्कलितं 4 ज - त्रिपुरान्तकरम् 5 न - पूर्वरङ्गे 6 ड - दिङ्ले त्रिरुक्तस्तु 7 ज पादौ ।

सा ध्रुवा परिवर्ताख्या त्रिलया त्रियतिस्तथा ।
परिवर्तास्तु चत्वारः पाणयस्त्रय एव च ॥ २०६
चतुर्भिस्सन्निपातैस्तु[1] द्वात्रिंशत्कलिकान्विता[2] ।
पूर्वरङ्गे प्रयोक्तव्यः परिवर्तः प्रयोक्तृभिः ॥ २०७

यथा ।

चन्द्रार्धभूषणजटं[3] वरं[4] वृषभकेतुं
कैलासपर्वतनिवासिनं[5] सुरवरिष्ठम्[6] ।
शैलाधिराजतनयाप्रियं प्रमथनाथं
मूर्ध्ना नतोऽस्मि त्रिपुरान्तकं परमयोगिम् ॥ २०८

अवकृष्टामिदानीं तु कथ्यमानां निबोधत ।
अस्यास्तूपोहनं कार्यं कलाभिः पञ्चभिर्युतम् ॥ २०९
[7]दिग्ले दिग्ले पुनश्चान्ते झण्टुमस्य प्रयोजयेत् ।
अष्टावेव तु कार्याणि मध्ये लघ्वक्षराणि तु ॥ २१०
तृतीयं चैव षष्ठं तु [8]नवमैकादशे तथा ।
पादे पञ्चदशं चैव षोडशं च भवेद्गुरु ॥ २११
[9]अष्टषष्टिगणैः [10]पादैरवकृष्टांविधिर्बुधाः ।
चतुर्भिः सन्निपातैश्च पाणिभिस्त्रिभिरेव च ॥ २१२

त्रियतिरिति स्रोतोवहादि भाण्डवाद्यसूचिका । परिवर्ताश्चतुर्दिक्षु चत्वारः । पाणयः समपाणिरुपरिपाणि रधःपाणिश्च । एतैर्वाद्यविधिरुक्ता । अष्टषष्टिगणै रिति पातभागाः ।

त्रिभिरिति समपाण्यादिभिः ।

---

1 म - सन्निपातैश्च 2 द - द्वात्रिंशत्रिकलान्वितः 3 न - परं 4 च - वृषभकेतनं 5 न - निवासितम 6 ड - सुरपरिष्ठितं शैलेन्द्रराज 7 न - दिल्लेदिल्ले पुनश्चायं झण्टुमस्य 8 प - नवमैकादशं 9 न - अर्धषष्ठ 10 न - पादैरवकृष्टां विदुर्बुधाः ।

यथा—

वरदं सगणं [1]त्रिपुरान्तकं [2]वृषभकेतुं ।
गजचर्मपटं विषमेक्षणं [3]भुवननाथम् ।
[4]भुजगाभरणं [5]जगतां हितं [6]भुवनयोनिं ।
प्रणतोऽस्मि भवन्तमुमापतिं त्वसितकण्ठम् ॥ २१३

तृतीयं चैव षष्ठं च गुरु पादे त्रयोदशम् ।
[7]चतुर्गुणसमायुक्ता सा कार्या त्वड्डिता ध्रुवा ॥ २१४
तत्राण्युपोहनं कार्यं चतुष्कलसमन्वितम् ।
अड्डितायाः प्रयोगज्ञैरन्ते [8]झण्टुं विभूषितम् ॥
दिग्ले दिग्ले [9]ततश्चैव [10]कार्यमन्ते सदा बुधैः ।
चत्वार्येव तु कार्याणि मध्ये लघ्वक्षराणि तु ॥ २१६

यथा ।

[11]प्रवरं वरदं [12]प्रणमत सततं
गजचर्मपटं [13]मुनिजनसहितम् ।
उमया सहितं [14]भुजगवलयिनं
प्रणतोऽस्मि शिवं [15]त्रिभुवनसहितम् ॥ २१७
प्रयोज्या त्वड्डिता ह्येवं पूर्वरङ्गे यथार्थतः ।
अतःपरं प्रवक्ष्यामि विक्षिप्तायास्तु लक्षणम् ॥ २१८

---

1 ड त्रिपुरान्तकरं 2 ड - वृषभेक्षणं 3 न - भुवननाथम् 4 न - भुजगाहरणं 5 ड - भजता 6 ड - भुवनयोगिनं 7 द - चतुर्गण 8 न - झण्टं 9 न - ततो झण्टं 10 ड - कार्यमानं 11 न - वरदं वरदं 12 ड - प्रमथगणपतिं, 13 ड - मुनिगण 14 न - वलयितं 15 द - त्रिभुवननमितम् ।

तृतीयं चैव षष्ठं च नवमं दशमं तथा ।
गुर्वक्षराणि [1]पादे तु यस्यां [2]विक्षिप्तका तु सा ॥
[3]द्विग्ले त्रिभिर्गुणैर्युक्ताः पातास्तस्य भवन्ति हि ।
त्रिकलं चापि निर्दिष्टमुपोहनमतः परम् ॥ २२०
द्विग्ले द्विग्ले पुनः कार्यमन्ते [4]झण्टुं प्रयोक्तृभिः ।
लघ्वक्षरैर्विहीनं तु विक्षिप्तोपोहनं भवेत् ॥ २२१

यथा ।

त्रिपुरान्तकरं [5]बहुलीलं, उमया सहितं बहुरूपम् ।
[6]भुजगाभरणं त्रिपुरान्तं, प्रणमामि सदा परमीशम् ॥
एवं सर्वा [7]ध्रुवाः कार्या युग्मौजकृतगीतकाः ।
आचार्यबुध्या कर्तव्या पूर्वरङ्गे यथाविधि ॥ २२३
एवं वः कथितं [8]सम्यक्पूर्वरङ्गं त्रिधा मया ।
किमन्यत्संप्रवक्ष्यामि भूयोऽभीष्टं द्विजोत्तमाः ॥

इति भारतीये नाट्यशास्त्रे पूर्वरङ्गविधानं
नाम पञ्चमोऽध्यायः

युग्मोजकृतेति । युग्मं चतुरश्रतालात्मकं, ओजं त्र्यश्रतालेन संमितं मागध्यादिवस्तु । त्रिधेति शुद्धचित्रमिश्रभेदात् । पूर्वरङ्गलक्षणपरिसमाप्तौ नाट्यलक्षणान्तरोपदेश आभिमुख्यं दर्शयति किमित्यादिना ।

इति पञ्चमाध्यायप्रक्षिप्तभागस्य पूरणी व्याख्या

---

1 द - पादेषु 2 प - विक्षिप्तकास्तु सा 3 न - द्विग्लेस्त्रिभिर्गुणैर्युक्ता ड.- सर्वैस्त्रिभिर्गुणैर्युक्ता म - त्रिभिर्गणैर्युक्ता 4 न - झण्टुं 5 न - बहुलीलसुमासहितं 6 ड - ससिसिहरि आसिअजोहिँ पणमामि 7 न - ध्रुवाः 8 न - पूर्वरङ्गस्त्रिधा ।

॥ श्रीः ॥

नाट्यशास्त्रम्.

षष्ठोऽध्यायः

पूर्वरङ्गविधिं श्रुत्वा [1]पुनराहुर्महत्तमाः ।
[2]भरतं मुनयः सर्वे [3]प्रश्नान्पञ्चाभिधत्स्व नः ॥ १

अभिनवभारती—षष्ठोऽध्यायः.

... ...

पूर्वरङ्गविधिं श्रुत्वेति पञ्चप्रश्नानिति । रसानां केन रसत्वमित्येकः प्रश्नः ।

... ...

तथापि नाट्यगतत्वे सम्यङ्निर्णीतं भवति न वचनमात्रात् । अनेनैवाभिप्रायेण दशरूपकनिरूपणे प्रथमप्रश्नार्थो निगमयिष्यते ।

"भविष्यति युगे प्रायो भविष्यन्त्यबुधा नरा" (१९-१२४) इत्यादि । तथा—

"बुद्धयः कर्मशिल्पानि वैलक्षण्यं कलासु च" (१९-१२५) इत्यादि । सिद्ध्यध्याये च द्वितीयप्रश्नार्थविषयो निर्णेष्यते, "तुष्यन्ति तरुणाः कामे" (२७-५७) इत्यादिना । एवमन्यत्रापि तत्र तत्रेत्येतच्च तव्द्याख्यानप्रसङ्ग एव दर्शयिष्यामः । तेन पूर्वप्रश्नितवस्तुतत्त्वनिर्णय एव क्रियतामिति तात्पर्यम् । प्रश्नान् पञ्चेति । ये रसा इत्यादि तु यत्प्रश्नत्रयं, तत्रायं भावः । इहाङ्गणनायां "जग्राह पाठ्य"मित्यादौ पाठ्यगीतयोस्तावत्सुप्रसिद्धं रूपं, अभिनयानामपि "महागीतेषु चैवार्थान्सम्यगेवाभिनेष्यसी"ति (४-१५)

"यदा प्राप्त्यर्थमर्थानां तज्ज्ञैरभिनयः कृतः" (४-२६८)

---

1 प - पुनराहुस्तपोधनाः 2 प - मुनयो भरतं सर्वे न - मुनयो महत्तमास्सर्वे 3 न - पञ्चप्रश्नान्ब्रवीहि नः ।

ये रसा इति पठ्यन्ते नाट्ये [1]नाट्यविचक्षणैः ।
रसत्वं [2]केन वै तेषामेतदाख्यातुमर्हसि ॥ २
[3]भावाश्चैव [4]कथं प्रोक्ताः किं वा ते [5]भावयन्त्यपि ।
संग्रहं कारिकां चैव निरुक्तं [6]चैव तत्त्वतः ॥ ३
तेषां तु वचनं श्रुत्वा मुनीनां भरतो मुनिः ।
प्रत्युवाच पुनर्वाक्यं रसभावविकल्पनम् ॥ ४

इत्यादिवचनबलाच्च सुरूपं तावदभिनयो? हृदयङ्गमः । ये तु "रसानाथर्वणो" दिति रसा उक्तास्ते तावत्प्रसिद्धाः षडम्लादयो, न प्रकृतौ न तु विकृतौ युक्ताः। ये त्वन्ये शृङ्गारादयः केचन रसशब्देन सह प्रयुक्ताः, "शृङ्गाररससम्भवे"ति "ततो रौद्ररसं श्लोक"मिति (५-अ) तत्रापि शृङ्गारादिषु कथं रसशब्दवाच्यत्वम् । वैशब्दोऽक्षरमालायाम् । रसनेन्द्रियग्राह्ये हि रसशब्दः प्रसिद्धः । न चायमनादरस्थानभूतोऽर्थो, येनाविचारित एवोपेक्ष्यते, "खिन्नानां रसभावेष्वि"त्यादावादरातिशयप्रतीतेः । अत एव शब्दप्रादुर्भाव इति शब्दो रसा इति पठ्यन्त इति । तेन प्राधान्यादङ्गाभिनयप्रश्नान्तर्भूतमप्येतत्पुनः प्रश्नितमित्यर्थः । पुनः प्रश्नाभिप्रायेणैवाख्यातुमर्हसीत्युपपन्नम् । पूर्वाख्यानेषु तु पुनरुक्तमभिधत्स्वेत्युक्तत्वात् । भावाश्चेति चशब्दस्तुब्दार्थे । भावास्त्वपठिता अपि कथं प्रोक्ताः । अथ पाठ्यादय एव भावास्तत्किमेषां रूपं, तेनादरविषयत्वात् । रसे प्रश्नान्तरं भूतावृत्त्या, विस्मयस्थानत्वाद्भावेषु प्रश्नचतुष्कम् । तथा हि—रससहभावेन भावाः केचन प्रोक्ताः,'"खिन्नाना"मित्यत्र, ते च केन प्रकारेणोक्ताः । "जग्राहे"त्यादौ तु हि तेषां नामापि न श्रुतम् । अथैतेष्वेव भावशब्दः प्रवर्तितः । तत्रापि भवन्तीति व्युत्पत्तिर्भावयन्तीति किमेतत्, किमुत्पादयन्ति । अथ व्याप्नुवन्ति द्वयोः कर्म किं स्यादिति वाशब्देन चशब्दे-

---

1 नाट्यविचक्षणाः 2 न - केन वा 3 प - भावाश्चापि 4 न - हि ये प्रोक्ताः
5 ड - किञ्च भावयन्ति हि, भावयन्ति वा 6 न - चाभिदत्त्व नः ।

अहं वः[1] कथयिष्यामि निखिलेन तपोधनाः ।
संग्रहं कारिकां चैव निरुक्तं च यथाक्रमम् ॥ ५
न शक्यमस्य[2] नाट्यस्य गन्तुमन्तं कथं चन ।
कस्माद्बहुत्वाज्ज्ञानानां शिल्पानां वाप्यनन्ततः ॥ ६

नापिशब्देन च चत्वारो भावेषु प्रश्नाः । एवं प्राधान्यात्प्रश्नपञ्चकान्तरम् । वस्तुतः पुनः पञ्चप्रश्नी पूर्वोक्तैवेयं विष्फार्यते सङ्ग्रहादिति चाभिधत्स्व ।

ननु तैरिह किं प्रयोजनं ; आह तत्त्वत इति । तुशब्दो हेतौ । तदित्याख्यानं परामृष्टं, यतस्तदाख्यानमत एवैभ्यः सङ्ग्रहादिभ्य उद्देशलक्षणपरीक्षादिषु प्राधान्यात्तदुपक्रममेव सर्वमभिधेयम् । तदाह । निखिलेन सङ्ग्राह्यलक्षणीयनिर्वचनीयात्मनोपलक्षितं सङ्ग्रहादित्रयमेव वक्ष्यामीति त्रयप्रकाररूपेभ्यः समुदायेभ्यः तस्मान्नोऽभिधत्स्वेति । पुनश्शब्दो भिन्नक्रमः । भरतमुनिः पुनः रसभावा विकल्प्यन्ते निश्चीयन्तेऽनेन, तादृग्वाक्यमुवाच, न तु तदीयं वचनमुक्तमुत्तरदानेन समादृत्येति पुनश्शब्दार्थः । मुनेश्चायं भावः, + रसादिषु समुच्चयार्थश्च, तदभिधानेऽन्यन्न किंचिदभिधेयमवशिष्यत इत्येवशब्दः । यथाक्रममिति पूर्वसङ्ग्रह उद्देशप्रकारत्वादित्यादिक्रमेण, स्वबुद्धिविषयं बहुमानं गृह्णतामभीषामित्यभिप्रायेण भवद्भिर्युक्तमेतदुक्तम् ।

सङ्ग्रहमित्यादीन्निदर्शयन्मुनिराह न शक्यमस्येति । शक्यमिति सामान्योपक्रमो माध्यस्थ्यविवक्षां गन्तुमिति प्राप्तुम् । अन्तो निश्चयः । कथंचनेत्यमुं सङ्ग्रहादिप्रकारं वर्जयित्वान्येन प्रतिपदनिरूपणादिनेत्यर्थः । यत्किल प्रतिपदं निरूपयितुं न शक्यं तल्लक्षणद्वारेणोच्यते ; लक्षणस्यैवाङ्गमुद्देश परीक्षे, तस्य विषयप्रदर्शने परिशुद्धौ च तयोर्व्यापारात्, न चात्र प्रतिपदं निरूपणं शक्यमिति ।

---

1 ड - अहं च 2 न - शक्यमिह 3 प - कदा चन 4 न - कस्माद्बहुत्वाज्ञावानां 5 न - प्यनन्ततः ।

1 प्राप्तम् 2 परिच्छेदस्य ।

एकस्यापि न वै [1]शक्यमन्तं ज्ञानार्णवस्य हि ।
गन्तुं [2]किं पुनरन्येषां ज्ञानानामर्थतत्त्वतः ॥ ७
किन्त्वल्पसूत्र[3]ग्रन्थार्थमनुमानप्रसाधकम् ।
नाट्यस्यास्य प्रवक्ष्यामि रसभावादिसंग्रहम् ॥ ८
विस्तरेणोपदिष्टानामर्थानां सूत्रभाष्ययोः ।
[4]निबन्धो यः समासेन संग्रहं तं विदुर्बुधाः ॥ ९
[5]रसा भावा ह्यभिनयाः [6]धर्मीवृत्तिप्रवृत्तयः ।
सिद्धिः स्वरास्तथातोद्यं गानं [7]रङ्गश्च संग्रहः ॥ १०

अत्र हेतुमाह बहुत्वादिति । ज्ञानानि व्याकरणादीनि शास्त्राणि । शिल्पानि चित्रपुस्तादिकर्माणि । तेषामनन्तादन्ताभावात् ।

एतदेवोपोद्बलयत्येकस्येति, नाट्याङ्गभूतस्य कस्यचिदिति शेषः । अर्थस्याभिधेयस्य तत्त्वतः, तननं विस्तारस्तेन । अन्येषामिति, अङ्गभूतस्यापि यान्यङ्गत्वेनायान्तीत्यर्थः ।

सङ्ग्रहादेस्त्वत्र सदुपाय इति दर्शयति किन्त्विति । नाट्यस्य नाट्यविषयस्यार्थस्य, सङ्ग्रहं संक्षिप्य गृह्यतेऽनेनेति तमुद्देशं । प्रवक्ष्यामीति कथं रसभावादि कृत्वा प्राधान्यात्तदुपक्रममित्यर्थः । किं तेनेत्याहानुमानलक्षणं [1]तद्धि केवलव्यतिरेकिहेतुरूपं, तस्य [2]चोद्देशधर्मिणं प्रकल्पयन् प्रकृष्टः साधकः, आश्रयासिद्धत्वशङ्काशमनेन पक्षधर्मत्वमूलाङ्गपोषकत्वात्तस्य सङ्ग्रहस्य स्वरूपमाह । सूत्रभाष्यग्रन्थयोर्लक्षणपरीक्षयोर्योऽर्थो लक्ष्यपरीक्षितव्यलक्षणः सोऽल्पः सङ्कुचितोनाममात्रेणोद्देश्यतया यत्र।अन्येऽप्येवमेव मन्यन्त इति दर्शयति विस्तरेणेति। सूत्रं लक्षणम् । भाष्यं तद्व्यक्तीकरणरूपा परीक्षा। अल्पौ सूत्रग्रन्थौ यत्रार्थे, सोऽर्थो यत्रेति तु व्याख्यानमनेन श्लोकेन संवदते।

सङ्ग्रहं दर्शयति रसा भावा इत्यादिना । चशब्द इतिशब्दार्थे । अभिनयत्रयं गीतातोद्ये चेति पञ्चाङ्गं नाट्यम् । नटस्य हि रसभावयोगे मरणादौ

---

1 न - शक्यमन्तो 2 ड - किमुत सर्वेषां 3 द - गूढार्थं 4 म - निबद्धो 5 ज - रसभावा 6 ज - धर्मवृत्ति 7 प - रङ्गस्य प्रकृतिरेव च ।

1 तत्खलु 2 चोद्देशो धर्मिणः ।

[उपचारस्तथा विप्रा मण्डपाश्चेति सर्वशः ।
त्रयोदशविधो ह्येष ह्यादिष्टो नाट्यसंग्रहः ॥] ११
अल्पाभिधानेनार्थो यः [1]समासेनोच्यते बुधैः ।
सूत्रतः [2]सा तु विज्ञेया कारिकार्थप्रदर्शिनी[3] ॥ १२

तत्त्वावेशो लयादिभङ्गश्च स्यात् । दृष्टस्तु तत्प्रत्ययो नटे भ्रमः । अनेन तु श्लोकेन कोहलमते एकादशाङ्गत्वमुच्यते, न तु भरते, तत्सङ्गृहीतस्यापि पुनरुद्देशात्, निर्देशे चैतत्क्रमव्यत्यासनादित्यौद्भटाः । नैतदिति भट्टलोल्लटः । रसभावानामपि वासनावेशवशेन [1]नटे सम्भवादनुसन्धिबलाच्च, लयाद्यनुसरणादन्तर्भूतस्यापि प्रयोजनवशेन पुनरुद्देशदर्शनात्, क्रमस्य चाविवक्षितत्वादिति । वयन्त्वत्र तत्त्वमग्रे वितनिष्याम इत्यास्तां तावत् ।

अथ कारिकां लक्षयत्यल्पाभिधानेनेति । अनेनार्थस्य कारिकात्वं लक्षणरूपस्य दर्शयति,* तद्वाचकस्य सूत्रस्य तत्संक्षिप्तार्थविवरणात्मकस्य च श्लोकस्यानेन लक्षणवाक्यं द्विधेति तात्पर्यम् । योऽर्थोऽल्पैः शब्दैः समासेन बहुतरलक्ष्यसङ्ग्रहेण सूत्रं वाचकमाश्रित्योच्यते सोऽर्थः कारिका, ज्ञप्तिसाधकत्वात् । तदर्थिनी कारिका, सूत्रतः सूत्रणेन, तेन सूत्रमपि कारिका । तत्सूत्रमपेक्ष्य या अनु पश्चात्पठिता श्लोकरूपा सापि कारिका । तथा हि—सूचनात्मकत्वात्सूत्राल्लब्धो योऽर्थो लक्षणात्मकः स एव सम्यगिति श्रव्यतया पर्णान्यनेनेति वृन्तबन्धेनोच्यमानोऽल्पैश्च शब्दैर्निरूप्यमाणोऽर्थस्य लक्षणीयस्य प्रकर्षे धर्म्यन्तराद्व्यवच्छेदं दर्शयन् धर्मः कारिका, क्रियतेऽनेन ज्ञप्तिरिति कारिका, लक्षणमिति यावत्,+ तदर्थप्रकाशकत्वाच्छ्लोकोऽप्युपचारात्कारिका ।

एतदुक्तं भवति—उद्दिष्टस्य धर्म्यन्तरव्यवच्छेदकं लक्षणं वक्तव्यम् । तच्च पूर्वं सूत्रेण ततोऽप्यकृताक्षेपोत्तरप्रपञ्चेन तद्विवरणमात्ररूपेण सुखग्राह्येण श्लोकेनोभयोरापि हि लक्षणमेव प्रतिपाद्यम् । तदेव कारिकोच्यते [सूत्रश्लोकावुपचारादिति] ।

---

1 न - समासेनोपसूच्यते 2 ड - सोऽनुमन्तव्यः न - सानुमन्तव्या 3 न - प्रयोगिनी ।

---

1. सम्भवादनुबन्ध ।

[1]नानानामाश्रयोत्पन्नं निघण्टुनिगमान्वितम् ।
[2]धात्वर्थहेतुसंयुक्तं [3]नानासिद्धान्तसाधितम् । १३

अथ परीक्षात्मकं निरुक्तं लक्षयति श्लोकद्वयेन नानानामेत्यादिना । समासेन संक्षेपेणानेकव्यक्तिभेदभिन्नस्यार्थस्य लक्षणीयस्य यः सूचकोऽर्थो लक्षणात्मकः स यत्राक्षेपप्रतिसमाधानलक्षणे वस्तुनि सति स्थापितो भवति तत्परीक्षारूपनिरुक्तम् । नचैवं परिभाषा किन्त्वर्थमात्रम् । एतन्निर्भज्याक्षेपप्रतिसमाधानाभ्यां लक्षणस्य वचनमिति ।

एतदाह धात्वर्थवचनेनेति । कथं तल्लक्षणं स्थाप्यत इत्याशङ्क्य क्रियाविशेषणाभिधानद्वारेणाक्षेपप्रतिसमाधानप्रकारं दर्शयति नानेत्यादिना । नानाप्रकाराणि यानि नामानि लक्षणवाक्येऽर्थप्रतिपादकाः सुबन्ताः शब्दास्तानाश्रित्योत्पन्नः उत्पाद आक्षेपप्रतिसमाधानयोर्यत्र । ननु नामपदेषु कथमाक्षेपप्रतिसमाधाने, आह निघण्टुनाभिधानकोशेन रूढिषु, अन्येषु प्रकृतिप्रत्ययविभागनिगमनयान्वितमन्वयो यत्रोत्पादे, यानि च लक्षणवाक्ये तिङन्तानि पदानि तेषु प्रकारमाह धात्वर्थस्य क्रियाया हेतूनां च क्रियानिमित्तानां कारकाणां संयोजनं विचारो यत्र स्थापने, इयता लक्षणवाक्ये पूर्वं शब्दपरीक्षा दर्शिता । अयं शब्दः कथमत्रार्थे वर्तत इत्याक्षेपः, इत्थमिति च प्रतिसमाधानम्, एतत् [1]प्रदर्शितवस्तुप्राणितमेव । अर्थपरीक्षामपि दर्शयति—नानाप्रकारैः, सर्वतन्त्रप्रतितन्त्रादिभिः सिद्धान्तैः प्रमाणमूलैरर्थैः, साधितमाक्षेपोत्तरयोः साधना यत्र स्थापने । एवं परीक्षानेन दर्शिता । तन्त्रादिन्यायास्तु तदङ्गं निरुक्तमपि तच्चतुर्धा—नाम्ना वा, ऊर्ध्वं खमस्योलूखलः । धातुना वा, रस्यत इति रसः । द्वाभ्यां वा, पिशितमश्नातीति पिशाचः । समयेन च, सोऽपि त्रिधा—लौकिको, यथा, भू सत्तायाम्; वैदिको, यथा, दीधीङ् दीप्तिदेवनयोः, वेवीङ्वेतिना तुल्ये, प्रतिशास्त्रपार्षदः,

---

1 न - नानानामाश्रयोत्पन्ननिघण्टुं 2 ड - हेतु धात्वर्थ 3 न - संयुक्तनामसिद्धान्तसाधितः । स्थापितोऽर्थो भवेद्यत्र समासेनार्थसूत्रयोः । धात्वर्थवचनेनेह निरुक्तं तद्विदु र्बुधाः ।

1 प्रीणितमेव ।

[1]स्थापितोऽर्थो भवेद्यत्र समासेनार्थसूचकः ।
धात्वर्थवचनेनेह निरुक्तं तत्प्रचक्षते ॥ १४
सङ्ग्रहो यो मया प्रोक्तः समासेन द्विजोत्तमाः ।
[2]विस्तरं तस्य वक्ष्यामि सनिरुक्तं सकारिकम् ॥ १५
शृङ्गारहास्यकरुणा [3]रौद्रवीरभयानकाः ।
बीभत्साद्भुतसंज्ञौ[4] चेत्यष्टौ नाट्ये रसाः[5] स्मृताः ॥

यथा, गान्धर्ववेदे गीतकविशेषे ओवेणकादिशब्दः । तदेतदुक्तं नानेत्यादिना । निरुक्तस्य तु प्रयोजनं संक्षेपेणार्थावधारणं, तदुक्तं स्थापित इति ।

अथोद्दिष्टानां विभागं सूचयति सङ्ग्रहो यो मयेति । तस्येति सङ्ग्रहस्य । सङ्ग्रह एव विस्तारितो विभाग इत्यर्थः । किं तदुक्तावेव सर्वसम्पन्नं, नेत्याह सनिरुक्तं परीक्षापर्यन्तमित्यर्थः, अन्तवचनेऽव्ययीभावः । न चालक्षितस्य परीक्षेत्याह सकारिकं कारिकासम्पदोपेतं, सम्पत्तौ समासः ।

तत्र विभागं तावदाह शृङ्गारहास्येत्यादिना, नाट्यसङ्ग्रह (६-३२) इत्यन्तेन । तत्र नाट्यं नाम नटगताभिनयप्रभावसाक्षात्कारायमाणैकघनमानसनिश्चलाध्यवसेयः, समस्तनाटकान्यतमकाव्यविशेषाच्च द्योतनीयोऽर्थः । स च यद्यप्यनन्तविभावात्मा, तथापि सर्वेषां जडानां संविदि तस्याश्च भोक्तरि भोक्तृवर्गस्य च प्रधाने भोक्तरि पर्यवसानान्नायकाभिधानभोक्तृविशेषस्थायिचित्तवृत्तिस्वभावः । सा चैकचित्तवृत्तिः स्वपरकीयामिति मानानन्ताचित्तवृत्त्यन्तरशतविशेषितालौकिकभूतगेयपदादिलास्याङ्गदशकोपजीवनस्वीकृतलक्षणगुणालङ्कारगीतातोद्यादिसम्यक्सुन्दरीभूतकाव्यमहिमप्रयोगमालाभ्यासविशेषाश्रयत्वात् प्रच्याविता, अत एव साधारणीभूततया सामाजिकमपि स्वात्मसद्भावेन समावेशयन्ती, तादात्म्यादेव चानुमानागमयोगिप्रत्यक्षादिकरणकृततटस्थप्रमातृप्रमेयपरकीयलौकिकचित्तवृत्तिविलक्षणतया निर्भासमाना, परिमितस्वात्मा-

1 न - साधितो 2 ड - विस्तरेण प्रवक्ष्यामि 3 ज - वीररौद्र 4 द - संज्ञाश्चेत्यष्टौ ज - शान्ता त्र नव नाट्यरसाः 5 म - नाट्यरसाः ।

एते ह्यष्टौ रसाः[1] प्रोक्ता[2] द्रुहिणेन महात्मना ।
पुनश्च भावान्वक्ष्यामि स्थायिसञ्चारिसत्त्वजान् ॥ १७
रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ॥ १८

श्रयतानिर्भासनाविरहाच्च लौकिकप्रमादिजनितनिजरतिश्लोकादिवत् षड्ज (डज?)हानादिचित्तवृत्त्यन्तरजननाक्षमा, तत एव निर्विघ्नस्वसंवेदनात्मक-विश्रान्तिलक्षणेन रसनापरपर्यायेण [1]व्यापारेण गृह्यमाणत्वाद्रसशब्देनाभिधीयते । तेन रस एव नाट्यं, यस्य व्युत्पत्तिः फलमित्युच्यते । तथा च रसाद्दत (६-३३)इत्यत्रैकवचनोपपत्तिः । ततश्च मुख्यभूतान्महारसात्स्फोटदृशीवासत्यानि वा, अन्विताभिधानदृशीवोपायात्मकानि सत्यानि वा, अभिहितान्वयदृशीव तत्समुदायरूपाणि वा रसान्तराणि भागाभिनिवेशदृष्टानि रूप्यन्ते । तद्वक्ष्यन्ते "काव्यर्थान् भावयन्ती"ति तेन प्रथमं रसाः, ते च नव । शान्तापलापिनस्त्वष्टाविति तत्र पठन्ति ।

तत्र कामस्य सकलजातिसुलभतयात्यन्तपरिचितत्वेन सर्वान्प्रति हृद्यतेति पूर्वं शृङ्गारः । तदनुगामी च हास्यः । निरपेक्षभावत्वात्तद्विपरीतस्ततः करुणः । ततस्तन्निमित्तं रौद्रः, स चार्थप्रधानः । ततः कामार्थयोर्धर्ममूलत्वाद्वीरः, स हि धर्मप्रधानः । तस्य च भीताभयप्रदानसारत्वात्तदनन्तरं भयानकः । तद्विभावसाधारण्यसंभावनात्ततो बीभत्सः, इति (ती?) यद्वीरेणाक्षिप्तं वीरस्य पर्यन्तेऽद्भुतः फलमित्यनन्तरं तदुपादानं,तथा च वक्ष्यते "पर्यन्ते कर्तव्यो नित्यं रसोऽद्भुत" इति । ततस्त्रिवर्गात्मकप्रवृत्तिधर्मविपरीतनिवृत्तिधर्मात्मको मोक्षफलः शान्तस्तत्र स्वात्मावेशेन रसचर्वणेत्युक्तम् । स च विभावादिबलादिति भावा वक्तव्याः । तत्र नाज्ञातलौकिकरत्यादिचित्तवृत्तेः कवेर्नटस्य वा तद्विषयविशिष्टविभावाद्याहरणं शक्यमिति स्थायिन उद्दिष्टाः । तत्र शान्तस्य स्थायी विस्मयशमो इति कैश्चित्पठितः । उत्साह एवास्य स्थायीत्यन्ये । जुगुप्सेति केचित् । सर्व इत्येके । तत्त्वज्ञानजो निर्वेदोऽस्य स्थायी । एतदर्थमेवोभयधर्मोप-

---

1 ढ - नवरसाः 2 प - दृष्टा ।

1 व्यापारत्वेन 2 ततस्तु ।

[1]निर्वेदग्लानिशङ्काख्यास्तथासूया मद श्रमः।
आलस्यं चैव दैन्यं च [2]चिन्ता मोहः स्मृतिर्धृतिः॥
व्रीडा चपलता हर्ष आवेगो जडता [4]तथा।
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च॥ २०
सुप्तं [5]विबोधोऽ[6]मर्षश्चाप्यवहित्थमथोग्रता।
[7]मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च॥ २१
[8]त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः।
[9]त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः॥ २२
स्तम्भः स्वेदोऽथ रोमाञ्चः [10]स्वरभङ्गोऽथ वेपथुः।
वैवर्ण्यमश्रु प्रलय [11]इत्यष्टौ सात्त्विकाः स्मृताः॥ २३
आङ्गिको वाचिकश्चैव ह्याहार्यः सात्त्विकस्तथा।
चत्वारोऽभिनया ह्येते [12]विज्ञेया नाट्यसंश्रयाः॥ २४

जीवित्वख्यापनायामङ्गलभूतोऽप्यसौ पूर्वं निर्दिष्टो। व्यभिचारित्वाभिनयत्वोपजीवक इति सात्त्विकाः। स्थायिषु च सङ्ख्या नोक्तेत्यपरे। अत एव स्थायिन एते तु व्यभिचारिणोऽपि भवन्ति। एतच्चाग्रे वितनिष्यामः। व्यभिचारिण एत इत्युभयतो नियमार्थं सङ्ख्योपादानम्। सात्त्विका व्यभिचारिवृत्ताभिनयवृत्तं चोपजीवन्तीति पृथगभिनयादिभ्यो गणिताः। चत्वार इति। आहार्यस्यापि धनुःप्रतिशीर्षकमुकुटादेः प्रत्यक्षबुद्धावुपयोगेऽन्तरङ्गत्वं सूचयति। नाट्यसंश्रयाइति। लोके तु

---

1 ज - निर्वेदोऽथ तथा ग्लानिशङ्कासूया 2 म - मोहमतिस्मृतीः 3 द - चपलता चैव 4 प - धृतिः 5 न - सुप्तिर्विबोधो 6 ड - हर्षश्चाप्यवहित्था 7 ढ - मथिर्व्याधिरथो 8 न - उन्मादश्चैव नाट्यज्ञैरेवं हि 9 न - त्रयस्त्रिंशदिमे 10 न - स्वरभेदोऽथ 11 न - भावास्त्वष्टौ तु सात्त्विकाः 12 ड - येषु नाट्यं प्रतिष्ठितम् न विज्ञेया नाट्यकर्मणि।

[1]लोकधर्मी नाट्यधर्मी धर्मीति द्विविधः स्मृतः।
भारती सात्वती चैव [3]कैशिक्यारभटी तथा। २५
चतस्रो वृत्तयो [4]ह्येता यासु नाट्यं प्रतिष्ठितम्।
आवन्ती दाक्षिणात्या च तथा चैवो[5]ढ्रमागधी॥ २६
[6]पाञ्चालमध्यमा [7]चेति [8]विज्ञेयास्तु प्रवृत्तयः।
[9]दैविकी मानुषी चैव [10]सिद्धिः स्याद्द्विविधैव तु॥ २७
[11]शारीराश्चैव वैणाश्च सप्त षड्जादयः स्वराः।
[निषादर्षभगान्धारमध्यपञ्चमधैवताः॥] २८
ततं चैवावनद्धं[12] च घनं सुषिरमेव च।
[13]चतुर्विधं च विज्ञेयमातोद्यं लक्षणान्वितम्॥ २९

कदाचिन्न भवत्यपि गृहीतत्वात्, नाट्ये तु तत एव (तदेव?) जीवितम्। अत एव रसभावानन्तरमभिनया उद्दिष्टाः। अभिनयाश्च लौकिकं धर्मं तन्मूलमेव [1]तदुपयोगिनं सामयिकं वानुवर्तन्त इत्यतस्तदनन्तरं धर्मी। न चाभिनयोऽभिनेतव्यमन्तरेणास्तीति, दशरूपकयोगद्वारेण तदुपकारिण्यो वृत्तयः, द्वे तिस्रः, पञ्चेति निराकरणाय चतस्र इत्युक्तम्। ता अपि देशवशाद्भूयसा भवन्तीति तदनन्तरं प्रवृत्तयः। सर्वमेतत्सिद्धिपर्यवसानमिति ततो द्विविधा सिद्धिः। स्वराः पाठ्यगानसंगृहीता अपि पृथगुपात्ताः केवलानामपि प्रयोगोपरञ्जकत्वं यल्लक्ष्ये दृश्यते, यत्रान्तरालाप इति प्रसिद्धिस्तदभ्युपगमार्थं। लक्षणान्वितमिति। अन्यत्तु मल्लकपटफलकज्वालामुखपक्षवाद्यादि लौकिकं नैतत्सङ्गृहीतं वाध्यत्वादित्यर्थः। एतच्चान्ते वक्ष्यते। यदपि चतुर्विधं न सर्व-

---

1 ड - लौकिकी नाट्यधर्मी च 2 ड - द्विविधा स्मृता 3 ड - वृत्तिरारभटी 4 ड - ह्येताः कैशिक्या सह कीर्तिताः 5 प- चैवार्धः चैवान्ध्र 6 प पाञ्चालीमध्यमा 7 प - चैव 8 प ज्ञेया नाट्यप्रवृत्तयः 9 म - दैवीति 10 ड - सिद्धिस्तु द्विविधैव च 11 न - शारीरा वैणवाश्चैव 12 न - नद्धश्च 13 न - चतुर्विधं तु।

---

1 तदुपजीविनं।

ततं तन्त्रीगतं ज्ञेयमवनद्धं तु [1]पौष्करम् ।
[2]घनस्तु तालो विज्ञेयः सुषिरो वंश [3]एव च ॥ ३०

प्रवेशाक्षेपनिष्क्राम[4]प्रासादिकमथान्तरम्[5] ।
गानं पञ्चविधं ज्ञेयं ध्रुवायोगसमन्वितम् ॥ ३१

[उत्तमाधममध्या च प्रकृतिस्त्रिविधा स्मृता ।
बाह्याभ्यन्तरसम्भूतमुपचारद्वयं भवेत् ॥] ३२

चतुरश्रो विकृष्टश्च रङ्गस्त्र्यश्रश्च कीर्तितः
एवमेषोऽल्प[6]सूत्रार्थो निर्दिष्टो नाट्यसंग्रहः ॥ ३३

मिदं वहुलचर्मकारादिवाद्यमपि च वक्ष्यमाणलक्षणान्वितम् । आतुद्यतेऽभिहन्यत इत्यर्थः । पुष्करशब्दश्रवणादागतं पुष्कारवर्तकदेवताधिष्ठितं पद्मपत्राकारं चर्मपुटभापं चेति पौष्करम् । हन्यते कलासाम्यार्थमिति घनः । अत एव तालैकप्रमाणत्वात्स्वरवर्णसम्भवात्ताल इत्युक्तः कांस्यतालादिः । एवकारः काहलादिव्युदासाय । पात्रस्य प्रवेशे भावप्रकृत्यवस्थादिसूचकं यद्गीयते तत्प्रवेशगानम् । प्रविष्टस्यान्तर्गतां चित्तवृत्तिं सामाजिकान्प्रति प्रसादयितुं प्रथयितुं प्रसादगानम् । रसान्तराक्षेपार्थमाक्षेपगानम् । अन्तरमिति गतिपरिक्रमणनिरुपणादिरवसरः, तत्र यद्गीयते तदान्तरं गानम् । पात्रस्य निष्क्रमणे तु निष्क्रामगानम् । प्रवेशादय उपचाराद्गाने, प्रसादोऽस्य प्रयोजनं प्रासादिकम् । अन्ये तु समासान्मत्वर्थीयं ठञं कृत्वा प्रासादिकमिति । ध्रुवागीत्याधारो नियतः पदसमूहस्तत्र योगेन युज्यमानतया समन्वितं तदर्थप्राधान्येन नियतरूपत्वादिति गानस्य गान्धर्वाद्भेदः सूचितः । कक्ष्याविभागेन गत्युपकारेण सर्वाभिनयानुभावोपकारी गानतोद्योपकारी च मण्डपः, यथोक्तम् "यश्चाप्यास्यगतो भाव"(२-२३) इति, तथा "गम्भीरस्वरता येन कुतपस्ये"त्यादि (२-८६)। रङ्गेणैव च कक्ष्याविभागः सङ्गृहीत इति नानुद्दिष्टं कक्ष्यायाः ।

1 न - पुष्करम् 2 प - घनन्तु 3 द - पत्र तु । 4 ङ - प्रावेशिक 5 ज - अथापरम् 6 म - सूत्रार्थोऽप्यादिको ।

अतः परं प्रवक्ष्यामि सूत्रग्रन्थविकल्पनम् ।

तत्र रसानेव [1]तावदादावभिव्याख्यास्यामः । न हि

एतदुपसंहरत्येवमित्यादिना । एवमुद्देशविभागभेदेन द्विधा सङ्ग्रहमभिधाय लक्षणपरीक्षे वक्तुं प्रतिजानीते अतः परमिति । सूत्रग्रन्थविकल्पनमिति । सूत्रं सूत्रकं लक्षणं वक्ष्यामि । तेनैव च कारिका संगृहीता । ग्रन्थो भाष्यं तत्कृतं च विकल्पनमाक्षेपप्रतिसमाधानात्मकमिति परीक्षा निरुक्तशब्दवाच्या प्रतिज्ञाता । सूत्रविवरणस्वभावा तु कारिका सूत्रमपि प्रकाशयन्ती बहुतराक्षेपसमाधानव्याकुलशिष्यजनस्थितपक्षनिरूपणेनोपकरोतीति भाष्यस्य पश्चादस्याः पाठः ।

एवं सूत्रं भाष्यं परीक्षां च प्रवक्ष्यामीति प्रतिज्ञाय रसविषयमेव सूत्रप्रभृति प्रथमं वक्तव्यमित्यत्र परिकरबन्धं घटयितुमाह तत्रेति । तेषां रसादीनां मध्ये । एवकारोऽवधारणे । तावदिति क्रमे । अभितः सूत्रग्रन्थपरीक्षाक्रमेण विभज्याख्यास्यामः ।

उद्देशक्रमस्यैव पर्यनुयोज्यतामाशङ्क्यापरं क्रमहेतुमाह न हीति । हि यस्मात्,रसं विना विभावादिरर्थो बुद्धौ व्याख्येयतया न प्रवर्तते,यतश्च तं विनार्थः प्रयोजनं प्रीतिपुरस्सरं व्युत्पत्तिमयं न प्रवर्तते, यतश्च रसं प्रत्यादृते रसनात्मकप्रतीत्येकघनविश्रान्ते सामाजिकलोकेऽन्यो भावादिरर्थः प्रविभागेन बुद्धौ न वर्तते, सर्वस्य जडस्य चित्तवृत्त्यन्तरोपकृतप्रधानस्थायिनामधेयचित्तवृत्तिमग्नत्वेन विभावानुभावादिवर्गस्यावभासात्, अतो व्याख्यातृनटसामाजिकाभिप्रायेण तस्यैव प्राधान्यमिति रस एव तावत्पूर्वमुद्दिष्ट इति, तस्यैव लक्षणादि कर्तव्यमिति तात्पर्यम् । पूर्वत्र बहुवचनमत्र चैकवचनं प्रयुञ्जानस्यायमाशयः—एक एव तावत्परमार्थतो रसः सूत्रस्थानीयत्वेन रूपके प्रतिभाति । तस्यैव पुनर्भागदृशा विभागः । सोऽपि च न [1]तदेकमुखप्रेक्षितामतिवर्तते । एतच्चोद्देश एवास्माभिरभिहितचरं, अभिधास्यते चाग्रे ।

---

1 न - अभिधास्यामः ।

---

1 नटभेदमुखप्रेक्षकमति ।

रसादृते [1]कश्चिदर्थः प्रवर्तते । तत्र विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः ।

एवं क्रमहेतुमभिधाय रसविषयं लक्षणसूत्रमाह—विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः । अत्र भट्टलोल्लटप्रभृतयस्तावदेवं व्याचख्युः—विभावादिभिः संयोगोऽर्थात् स्थायिनस्ततो रसनिष्पत्तिः । तत्र विभावश्चित्तवृत्तेः स्थाय्यात्मिकाया उत्पत्तौ कारणम् । अनुभावाश्च न रसजन्या अत्र विवक्षिताः, तेषां रसकारणत्वेन गणनानर्हत्वात्, अपि तु भावानामेव ये‌ऽनुभावाः । व्यभिचारिणश्च चित्तवृत्त्यात्मकत्वात् यद्यपि न सहभाविनः स्थायिना, तथापि वासनात्मतेह तस्य विवक्षिता । दृष्टान्तेऽपि व्यञ्जनादिमध्ये कस्य चिद्वासनात्मकता स्थायिवदन्यस्योद्भतता व्यभिचारिवत् । तेन स्थाय्येव विभावानुभावादिभिरुपचितो रसः । स्थायी [भव]त्वनुपचितः । स चोभयोरपि मुख्यया वृत्त्या रामादावनुकार्येऽनुकर्तरि च नटे रामादिरूपतानुसन्धानबलात्—इति ।

चिरन्तनानां चायमेव पक्षः । तथा हि दण्डिना स्वालङ्कारलक्षणेऽभ्यधायि । "रतिः शृङ्गारतां गता रूपबाहुल्ययोगेने"ति (काव्यादर्शे २-२८१)

"अधिरुह्य परां कोटिं कोपो रौद्रात्मतां गतः" (काव्यादर्शे २-२८३)

इत्यादि च ।

एतन्नेति श्रीशङ्कुकः । विभावाद्ययोगे स्थायिनो लिङ्गाभावेनावगत्यनुपपत्तेर्भावानां पूर्वमभिधेयताप्रसङ्गात्, स्थितदशायां लक्षणान्तरवैयर्थ्यात्, मन्दतरतममाध्यस्थ्याद्यानन्त्यापत्तेः, हास्यरसे षोढात्वाभावप्राप्तेः, कामावस्थासु दशस्वसङ्ख्यरसभावादिप्रसङ्गात्, शोकस्य प्रथमं तीव्रत्वं कालाच्च मान्द्यदर्शनं क्रोधोत्साहरतीनाममर्षस्थैर्यसेवाविपर्यये ह्रासदर्शनमिति विपर्ययस्य दृश्यमानत्वाच्च, तस्माद्धेतुभिर्विभावाख्यैः कार्यैश्चानुभावात्मभिः सहचारिरूपैश्च व्यभिचारिभिः प्रयत्नार्जिततया कृत्रिमैरपि तथानभिमन्यमानैरनुकर्तृस्थत्वेन लिङ्गबलतः प्रतीयमानः स्थायिभावो मुख्यरामादिगतस्थाय्यनुकरणरूपः, अनुकरणरूपत्वादेव च नामान्तरेण व्यपदिष्टो रसः । विभावा हि काव्यबलानुसन्धेयाः, अनुभावाः शिक्षातः, व्यभिचारिणः कृत्रिमनिजानु-

---

1 ड - कश्चिदप्यर्थः ।

भावार्जनबलात्, स्थायी तु काव्यबलादपि नानुसन्धेयः। रतिः शोक इत्यादयो हि शब्दा रत्यादिकमभिधेयीकुर्वन्त्यभिधानत्वेन, न तु वाचिकाभिनयरूपतयावगमयन्ति। न हि वागेव वाचिकं, अपि तु तया निर्वृत्तं, अङ्गैरिवाङ्गिकम्। तेन—

" विवृद्धात्माप्यगाधोऽपि दुरन्तोऽपि महानपि।
वाडवेनेव जलधिः शोकः क्रोधेन पीयते " इति,

तथा—

" शोकेन कृतः स्तम्भः तथा स्थितो योऽनवस्थिताक्रन्दैः।
हृदयस्फुटनभयार्तैररर्दितुमभ्यर्थ्यते सचिवैः "

इत्येवमादौ न शोकोऽभिनेयोऽपि त्वभिधेयः।

" भाति पतितो लिखन्त्यास्तस्या बाष्पाम्बुशीकरकणौघः।
स्वेदोद्गम इव करतलसंस्पर्शादेष मे वपुषि॥ (रत्ना २-११)

इत्यनेन तु वाक्येन स्वार्थमभिदधतोदयनगतः सुखात्मा रतिस्थायी(यि?)भावोऽभिनीयते न तूच्यते। अवगमनशक्तिर्ह्यभिनयनं, वाचकत्वादन्या। अत एव स्थायिपदं सूत्रे भिन्नविभक्तिकमपि नोक्तम्। तेन रतिरनुक्रियमाणा शृङ्गार इति तदात्मकत्वं तत्प्रभवत्वं च युक्तम्। अर्थक्रियापि मिथ्याज्ञानदृष्टा—

(" मणिप्रदीपप्रभयोर्मणिबुध्याभिधावतोः।
मिथ्याज्ञानाविशेषोऽपि विशेषोऽर्थक्रियां प्रति " इति।)

न चात्र नर्तक एव सुखीति प्रतिपत्तिः। नाप्ययमेव राम इति, न चाप्ययं न सुखीति, नापि रामः स्याद्वा न वायमिति, न चापि तत्सदृश इति। किन्तु सम्यङ्मिथ्यासंशयसादृश्यप्रतीतिभ्यो विलक्षणा चित्रतुरगादिन्यायेन यः सुखी रामः, असावयमिति प्रतीतिरस्तीति। तदाह—

" प्रतिभाति न सन्देहो न तत्वं न विपर्ययः।
धीरसावयमित्यस्ति नासावेवायमित्यपि॥
विरुद्धबुद्धिसम्भेदादविवेचितसंप्लवः[1]।
युक्त्या पर्यनुयुज्येत स्फुरन्ननुभवः कया " ॥—इति।

तदिदमप्यन्तस्तत्त्वशून्यं न विमर्दक्षममित्युपाध्यायाः। तथा हि—अनुकरणरूपो रस इति यदुच्यते तत्किं सामाजिकप्रतीत्यभिप्रायेण, उत नटाभिप्रायेण। किं वा

1 विप्लवः।

वस्तुवृत्तविवेचकव्याख्यातृबुद्धिसमवलम्बनेन, यथाहुर्व्याख्यातारः खल्वेवं विवेचयन्तीति। अथ भरतमुनिवचनानुसारेणाद्यः पक्षोऽसङ्गतः। किंचिद्धि प्रमाणेनोपलब्धं तदनुकरणमिति शक्यं वक्तुम्। यथा, एवमसौ सुरां पिबतीति सुरापानानुकरणत्वेन पयःपानं प्रत्यक्षावलोकितं प्रतिभाति; इह च नटगतं किं तदुपलब्धं तदनुकरणतया भातीति चिन्त्यम्। तच्छरीरं तन्निष्ठं प्रतिशीर्षकादि रोमाञ्चकगद्गदिकादिभुजाक्षेपवलनप्रभृति भ्रूक्षेपकटाक्षादिकं च न रतेश्चित्तवृत्तिरूपतयानुकारत्वेन कस्यचित्प्रतिभाति जडत्वेन भिन्नेन्द्रियग्राह्यत्वेन भिन्नाधिकरणत्वेन च ततोऽतिवैलक्षण्यात्। मुख्यामुख्यावलोकने च तदनुकरणप्रतिभासः। न च रामगतां रतिमुपलब्धपूर्विणः केचित्। एतेन रामानुकारी नट इत्यपि निरस्तः प्रवादः।

अथ नटगता चित्तवृत्तिरेव प्रतिपन्ना सती रत्यनुकारः शृङ्गार इत्युच्यते, तत्रापि किमात्मकत्वेन सा प्रतीयत इति चिन्त्यम्। ननु प्रमदादिभिः कारणैः कटाक्षादिभिः कार्यैः धृत्यादिभिश्च सहचारिभिर्लिङ्गभूतैर्या लौकिकी कार्यरूपा कारणरूपा सहचारिरूपा च प्रतीतियोग्या तदात्मकत्वेन सा नटचित्तवृत्तिः प्रतिभाति, हन्त तर्हि रत्याकारेणैव सा प्रतिपन्नेति दूरे रत्यनुकरणता वाचोयुक्तिः।

ननु ते विभावादयोऽनुकार्ये पारमार्थिकाः, इह त्वनुकर्तरि न तथेति विशेषः। अस्त्वेवं, किन्तु ते हि [1]विभावादयोऽनन्तकारणानन्तकार्यानन्तसहचररूपा अपि काव्यशिक्षादिबलोपकल्पिताः कृत्रिमाः सन्तः किं कृत्रिमत्वेन सामाजिकैः गृह्यन्ते न वा। यदि गृह्यन्ते, तदा तैः कथं रतेरवगतिः।

नन्वत एवं(व?) तत्प्रतीयमानं रत्यनुकरणं बुद्धेः कारणम्। कारणान्तरप्रभवेषु हि कार्येषु सुशिक्षितेन [न] तथाज्ञाने वस्त्वन्तरस्यानुमानं तावद्युक्तम्। असुशिक्षितेन तु तस्यैव प्रसिद्धस्य कारणस्य, [2]यथा वृश्चिकविशेषाद्गोमयस्येवानुमानं वृश्चिकस्यैव तत्परं मिथ्याज्ञानं, यत्रापि धूमलिङ्गज्ञानं मिथ्या तत्रापि न [3]तदाभासानुमानमयुक्तम्। न हि बाष्पाद्धूमत्वेन ज्ञातादनुकारप्रतिभासमानादपि लिङ्गात्तदनुकारानुमानं युक्तम्। धूमानुकारत्वेन हि ज्ञायमानान्नीहाराग्न्याख्या(ग्न्य?)नुकारं जपापुष्पप्रतीतिर्दृष्टा।

---

1. बिभावादयोऽतत्करणातत्कार्यातत्सहचररूपा 2 तथा 3 तदभ्यासानुमानं युक्तं।

नन्वक्रुद्धोऽपि नटः क्रुद्ध इव भाति। सत्यम्। क्रुद्धेन सदृशः। सादृश्यं च भ्रुकुट्यादिभिः, गौरिव गवयेन मुखादिभिरिति। नैतावतानुकारः कश्चित्। न चापि सामाजिकानां सादृश्यमतिरस्ति। सामाजिकानां च न भावशून्या नर्तके प्रतिपत्तिरित्युच्यते। अथ च तदनुकारप्रतिभास इति रिक्ता वाचोयुक्तिः। यच्चोक्तं रामोऽयमित्यस्तिप्रतिपत्तिस्तदपि यदि तदात्वेति निश्चितं तदुत्तरकालभाविबाधकवैधुर्याभावे कथं न तत्त्वज्ञानं स्यात्। बाधकसद्भावे वा कथं न मिथ्याज्ञानम्। वास्तवेन च वृत्तेन बाधकानुदयेऽपि मिथ्याज्ञानमेव स्यात्। तेन विरुद्धबुद्धि(द्ध्य?)संभेदादित्यसत्। नर्तकान्तरेऽपि च रामोऽयमिति प्रतिपत्तिरस्ति। ततश्च रामत्वं सामान्यरूपमित्यायातम्।

यच्चोच्यते विभावाः काव्यादनुसन्धीयन्ते तदपि न विद्मः। न हि ममेयं सीता काचिदिति प्रतिपत्तिर्नटस्य। अथ सामाजिकस्य तथा प्रतीतियोग्याः क्रियन्त इत्येतदेवानुसन्धानमुच्यते, तर्हि स्थायिनि सुतरामनुसन्धानं स्यात्। तस्यैव हि मुख्यत्वेनास्मिन्नयमिति सामाजिकानां प्रतिपत्तिः।

यत्तु वाग्वाचिकमित्यादिना भेदाभिधानसंरम्भगर्भमहीयानभिनयरूपताविवेकः कृतः स उत्तरत्र स्वावसरे(अ-१४)चर्चयिष्यते। तस्मात्सामाजिकप्रतीत्यनुसारेण स्थाय्यनुकरणं रस इत्यसत्। न चापि नटस्येत्थं प्रतिपत्तिः, रामं तच्चित्तवृत्तिं वानुकरोमीति, सदृशकरणं हि तावदनुकरणमनुपलब्धप्रकृतिना न शक्यं कर्तुम्। अथ पश्चात्करणमनुकरणम्, तल्लोकेऽप्यनुकरणात्मतातिप्रसक्ता। अथ न नियतस्य कस्यचिदनुकारः, अपि तूत्तमप्रकृतेः शोकमनुकरोति, तर्हि केनेति चिन्त्यं, न तावच्छोकेन, तस्य तदभावात्। न चाश्रुपातादिना शोकस्यानुकारः, तद्वैलक्षण्यादित्युक्तम्। इयत्तु स्यात् - उत्तमप्रकृतेर्ये शोकानुभावाःताननुकरोमीति। तत्रापि कस्योत्तमप्रकृतेः। यस्य कस्य चिदिति चेत्सोऽपि विशिष्टतां विना कथं बुद्धावारोपयितुं शक्यः। य एवं रोदितीति चेत्स्वात्मापि मध्ये नटस्यानुप्रविष्ट इति गलितोऽनुकार्यानुकर्तृभावः।

किञ्च नटः शिक्षावशात्स्वविभावस्मरणाच्चित्तवृत्तिसाधारणीभावेन हृदयसंवादात्केवलमनुभवान्प्रदर्शयन् काव्यमुपचितकाकुप्रभृत्युपस्कारेण पठंश्चेष्टत इत्येतावन्मात्रेऽस्य प्रतीतिर्नत्वनुकारं वेदयते। कान्तवेषानुकारवद्धि न रामचेष्टितस्यानुकारः। एतच्च प्रथमाध्यायेऽपि दर्शितमस्माभिः। नापि वस्तुत्वानुसारेण तदनुकारत्वम्, न तु संवेद्यमानस्य वस्तुवृत्तसत्वानुपपत्तेः। यच्च वस्तुवृत्तं तद्दर्शयिष्यामः। न च मुनिवचनमेवंविधमस्ति क्वचित्स्थाय्यनुकरणं रस इति ;

नापि लिङ्गमात्रार्थे मुनेरुपलभ्यते। प्रत्युत ध्रुवागानतालवैचित्र्यलास्याङ्गोपजीवनं निरूपणादिविपर्यये लिङ्गमिति सन्ध्यङ्गाध्यायान्ते वितनिष्यामः। सप्तद्वीपानुकरण(१-१२०)मित्यादि त्वन्यथापि शक्यगमनिकमिति तदनुकारेऽपि च क्व नामान्तरं कान्तवेषगत्यनुकरणादौ।

यच्चोच्यते वर्णकैर्हरितालादिभिः संयुज्यमान एव गौरित्यादि, तत्र यद्यभिव्यज्यमान इत्यर्थोऽभिप्रेतस्तदसत्। न हि सिन्दूरादिभिः पारमार्थिको गौरभिव्यज्यते प्रदीपादिभिरिव, किन्तु तत्सदृशः समूहविशेषो निर्वर्त्यते, अत एव हि सिन्दूरादयो गवावयवसन्निवेशसदृशेन सन्निवेशविशेषेणावस्थिता, गोसदृशीतिप्रतिभासस्य विषयो नैवं विभावादिसमूहो रतिसदृशताप्रतिपत्तिग्राह्यः। तस्माद्भावानुकरणं रस इत्यसत्।

येन त्वभ्यधायि सुखदुःखजननशक्तियुक्ता विषयसामग्री बाह्यैव, साङ्ख्यदृशा सुखदुःखस्वभावो रसः, तस्यां च सामग्र्यां दलस्थानीया विभावाः संस्कारकाः अनुभावव्यभिचारिणः, स्थायिनस्तु तत्सामग्रीजन्या आन्तराः सुखदुःखस्वभावा इति, तेन स्थायिभावान् रसत्वमुपनेष्याम इत्यादावुपचारमङ्गीकुर्वता ग्रन्थविरोधं स्वयमेव बुध्यमानेन दूषणाविष्करणमौर्ख्यात् प्रामाणिको जनः पारिरक्ष(क्षि?)त इति किमस्योच्यते यत्त्वत्यन्तं नः (यत्त्वन्यत्तत्?) प्रतीतिवैषम्यप्रसङ्गादि तत्क्रियदत्रोच्यताम्।

भट्टनायकस्त्वाह - रसो न प्रतीयते नोत्पद्यते नाभिव्यज्यते। स्वगतत्वेन हि प्रतीतौ करुणे दुःखित्वं स्यात्, न च सा प्रतीतिर्युक्ता। सीतादेरविभावत्वात्, स्वकान्तास्मृत्यसंवेदनात्, देवतादौ साधारणीकरणायोग्यत्वात्, समुद्रलङ्घनादेरसाधारण्यात्। न च [1]तद्वतो रामस्य [2]स्मृतिरनुपलब्धत्वात्। न च शब्दानुमानादिभ्यः तत्प्रतीतौ लोकस्य सरसता प्रयुक्ता प्रत्यक्षादिव, नायकयुगलकावभासे हि प्रत्युत लज्जाजुगुप्सास्पृहादिस्वोचितचित्तवृत्त्यन्तरोदयः। अव्यग्रतयाकाशूरसत्वमथापि स्यात्तत्र + प्रतीतिरनुभवस्मृत्यादिरूपरसस्य युक्ता। उत्पत्तावपि तुल्यमेतद्दूषणम्। शक्तिरूपत्वेन पूर्वं स्थितस्य पश्चादभिव्यक्तौ विषयार्जनतारतम्यापत्तिः। स्वगतत्वपरगतत्वादि च पूर्ववद्विकल्प्यम्। तस्मात्काव्ये दोषाभावगुणालङ्कारमयत्वलक्षणेन, नाट्ये चतुर्विधाभिनयरूपेण, निविडनिजमोहसङ्कटतानिवारणकारिणा विभावादिसाधारणीकरणात्मनाभिधातो, द्वितीयेनांशेन भावकत्वव्यापारेण भाव्यमानो,

1 तत्त्वतो 2 स्मृतिरुपलब्धः।

रसोऽनुभवस्मृत्यादिविलक्षणेन रजस्तमोऽनुवेधवैचित्र्यबलाद्धृदि विस्ताराविकासलक्षणेन सत्त्वोद्रेकप्रकाशानन्दमयनिजसंविद्विश्रान्तिविलक्षणेन परब्रह्मास्वादसविधेन भोगेन परं भुज्यत इति। तत्र पूर्वपक्षोऽयं भट्टलोल्लटपक्षानभ्युपगमादेव नाभ्युपगत इति तद्दूषणमनुत्थानोपहतमेव। प्रतीत्यादिव्यतिरिक्तश्च संसारे को भोग इति न विद्मः। रसनेति चेत्, सापि प्रतिपत्तिरेव। केवलमुपायवैलक्षण्यान्नामान्तरं प्रतिपद्यताम्। दर्शनानुमितिश्रुत्युपमितिप्रति[1]भानादिनामान्तरवत्। निष्पादनाभिव्यक्तिद्वयानभ्युपगमे च नित्यो वा असद्वा रस इति तृतीया गतिः स्यात्। न चाप्रतीतं वस्त्वस्ति व्यवहारे योग्यम्।

अथोच्यते—प्रतीतिरस्य भोगीकरणं, तच्च रत्यादिस्वरूपं, तदस्तु, तथापि न तावन्मात्रं। यावन्तो हि रसास्तावन्त एव रसना (रसा?) त्मनः प्रतीतयो भोगीकरणस्वभावाः। सत्त्वादिगुणानां चाङ्गाङ्गिवैचित्र्यमनन्तं कल्प्यमिति का त्रित्वेनेयत्ता—

"अभिधा भावना चान्या तद्भोगीकृतमेव च।
अभिधाधामतां याते शब्दार्थालङ्कृती ततः।
भावनाभाव्य एषोऽपि शृङ्गारादिगणो हि यत्।
तद्भोगीकृतरूपेण व्याप्यते सिद्धिमान्नरः"॥ इति

यत् "काव्येन भाव्यन्ते रसा" इत्युच्यते, तत्र विभावादिजनितचर्वणात्मकास्वादरूपप्रत्ययगोचरतापादनमेव यदि भावनं तदभ्युपगम्यत एव। यत्तूक्तम्—

"संवेदनाख्यव्यङ्ग्य(स्व)परसंवित्तिगोचरः।
आस्वादनात्मानुभवो रसः काव्यार्थ उच्यते" इति

तत्र व्यज्यमानतया व्यङ्ग्यो रक्ष्यते। अनुभवेन च तद्विषय इति मन्तव्यम्। नन्वेवं कथं रसतत्त्वमास्ताम्। किं कुर्मः।

आम्नायसिद्धे किमपूर्वमेत-
त्संविद्विकासेऽधिगतागमित्वम्।
इत्थं स्वयंग्राह्यमहार्हहेतु-
द्वन्द्वेन किं दूषयिता न लोकः॥

1 बलाद्गति 2 गानादि।

ऊर्ध्वोर्ध्वमारुह्य यदर्थतत्त्वं
धीः पश्यति श्रान्तिमवेदयन्ती ।
अलं तदाद्यैः परिकल्पितानां
विवेकसोपानपरम्पराणाम् ॥

चित्तं निरालम्बनमेव मन्ये
प्रमेयसिद्धौ प्रथमावतारम् ।
तन्मार्गलाभे सति सेतुबन्ध-
पुरप्रतिष्ठादि न विस्मयाय ॥

तस्मात्सतामत्र न दूषितानि
मतानि तान्येव तु शोधितानि ।
पूर्वप्रतिष्ठापितयोजनासु
मूलप्रतिष्ठाफलमामनन्ति ॥

तद्युच्यतां परिशुद्धतत्त्वम् । उक्तमेव मुनिना न त्वपूर्वं किञ्चित् । तथाह्याह "काव्यार्थान् भावयन्ती"ति(अ-७)तत्काव्यार्थो रसः। यथा हि रात्रिमासत, *तामग्नौ प्रादादित्यादावर्थितादिलक्षितस्याधिकारिणः प्रतिपत्तिमात्रादतितीव्रमरोचितात्प्रथमप्रवृत्तादनन्तरमधिकैवोपात्तकालतिरस्कारेणैवास्ते प्रददातीत्यादिरूपासंक्रमणादिस्वभावा यथादर्शनं प्रति भावनाविधिनियोगादिभाषाभिर्व्यवहृता प्रतिपत्तिस्तथैव काव्यात्मकादपि शब्दादधिकारिणोऽधिकास्ति प्रतिपत्तिः। अधिकारी चात्र विमलप्रतिभानशालिहृदयः। तस्य च "ग्रीवाभङ्गाभिरामं"मिति (शाकु-अ-१)"उमापि नीलालके"ति(कुमा-३-६२)'हरस्तु किञ्चि'(कुमा-३-६७) दित्यादिवाक्येभ्यो वाक्यार्थप्रतिपत्तेरनन्तरं मानसी साक्षात्कारात्मिकापहासिततत्तद्वाक्योपात्तकालादिविभागा तावत्प्रतीतिरुपजायते। तस्यां च यो मृगपोतकादिर्भाति तस्य विशेषरूपत्वाभावाद्भीत इति,त्रासकस्यापारमार्थिकत्वाद्भयमेव परं देशकालाद्यनालिङ्गितं,तत एव भीतोऽहं भीतोऽयं शत्रुर्वयस्यो मध्यस्थो वेत्यादिप्रत्ययेभ्यो दुःखसुखादिकृतभानादिबुध्यन्तरोदयनियमवत्तया विघ्नबहुलेभ्यो विलक्षणं निर्विघ्नप्रतीतिग्राह्यं साक्षादिव हृदये निविशमानं चक्षुषोरिव विपरिवर्तमानं भयानको रसः।तथाविधे हि भये नात्यन्त(नात्मा?) तिरस्कृतो न विशेषत उल्लिखितः,+ एवंपरोऽपि।तत एव न परिमितमेव साधारण्यमपि तु

1 ग्राहकस्य 2 विधीयमानं 3 चक्षुषोरिव विपरि । * वपां (तै—ब्रा)

विततं व्याप्तिग्रह इव धूमाग्न्योर्भयकम्पयोरेव वा तदत्र साक्षात्कारायमाणत्वेन परिपोषिका नटादिसामग्री, यस्यां [1]वस्तुसतां काव्यार्पितानां च देशकालप्रमात्रादीनां नियमहेतूनामन्योन्य[2]प्रतिबन्धबलादत्यन्तमपसरणे स एव साधारणीभावः सुतरां पुष्यति । अत एव सर्वसामाजिकानामेकघनतैव प्रतिपत्तेः सुतरां रसपरिपोषाय सर्वेषामनादिवासनाचित्रीकृतचेतसां वासनासंवादात् । सा चाविघ्ना संवित् चमत्कार[3]स्तज्जोऽपि कम्पपुलकोल्लुकसनादिर्विकारश्चमत्कारः । यथा—

"अज्ज वि हरी चम०कइ कहकह वि न मंदरेण कळिआइं ।
चंदकळाकंदळस०छहाइ ळ०छीइ अंगाइ ॥"

तथा हि स चातृप्तिव्यतिरेकेणाच्छिन्नो भा(भो ?)गावेश इत्युच्यते । भुञ्जानस्याद्भुत[4]भोगात्मस्पन्दाविष्टस्य च मनः करणं चमत्कार इति । स च साक्षात्कारस्वभावो मनसाध्यवसायो वा सङ्कल्पो वा स्मृतिर्वा तथात्वेन स्फुरत्य(न्त्?)स्तु । यदाह—

"रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्—
[5]पर्युत्सुको भवति यत्सुखितोऽपि जन्तुः ।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि" (शाकु ५—)

इत्यादि, (अत्र हि स्मरतीति या स्मृतिरुपदर्शिता सा न तार्किकप्रसिद्धा, पूर्वमेतस्यार्थस्याननुभूतत्वात् । अपि तु प्रतिभानापरपर्यायसाक्षात्कारस्वभावेयमिति ।) सर्वथा तावदेषास्ति प्रतीतिरास्वादात्मा, यस्यां रतिरेव भाति । तत एव विशेषान्तरानुपहितत्वात्सा रसनीया सती न लौकिकी न मिथ्या नानिर्वाच्या न लौकिकतुल्या न तदारोपादिरूपा । अत्रैव चोपचयावस्थासु देशाद्यनियन्त्रणादनुकारोऽ[प्यभावा]नुगामितया करणाद्विषय[6]सामग्र्यपि भवतु विज्ञानवादावलम्बनात्, सर्वथा रसनात्मकवीतविघ्नप्रतीतिग्राह्यो भाव एव रसः । तत्र विघ्नापसारका विभावप्रभृतयः । तथा हि—लोके सकलविघ्नविनिर्मुक्ता संवित्तिरेव चमत्कार[7]निर्वेशरसनास्वादनभोगसमापत्तिलयविश्रान्त्यादिशब्दैरभिधीयते । विघ्नाश्चास्यां (सप्त) प्रतिपत्तावयोग्यता

1 वस्तुमतां 2 संबन्ध 3 तज्जैरपि 4 भोगस्पन्दा 5 पर्युत्सुकी 6 सामग्र्यामपि 7 विन्निवेश ।

* अद्यापि ... चमत्कृति ... न मन्दरेण कलितानि ।
चन्द्रकलाकन्दलसच्छितानि लक्ष्म्या (?) अङ्गानि ॥ इति छाया स्यात्

संभावनाविरहो नाम (१), स्वगतत्वपरगतत्वनियमेन देशकालविशेषावेशो (२,३) निजसुखादिविवशीभावः (४), प्रतीत्युपायवैकल्यस्फुटत्वाभावो (५), अप्रधानता (६), संशययोगश्च (७)।

तथाहि—संवेद्यमसंभावयमानः संवेद्ये संविदं विनिवेशयितुमेव न शक्नोति का तत्र विश्रान्तिरिति प्रथमो विघ्नः। तदपसारणे हृदय[1]संवादो लोकसामान्यवस्तुविषयः। अलोकसामान्येषु तु चेष्टितेष्वखण्डितप्रसिद्धिजनितगाढारूढप्रत्ययप्रसरकारी प्रख्यातरामादिनामधेयपरिग्रहः। अत एव निस्सामान्योत्कर्षोपदेशव्युत्पत्तिप्रयोजने नाटकादौ प्रख्यातवस्तुविषयत्वादि नियमेन निरूप्यते न तु प्रहसनादेव। तच्च स्वावसर एव वक्ष्याम इत्यास्तां तावत्। १

स्वैकगतानां च सुखदुःखसंविदामास्वादे यथासंभवं तदपगमभीरुतया वा तत्परिरक्षाव्यग्रतया वा तत्सदृशो जिजीषया वा तज्जिहासया वा तत्प्रचिख्यापयिषया वा तद्गोपनेच्छया वा प्रकारान्तरेण वा संवेदनान्तरसमुद्गम एव परमो विघ्नः। २

परगतत्वनियमभाजामपि सुखदुःखानां संवेदने नियमेन स्वात्मनि सुखदुःखमोहमाध्यस्थ्यादिसंविदन्तरोद्गमनसंभावनादवश्यंभावी विघ्नः। [3]तदपसरणे कार्यो नातिप्रसङ्गोऽत्रेत्यादिना पूर्वरङ्गविधिं प्रतीति पूर्वरङ्गानिगूहनेन "नटीविदूषको वापी"ति लक्षितप्रस्तावनावलोकनेन च यो नटरूपताधिगमस्तत्पुरस्सरः प्रतिशीर्षकादिना तत्प्रच्छादनप्रकारोऽभ्युपायः, अलौकिकभाषादिभेदलास्याङ्गरङ्गपीठमण्डपगतकक्ष्यादिपरिग्रहनाट्यधर्मीसहितः। तस्मिन् हि सत्यस्यैवात्रैवैतत्रैव च सुखं दुःखं वेति न भवति, प्रतीतिस्वरूपस्य निह्नवाद्रूपान्तरस्य चारोपितस्य प्रतिभासंविद्विश्रान्तिवैकल्येन स्वरूपे विश्रान्त्यभावात्। [4]सत्येतदीयरूपनिह्नवमात्र एव पर्यवसानात्। तथा हि—आसीनपाठ्यपुष्पगन्धिकादि लोके न दृष्टम्। न च तत्र किञ्चित्कथंचित्संभाव्यत्वादिति स एष सर्वो मुनिना साधारणीभावसिध्द्या रसचर्वणोपयोगित्वेन परिकरबन्धः समाश्रित इति तत्रैव स्फुटीभविष्यतीति, तदिह तावन्नो नमनीयम्। ततः स एष स्वपरानियतताविघ्नापसरणप्रकारो व्याख्यातः। ३

निजसुखादिविवशीभूतश्च कथं वस्त्वन्तरे संविदं विश्रामयेदिति तत्प्रत्यूहव्यपोहनाय प्रतिपदार्थनिष्ठैः साधारण्यमहिम्ना सकलभोग्यत्वस

1 संवेदो 2 निरूप्यते 3 तदपकरणे 4 सत्यं।

हिष्णुभिः शब्दादि विषयमयीभि (यै ?) रातोद्यगानविचित्रमण्डपपदविदग्धग-णिकादिभिरुपरञ्जनं समाश्रितं, येनाहृदयोऽपि हृदयवैमल्यप्राप्त्या सहृदयींक्रियते, उक्तं हि "दृश्यं श्रव्यं चे"ति । ४

किञ्च प्रतीत्युपायानामभावे कथं प्रतीतिभावः । अस्फुटप्रतीतिकारि-शब्दलिङ्गसम्भवेऽपि न प्रतीतिर्विश्राम्यति स्फुटप्रतीतिरूपप्रत्यक्षोचितप्रत्यय-साकाङ्क्षत्वात्, यथाहुः, सर्वा चेयं प्रमितिः प्रत्यक्षपरेति । स्वसाक्षात्कृते आगमानुमानशतैरप्यनन्यथाभावस्य स्वसंवेदनात् । अलातचक्रादौ साक्षा-त्कारान्तरेणैव बलवता [1]तत्प्रमित्यवधारणादिति लौकिकस्तावदयं क्रमः । तस्मात्तदुभय विघ्नविघातेऽभिनया बोध(अलो?)कधर्मिवृत्तिप्रवृत्त्युपस्कृताः सम-भिषिच्यन्ते। अभिनयनं हि सशब्दलिङ्गव्यापार[वि]सदृशमेव प्रत्यक्षव्या[2] पारकल्पमिति निश्चेष्यामः । ५

अप्रधाने च वस्तुनि कस्य संविद्विश्राम्यति । तस्यैव प्रत्ययस्य प्रधानान्तरं प्रत्यनुधावतः स्वात्मनि विश्रान्तत्वात् । अतोऽप्रधा-नत्वं जडे विभावानुभाववर्गे व्यभिचारिनिचये च संविदात्मकेऽपि नियमे-नान्यमुखसंप्रेक्षिणि[2] संभवतीति तदतिरिक्तः स्थाय्येव तथा चर्वणापात्रम् । तत्र पुरुषार्थनिष्ठाः काश्चित्संविद इति प्रधानम् । तद्यथा—रतिः कामतदनुषङ्गि-धर्मार्थनिष्ठा, क्रोधस्तत्प्रधानेष्वर्थनिष्ठः, कामधर्मपर्यवसितोऽप्युत्साहः, समस्तधर्मादिपर्यवसितस्तत्त्वज्ञानजनितनिर्वेदप्रायो विभावो मोक्षोपाय इति तावदेषां प्राधान्यम् । यद्यपि चैषामप्यन्योन्यं गुणभावोऽस्ति, तथापि तत्तत्प्र-धाने रूपके तत्तत्प्रधानं भवतीति रूपकभेदपर्यायेण सर्वेषां प्राधान्यमेषां लक्ष्यते । अदूरभागाभिनिविष्टदृश[3]स्त्वेकस्मिन्नपि रूपके पृथक्प्राधान्यम् । तत्र सर्वेऽमी सुखप्रधानाः स्वसंविच्चर्वणरूपस्यैकघनस्य प्रकाशस्यानन्दसार त्वात् । तथा हि—एकघनशोकसंविच्चर्वणेऽपि [4]लोके स्त्रीलोकस्य हृदय-विश्रान्तिरन्तरायशून्यविश्रान्ति[5]शरीरत्वात्, अविश्रान्तिरूपतैव दुःखम् । तत एव कापिलैर्दुःखस्य चाञ्चल्यमेव प्राणत्वेनोक्तं रजोवृत्तिं वदद्भिरित्या-नन्दरूपता सर्वरसानाम्। किन्तूपरञ्जकविषयवशात्केषामपि व किं नास्ति। स्पर्शो वीरस्य स हि क्लेशसहिष्णुतादिप्राण एव । एवं रत्यादीनां प्राधान्यम् । हासादीनां तु सातिशयं सकललोकसुलभविभावतयोपरञ्जकत्वमिति प्राधा-न्यम् । अत एवानुत्तमप्रकृतिषु बाहुल्येन न हासादयो भवन्ति । पामरप्रायः

---

1 तदव 2 नाव्यसुखसंप्रेक्षिणी 3 दृशात्वेक 4 लोकेऽस्ति 5 शून्यत्वात् ।

सर्वोऽपि हसति शोचति बिभेति परनिन्दामाद्रियते, अल्पसुखभाषितत्वेन च सर्वत्र विस्मयते। रत्याद्यङ्गतया तु पुमर्थोपयोगित्वमपि स्यादेषाम्। एतद्गुणप्रधानभावकृत एव च दशरूपकादिभेद इति वक्ष्यामः। स्थायित्वं चैतावतामेव। जात एव हि जन्तुरियतीभिः संविद्भिः परीतो भवति। तथा हि—

"दुःखसंश्लेषविद्वेषी सुखास्वादनसादरः"।

इति न्यायेन सर्वो रिरंसया व्याप्तः स्वात्मन्युत्कर्षमानीतया परमुपहसन्नभीष्टवियोगसन्तप्तस्तद्धेतुषु कोपपरवशोऽशक्तौ च ततो भीरुः किञ्चिदुज्जिगीषुरप्यनुचितवस्तुविषयवैमुख्यात्मकतयाक्रान्तः[1] किञ्चिदनभीष्टतयाभिमन्यमानस्तत्तत्स्वपरकर्तव्यदर्शनसमुदितविस्मयः किञ्चिच्च जिहासुरेव जायते। न ह्येतच्चित्तवृत्तिवासनाशून्यः प्राणी भवति[2]। केवलं कस्यचित्काचिदधिका चित्तवृत्तिः, काचिदूना। कस्यचिदुचितविषयनियन्त्रिता, कस्यचिदन्यथा। तत्काचिदेव पुमर्थोपयोगिनीत्युपदेश्या। तद्विभावकृतश्चोत्तमप्रकृत्यादिव्यवहारः। ये पुनरमी ग्लानिशङ्काप्रभृतयश्चित्तवृत्तिविशेषास्ते समुचितविभावाभावाज्जन्ममध्येऽपि[3] न भवन्त्येव। तथा हि—रसायनमुपयुक्तवतो मुनेर्ग्लान्यालस्यश्रमप्रभृतयो नोत्तिष्ठन्ति, यस्यापि वा भवन्ति विभावबलात्तस्यापि हेतुप्रक्षये क्षीयमाणाः संस्कारशेषतां नावश्यमनुबध्नन्ति। [4]उत्साहादयस्तु संपादितस्वावश्यकर्तव्यतया प्रलीनकल्पा अपि संस्कारशेषतां नातिवर्तन्ते, कर्तव्यान्तरविषयस्योत्साहादेरखण्डनात्[5]। यथाह पतञ्जलिः—"न हि चैत्र एकस्यां स्त्रियां रक्त इत्यन्यासु विरक्त[6]" इत्यादि। तस्मात्स्थायिरूपचित्तवृत्तिसूत्रस्यूता एवामी व्यभिचारिणः स्वात्मानमुदयास्तमयवैचित्र्यशतसहस्रधर्माणं प्रतिलभमाना रक्तनीलादिसूत्रस्यूतविरलभावोपलम्भनसम्भावितभङ्गीसहस्रगर्भस्फटिककाचेभ्र(भ्रा?)भ्रकपद्मरागमरकतमहानीलादिमयगोलकवत्तस्मिन् सूत्रे स्वसंस्कारवैचित्र्यमनिवेशयन्तोऽपि तत्सूत्रकृतमुपकारसन्दर्भं [7]विभ्रतः स्वयं च विचित्रार्थस्थायिसूत्रं च विचित्रयन्तोऽन्तरान्तरा शुद्धमपि स्थायिसूत्रं प्रतिभासावकाशमुपधयन्तोऽपि पूर्वापरव्यभिचारिरत्नच्छायाशबलिमानमवश्यमानयन्तः प्रतिभासन्त इति व्यभिचारिण उच्यन्ते। तथा हि ग्लानोऽयमित्युक्ते कुत इति हेतुप्रश्नेन स्थायितास्य सूच्यते। न तु राम उत्साहशक्तिमानित्यत्र हेतुप्रश्नमाहुः। अत

1 वैमुख्यतया 2 भवन्ति 3 ज्जगन्मध्येऽपि 4 रत्यादयस्तु 5 विषयस्य रत्यादेः 6 विरक्त 7 विभ्रुतमः।

एव विभावास्तत्तोद्बोधकाः सन्तः स्वरूपोपरञ्जकत्वं विदधाना रत्युत्साहादेरुचितानुचितत्वमात्मभावहन्ति । न तु तदभावे सर्वथैव ते निरुपाख्याः, वासनात्मना सर्वजन्तूनां तन्मयत्वेनोक्तत्वात् । व्यभिचारिणां तु स्वविभावाभावे नामापि नास्तीति वितनिष्यते चैतद्यथायोगं व्याख्यावसरे । एवमप्रधानत्वनिरासः । ६

स्थायिनिरूपणायां "स्थायिभावान् रसत्वमुपनेष्याम (अ-६") इत्यनया लक्षणशेषभूतया विशेषलक्षणनिष्ठया च मुनिना कृतः । तत्रानुभावानां विभावानां व्यभिचारिणां च पृथक्स्थायिनि नियमो नास्ति, बाष्पादेरानन्दाक्षिरोगादिजत्वदर्शनात्, व्याघ्रादेश्च क्रोधभयादिहेतुत्वात्, [1]श्रमचिन्तादेरुत्साहभयाद्यनेकसहचरत्वविलोकनात्, सामग्री वा तु न व्यभिचारिणी । तथा हि —बन्धुविनाशो यत्र विभावः परिदेविताश्रुपातादिस्त्वनुभावः [2]चिन्तादैन्यादिर्व्यभिचारी सोऽवश्यं शोक एवेत्येवं संशयोदये शङ्कात्मकविघ्नशमनाय संयोग उपात्तः । तत्र लोकव्यवहारे कार्यकारणसहचारात्मकलिङ्गदर्शने स्थाय्यात्मपरचित्तवृत्त्यनुमानाभ्यास एव पाटवादधुना तैरेवोद्यानकटाक्ष[3]वृक्षादिभिर्लौकिकीं कारणत्वादिभुवमतिक्रान्तैर्विभावनानुभावनासमुपरञ्जकत्वमात्रप्राणैः, अतएवालौकिकविभावादिव्यपदेशभाग्भिः 'प्राच्यकारणादिरूपसंस्कारोपजीवनाख्यापनाय' विभावादिनामधेयव्यपदेश्यैर्भावाध्यायेऽपि वक्ष्यमाणस्वरूपभेदैर्गुणप्रधानतापर्यायेण सामाजिकधियि सम्यग्योगं संबन्धमैकाग्र्यं वाऽऽसादितवद्भिरलौकिकनिर्विघ्नसंवेदनात्मकचर्वणागोचरतां नीतोऽर्थश्चर्व्यमाणतैकसारो न तु सिद्धस्वभावस्तात्कालिक एव न तु चर्वणातिरिक्तकालावलम्बी स्थायिविलक्षण एव रसः ।

ननु (न? तु) यथा शङ्कुकादिभिरभ्यधीयत, "स्थाय्येव विभावादिप्रत्याय्यो रस्यमानत्वाद्रस उच्यत" इति । एवं हि लौकिकेऽपि किं न रसः, असतोऽपि हि यत्र रसनीयता स्यात्तत्र वस्तुसतः कथं न भविष्यति । तेन स्थायिप्रतीतिरनुमितिरूपा वाच्या, न रसः । अत एव सूत्रे स्थायिग्रहणं न कृतम् । तत्प्रत्युत शल्यभूतं स्यात् । केवलमौचित्यादेवमुच्यते स्थायी रसीभूत इति । [6]औचित्यं तु तत्स्थायिगतत्वेन कारणादितया प्रसिद्धानामधुना चर्वणोपयोगितया विभावादित्वावलम्बनात् । तर्हि हि लौकिकचित्तवृत्त्यनुमाने का रसता ।

1 भ्रम 2 चिन्तादैन्यादिव्यभिचारिणः 3 धृत्यादिभि 4 कारणादि 5 जीविनः ख्यापनाय 6 अचिन्त्यं ।

तेनालौकिकचमत्कारात्मा रसास्वादः स्मृत्यनुमानलौकिकस्वसंवेदनविलक्षण एव । तथाहि—लौकिकेनानुमानेन संस्कृतः प्रमदादिना ताटस्थ्येन प्रतिपद्यते, अपि तु हृदयसंवादात्मकसहृदयत्वबलात्पूर्णीभवद्रसास्वादाङ्कुरीभावेनानुमानस्मृत्यादिसोपानमनारुह्यैव तन्मयीभावोचितचर्वणाप्राणतया । न च सा चर्वणा प्राङ्मानान्तरात्, येनाधुना स्मृतिः स्यात् । न चात्र लौकिकप्रत्यक्षादिप्रमाणव्यापारः । किञ्च लौकिकविभावादि[1]संयोगबलोपनतैवेयं चर्वणा । सा च प्रत्यक्षानुमानागमोपमानादिलौकिकप्रमाणजनितरत्याद्यवबोधतस्तथा योगिप्रत्यक्षजतटस्थपरसंविज्ञानात्सकलवैषयिकोपरागशून्य[2]-शुद्धपरयोगिगतस्वानन्दैक[3]घनानुभवाच्च विशिष्यते, [4]एतेषां यथायोगमर्जनादिविघ्नान्तरोदयात्ताटस्थ्यस्फुटत्वविषयावेश[5]वैवश्येन च सौन्दर्यविरहात् । अत्र तु स्वात्मैकगतत्वनियमासंभवात् (न विषयावेशवैवश्यम्), स्वात्मानुप्रवेशात्परगतत्वनियमाभावात् (न ताटस्थ्यस्फुटत्वं) तद्विभावादिसाधारण्यवशसंप्रबुद्धोचितनिजरत्यादिवासनावेशवशाच्च न विघ्नान्तरादीनां सम्भव इत्यवोचाम बहुशः । अत एव विभावादयो न निष्पत्तिहेतवो रसस्य, तद्बोधापगमेऽपि रससंभवप्रसङ्गात् । नापि ज्ञप्तिहेतवः, येन प्रमाणमध्ये पतेयुः, सिद्धस्य कस्य चित्प्रमेयभूतस्य रसस्याभावात् । किं तर्ह्येतद्धि विभावादय इति । अलौकिक एवायं चर्वणोपयोगी विभावादिव्यवहारः । क्वान्यत्रेत्थं दृष्टमिति चेद्भूषणमेतदस्माकमलौकिकत्वसिद्धौ पानकरसास्वादोऽपि किं गुडमरीचादिषु दृष्ट इति समानमेतत् ।

नन्वेवं रसोऽप्रमेयः स्यादेवं युक्तं भवितुमर्हति । रस्यतैकप्राणो ह्यसौ न प्रमेयादिस्वभावः । तर्हि सूत्रे निष्पत्तिरिति कथं नेयं रसस्यापि तु तद्विषयरसनायाः, तस्मान्निष्पत्त्या तु यदि तदेकायत्तजीवितस्य रसस्य निष्पत्तिः उच्यते—न कश्चिदत्र दोषः । सा च रसना न [6]प्रमाणव्यापारो न कारकव्यापारः । स्वयं तु नाप्रामाणिकी स्वयं (सं)वेदनसिद्धत्वात् । रसना च बोधरूपैव, किन्तु बोधान्तरेभ्यो लौकिकेभ्यो विलक्षणैवोपायानां विभावादीनां लौकिकवैलक्षण्यात् । तेन विभावादिसंयोगाद्रसना, यतो निष्पद्यतेऽतस्तथाविधरसनागोचरो लोकोत्तरोऽर्थो रस इति तात्पर्यं सूत्रस्य ।

---

1 साङ्ग 2 शून्यश्च ह्यपर 3 रसनानु 4 पतासां 5 वैवश्यकृतसौन्दर्य
6 प्रमाणं नाव्यापारो (प्राणव्यापारः—हेमः)

अयमत्र संक्षेपः । मुकुटप्रतिशीर्षिकादिना[1] तावन्नटबुद्धिराच्छाद्यते । गाढप्राक्तनसंविन्संस्काराच्च काव्यबलानीयमानापि न तत्र रामधीर्विश्राम्यति । अत एवोभयदेशकालत्यागः । रोमाञ्चादयश्च भूयसा रतिप्रतीतिकारितया दृष्टास्तत्रापि लौकिकादेशकालानियमेन तत्र रतिं गमयन्ति ।यस्यां स्वात्मापि तद्वासनावत्त्वादनुप्रविष्टः । अत एव तटस्थतया रत्यवगमः, न च नियतकारणतया, येनार्जनाभिष्वङ्गादिसम्भावना, न च नियतपरा[गा]त्मकगततया-येन दुःखद्वेषाद्युदयस्तेन साधारणीभूता सन्तानवृत्तेरेकस्या एव वा संविदो गोचरभूता रतिः शृङ्गारः । साधारणीभावना च विभावादिभिरिति । तत्र विभावप्राधान्यस्य धानाणि (प्राधान्येन साधारणीभावो यथा—)

"केलीकन्दलितस्य विभ्रममधो धुर्यं वपुस्ते दृशो-
भङ्गीभङ्गुरकामकार्मुकमिदं भ्रूनर्मकर्मक्रमः ।
आपातेऽपि विकारकारणमहो वक्त्राम्बुजन्मासवः
सत्यं सुन्दरि वेधसस्त्रिजगतीसारं त्वमेकाकृतिः" ॥

अत्र च विभावकृतं तत्सौन्दर्य (र्यं?) प्राधान्येन भाति । तदनुगतत्वेन केलीविभ्रमभङ्गुरनर्मवचोमहिम्ना चानुभाववर्गो भङ्गीक्रमविकारादिशब्दबलाच्च विभाववर्गः प्रतिभातीति । अत एव नास्फुटत्वाशङ्कात्र रत्यास्वादमये शृङ्गारे विधेया । अनुभावप्राधान्यं यथा शुद्धसारस्वतप्रवाहपवित्रसकलवाङ्मयमहार्णवपूर्णभावसम्पादनाद् द्विजराजस्येन्दुराजस्य—

"यद्विश्रम्य विलोकितेषु बहुशो निस्थेमनी लोचने
यद्गात्राणि दरिद्रति प्रतिदिनं लूनाब्जिनीनालवत् ।
दूर्वाकाण्डविडम्बकश्च निविडो यत्पाण्डिमा गण्डयोः
कृष्णे यूनि सयौवनासु वनितास्वेषैव वेषस्थितिः" इति ।

अत्र विश्रम्येति बहुश इति प्रतिदिनमिति च पदसमर्पिता व्यभिचारिणः कृष्ण इत्यादिपदार्पितश्च[2] विभावो गुणत्वेन प्रतिभासते । विश्रान्तिलक्षणस्तम्भविलोकनवैचित्र्यगात्रतानवतारतम्यपुलकवैवर्ण्यप्रभृतिस्त्वनुभावसञ्चयः । प्रधानतया व्यभिचारिणां तु प्राधान्यम् । यद्विभावानुभावप्राधान्यं कृतं तत्राद्यं यथा महाकवेः कालिदासस्य—

"आत्तमात्तमधिकान्तमुक्षितुं कातरा शफरशङ्किनी जहौ ।
अञ्जलौ जलमधीरलोचना लोचनप्रतिशरीरलाञ्छितम्" ॥

---

1. शीर्षकादीना 2. पदायितश्च ।

को दृष्टान्तः । अत्राह—यथा हि [2]नानाव्यञ्जनौषधिद्रव्यसंयोगाद्रसनिष्पत्तिर्भवति । यथा हि—गुडादिभिर्द्रव्यैर्व्यञ्जनौषधिभिश्च षाडवादयो रसा निर्वर्तन्ते तथा-

---

इत्यत्र सुकुमारमुग्धप्रमदाजनभूषणभूतस्य व्यभिचारिवर्गस्य वितर्कत्रासशङ्कादेः प्राधान्यम् । तद्विभावानां प्राधान्यादिसौन्दर्यातिशयकृतमात्तमित्याद्यर्पितानुभाववर्गस्तु तदनुयायी । एवं द्वयप्राधान्ये चोदाहार्यम् । किन्तु समप्राधान्य एव रसास्वादस्योत्कर्षः । तच्च प्रबन्ध एव भवति, वस्तुतस्तु दशरूपक एव, यदाह वामनः "सन्दर्भेषु दशरूपकं श्रेयः । तद्धि चित्रं चित्रपटवद्विशेषसाकल्या"दिति(२-३०-१३)तद्रससमर्पणया तु प्रबन्धे भाषावेषप्रवृत्त्यौचित्यादिकल्पनात्, तदुपजीवनेन मुक्तके । तथा च तत्र सहृदयाः पूर्वापरमुचितं परिकल्प्य "ईदृगत्र वक्तास्मिन्नवसर" इत्यादि बहुतरं पीठबन्धरूपं विदधते । तेन ये काव्याभ्यासप्राक्तनपुण्यादिहेतुबलादिति सहृदयास्तेषां परिमित [1]विभावाद्युन्मीलनेन परिस्फुट एव साक्षात्कारकल्पनः काव्यार्थः स्फुरति, अतएव तेषां काव्यमेव प्रतीत्युत्पत्तिकृत् । अनपेक्षितनाट्यमपि तेषामपि तु "नाट्यनिपतिताः स्फुरिताः शशिरश्मय" इति न्यायेन सुतरां निर्मलीकरणम् । अहृदयानां च तदेव नैर्मल्याधायि । यत्र पतिता गीतवाद्यगणिकादयो न व्यसनितायै पर्यवस्यन्ति नित्योपकरणात्तत्वं च नटो ध्यायिनामिदं ध्यानपदो । न हि तत्रायमेव सिन्दूरादिमयो वासुदेव इति स्मरणीयप्रतिपत्तिः । अपि तु तदुपायद्वारेणातिस्फुटीभूतसङ्कल्पगोचरो देवताविशेषो ध्यायिनां फलकृत् । तद्वन्नटप्रक्रिया वागादिनटलक्षितातिस्फुटाध्यवसायाविषयितो नियतदेशकालाद्यस्पृष्टभूत इदं फलमिति विधिस्थानीयोऽर्थो व्युत्पत्तिं वितरति । युते दृश्यान्यनियमादौ चित्तवृत्त्यादौ वा न बाधकोदयः सम्यग्ज्ञानभूतं ह्येवेदं पूर्णस्तेन राम इत्येव प्रतीतिर्नत्वयं रामोऽयमिति । स्फुटीकरिष्यते चैतदग्रतः ।

तत्रालौकिकोऽयमर्थो न दृष्टान्तमन्तरेण हृदयङ्गमीभवेदित्याशयेनाह को दृष्टान्त इति । दृष्टान्तो बहूनां संयोगादपूर्वो रस उत्पद्यमानः क्व दृष्ट इत्यर्थः ।

---

1 इति चेदुच्यते 2 व्यञ्जनद्रव्यौषधि :

---

1 विभावाद्युन्मीलनेऽपि ।

[1]नानाभावोपगता [2]अपि स्थायिनो भावा रसत्वमाप्नुवन्तीति। [3]अत्राह—रस इति कः पदार्थः। [4]उच्यते—आस्वाद्यत्वात्। [5]कथमास्वाद्यते रसः? यथा हि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना रसानास्वादयन्ति सुमनसः पुरुषा हर्षादींश्चाधिगच्छन्ति, तथा नानाभावाभि-

---

अत्र प्रश्ने भाष्येण प्रतिवचनमाह यथेत्यादिनाप्नुवन्तीत्यन्तेन। व्यञ्जनमुपसेचनद्रव्यम्। तच्च नानातिक्तमधुरचुक्रादिभेदादधिकाञ्जिकादि। ओषधयश्चिञ्चागोधूमदलहरिद्रादयः। द्रव्यं गुडादि। एषां पाकक्रमेण सम्यग्योजनारूपात्कुशलसम्पाद्यात्संयोगात्। षाडवादय इति लोकप्रसिद्धेभ्यः परस्परविविक्तेभ्यो मधुरतिक्ताम्ललवणकटुकषायेभ्यो मिश्रेभ्यश्च विलक्षणः षाडवशब्दवाच्यः। तत्प्रधाना बहुतरा रसनयोग्याः क्रियन्ते। तथैव नानाभूतैर्विभावादिभिरुपसमीपं प्रत्यक्षकल्पतां गता लोकापेक्षया ये स्थायिनो भावास्ते रस्यमानतैकजीवनं रसत्वं तत्र प्रतिपद्यते(न्ते?)।

एतदुक्तं भवति। पाकरूपया सम्यग्योजनया तावदलौकिको रसो जायते। तत्र च प्रधानत्वेन जलस्य रसाभिव्यञ्जकत्वमिति व्यञ्जनं विभावस्थानीयं चिञ्चाहरिद्राद्यनुभावप्रायम्। द्रव्याणि तु गुडादि, तदीयचुक्रादिरसविलक्षणमधुरादियोगाद्व्यभिचारिकल्पं स्वात्मानि तदुपजीवनेन च परत्र च स्वरससङ्क्रमणया वैचित्र्याधायकत्वात्। अत्र तु स्थायिकल्पस्तन्मिश्रणासमयभावी रसविशेषो विभावकल्पव्यञ्जनजनितो मन्तव्यः। स हि लौकिकः। अयन्तु कुशलैकनिव(र्व?)र्त्यस्तद्विदां रसनीयो भवति। तेनान्नस्येत्यध्याहारो न युक्तः। यथा हि दार्ष्टान्तिकसूत्रे स्थायिग्रहणं शल्यकल्पमिति त्रयमेवोपात्तं तथा दृष्टान्तेऽपि त्रयस्यैवोपादानं युक्तम्।

एवं सूत्रं व्याख्याय लक्षणपदं परीक्षितुमाक्षिपति रस इति क इत्यादिना। मधुरादौ पारते(दे?)विषये सारे जलसंस्कारेऽभिनिवेशे क्वाथे देहधातोर्निर्यासे वायं प्रसिद्धो न त्वन्यत्र, तेन रस इति पदस्य शृङ्गारादिषु प्रवर्तितस्य कोऽर्थः किं प्रवृत्तिनिमित्तम्? कथ्यते। स्वाभिधेयनियमाय शब्देन

---

1 एवं नाना 2 न-पंहिता 3 न-ऋषय ऊचुः 4 ड अत्रोच्यते 5 प-कथमास्वाद्यो।

नयव्यञ्जितान् वागङ्गसत्त्वोपेतान् स्थायिभावानास्वादयन्ति [1]सुमनसः प्रेक्षकाः हर्षादींश्चाधिगच्छन्ति, तस्मान्नाट्यरसा [2]इत्यभिव्याख्यास्यामः। अत्रानुवंश्यौ श्लोकौ भवतः—

यदि वा तत्प्रयोक्तृप्रतिपत्तृभिरित्यर्थः, (किं)प्रवृत्तिनिमित्तम्। अत्रोत्तरं, आस्वाद्यत्वात्, प्रवृत्तिहेतोर्यः प्रश्नस्तेनोत्तरं हेतुविभक्त्यैव दत्तम्, तेन क्रियाप्रवृत्तिनिमित्तमस्येत्युक्तं भवति। यस्तु भङ्क्त्वा व्याचष्टे रस इति योऽयं शब्दस्तत्रोत्तमपरमार्थ उच्यत इति तस्यानेनेत्यध्याहारं विना प्रकृतपदार्थवाचकोऽयं शब्द इति न तात्पर्यकल्पनं विना नातीव सङ्गतमुत्तरं, प्रश्नमन्तरेण चास्वाद्यत्वादित्यल्प(पौ?)पदप्रायमित्यास्तामेतत्॥

अथ प्रवृत्तिनिमित्तं व्याक्षिपति कथमास्वाद्यत इति। आस्वादनं हि रसनेन्द्रियजज्ञानं प्रसिद्धमिति भावः। अत्रोपचरितक्रियाश्रयेणोत्तरमाह यथा नानेत्यादिना। यथातथाशब्दाभ्यां सादृश्यमत्रोपचारे निमित्तमिति दर्शयति। तत्र भोग्यस्य भोक्तुः फलस्य च साम्यं दर्शयति। यथा हि व्यञ्जनसंस्कृतेनास्वाद्यतैकाग्रमनसि च भोक्तर्यास्वादयितृता; अन्यचित्तस्य भुञ्जानस्याप्यास्वादाभिमानाभावात्, प्रहर्षाप्यायजीवनपुष्टिबलारोग्याणां चास्वादफलता, तथाभिनयव्यञ्जितेऽचिन्त्या स्थायिशब्दव्यपदेश्ये रसे आस्वाद्यता, एकाग्रे च सामाजिके तन्मयीभूत आस्वादयितृता, हर्षप्रधानानां धर्मादिव्युत्पत्तिवैदग्ध्यादीनामास्वादफलत्वमिति कर्मकर्तृफलसादृश्याद्विभावादिजः प्रतीतिविशेषो रसनाक्रियेति व्यपदिष्ट इति तात्पर्यम्। यदन्नं सुमनसो भुञ्जाना हर्षादींश्च यान्ति तेन रसानास्वादयन्तीत्यनेन शब्देनाभितः सर्वत्र विशेषेणान्ये भोक्तृविलक्षणतया आसमन्तात्ख्याताः प्रसिद्धाः यथा चैते तथा प्रेक्षका अपि। तेन तेऽपि स्थायिनः आस्वादयन्तीति आभिमुख्येन सादृश्ये व्याख्याता अस्माभिर्व्यवहृताः। अत्रोपसंहारस्तस्मान्नाट्यरसाः।

अन्ये त्वादिशब्देन शोकादीनामत्र सङ्ग्रहः। स च न युक्तः। सामाजिकानां हि हर्षैकफलं नाट्यं न शोकादिफलम्। तथात्वे निमित्ताभावात्तत्प्रसङ्गाच्चेति मन्यमाना हर्षं चाधिगच्छन्तीति पठन्ति।

---

१ प-सुमनसः प्रेक्षकान्। २ न-स्मृता इति व्याख्याताः।

यथा बहुद्रव्य[1]युतैर्व्यञ्जनैर्बहुभिर्युतम् ।
आस्वादयन्ति भुञ्जाना भक्तं भक्तविदो जनाः ॥३५॥
भावाभिनय संबद्धान्स्थायिभावांस्तथा बुधाः ।
आस्वादयन्ति मनसा तस्मान्नाट्यरसाः स्मृताः ॥३६॥

एवं ग्रन्थयोजनायां स्पृष्टायां यत्कैश्चिदत्र चोदितं दृष्टान्ते आत्मा रसना मनश्चेति त्रयम्, प्रकृते तु रसनेति परिहृतं चात्मन एवात्र स्थानान्तरसङ्क्रान्तस्य मनःस्थानीयता, मनसश्च रसनास्थानीयतेति तत्सर्वं वृथा, नाट्यशास्त्रे ह्युपचारबीजस्य सादृश्यस्यात्र प्राधान्येन प्रतिपिपादयिषितत्वादित्यास्ताम् । एवं "रसत्वं केन वैतेषा (अ६-२)मिति यत्प्रश्नितं तत्प्रतिसमाहितम् । अत्रेति भाष्येऽनुवंशभवौ शिष्याचार्यपरम्परासु वर्तमानौ श्लोकाख्यौ वृत्तविशेषौ सूत्रार्थसंक्षेपप्रकटीकरणेन कारिकाशब्दवाच्यौ भवन्तौ पठति यथेत्यादि । मधुरादिभेदाद्बहूनि द्रव्याणि गुडादीनि । बहुभिरिति दधिकाञ्जिकादिभिः । अनेन विभावभेदं रसभेदे हेतुत्वेन सूचयति— भुञ्जाना आस्वादयन्तीति । रसनाव्यापाराद्भोजनादधिको यो मानसो व्यापारः स एवास्वादनमिति दर्शयति । एतदुक्तं भवति—न रसनाव्यापार आस्वादनमपि तु मनस एव स चात्रावक्रलोऽस्ति । केवलं लोके रसनाव्यापारानन्तरभावी स प्रसिद्ध इत्युपचार इह दर्शित इति । शुद्धतत्स्व(त्त्व?)रूपज्ञानस्वभावा अत्र भावा विभावव्यभिचारिणः। अभिनया अनुभावा एवेदं पृथग्वचनं प्राधान्यात्,तै यैः सम्यग्बद्धा हृदयसंवादक्रमेण तन्मयीभावापन्नप्रमातृभूम्यभेदमुपसम्प्राप्ता अचिन्त्याः स्थायिनः आसमन्तात्साधारणीभावेन निर्विघ्नप्रतिपत्तिवशान्मनसेन्द्रियान्तरविघ्नसंभावनाशून्येनास्वादयन्ति स्वपरविवेकशून्यस्वादचमत्कारपरवशेन लौकिकात्प्रत्ययादुपार्जनादिविघ्न बहुलाद्योगिप्रत्ययाच्च विषयास्वादशून्यतापरुषाद्विलक्षणाकारसुखदुःखादिविचित्रवासनानुवेधोपनतहृद्यतातिशयसंविच्चर्वणात्मता(ना?)भुञ्जते बुधा इति पूर्वोपयोगो लौकिकानां प्रत्यक्षादीना मत्र दर्शितः ।

एतदुपसंहरति तस्मादिति । नाट्यात्समुदायरूपाद्रसाः यदि वा नाट्यमेव रसाः, रससमुदायो हि नाट्यम् । न नाट्य एवं च रसाः काव्येऽपि, नाट्यायमान एव रसः, काव्यार्थविषये हि प्रत्यक्षकल्पसंवेदनोदये रसोदय इत्युपाध्यायाः । यदाहुः काव्यकौतुके—

1 प-युक्ते 2 न-संयुक्तांस्थायि ।

"प्रयोगत्वमनापन्ने काव्ये नास्वादसम्भव" इति ।
"वर्णनोत्कलिकाभोगप्रौढोक्त्या सम्यगर्पिताः ।
उद्यानकान्ताचन्द्राद्या भावाः प्रत्यक्षवत्स्फुटाः" इति ॥

अन्ये तु काव्येऽपि गुणालङ्कारसौन्दर्यातिशयकृतं रसचर्वणमाहुः । वयं तु ब्रूमः—काव्यं तावन्मुख्यतो दशरूपकात्मकमेव । तत्र ह्युचितैर्भाषावृत्तिकाकुनैपथ्यप्रभृतिभिः पूर्यते च रसवत्ता । सर्गबन्धादौ हि नायिकाया अपि संस्कृतैवोक्तिरित्यादि बहुतरमनुचितं केवलं शक्तिरहितत्वाद्यावर्ण्यते तावतीव हृद्यमिति न्यायेनानौचित्यं न [1]प्रतिहारि । तत एवोच्यते सन्दर्भेषु दशरूपकमिति (ति?) [न] । तदंश[2]सन्ध्यादिसङ्घटनमुद्धृत्य सर्गबन्धादि यावदुक्तं । यत्तु दशरूपकं तस्य योऽर्थस्तदेव नाट्यम्, यद्वक्ष्यते "नाट्यस्यैषा तनू"रिति, तस्य हृदयसंवादतारतम्यापेक्षया श्रोतृप्रतिपत्तृस्फुरणं स्फुटास्फुटत्वेनातिविचित्रम् । तत्र ये स्वभावतो निर्मलमुकुरहृदयास्त एव संसारोचितक्रोधमोहाभिलाषपरवशमनसो न भवन्ति । तेषां तथाविधदशरूपकाकर्णनसमये साधारणरसनात्मकचर्वणग्राह्यो रससञ्चयो नाट्यलक्षणस्फुट एव । ये त्वतथाभूतास्तेषां प्रत्यक्षोचिततथाविधचर्वणालाभाय नटादिप्रक्रिया, स्वगतक्रोधशोकादिसङ्कटहृदयग्रन्थिभञ्जनाय गीतादिप्रक्रिया च मुनिना विरचिता । सर्वानुग्राहकं हि शास्त्रमितिन्यायात्तेन नाट्य एव रसा न लोक इत्यर्थः । काव्यं च नाट्यमेव । अत एव च नटे न रसः, कुत्र तर्हि, विस्मृतिशीलो न बोध्यते । उक्तं हि देशकालप्रमातृभेदानियन्त्रितो रस इति । केयमाशङ्का, नटे तर्हि किमास्वादनोपायः, । अत एव च पात्रमित्युच्यते । न हि पात्रे मद्यास्वादोऽपि तु तदुपायकः, स्नेहप्रमुखमात्रे नटोपयोग इत्यलम् । चित्रपुस्ताद्यपि च नाट्यस्यैवार्थभागाभिष्यन्दो, यथा सर्गबन्धादि शब्दभागाभिष्यन्दः।एतच्च "योऽर्थो हृदयसंवादी"त्यत्र(अ७) वितत्य वक्ष्यामः । अन्ये त्वभिनयादिसामग्रीमयं बहिर्दृश्यमानं नाट्यं नटधर्मकर्मरूपमित्याशयेन नाट्याद्रसा इत्याहुः । स्मृता इति सम्प्रदायाविच्छेदं दर्शयति । ये तु रत्याद्यनुकरणरूपं रसमाहुः(ते)अथ चोदयन्ति शोकः कथं सुखहेतुरिति । परिहरन्ति च, अस्ति कोऽपि नाट्यगतानां विशेष इति । तत्र चोद्यं तावदसत् । शोको हि प्रतीयमानः किं स्वात्मनि प्रत्येतुर्दुःखं वितनोतीति नियमः, शत्रुदुःखे प्रहर्षात्, अन्यत्र च मध्यस्थत्वात् । उत्तरं तु भावानां वस्तुस्वभावमात्रेणेति न किञ्चिदेतत् ।

---

1 प्रतिभाति 2 मध्यादि ।

अत्राह—किं रसेभ्यो भावानामभिनिर्वृत्तिरुताहो[1] भावेभ्यो रसानामिति । उच्यते — केषांचिन्मतं परस्परसंबन्धादेषामभिनिष्पत्तिरिति । तन्न । कस्मात्, दृश्यते हि भावेभ्यो रसानामभिनिर्वृत्तिर्न तु रसेभ्यो[2] भावानामभिनिर्वृत्तिरिति । भवन्ति चात्र श्लोकाः— ॥३७॥

अस्मन्मते तु संवेदनमेवानन्दघनमास्वाद्यते । तत्र का दुःखाशङ्का । केवलं तस्यैव चित्रताकरणे रतिशोकादिवासनाव्यापारस्तदुद्बोधने चाभिनयादिव्यापारः । यदेतदुक्तं रसतत्त्वं तदेवमुपशोधयितुमुपक्रमतेऽत्राहेत्यादिना चोद्यमुखेन।नर्तकगतेभ्यो भावाःसामाजिकैः,यथा करुणाच्छोकस्ततो विभावाद्युपचितसामाजिके करुण इति रसाद्भावो भावाद्रस इति सन्देहः। अत एव परस्परमपि जन्म कालभेदेनेति तृतीयः पक्षः । यदि वा नट एव राम एव चापूर्वं भावस्तत उपचये रसस्ततोऽभ्युपचये भाव इत्येवं पक्षत्रयोत्थानम् । इदं चासत्, एवंभूतस्य रसस्वरूपस्य निराकृतत्वात् ।

श्रीशङ्कुकस्त्वाह, अनुकर्तरि रसानास्वादयते । अनुकार्ये भावप्रतीतिप्रयोगे लोके प्रकृति (ती?) रसं निष्पादयतीति द्वितीयपक्षो नाट्याचार्याभिप्रेतशिक्षानुसारेण । अत एव च तृतीयोऽपि संभवति।एतदप्यसत्। न हि सामाजिकोऽनुकार्यानुकर्तृविभागमवैति । दूषितः स्वानुकरणवादः । तस्मादित्थमेतत्— किं रसेभ्यो भावा उत विपर्ययः, आहो अन्योन्यजनकतेति त्रयः प्रश्नाः। आहोशब्दो भिन्नक्रमः । विभावादिभ्यस्तावद्रसनिष्पत्तिरुक्ता, स एव द्वितीयः पक्षः । अभ्युपगतपूर्वमेतच्च कथं, न हि लोके विभावानुभावादयः के च न भवन्ति । हेतुकार्यावस्थामात्रत्वाल्लोके तेषाम् ।

अथ त एव रसनोपयोगित्वे विभावादिरूपतां प्रतिपद्यन्ते तर्हि रसप्रसादाद्भावा विभावादयः। अथोच्यते विभावादिप्रसादाद्रसो यथोक्तं प्राग्रसप्रसवाच्च विभावादिरूपत्वं तर्हि परस्पराश्रयत्वम् । इतरेतराश्रयाणि च न प्रकल्पन्त इत्याक्षेपः । अत्र सिद्धान्तमाह दृश्यते हीति, प्रमदादयः प्रतीताः सन्तो रसास्वादं विदधते यथोक्तं प्राक्। अतो न रसेभ्यो भावाः, भावशब्दार्थे-

---

1 प-निष्पत्तिरुताथ 2 म-निष्पत्तिरिति न रसेभ्यो ।

नानाभिनयसम्बद्धान्भावयन्ति[1] रसानिमान् ।
यस्मात्तस्मादमी भावा विज्ञेया नाट्ययोक्तृभिः ॥३८॥
नानाद्रव्यैर्बहुविधैर्व्यञ्जनं भाव्यते यथा ।
एवं भावा भावयन्ति रसानभिनयैः सह ॥३९॥
न भावहीनोऽस्ति रसो न भावो रसवर्जितः ।
परस्परकृता सिद्धिस्तयोरभिनयो भवेत् ॥४०॥
व्यञ्जनौषधिसंयोगो यथान्नं स्वादुतां नयेत् ।
एवं भावा रसाश्चैव भावयन्ति परस्परम् ॥४१॥

पर्यालोचना चैतदेवोपपन्नमिति श्लोकेनाह । नानाभिनयैः सम्यग्बद्धान् हृदयङ्गतान् भावयन्ति सम्पादयन्ति रसांस्तस्माद्भावाः ॥

नन्वेतद्भावशब्दः प्रवृत्तिनिमित्तम् । न तत्, प्रकृतं किञ्चिदुक्तमित्याशङ्क्य प्रकृते योजयितुमाह नानाद्रव्यैरिति । व्यज्यत इति व्यञ्जनश्चानुपानादि रसोऽत्राभिप्रेतः, बहुविधैरिति व्यञ्जनस्योपलक्षणम् । अभिनयैरित्यस्य वा विशेषणम् । एवं स्थितपक्षमुपसंहरति न भावहीनोऽस्ति रस इति । अत्र चोद्यवादी स्वाशयमुन्मीलयति न भावो रसवर्जित इति । लोके हि न कश्चिद्विभावादिव्यवहार इति भावः । अथोत्तरमाह—"परस्परकृता सिद्धिस्तयोरभिनयो भवेत्" । अभिनये साक्षात्कारे संपन्ने तदुपयोगितया विभावादिव्यपदेश इत्यतो या परस्परकृता सिद्धिः सा भद्रं भवति संभाव्यते । एवम्भूतमितरेतराश्रयजदूषणमित्यर्थः ।

अत्रैव दृष्टान्तमाह व्यञ्जनौषधिसंयोग इति । व्यञ्जनौषधिसंयोगोऽन्नं च कर्तृ यथा परस्परमन्योन्यं कर्मभूतं स्वादुतां नयेत्तथा भावा रसाश्चान्योन्यं भावयन्ति भावा रसान्भावयन्ति निष्पादयन्ति रसास्तु भावान् भावयन्ति भावान्कुर्वन्ति भावादिव्यपदेश्यान्कुर्वन्तीत्यर्थः । एतदुक्तं भवति—एकत्रैकदा क्रियायामन्योन्याश्रयत्वं दोषो न तु क्रियाभेदे । यथा व्यञ्जनादिसंयोगेनान्नस्याम्लादिरसवत्ता क्रियते, अन्नेन वाश्रयरूपेण सता व्यञ्जनसुखयोग्यता क्रियते, एवं भावै रस्यमानता । रसैश्च विभावादिव्यपदेश्यता कारणादीनां यथा पटापेक्षया तन्तवः पटकारणमिति व्यपदेश्याः, तन्त्वपेक्षया पटः कार्यो न चेत(रेत)राश्रयं तथा प्रकृतेऽपीति ।

---

1 न - ज्ञापयन्ति 2 ड - भावो वा रसवर्जितः न रसो भाववर्जितः ।

यथा बीजाद्भवेद्वृक्षो वृक्षात्पुष्पं फलं यथा ।
तथा मूलं रसाः सर्वे तेभ्यो भावा व्यवस्थिताः ॥४२॥
एवमेते स्थायिभावा रससंज्ञाः प्रत्यवगन्तव्याः ।
तदेषां रसानामुत्पत्तिवर्णदैवतनिदर्शनान्यभिव्याख्या-
स्यामः ।

ननु यदि भावेभ्यो रसास्तर्हि कथमुक्तं न हि रसादृते कश्चिदप्यर्थः प्रवर्तते तेन पूर्वं त एवोद्देश्या इत्याशङ्क्याह यथेत्यादिना । बीजं यथा वृक्षमूलत्वेन स्थितं तथा रसास्तन्मूलादिप्रीतिपूर्विका व्युत्पत्तिरिति त (क?)तरे च व्याख्यानार्हाः कविगतसाधारणीभूतसंविन्मूलश्च काव्यपुरस्सरो नटव्यापारः सैव च संवित्परमार्थतो रसः, सामाजिकस्य च तत्प्रतीत्या वशीकृतस्य पश्चादपोद्धारबुध्या विभावादिप्रतीतिरिति प्रयोजने नाट्ये काव्ये सामाजिकधियि च । एवं मूलबीजस्थानीयात्कविगतो रसः । कविर्हि सामाजिकतुल्य एव । तत एवोक्तं "शृङ्गारी चेत्कवि" रित्याद्यानन्दवर्धनाचार्येण। ततो वृक्षस्थानीयं काव्यम् । तत्र पुष्पादिस्थानीयोऽभिनयादिनटव्यापारः । तत्र फलस्थानीयः सामाजिकरसास्वादः । तेन रसमयमेव विश्वम् । अत्र च विज्ञानवादे द्विधाभिधानं स्फोटकतत्त्वं सत्कार्यवाद एकत्वदर्शनमित्यादि च द्रष्टव्यम् । वयं तु प्रकृतानुपयोगिश्रुतलवसन्दर्शन मिथ्याप्रयासमंश्रय मशिक्षितपूर्विण इत्यास्ताम् ।अन्ये तु बीजादिव भावाद्रसवृक्षस्ततोऽप्यभिनयकुसुमसुन्दरात्फलमिव भावः प्रतीत्या भुज्यत इति व्याचक्षते । तैः प्रकृताविरुद्धं सर्वं व्याख्यातम् । एवं हि भावस्यैवोपक्रमपर्यवसानवर्तित्वमुक्तं स्यादित्यास्तां चैतत् । एवं त्रयोऽपि पक्षाः कथंचिदुपगता अभिप्रायवैचित्र्येणेति तात्पर्यम् ।

एवमुद्दिष्टानां विभक्तानां च रसानां सामान्यलक्षणं परीक्षापरिशुद्धमभिधाय तदनुवादपूर्वकं विशेषलक्षणं वक्तुं पीठबन्धं दर्शयति तदेषामित्यादिना । यतः सामान्यलक्षणमेतेषां कृतं तस्माद्विशेषलक्षणांशपूरकाण्युत्पत्त्यादीनि व्याख्यास्यामः । तत्रोत्पत्तिरुत्पादकानामुत्पाद्यानां च विशेषलक्षणमन्योन्यतो व्यवच्छेदादुत्पादकानामप्येतदुत्पादकत्वमुत्पादकान्तराद्वैलक्षण्यमुत्पाद्य-

---

1 न-संयोगा था 2 न ततो भावा 3 न स्थायिनो भावा 4 म-एषां भावविभावव्यभिचारिसंयुक्तानामुत्पत्तिवर्णदैवतदर्शना ।

तेषामुत्पत्तिहेतवश्चत्वारो रसाः। तद्यथा—[1]शृङ्गारो रौद्रो वीरो बीभत्स इति। अत्र— ॥४३॥

[2]शृङ्गाराद्धि भवेद्धास्यो [3]रौद्राच्च करुणो रसः।
[4]वीराच्चैवाद्भुतोत्पत्तिर्बीभत्साच्च भयानकः ॥४४॥
शृङ्गारानुकृतिर्या तु स [5]हास्यस्तु प्रकीर्तितः।
रौद्रस्यैव च यत्कर्म स ज्ञेयः करुणो रसः ॥४५॥

कृतमेवमुत्पाद्यानामुत्पादककृतमिति परस्परलक्षणत्वम्। वर्णः श्वेतादि तु सुस्पष्टम्। विलक्षणाद्येवं निर्देशनं तु शृङ्गारो नामेत्यादिना विभावादिविशेषसंयोग उत्पत्तिलक्षणा ह्यन्योन्याश्रयशङ्कावर्णदेवतयोस्त्वागमानुविद्धत्वमिति स्फुटम्। निश्चयदर्शनोपायत्वमुत्पत्त्यादीनां न संभवति। विभावादिविशेषसंयोगस्तु तद्वैलक्षण्यान्निदर्शनमित्युक्तम्॥

तत्रोत्पत्तिं तावदाह तेषामित्यादिना। तेषां रसानामुत्पत्तौ हेतवः सूचकाश्चत्वारो रसानामुत्पाद्योत्पादकप्रकारो यावान् सम्भवति स चतुर्भिरेव सूचित इति यावत्। तथा हि—तदाभासत्वेन तदनुकाररूपतया हेतुत्वं शृङ्गारेण सूचितम्। यतो विभावाभासादनुभावाभासाद्व्यभिचार्याभासाद्रत्याभासे प्रतीते चर्वणाभाससारः शृङ्गाराभासः। कामनाभिलाषमात्ररूपा हि रतिरत्र व्यभिचारिभावो न स्थायी। तस्य तु स्थायिकल्पत्वेनाभाति। तद्वशाद्विभावाद्याभासता। अतश्च स्थाय्याभासत्वं रतेः। यतो रावणस्य सीता द्विष्टामप्युपेक्षिका वेति हृदयं नैवं स्पृशतीति। तत्स्पर्शे ह्यभिमानोऽस्या विलीयत एव। "मयीयं रक्ते"ति तु निश्चयो ह्यनुपयोगीकामजमोहसारत्वात्, शुक्तौ रूप्याभासवत्। यद्यपि—

"दूराकर्षणमोहमन्त्र इव मे तन्नाम्नि याते श्रुतिं
चेतः कालकलामपि प्रसहते नावस्थितिं तां विना।
एतैराकुलितस्य विक्षतरतेरङ्गैरनङ्गातुरैः
सम्पद्येत कथं तदाप्तिसुखमित्येतन्न वेद्मि स्फुटम्"॥

1 न-शृङ्गारो वीरो रौद्रो 2 ड शृङ्गारात्तु 3 न-रौद्रात्तु 4 न-वीरस्यापि यत्कर्म सोऽद्भुतः परिकीर्तितः। 5 प-हास्य इति संज्ञितः।

इत्यादौ रावणवाक्ये तावति रत्याभासतैव न तु हासः स्फुरति। तथापि सीताविभावलक्षणं रावणवयः प्रकृतिविरुद्धं च। चिन्तादैन्यमोहादिकं व्यभिचारिगणमश्रुपातपरिदेवितादि चानुभावजातमनौचित्यात्तदाभासरूपं स(त?)द्धास्यविभावरूपं तद्वक्ष्यते "विकृतपरवेषालङ्कारै"(अ ६)त्यादि। एवं तदाभासतया प्रकारः शृङ्गारेण सूचितः। तेन करुणाद्याभासेष्वपि हास्यत्वं सर्वेषु मन्तव्यम्। अनौचित्यप्रवृत्तिकृतमेव हि हास्यविभावत्वं, तच्चानौचित्यं सर्वरसानां विभावानुभावादौ सम्भाव्यते। तेन व्यभिचारिणामप्येषैव वार्ता। अत एव (संवि)त्सतत्त्वनिपुणैश्चिरन्तनै रसभावतदाभासव्यवहारस्तत्र तत्र क्रियते। आमोक्षहेतावपि तदाभासतायां शान्ताभासो। हास्य एव प्रहसनरूपस्य, अनौचित्यत्यागः सर्वपुरुषार्थेषु व्युत्पाद्यः। एतच्च लक्षणे वक्ष्यते। तत्र हास्याभासो यथास्मत्पितृव्यस्य वामनगुप्तस्य।—

"लोकोत्तराणि चरितानि न लोक एष
संमन्यते यदि किमङ्ग वदाम्र(म?) नाम।
यत्त्वत्र हासमुखतस्त्वममुष्यं तेन
पार्श्वोपपीडमिह को न विजाहसीति" ॥

एवं यो यस्य न वन्धुस्तच्छोके करुणोऽपि हास्य एवेति सर्वत्र योज्यम्। एतदेवोदाहरणम्। एवमन्यत्तेनानुमेयमिति मुनिना यथाग्रहणं कृतम्। यदीयफलानन्तरं द्वितीयरसोऽवश्यंभावी तस्योदाहरणं रौद्रो, रौद्रस्य हि फलं वधवन्धादि तद्विभावकेनावश्यं करुणेन भाव्यम्। यथा वेणीसंहारे—

"अद्यैवावां रणमुपगतौ तातमम्बां च दृष्ट्वा
घ्रातस्ताभ्यां शिरसि विनतोऽहं च दुश्शासनश्च।
तस्मिन्वाले प्रसभमरिणा प्रापिते तामवस्थां
पित्रोः पार्श्वे व्यपगतघृणः किं नु वक्ष्यामि गत्वा।"

एवं रौद्रानन्तरं नियमेन भयानकः। शृङ्गारानन्तरं नियमेन करुणं (णो) व्याप्रियते त्वसौ तज्जन्मनि यथा तापसवत्सराजे वासवदत्तादाहाद्वत्सराजस्य। ननु तत्रारतेरविच्छेदाद्वन्धुताकृतः शोकः, नैतत्, करुणोत्पत्तिकालेऽपि हि

1 प्रभृति।

क्रोधस्य विच्छेद एव। यदाह—"निर्वाणवैरदहनाः प्रशमादरीणां नन्दन्तु पाण्डुतनयाः" (वेणी अ-१) इति न च बन्धुमात्रं हेतु, एवं हि सति—

"उत्कम्पिनी भयपरिस्खलितांशुकान्ता
ते लोचने प्रतिदिशं विधुरे क्षिपन्ती।
क्रूरेण दारुणतया सहसैव दग्धा
धूमान्वितेन दहनेन न वीक्षितासि" (तापसवत्सराजे २-१६)

इत्यादौ ते इति प्राणभूतं(पदं) निरुपयोगतां गमितं स्यात्। रतिप्रलापेषु च कुमारसम्भवे शृङ्गार एव करुणस्य जीवितं—

"हृदये वससीति मत्प्रियं यदवोचस्तदवैमि कैतवम्।
उपचारपदं न चेदिदं त्वमनङ्गः कथमक्षता रतिः" (४-९)

इत्याद्युक्तिषु। एवं वीराद्भयानकोत्पत्तिः। यथा "कर्णस्यात्मजमग्रतः शमयतो भीतं जगत्फाल्गुनात्" (वेणी ५ ५)। यत्त्वत्र श्रीशङ्कुकेनोक्तं नात्रोत्साहस्य व्यापार इति तदसत्। एवं हि निर्विषय एवोत्साहः स्यात्, कर्तव्याननुसन्धानात्। युद्धवीरे च पराजयजनितः प्रतापापरपर्यायः शत्रुहृदयदाहदायी तद्वनितादिषु भयानक एव जीवितं, यथा—

स पातु वो यस्य हतावशेषास्तत्तुल्यवर्णाञ्जनरञ्जितेषु।
[1]लावण्ययुक्तेष्वपि वित्रसन्ति दैत्याः स्वकान्तानयनोत्पलेषु"॥(इत्यादिषु)

नियमेन भवतीति वक्तव्यम्। नियमश्चकारेणोक्तो, रौद्रादित्यानन्तर्यसूचकपञ्चम्यनन्तरं प्रयुक्तेन। यस्तु रसो रसान्तरं फलत्वेनाभिसन्धाय प्रवर्तते तस्योदाहरणं वीरः। महापुरुषोत्साहो हि जगद्विस्मयफलाभिसन्धानेनैव। यथा-"दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत" (वीरचरिते) इत्यादि, रौद्रस्तु परविनाशनं फलत्वेनाभिसन्धाय प्रवर्तते। न करुणमिति शेषः। विदूषकहासस्तु नायिकाहासफलत्वेनाभिसन्धत्त इति मन्तव्यम्। यस्तु रसस्तुल्यविभावत्वानियमेन रसान्तरं हि परमाक्षिपति, तस्योदाहरणं बीभत्सः, तस्य हि ये भावा रुधिरप्रभृतयस्तेऽवश्यं भयहेतवः, तथा तद्व्यभिचारिणो मरणमोहापस्माराद्यास्तदनुभावास्तु मुखविकूणनादयो, यथा वेणीसंहारे "संस्तभ्यन्तां निहतदुश्शासनपीतशेषशोणितपीतबीभत्स वृकोदरदर्शनवैक्लब्यस्खलितप्रहरणानि रणाद्विद्रवन्ति बलानी"ति (वेणी ४)। एवं तदाभासतद्द्वारेण रसान्तराक्षेपकत्वे शृङ्गार उदाहरणम्। तेन शृङ्गारानुकृतिरित्यत्र तुशब्दो वीप्सायाम्। द्वितीयो हेतौ। तेनैवं योजनाया

1 शृङ्गारसाक्ष्यैव च।

वीरस्यापि च यत्कर्म सोऽद्भुतः परिकीर्तितः।
बीभत्सदर्शनं यत्र [1]ज्ञेयः स तु भयानकः॥ ४६

अनुकृतिः स हास्यो यतः प्रकीर्तितः। एवंविभावको हास्य इति शेषः। तद्यथा शृङ्गार आद्यं शृङ्गारवत्यनुकृतिरित्यर्थः। यत्त्वत्र शृङ्गाराद्भुतोत्पत्तेराशङ्कां ददृशुः "दृशः पृथुतरीकृता"(रत्ना २-१५) इत्यादौ निर्मूलमेवोदयने हि शृङ्गारो ब्रह्मणि विस्मयसम्भावना। सा च न तात्कालिकत्वेन नोत्तरकालिकत्वेन। किन्तु पूर्वतरमेतदिति[1] न किञ्चिदेतत्। परस्परफलत्वेन रसान्तराक्षेपे रौद्र उदाहरणम्। रौद्रस्य यत्कर्म [2]फलात्मकं वधादि चकाराच्चस्य यत्कर्म फलरूपं स एव करुणः। एवकारेणात्यन्तव्यवहितां परम्परां पराकरोति। समनन्तरफलत्वेन रसान्तराक्षेपे उदाहरणं त्वस्यासन्नियोगो वीरस्य सम्यङ्निकटं यत्फलं सोऽद्भुतः, परितःसमन्ताद्या कीर्तिर्यशःप्रतापरूपा ततो हेतोः अपिशब्दाच्छृङ्गारोऽपि वीरस्यानन्तरं फलं; द्रौपदीस्वयंवरादौ सहभावेन रसान्तराक्षेप बीभत्स उदाहरणम्। यदेव बीभत्सस्य दर्शनं विभावादिरूपं स एव भयानकस्तद्विभावत्वादुपचारस्य सहभावप्रतीतः (तिः ?) फलम्। तमेव चशब्दो द्योतयति। तुः पूर्वतो विशेषमाह—अयमेव चाक्षेपप्रकाशत्वात्संभाव्यते न त्वधिक इति। या त्वस्यापि सा तेनोक्ता।? । ये चात्रोत्पत्तिहेतव उक्तास्ते यथास्वं पुरुषार्थचतुष्कव्याप्तास्तद्धितसौन्दर्यातिशयजननरूपरञ्जकाभासादयस्तदनुगामित्वेन रूपकेषु निबन्धनीयाः। एतावन्त एव च रसा इत्युक्तं पूर्वम्। तेनानन्त्येऽपि पार्षदप्रसिद्ध्यैतावतां प्रयोज्यत्वमिति यद्भट्टलोल्लटेन निरूपितं तदवलेपना परामृश्येत्यलम्। वर्णाभिधानं पूजादौ ध्यान उपयोगि। मुखरागेऽपीत्यन्ये। स्वच्छपीतौ शमाद्भुताविति शान्तवादिनां पाठः। तत्तद्रससिद्धौ सा सा देवता पूज्येति देवतानिरूपणम्। विष्णुः कामदेवः। प्रमथा भगवतो गणाः क्रीडापराः। रुद्रस्त्रैलोक्यसंहारकर्ता। अत एव चोदयतीति नियमेन वधादिके सम्पादिते करुणः, महाकालोऽधिदैवतमिति शेषः। स हि तद्विभावं कङ्कालं श्मशानादि सेवते। महेन्द्रस्त्रैलोक्यराजः। ब्रह्मा

1 न - यश्च भवेत्स।

1 तरमेतदिति 2 फलत्वात्मकं 3 विपरीतः।

अथ वर्णा नाम

[1]श्यामो भवति शृङ्गारः सितो हास्यः प्रकीर्तितः ।
[2]कपोतः करुणश्चैव रक्तो रौद्रः प्रकीर्तितः ॥ ४७
[2]गौरो वीरस्तु विज्ञेयः कृष्णश्चैव भयानकः ।
नीलवर्णस्तु बीभत्सः पीतश्चैवाद्भुतः स्मृतः ॥४८

[3]अथाधिदैवतानि

शृङ्गेरो [4]विष्णुदेवत्यो हास्यः प्रमथदैवतः ।
रौद्रो रुद्राधिदैवत्यः करुणो यमदैवतः ।। ४९
[5]बीभत्सस्य महाकालः [6]कालदेवो भयानकः ।
वीरो [7]महेन्द्रदेवः स्यादद्भुतो ब्रह्मदैवतः ॥ ५०

एवमेतेषां रसानामुत्पत्तिवर्णदैवतान्याभिव्याख्यातानि। [एषां तु] इदानीं विभावानुभावव्यभिचारिसंयुक्तानां लक्षणनिदर्शनान्यभिव्याख्यास्यामः । [8]स्थायिभावांश्च

अचिन्त्याद्भुतस्रष्टा । "बुद्धः शान्तोऽब्जजोऽद्भुत" इति शान्तवादिनः केचित्पठन्ति । बुद्धो जिनः परोपकारैकपरः प्रबुद्धो वा, तत्रोत्पत्तिलक्षणमन्योन्याश्रयत्वान्न निश्चयकारि । वर्णदैवतात्मकमप्यागमसिद्धत्वादित्येकप्रघट्टकेनोपसंहरत्येवमित्यादिना । एतेषामिति सर्वेषामित्यर्थः ।

अथ विशेषलक्षणानि वक्तुमासूत्रयतीदानीमित्यादिना । विशेषलक्षणं सजातीयाद्व्यवच्छेदकम् । न विजातीयाद्व्यवच्छेदं विना सजातीयत्वम् । न चासौ सामान्यलक्षणं विनेति तत्पृष्ठविशेषलक्षणमिति दर्शयितुं सामान्यलक्षणमनुवदत्यनुभावेत्यादिना । लक्षणानि च तानि निदर्शनानि च विशेषात्म-

1 न - श्यामो भवेत्तु 2 म - रक्तो रौद्रो रसः प्रोक्तः कपोतः करुणस्तथा 3 प - अथ दैवतानि 4 न - देवस्तु 5 प - बीभत्सश्च 6 प - कामदेवो 7 म - माहेन्द्रदैवत्य अद्भुतो स्थायिभावांश्च रसत्वमुपनेष्याम ।

रसनामनुक्रमिष्याम इति॥ तत्र शृङ्गारो नाम [1]रतिस्थायिभावप्रभव उज्ज्वलवेषात्मकः[2] । [यथा च] यत्किञ्चिल्लोके शुचि मेध्यमुज्ज्वलं दर्शनीयं वा [भवति]

कानि तेन प्रत्येकं लक्षणविशेषा उच्यन्त इत्यर्थः । विशेषलक्षणानि वा सामान्यलक्षणस्य निदर्शनानि, येषु सामान्यलक्षणं निर्दिश्यते योज्यते उदाह्रियते च तद्विना तस्योदाहर्तुमशक्यत्वात् । चकारो लोकोत्तरतयादरं सूचयति । ये स्थायिनो भावा लोके चित्तवृत्त्यात्मानो बहुप्रकारपरिश्रमप्रसवनिबन्धनकर्तव्यताप्रबन्धाभिधायिनस्तानपि नाम रसत्वं विश्रान्त्येकायतनत्वेनोपदेशदिशान्वेष्यामः । विभावान्यथायोगमुपहरद्भिः कविनटैर्हि ते रसतां नीयन्ते, यदाह—

"या व्यापारवती रसान्रसयितुं काचित्कवीनां नवा
दृष्टिर्या परिनिष्ठितार्थविषयोन्मेषा च वैपश्चिती ।
ते द्वे अप्यवलम्ब्य विश्वमनिशं निर्वर्णयन्तो वयं
श्रान्ता नैव च लब्धमब्धिशयन त्वद्भक्तितुल्यं सुखम् ॥" इति ।
(ध्वन्या ३)

नटानां तु तदुपजीवितत्वान्न नवा दृक्पश्यति न रसयत्यतो नवेति । तस्माद्रसनोपयोगिविभावाद्यौचित्यमस्माभिरुपदिशद्भिः स्थायिनो रसतां नीता भवन्तीत्यनेन लक्षणरूपस्य फलं दर्शयति ।

(अथ शृङ्गाररसप्रकरणम्) । तत्र कामस्य फलत्वादशेषहृदयसंवादित्वाच्च तत्प्रधानं शृङ्गारं लक्षयति तत्रेत्यादिनोज्ज्वलवेषात्मक इत्यन्तेन सूत्रेण । तत्रेति क्रमनिर्धारणे, एवं सतीत्यर्थे वा । एतत्सूत्रभाष्येण व्यक्तं यल्लक्ष्यपदं नामेति व्याचष्टे यत्किञ्चिदित्यादिना । हस्तपृष्ठतादिमण्डितः शृङ्गारस्तेन सूचीमध्याद्युपमीयते । तेनोज्ज्वलवेषात्मके शृङ्गारशब्दः । न चातिप्रसङ्गः, आप्तोपदेशस्य नियामकत्वादिति चिरन्तनाः । तदनुपपन्नं, उपमानोपमेययोर्विशेषविषयविभागानवभासात् । तथा तस्माद्यमत्रार्थः । रतिरेवास्वाद्यमानो मुख्यशृङ्गारः । रतिमास्वादयद्भिस्तद्बहुमानपरः शृङ्गारीत्युच्यते । यस्तु से (त?)ज्जनादिपर एव तद्व्यसनिता सा रसनास्वाददशालोके(काले?) भवन्त्यपि न चिरमवतिष्ठते । तदास्वादे चोपयोगि यथास्वं विभावादितया शास्त्र(स्त्रा?)निषिद्धमजुगुप्सितं संस्फुटं मनोहरं च, तदुपचाराच्छृङ्गारशब्दवाच्यम् । तदाह उपमीयते तदुपयोगितया तथा मीयते

---

1 च - वेषात्मकत्वाच्छृङ्गारो रसः 2 न - प्रभवोज्ज्वल. म - प्रभवो हृद्योज्ज्वलवेषस्वभावः न म स्त्रीस्थायी भाववेषस्वभावः

[1]तच्छृङ्गारेणोपमीयते । [2]यस्तावदुज्ज्वलवेषः [3]स शृ-ङ्गारवानित्युच्यते। यथा च गोत्रकुलाचारोत्पन्नान्याप्तोप-देशसिद्धानि पुंसां नामानि भवन्ति [4]तथैवेषां रसानां भावानां च नाट्याश्रितानां चार्थाना[5]माचारोत्पन्नान्याप्तो-पदेशसिद्धानि नामानि [भवन्ति]। [6]एवमेष आचारसिद्धो हृद्योज्ज्वलवेषात्मकत्वाच्छृङ्गारो[7] रस [इति]। स च [8]स्त्रीपुरुषहेतुक उत्तमयुवप्रकृतिः।

लक्ष्यत इति यावत्। क यथेति दर्शयति यस्तावदिति। तावद्ग्रहणेनावधारण-वाचिना शृङ्गारवाच्यो मुख्योऽर्थस्तत्र नास्तीति दर्शयति स शृङ्गारवानिति, तद्-नुज्ज्वलवेषे शृङ्गारशब्द उपचरित इत्याह। ननु मुख्यतया रत्यास्वादे शृङ्गार-शब्दस्यप्रवृत्तौ किं निबन्धनमित्याशङ्क्याह, यथा चेत्यादि। गोत्रं पितृसन्तानादि, कुलं मातृसन्तानं सूचयति, । आचारो व्यवहारस्तत उत्पन्नानि लोके प्ररूढानि मूले तु नाद्य, आप्तोपदेशेन नामकरणलक्षणेन समयेन सिद्धानि। पुंसामितिमनुष्य-जातेर्नराणां नारीणां च। नराणां हि पितृसन्तानानुसारि नाम विष्णुशर्मे-त्यादि, स्त्रीणां तु मातृवंशानुसारि कनकप्रभा चन्द्रप्रभेति।

एवं रसादीनां तच्छास्त्रवेदिवृद्धव्यवहारतो निरूढानि प्राक्तनब्रह्मा - द्याप्तप्रणीतानि नामानि। तदेवोपसंहरति। एवं शृङ्गारो रसः। स आचार-व्यवहाराल्लोकेऽपि सिद्धः, कुतो हेतोर्हृद्यादिवेषात्मकत्वात्। एतदुक्तं भवति— प्रतिशास्त्रसमयानुसारिणोऽपि शब्दास्तद्वृद्धव्यवहारपरम्परया लोके प्रसिद्धा उपचारतोऽन्यत्रापि व्यवह्रियन्ते। यथा—साङ्ख्यपुरुषोऽयं, न किञ्चित्करोति पूर्वरङ्गोऽत्र तेन मे विरचितोऽत्र महतान्योन्यमस्ये"ति, तद्वदमी शृङ्गारादिशब्दा इहैव विषये मुख्याः, लोके तु साङ्ख्यपुरुषादिशब्दवत्। यस्तु शृङ्गारशब्दस्या-

---

1 न - तत्सर्वं शृङ्गारेण 2 न - य स्तावद्धृद्योज्ज्वलवेषः 3 म - वेषात्मकः 4 च - तथैषां म - तथैतेषां 5 न - आचारोत्पत्यङ्गकर्माप्तोप 6 ड - तदेवमेष गुर्वाचार म - एवमाचार 7 ड - वेषात्मकः शृङ्गारो न - शृङ्गारः स च 8 द - स्त्रीपुंस 9 प - युवतिप्रकृतिः

नीयेन व्युत्पत्तिमाह तस्य रूपमपि विस्मृतम्, आरकाङ्प्रत्ययो, नारच् बृन्दारक इति । अथात एवोणादिषु निपातितोऽयं शब्दः । यस्तु पृथग्भावेन गोलादिनामानि व्याचष्टे व्याख्याभावात्तदीक्षितानि तस्य प्रकृते न किञ्चिदिप्युपयुज्यते । न च गोलाचारोत्पन्ने नामनि नियामक आप्तोपदेशो लोके इत्यास्तामेतत् ।

अथ रतिस्थायीति सूत्रभागं भाष्येण स्पष्टयति स चेत्यादिना । स्त्रीपुरुषशब्देन परस्पराभिलाषसंभोगलक्षणया लौकिक्या अस्येयं स्त्रीति या, तेनाभिलाषमात्रसारायाः कामावस्थानवर्तिन्या व्यभिचारिरूपाणीति या, विलक्षणैव इयं स्थायिरूपा प्रारम्भादिफलप्राप्तिपर्यन्तव्यापिनी परिपूर्णसुखैकफला रतिरुक्ता भवति। हेतुरस्य कविर्हि लौकिकरतिवासनानुविद्धस्तथा विभावादि(दी?)नाहरति नाट्यं चानुभावान्यथारत्यास्वादे शृङ्गारो भवतीति। आस्वादयितुरपि प्राक्कक्ष्यायां रत्यङ्ग उपयोगीत्युक्तः प्राक्। एतदुक्तं भवति—[1]रतिक्रीडासार्धं च परमार्थतः कामिनोरेव, तत्रैव सुखस्य धाराविश्रान्तेः, अपरस्यर्तुमाल्यादिविषयसौन्दर्यस्य कविना कृतस्य संकल्पत्वात्संवेदनाद्द्वितयान्योन्यनिमज्जनात्मकमीलनाख्यो हि परमो भोगः, संविद एव प्रधानत्वादन्यत्र तु जडस्य भोग्यत्वात्, अत एवाह, "श्वासायासविडम्बनैव वपुषि प्राणापुनर्जानकी" इति। अत एव यत्कैश्चिदाचोद्यत, रतेराधारभेदेन भेदात्कथमेको रस इति, तदनभिज्ञया। एकैव ह्यसौ तावती रतिः, यत्रान्योन्यसंविदैकवियोगो न भवति, अत एवोत्तमयुवप्रकृतिरुत्तमश्चोत्तमा चोत्तमौ,एवं युवानौ। य(अ?)त्रोत्तमयुवशब्देन तत्संविदुच्यते। ननु(तु?)कायश्चैतस्यैव हि परमार्थत उत्तमयुवत्वं विशेषः। स ह्यवस्थावान् तत्रतत्र व्यवहारस्य भूतत्वात् तत्प्रकृतिः सा संविदास्वादयोग्यत्वात् शृङ्गाररसीभवतीति । अनुत्तमत्वे तु(तदा?) दार्ढ्यमयुवत्वे चेति न सा रतिसंविद्वियोगस्य संभावनात् । अवियुक्तसंवित्प्राणस्तु शृङ्गारः, यथा—

"वारिसिणि०चरिहिआदि हिल०गणाहुकंहविएक।
हुहिप्पुळजळमरणिमअळहुतीतिहविपण्सि" । † इति

व्याख्याता परस्परं जीवितसर्वस्वाभिमानरूपा वेषयति व्यापयति चित्तवृत्तिमन्यत्र ज्ञापनया संक्रामयतीति वेषो,विभावानुभावात्मा,वेषयति, व्याप्नुवन्ति

[1] एवमुक्तं † अस्फुटेयं गाथा

तस्य द्वे अधिष्ठाने, सम्भोगो विप्रलम्भश्च,[1] तत्र सम्भोगस्तावदृतु[2] माल्यानुलेपनालङ्कारेष्टजनविषयवरभवनोपभोग वन[3] गमनानुभवनश्रवणदर्शनक्रीडालीलादिभिर्विभावै रुत्पद्यते[4] ।

स्थायिनमिति व्यभिचारिणः । ते चोज्ज्वला उत्कृष्टा यस्मिंस्तथाभूत आत्मा यस्येति मूत्रे संक्षिप्य यद्विभावादि निरूपितं तद्विभागेन व्याख्येयमित्याशयेन शृङ्गारस्यावस्थाभेदमाह तस्य द्वे इत्यादिना । अधिष्ठाने अवस्थे इत्यर्थः। अधिष्ठीयतेऽवस्थातत्शृङ्गाररूपेण तेन शृङ्गारस्येमौ भेदौ गोत्वस्येव शाबलेयत्वबाहुलेयत्वे। अपि तु तद्दशाद्वयेऽप्यनुयायिनी या रतिरास्थाबन्धात्मिका तस्याश्चास्वाद्यमानं रूपं शृङ्गारः । यदाहुः—

"(एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा
मा कौलीनादासतनयने मय्यविश्वासिनी भूः) ।
स्नेहानाहुः किमपि विरहह्रासिनस्तेऽप्यभोगा—
दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥ इति । †

अत एव सम्भोगे विप्रलम्भसम्भावनाभीरुत्वं विप्रलम्भेऽपि सम्भोगमनोराज्यानुवेध इति । इयच्छृङ्गारस्य वपुः, अभिलाषेर्ष्याप्रवासादिदशास्त्वत्रैवान्तर्भूताः । सत्यामास्थाबन्धात्मिकायां रतौ तेन सम्भोगशृङ्गार इत्यादि व्यपदेशो भोगेऽप्युपचारात्, अत एव सत्यतः सातिशयचमत्कारः। यथा—

"एकस्मिञ्छयने पराङ्मुखतया वीतोत्तरं ताम्यतो-
रन्योन्यं हृदयस्थितेऽप्यनुनये संरक्षतोर्गौरवम् ।
दम्पत्योः शनकैरपाङ्गवलनान्मिश्रीभवच्चक्षुषो-
र्भग्नो मानकलिः सहासरभसंव्यासक्तकण्ठग्रहम्" ॥ *

तत्र ह्रीर्ष्याविप्रलम्भसम्भोगमीलनात्मिकैवैकप्राणीभूतोभयगतविभावानुभावव्यभिचारिकृतसातिशया रसावभक्ताभिस्ते (विभक्तिरास्ते?) नयनयोः? । चोदितं

---

1 न - विप्रलम्भकृतश्च 2 ड; माल्यालेपन 3 ड - भोगोपवन द उपवनभवनानुगमन श्रवणक्रीडालीलाश्रयादिभिः 4 म - समुत्पद्यते ।

† मेघसंदेशे * अमरुकशतकम्.

पुरूरवस उन्मादे वत्सराजस्य तापसत्वे चानुज्ज्वलवेषत्वं विप्रलम्भशृङ्गारेऽपि तदनवकाशमेव भोगस्य रसत्वाभावात्, स्नानाद्यवस्थानमिव । यत्त्वत्रोत्तरं तावत्तटस्थैर्यदुज्ज्वलवेषाभावेऽपि रतिमुत्तमां न विजोहतीति, तद्यक्षभाषितं, प्रकृतचोद्यापरिहारात् । न हि चोदितमनुज्ज्वलवेषे कथं शृङ्गार इति । तदेवास्तु चोद्यमिति चेत्, न; वचनस्यातिभारोऽस्ति । ननु मुनिनैवमुक्तं सत्युज्ज्वलवेषे शृङ्गार इति, अपि तु विपर्यय इत्यास्तामेतत् । तत्रेति । द्वयोरवस्थयोर्मध्ये सम्भोगावस्था तावदुच्यते तत्रेह वस्तुतः स्त्रीपुंसौ परस्परं विभावौ तयोरुत्तमत्वे चोपयोगीनि ऋत्वादीनि उत्तमस्यानवसरे रत्यभावात् । ऋतुर्वसन्तादिः । माल्यं कुसुमादिः । अनुलेपनं समालम्भनं यद्यत्कामस्योद्दीपकम् । अलङ्कारः कटकादिः । (इष्टजनाः) द्विजन्मानो विदूषकादिः । एतदुभयमुत्तमत्वसूचकं, यदाह—

> "असमाप्तजिगीषस्य स्त्रीचिन्ता का मनस्विनः ।
> अनाक्रम्य जगत्कृत्स्नं किं सन्ध्यां भजते रविः" इति ।

विषया गीतादयस्तदन्तर्भूतमपि माल्यादि प्राधान्यात्पृथगुक्तम् । वरभवनं हर्म्यादि । एतद्देशविशेषोपलक्षणम् । एषामुपभोगः उपवनस्योद्यानस्यानुभवनं श्रवणं वा वरभवनस्थस्यापि । एतत्संकल्पादेरप्युपलक्षणम् । क्रीडा जलावगाहनादिकालीला । जनस्याकृति अनुग्रहणादन्यदपि हृद्यं हंसयुगलकचित्रपुस्तकदर्शनादि । एतच्चसमस्तमेव शृङ्गारविभावत्वेन मन्तव्यम् । यावान्कश्चिदयं विषयसम्भारो हृद्यतमस्तत्पूर्णतायां सत्यामुत्तमस्य रत्युदयः । अत एव रत्नावल्यां हर्म्यवर्णनमुद्यानगमनं कामदेवपूजा वसन्त इत्यादि सर्वमेव संगृहीतं "राज्यं निर्जितशत्रु योग्यसचिवे न्यस्त"मित्यादिना । (ननु) एवं च सर्व एव समुदितो विभाव इति काल्पनिकमालम्बनविभाव उद्दीपनविभाव इति, अत एव मुनिना नायं क्वचिद्विभाग उक्तः सूचितो वा । युक्तं चैतत् । यथैकत्रैव रूपके उद्यानर्तुमाल्यादीनां सर्वेषां दर्शनादेको रसः स्यात्, विभावभेदात् ॥

ननु प्रथमं प्रमदामात्रदर्शनेनोद्यानभवनादिसम्भवः । क एवमाह । ऐश्वर्यपूर्णस्य हि तावदात्मीयसमृद्धिसम्भारसंस्कारानवगमात् पूर्णतैव विभाववर्गस्य स्यात् । प्रधानं हि रूपकं तत्र तत्रोदाहरणं तेन पृथक्पृथगुदाहरणदानमनुपपन्नम् । या तु मुक्तकादौ पृथक्तया भावेऽपि रससंवित् । तत्रोत्तमे च तापस (तावत्?)स्तत्रानुसन्धानाच्चमत्कार इति । यस्त्वनुत्तमादिविषयेऽपरिपूर्णोद्दीपन-

*राजतरङ्गिण्याम् (४-४४२)

तस्य [1]नयनचातुरीभ्रूक्षेपकटाक्ष[2]सञ्चारललित-मधुराङ्गहार[3]वाक्यादिभिरनुभावैरभिनयः[4] प्रयोक्तव्यः ।

त्वेन चमत्कारो दृश्यते, यथा हि "वर्धते लुनाहिपणीलुदिंसिगमिहा अमइंह भ्रुवं हचदुघरीदुल्लए लंधा"* इति तथा कामस्वरूपे रङ्ग इत्यादि (?) तत्रैकाङ्गस्य सौभाग्यस्य प्राधान्याच्चमत्कारोदय इति तात्पर्यम् । न तु तदभावकृता चमत्कृतिः । एतैः कविनोपनिबद्धैर्नटेन च साक्षात्कारकल्पतामानीतैः सम्यगित्यविघ्नभोगात्मकसम्भोगो रस उत्पद्यते झटित्येव, न हि गमनाक्रियावत्पर्यन्ते रसनाक्रिया निष्पद्यते, अपि तु प्रथम एवावसरे । स च विभावसाक्षात्कारात्मक एव । तस्य तु प्रथमकक्ष्यायामेव रसनागोचरत्वाभिमतस्य नयनचातुर्यादिभी रसै रसनाद्याभिमुख्यं नीयते । अत एव तेऽभिनयानुभावाश्चाभिमुख्यनयनमनुभा(व)त्वं च तद्रसास्वादे समर्थाचरणमुद्दीपनम्, अत एव तदभावे[ऽपि] विभावादिवर्णनप्रधानेऽपि काव्ये न चमत्कारः रसनायास्तत्राभावात् । यथा विन्दो (कवीन्दो ?) भट्टेन्दुराजस्य—

"उपपरिसरं गोदावर्याः परित्यजताध्वगाः
सरणिमपरो मार्गस्तावद्भवद्भिरवेक्ष्यताम् ।
इह हि विहितो रक्ताशोकः कयापि हताशया
चरणनलिनन्यासोदञ्चन्नवांकुरकञ्चुकः" ॥ इति ।

एवमन्यत्राप्युपपद्यत इति तस्याभिनयादिर्योजनीयम् (?) ।

ननु विभावानां साधारण्यं कथं नियमं, एवं न हि, नाट्य इयांश्चात्र कविप्रयत्नसमर्प्यमाणस्तेन तद्भावात्प्रयोजकधर्मोद्रेकप्रकाशविशिष्टसद्बलात्प्रमुख एव विशेषविश्रान्ततां याति । तथा "हा प्रिये जनकराजपुत्रीति" इत्ययं श्रुत एव न रतिव्यतिरेकेण भावान्तरविभावता शङ्क्या । एतेन कुणपं कामिनीत्यादिसम्भावनं प्रत्युक्तम् । तत्र नयनचातुर्यादिना कान्तादृष्टिर्लक्ष्यते । यत्तु "भ्रुवोर्मूलसमुत्क्षेपश्चातुरी"मिति, वक्ष्यते (८-४४) सभ्रूक्षेपेण चोक्तं "विवर्तनं कटाक्ष" (८-९४) इति ताराकर्म । एवं च योजना—नयनानां चातुर्येण सभ्रूक्षेपेण कटाक्षेण च यद्यत्सञ्चारणं ललितं मन्थरं मधुरं नयनाभिरामं कृत्वा,

---

1 म - नयनचातुर्यं 2 म - सञ्चरण क - सञ्चारि 3 न - हारैर्वाक्यादिभिः
4 द - भावैरभिनेतव्यः *ध्वन्यालोके (५४-२२)

[1]व्यभिचारिणश्चास्यालस्यौग्र्यजुगुप्सावर्जाः[2]। विप्रलम्भकृतस्तु निर्वेदग्लानिशङ्कासूयाश्रम[3]चिन्तौत्सुक्यनिद्रासुप्तस्वप्नविबोधव्याध्युन्मादापस्मार[4]जाड्य [मोह] मरणादिभिरनुभावैरभिनेतव्यः[5] ॥

यान्यङ्गानां हरणानि स्वकर्तव्यकाले ललितानि सुकुमाराभिधेयानि मधुराणि च श्रवणसुखकराणि यानि वाक्यानीत्युपाङ्गाभिनय आङ्गिको वाचिकश्च लक्षितः। अत एव सामान्याभिनयाध्याय(अ. २२)वक्ष्यमाणाशेषचेष्टालङ्कारलाभ इति। ललितमधुरशब्दौ तदर्थावित्यसत्। आदिग्रहणात्सात्त्विको मुखरागपुलकादिर्गृह्यते। अनुभावकत्वेन ताटस्थ्यपरिहारः। आभिमुख्यनयनेन स्वात्मैक विश्रान्तिशङ्कानिरासः। एवमुत्तरत्रापि।

एवं विभावसमय एव रसनीयस्यानुभावावसरेऽवस्थावेशवैरस्यास्पदस्य पश्चाद्व्यभिचारिणः स्वात्मेव रसनीयतां चित्रयन्तः सातिशयं पुष्यन्तीति पश्चात्ते निरूप्यन्ते व्यभिचारिणश्चास्येति। आलस्यौग्र्यजुगुप्सावर्ज्यमाना येभ्यस्ते सर्वे व्यभिचारिणः। अस्येति दशाद्वयमयस्येत्यर्थः। जुगुप्सा स्थायिन्यपीह निषिद्धा न्यायसिद्धात्स्थायिनामपि व्यभिचारित्वमनुज्ञापयति। आलस्यादि च स्वविभावप्रमादादिविषयमेव निषिद्धम्। तेन * "वपुरलसलसद्बाहु लक्ष्म्या" इति। तथा † "कति चिदहानि वपुरभूत्" "केवलमलसेक्षणं तस्या" इत्यादिनापि (वि?)रूपकं मन्तव्यम्। एवं प्रयोगे काव्ये च विभावादीनां क्रम एवं समाश्रयणीयः। उत्पूर्वस्य लब्धप्रतिष्ठता तथाभूतस्य परिवारसंघटनमिति हि प्रतीतिक्रमः ॥

ननु निर्वेदादयः सम्भोगे न व्यभिचारिण इत्याशङ्क्याह विप्रलम्भकृतस्त्विति। तुशब्दो विशेषं द्योतयति। वाक्यैकवाक्यतया दुःखप्रायनिर्वेदादिमुक्त्वा आलस्यादिव्यतिरिक्ताश्च सुखमया एव धृत्यादयोऽत्र व्यभिचारित्वेन सम्भोग उपन्यस्ता इति प्रकटयति। परस्परांशोपजीवनं चात्र

1 म - व्यभिचारिणश्चालस्य, 2 च - वर्ज्याः 3 न - चिन्तौत्सुक्योवगभयविषाददैन्यनिद्रा 4 म - जडता 5 प - भावैरभिनयः प्रयोक्तव्यः

*वेणीसंहारे - (१-२) उत्तिष्ठन्त्या . पुनातु

†आविलपयोधराग्रं लवलीदलपाण्डुराननच्छायम्।
कतिचिदहानि शरीरं श्लथवलयमिवाभवत्तस्याः ॥ विक्र (५-८)

जीवितमिति दर्शयितुमस्येत्यनुद्भिन्नमेवोक्तम् । तत एव च भगवदनुग्रहपवित्र-वाचा कालिदासेन रघुवंशे सम्भोगविप्रलम्भात्मकव्यामिश्ररसनासम्पत्तये प्रत्यनीकोद्देशेन रामभद्रस्य स्वकर्मपूर्वावस्थावर्णनेनादृतम् । स्वप्ना(सुप्ता ?)न्त-र्भूतोऽपि स्वप्नः प्राधान्यादुपात्तः † "क नीलकण्ठव्रजसी"ति (कुमा-५-५४)। "सिविणवएविहुदोसु ० जपउमुमराविउतरूढसंखुआसिपुअगळगाळविउति" तथा * "आहूतोऽपि सहायै"रित्यादौ हि स एव प्राणः। सम्भोगदशायां तु विभावसान्निध्ये निद्राद्यभावाद्विबु(बो?)धोऽपि व्यभिचारी । सम्भोगेऽपि रतिश्रमकृतनिद्रादि यद्यप्यस्ति तथाऽपि न रतौ तच्चित्रतामभिधत्ते। विप्रलम्भे तु तद्रतिभावनापरस्परोऽत एव निद्रादिबाहुल्यापेक्षं चेत्थमभि-धानम् । उन्मादापस्मारव्याधीनां या नात्यन्तं कुत्सिता दशा सा काव्ये प्रयोगे च दर्शनीया । कुत्सिता तु [न] सम्भवेऽपि नेति वृद्धाः । वयं तु ब्रूमः । तादृश्यां दशायां स्वजीवितनिन्दात्मिकायां तद्देहोपभोगसाररत्यात्मका-स्थाबन्धोऽपि विच्छिद्यत एवेति सम्भव एव मरणमचिरकालप्रत्यापत्तिमयमत्र मन्तव्यं, येन शोकोऽवस्थानमेव न लभते । यथा—

"तीर्थे तोयव्यतिकरभवे जह्नुकन्यासरय्वो-
देहत्यागादमरगणनालेख्यमासाद्य सद्यः ।
पूर्वावस्थाधिकचतुरया सङ्गतः कान्तयासौ
लीलागारेष्वरमत पुनर्नन्दनाभ्यन्तरेषु ॥ (रघु-८-९५)

अत एव सुकविना वाक्यभेदेनापि मरणं नाख्यातम् । प्रतीतिविश्रान्ति-स्थानत्वपरिहाराय तृतीयपादेन [1]विभावानुभावसन्धानं दर्शितम् । पुनर्ग्रहणेन स एवार्थः सुतरां द्योतितः[2] । अन्ये त्वाहुः । मरणमिति न जीवितवियोग उच्यते । अपि तु चैतन्यावस्थैव, प्राणत्यागकर्तृतात्मिका[3] या सम्बन्धाद्यव-सरगता मन्तव्या । व्यभिचारिभावेनेति सुलभोदाहरणमेतदिति । आदि-शब्देन दैन्यमोहादयः । एते व्यभिचारिणोऽपि स्वानुभावैरनुभाविता विप्र-

---

† त्रिभागशेषासु निशासु च क्षणं निमील्यनेत्रे सहसा व्यबुध्यत ।
कनीलकण्ठ व्रजसीत्यलक्ष्यवागसत्यकण्ठार्पितबाहुबन्धना ॥ ०

*आहूतोऽपि सहायैरेमीत्युक्त्वा विमुक्तनिद्रोऽपि । गन्तुमना अपि पथिकः सङ्कोचं नैव शिथिलयति ॥

1 विभावानुभावस्थानकं दर्शितम् सा - विभावानुभावसाधनकं दर्शनम्
2 चोदितः 3 कर्तृकात्मिका

अत्राह—[1]यद्ययं [2]रतिप्रभवः शृंगारः [3]कथमस्य करुणाश्रयिणो भावा भवन्ति । अत्रोच्यते—[4]पूर्वमेवाभिहितं

लम्भमनुभावयन्ति तस्मादनुभावैरित्युक्तम् । अन्ये त्वादिशब्दं करणवाचिनमाश्रित्य तदीयानुभावान्प्राधान्येन दर्शयन्ति । एकशेषेण द्वयमप्यन्ये विप्रलम्भो(म्भे?) विडम्बनं सिद्धम् । इहतूपचारात्तदीयं फलं विरहात्मकं गृह्यते, न हि परस्परं रतिमतोर्विडम्बनमस्ति । तेन विरहेण कृतः सुष्ठुतमां प्रोषित इति दर्शयन्मुनिरनेन विना शृङ्गारो न प्रयोगे न काव्ये हृद्यतामवलम्बत इति दर्शयति । तथा हि—सम्भोगेऽप्येकघनशर्करास्वादस्थानीयतापरिहाराय वैषम्यं गोत्रस्खलितस्पर्धामन्यद्वा कलहविप्रलम्भहेतुभूतं कवयो निबध्नन्ति, "वामो हि काम" इति वात्स्यायनादिभिरभिहितम् । मुनिनापि वक्ष्यते "यद्वामाभिनिवेशित्व"मिति, (२२-१२३) । एते च व्यभिचारिणो विद्युदुन्मेषनिमेषयुक्त्यैव स्थायिसूत्रमध्ये प्रकटयन्तस्तिरोदधतश्च तद्वैचित्र्यमावहन्ति, न तु स्थिराः। यद्यपि स्थाय्यपि न स्थिरः, तथाऽपि संस्काररूपतया धारावाहिसजातीयप्रवाहरूपतया च स्थिर एव । व्यभिचारिणस्तु नैवं क्षणमपि भवन्ति । संस्कारमपि स्वकं स्थायिसंस्कार एव प्रौढयन्ति । तथैव स्मरणाच्च । तेन व्यभिचारिषु पृथक्पृथग्यैः कैश्चिदुदाहृतं तन्न तन्त्रन्यायानुपाति । तथा हि—धृतौ यदुदाहृतं "असम्भाव्यं देवा"दित्यादि, तत्रापि हर्षविस्मयगर्वमतिप्रभृतीनां च; "तेति मा"मिति वलितेत्यादिसूचितानां सम्भार एव, "किमपरं त्रैलोक्य"मित्यादौ चावान्तरवाक्यारम्भे स्मृतिप्रभृतिभिः सर्वत्र भाव्यम् । अन्यथा हि धृत्यैकवचनत्वे सर्वत्र श्लोकार्थे दृष्टिरेकैव चित्रन्यस्तेव भवेत् । "अस्याः सर्गविधा" (विक्रमोर्व १-१०)वित्यत्राप्यवान्तरवाक्यसमाप्तौ धृतिहर्षविस्मयादयो भवन्त्येव । अत एव विच्छिद्य विच्छिद्य वितर्कान्तरं समुदेति, न तु व्यभिचारी क्षणमप्यवतिष्ठते । चलं हि गुणवृत्तमिति हि तत्र भवन्तः । अत एव प्रयोगवैचित्र्यमन्यथा वैचित्र्यात्स एव प्रयोगः स्यात् । मध्येऽन्ते चाश्रयाः स्फुटाः । ते च त्रिस्रयं [1]धृतिप्रभृतीनीत्यास्तामेतत् ॥

---

1 ङ - यद्येवं 2 प - रतिर्भवति न - रतिभावप्रभवः 3 म - कथमिदानीमस्य 4 न - ननु पूर्वं स्मृति

सम्भोगविप्रलम्भकृतः शृङ्गार इति। [1]वैशिकशास्त्रकारै-श्च[2] दशावस्थोऽभिहितः। [3]ताश्च सामान्याभिनये वक्ष्यामः॥

[4]करुणस्तु [5]शापक्लेशविनिपतितेष्टजनविभवनाश-वधबन्धसमुत्थो निरपेक्षभावः। औत्सुक्यचिन्तासमुत्थः[6] सापेक्षभावो[7] विप्रलम्भकृतः।

वाक्यैकवाक्यत्वेनावस्थाद्वयस्यूतस्य शृङ्गारस्य यत्स्वरूपमुक्तमेतदेव परिशोधयितुं पूर्वपक्षयत्यत्राहेति। करुणविषये आश्रयणं विद्यते येषां भूम्ना अत एव कर्मधारयमत्वर्थीयाभ्यामितीह नाश्रितं भूम्नात्रहति ह्यत्र पूर्वपक्षस्य प्राणितम्॥

ननु त्वयोक्तमसदेवास्त्वित्याशंक्याह वैशिक्ये(कै?)त्यादि। वेशो वेश्या-वर्गः करणं च सम्भोगात्मकं तत्प्रयोजनं शास्त्रं कामसूत्रं ये कृतवन्तस्तैः शृङ्गारो दशभिरभिलषितादिभिर्मरणान्ताभिरवस्थाभिर्युक्तो दर्शितः। अव-स्थाग्रहणेन च तावन्तो बहवो विप्रलम्भा इत्याशङ्कां निराकरोति। तेन चिन्तादयोऽपि व्यभिचारित्वेन रतेस्तैरनुज्ञाता इति तात्पर्यम्। चकारेणेद-माह परस्परास्थाबन्धात्मकत्वे रतिरूपे स्थिते सति तदङ्गभूता दशावस्था विप्रलम्भाङ्गम्। यथोदयनस्य चित्रफलकावलोकनतः प्रभृति (रत्नावल्याम्)।

ननु तत्रापि न रतिः कास्य विषयस्यानवगमात्, न हि चित्रमात्रं नलिनीसंस्तरादेः साक्षिणो विद्यमानत्वादाकृत्या च काम्यमानतौचित्यस्य लाभात्। यदि परं नाम तज्ज्ञास्तत्कुलोपयोगीति। यदा तु विप्रलम्भाङ्गता न भवति तदा स्वातन्त्र्यं—यथा रावणस्यापि। तदुक्तमस्मदुपाध्यायभट्ट-तोतेन—

"स्वातन्त्र्येण प्रवृत्तौ तु सर्वप्राणिषु सम्भवः" इति।

---

1 न - वैशेषिक द - वैशिकशास्त्रकारेण 2 प - शास्त्रैश्च 3 न - ताश्चा-वस्थाः 4 म करुणः स पुनः 5 ढ - तापक्लेशेष्टजनवियोगविभव द - शोकक्लेश ...बन्धन म - ज - विनिपतनेष्ट 6 न - चिन्ताभावसमुत्थः 7 द - चिन्तारसोपेक्ष-भावो विप्रलम्भः।

एवमन्यः करुणोऽन्यश्च[1] विप्रलम्भ[2] इति। एवमेष सर्वभावसंयुक्तः शृङ्गारो भवति[3] ॥ ५१ ॥

अपि च[4]

सुखप्रायेष्टसम्पन्न[5] ऋतुमाल्यादिसेवकः[6] ।
[7]पुरुषप्रमदायुक्तः शृङ्गार इति संज्ञितः ॥ ५२ ॥

नन्वेवं व्यभिचार्यभेदात्करुणः कथं विप्रलम्भाद्भिद्यत इत्याशङ्क्याह करुणस्त्विवति। अधमप्रकृतेस्तावन्न विप्रलम्भः स्थाय्यभावात् । तदभावो विभावसामग्रीवैकल्यादिति तत्र तावत्करुणः पृथक् लब्धप्रतिष्ठ एव। उत्तमप्रकृतावपि रतिविपरीतः शोकः करुणे स्थायी । अत एवाह निरपेक्षो बन्धुजनादिविषये याऽपेक्षा रताविवालम्बनं यथोक्तम् "आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनाना"मिति (मेघ १-१०) ततो निष्क्रान्तो भावः शोकाख्यो यस्मिन् शापक्लेशे विनिपतितस्येष्टजनस्य यो विभवनाशो वधबन्धो वा ततः समुत्थानं, यस्य शापग्रहणेनाप्रतिकार्यत्वे सत्युत्तमप्रकृतेः शोकोदयस्थानमेतदिति दर्शयति । अन्यथोत्साहक्रोधादिविभावत्वं स्यात्। शोकत्वमेव च पराकर्तुं कविकुलचक्रवर्तिना पुरूरवस ऊर्वशीशापप्राप्तिरनुरूपलक्षितत्वेन निबद्धा। एवं विभावस्थायिविभेदो दर्शितः। येऽपि चैते निर्वेदाद्यास्तेऽपि वस्तुतो रत्यननुगृहीता निरपेक्षाच्छोकाद्भवन्त्यऽन्योन्य एव, ततोऽप्याह निरपेक्षभाव इति॥

एवं प्रसङ्गात्करुणस्य स्वरूपमभिधाय प्रकृते योजयत्यौत्सुक्यचिन्तेति। चिन्ताशब्दोऽशेषनिर्वेदाद्युपलक्षणम्। औत्सुक्यप्रधाना ये चिन्तादयस्तेभ्यः सम्यगुत्थानं विजृम्भो यस्य। अत एव सापेक्षो यत्र रत्याख्यो भावस्ते च सापेक्षाद्रत्याख्याद्भवन्ति। न हि विप्रलम्भे विभावः स्थायी च सम्भोगाद्भिद्यते। एक एवासाविति हि बहुश उक्तम् । एतदुक्तं भवति । औत्सुक्यं विषयौन्मुख्यम्। तच्च नष्टे विषये न सम्भवति। एवं परीक्ष्य परीक्षाफल-

---

1 म - करुणोऽन्यो 2 न - विप्रलम्भकृत इति 3 ड - भवेत् 4 न - भवति चात्र श्लोकः भ - अपि चात्र श्लोकः भ - सम्पन्नो 6 ड - माल्यानुसेवकः 7 द - पुरुषः प्रमदा।

अपि चात्रसूत्रानुविद्धे[1] आर्ये भवतः ।

[2]ऋतुमाल्यालंकारैः प्रियजनगान्धर्वकाव्यसेवाभिः ।
उपवनगमनविहारैः शृङ्गाररसः समुद्भवति ॥ ५४ ॥

नयनवदनप्रसादैः [3]स्मितमधुरवचोधृतिप्रमोदैश्च[4] ।
[5]मधुरैश्चाङ्गविहारैस्तस्याभिनयः प्रयोक्तव्यः ॥ ५५ ॥

[इति शृङ्गाररसप्रकरणम् ॥]

मुपसंहरत्येवमेष इति । शृङ्गार इत्येकवचनेनैक एव शृङ्गार इत्युपसंहृतम् ॥

एवं सूत्रार्थे परीक्ष्य स्थापिते तदर्थस्य सुखग्रहणार्थं सूत्रार्थं विवरणरूपत्वात्सूत्रसमीपेऽप्युपचितपाठात्कारिकामधुना पठत्यपि चेति । न केवलं सूत्रं परीक्षाऽपि, यावदियं कारिकेति समुच्चयार्थः । एवं सर्वत्र मन्तव्यम् । तामेव कारिकां पठति सुखेति । पुरुष इति भोक्ता संवेदनात्मकोऽभिप्रेतः । भोक्तैव च स्थायिसंविद्रूपो व्यभिचारिणस्तु भोगस्वभावास्तेन रतिरेव पुरुषः । तथा चोक्तम् । "श्रद्धामयोऽयं पुरुष" इति । एवं प्रमदाऽपि, तत्र भोक्तृत्वे पुरुषस्य प्राधान्यम् । प्रमदायास्तु भोग्यत्वं प्राधान्यादेव च तस्य भोग्येनापरतन्त्रीकरणमिति नायिकान्तरयोगेऽपि न शृङ्गारहानिः, भोग्यस्य तु पारतन्त्र्यादेवान्यसम्मीलने शृङ्गारभङ्ग इति दर्शितम् । अतः स्थायिभेदः शङ्कनीयः । सुखप्रायेष्टसम्पन्न इत्यादिपुरुषविशेषणत्वेन समुदितस्य विभावत्वं दर्शयति । विभावादयो रसोदयं विनाऽऽस्वादैश्च भोक्तरीति निमग्नत्वे भोक्तृप्रधानत्वं च दर्शयति । विषयसम्भारपूर्णताभिमानजैव रतिरुचिता । एतदर्थमेव "जंस अहं तादेण दिण्णेति" "इंरिसव्स कण्णपूरदंसणव्से "ति च । एतत्सर्वसम्पन्नत्वमेव नायिकायाः प्रदर्शितम् । अन्यथा नोत्तमत्वं स्यात् । निजजातिकुलानुरूपसम्पदभावे तु रतिः पुरुषार्थरूपत्वानुपदेश्या । अत एव

---

1 न - सूत्रानुबन्धे ग - सूत्रार्थानुविद्धे द - सूत्रानुविधे ज - अनुवंश्ये
2 ड - ऋतुमाला 3 द - स्मृति 4 द - प्रसादैश्च 5 म - ललितैश्चाङ्गविलासैः
द - मधुरैश्चाङ्गविशेषैः ढ - ललितैश्चाङ्गविचारैः च - मधुरैश्चाङ्गविकारैः ।

अथ हास्यो नाम हासस्थायिभावात्मकः। स च [1]वि-
कृतपरवेषालंकारधाष्ट्यलौल्य [2]कुहकासत्प्रलापव्यङ्गद -

तत्र सर्वस्य प्रतीतिवैरस्यानन्तरसम्भावनमिति श्लोकस्य तात्पर्यार्थः। विषय-सामग्रीसम्पूर्णो रस इति ये मन्यन्ते तेषामभ्रान्तिकारणमयं श्लोकः। स चेत्थं व्याख्यातो न भ्रान्तिजनकः संश्रीयत इत्यनेनान्वर्थतां पराकरोति। तथा हि—उणादिषु शृङ्गारशब्दो निपातित इति। न केवलं श्लोकवृत्तमिदम्। सूत्रार्थानुविद्धे यावदर्थे अपीत्यपिचेत्यस्य भिन्नक्रमस्यार्थः। प्रियो जनो विदूषकादिः। गान्धर्वशब्दो गीतादिहृद्यविषयोपलक्षणम्। काव्यसेवाशब्देन विषयसङ्कल्पं विभावत्वेन लक्षयति। यस्त्वाह काव्यार्थीभूताद्रसात्काव्यार्थ-विदो भावान्तरं प्रादुर्भवति; अतः सुखजनकत्वात्काव्यार्थो रस इति, स प्रत्युक्तो, न हि विषयसामग्री रस इति पूर्वं दर्शितम्। धृतिप्रमोदशब्देन व्यभिचारिणो लक्षयति। एक एव च परमार्थतः शृङ्गार इत्यभिप्रायेणादा-ववस्थोपलक्षणद्वारेण सर्व एवोपसंहृतो मन्तव्यः॥

इति शृङ्गाररसप्रकरणम्॥

अथ हास्यरसप्रकरणम्॥

अथ हास्यं लक्षयितुमाहाथेति। आत्मशब्देनेदमाह—रतिरास्वादनाख्यां प्रतीतिं विदधाना न तां रतिरूपामेव विधत्ते, प्रमुखे विभावादौ (अ)साधारण्यात्। हासे तु य आस्वादः सोऽपि विकृतवेषादीनां सामाजिकान्प्रति लोकवृत्तेन हासहेतुतेति विभावसाधारण्यद्वारेण तदेकस्वभाव एवोत्त हासात्मकरसनाख्य-चर्वणा चर्वणीयत्वाच्चास्य, रतिशोकावेव परमतज्जातीयसंविदास्वादौ धारा-रूढसुखदुःखरूपत्वेन निस्साधारणात्मीयत्वानियमग्रहगृहीतहेतुबलादेवोत्पद्येते यतः, अतोऽनयोर्मुनिना प्रभवग्रहणं कृतम्। अन्येषु तु विभावे साधारण्य-सम्भावनात्तदात्मकग्रहणं, नयविनयादेरन्यायकारिणः समानं कालादेर-पूर्ववस्तुनश्च सर्वान्प्रत्युत्साहक्रोधभयजुगुप्साविस्मयहेतुत्वेन साधारण्यविभाव-त्वादित्यलं बहुना।

---

1 ड - विकृतवेषा 2 ड - कलहासत्प्रलाप।

र्शन[1] दोषोदाहरणादिभिर्विभावैरुत्पद्यते[2] । [3]तस्योष्ठनासाकपोलस्पन्दनदृष्टि[4]व्याकोशाकुञ्चनस्वेदास्यरागपार्श्वग्रहणादिभिरनुभावैरभिनयः प्रयोक्तव्यः । [5]व्यभिचारिणश्चास्यावहित्थालस्यतन्द्रानिद्रास्वप्नप्रबोधासूयादयः[6] । द्विविधश्चायमात्मस्थः परस्थश्च[7] । [8]यदा स्वयं हसति तदात्मस्थः । यदा तु परं हासयति तदा परस्थः ॥ ५६ ॥

तत्र वेषः केशादिरचना, अलङ्कारः कटकादिः, स चोभयोऽपि विकृतो देशकालप्रकृतिवयोऽवस्थाविपरीतो हास्यस्य विभावः । एतेन सर्वे रसा हास्येऽन्तर्भूता इति दर्शितम् । अथ विदूषकोऽपि तद्वेषं विदधद्धास्याभासं प्रथयतीत्येतच्च प्रागेवोक्तम् । परस्य सम्बन्धी परः । एवंभूतो देवदत्तस्य वेषोऽयमलङ्कारो वा इत्युद्धट्टक(४-१८७)भाण्डनृत्तादौ दर्श्यमानौ हासं करोति वेषालङ्कारौ गतगदितादेरप्युपलक्षणम् । धाष्ट्यं निर्लज्जता । लौल्यं विषयेष्वनियतता । कुहकं कक्षग्रीवादिस्पर्शनं विस्मापनविधिप्रसिद्धं बालानां । अङ्गविगमो विखुनादि व्यङ्गम् । एषां दर्शनमिति समासः । दोषा अतत्प्रकृतेरपि भयादयः अकार्यकरणादयश्च विकृतवेषादय एव वा । तेषामुदाहरणं वर्णनम् । आदिग्रहणात्सङ्कल्पस्मृत्यादि । ओष्ठादेः स्पन्दनशब्देन संबन्धः । व्याकोशनं विकासो निमीलनं च, आकुञ्चनं त्वीषत्, एतद्दृष्ट्या योज्यम् । आस्यरागो मुखरागः । पार्श्वयोर्ग्रहणं पीडनम् । तन्द्राशब्देन मोहः । एते च विभावा अनुभावा व्यभिचारिणश्च प्रकृतित्रयभेदेन ये स्मितादिभेदा वक्ष्यन्ते तेषु यथायोगं योजनीयाः । द्विविधश्चायमिति । आत्मस्थैर्विभावैर्विकृतवेषादिभिर्विदूषकः स्वयं हसति, स तस्यात्मस्थः, देवीं च हासय-

---

1 भ - दोषाद्याहरण ड - व्यङ्ग्यदर्शन 2 ज - विभावैः समुत्पद्यते 3 ड - तस्योष्ठदंशन म - तस्योष्ठविवरणदशनदर्शननासाविकूणनकपोल द - तस्योष्ठविवरसंदर्शन नासा 4 ड - व्याकोचाकुञ्चनखेद 5 ज - व्यभिचारिणश्चास्य ग्लान्यवहित्थ द - व्यभिचारिणस्त्वस्यावहित्थातन्द्रीस्वप्नप्रतिबोध 6 म - स्वप्नादयश्च न - निद्राद्याश्च व्यभिचारिणः 7 द - परश्चेति 8 म - तत्र यदा ।

[1]अत्रानुवंश्ये आर्ये भवतः ॥ ५७ ॥

विपरीतालंकारैर्विकृताचाराभिधानवेषैश्च ।[2]
[3]विकृतैरङ्गविकारैर्हसतीति रसः स्मृतो हास्यः ॥ ५८ ॥
[4]विकृताचारैर्वाक्यैरङ्गविकारैश्च विकृतवेषैश्च ।[5]
हासयति जनं यस्मात्तस्माज्ज्ञेयो रसो हास्यः ॥ ५९ ॥
स्त्रीनीचप्रकृतावेष[6] भूयिष्ठं दृश्यते[7] रसः ।
षड्भेदाश्चास्य विज्ञेयास्तांश्च वक्ष्याम्यहं पुनः ॥[8] ६० ॥
स्मितमथ हसितं विहसितमुपहसितं चापहसितम-
तिहसितम् ।
द्वौ द्वौ भेदौ स्यातामुत्तममध्याधमप्रकृतौ[9] ॥ ६१ ॥

तत्र

स्मितहसिते ज्येष्ठानां[10] मध्यानां विहसितोपहसिते च ।
अधमानामपहसितं ह्यतिहसितं चापि[11] विज्ञेयम् ॥

तीति तस्याः परस्थः—तदिदमसत् । एवं हि विभावानामात्मस्थत्वविभागः स्यात् । न हासस्य, किञ्च स्वामिनः शोकोऽनुजीविषु शोकं करोतीति परस्थता सर्वत्र स्यात् । स्वयंभूर्हि परत्र देव्यादौ व्यक्तः क्रोधोऽपि (परस्थ इति चेद्गम्भीरस्य प्रभोरनुजीवितं(नां ?) गतानुभावव्यक्तक्रोधोऽपि) परस्थो भवेत् । तद्विभाव आत्मस्थोऽसौ विभावकस्त्वन्य इत्यप्यसत्परिहासेऽपि तदहासे विभावः स्यात् । एतच्च रत्यादिषु सर्वेष्वप्यस्ति । तस्मादयमत्रार्थः—परं

---

1 न - भवतश्चात्रार्ये 2 द - विकृतावेशाभिधानचेष्टाभिः 3 - विकृतैरर्थविशेषैः 4 ड - विकृताकारै 5 न - विहारैर्विकृतवेषकृतैः । 6 न - प्रकृतिरयं म - प्रकृतिष्वेष 7 म - पश्यते 8 न - वक्ष्याम्यशेषतः । 9 ड - मध्यमाधमप्रकृतौ 10 प - श्रेष्ठानां द - स्मितहसितं ज्येष्ठानां भ - स्मितहासितमुत्तमानां 11 ड - तथातिहसितं च ।

अत्रश्लोकाः [भवन्ति]

[1]ईषद्विकसितैर्गण्डैः कटाक्षैः सौष्ठवान्वितैः ।
अलक्षितद्विजं धीरमुत्तमानां स्मितं भवेत् ॥ ६५ ॥
उत्फुल्लाननन्नेत्रं तु[2] गण्डैर्विकसितैरथ ।[3]
किञ्चिल्लक्षितदन्तं च हसितं तद्विधीयते ॥[4] ६६ ॥

[अथ मध्यानाम्][5]

आकुञ्चिताक्षिगण्डं यत्सस्वनं मधुरं तथा ।[6]
[7]कालागतं सास्यरागं तद्वै विहसितं भवेत् ॥[8] ६८ ॥

हसन्तं दृष्ट्वा स्वयं विभावानपश्यन्नपि हसन् लोके दृष्टः । तथा विभावादिदर्शनेऽपि गाम्भीर्यादनुदितहासोऽपि परकीयहासावलोकने तत्क्षणं [1]हासविशेषः सम्पद्यत एवेति स्वभावः । यथाम्लदाडिमादिरसास्वाद(ः) सङ्क्रमणस्वभावोऽन्यत्रापि दन्तोदकविकारानुरूपसङ्क्रमदर्शनादेव सङ्क्र(क्रा?)मति । एवं हासः स्वभावतः सङ्क्रमशीले याति काष्ठभूयिष्ठता(म्) । नानाभेदा इत्याह षड्भेदा श्चेति । द्वौद्वाविति यथाक्रमविभावतारतम्यमित्यादीति केचित् । तत्त्वसत्, भेदान्तराणामपि प्रसङ्गात् । तस्मात्सङ्क्रमणाभिप्रायेणैतत्स्मितं हि यदुत्तमप्रकृतौ तत्सङ्क्रान्तं हसितं सम्पद्यते, अत एव त्र्यवस्थो हास इति वक्ष्यते । षडवस्थो ह्यन्यथा स्यात् । स्मितस्येषत्तायां (व्यपगतायां) हसितम् । ततो विशेषेण ततोऽपि परस्परसमीपगतमन्यदपहसितमतिशयेन वे(चे?)त्युपसर्गभेदादर्थभेदः । सौष्ठवमनुल्बणता । द्विजा दन्ताः । धीरमिति मन्थरं कृत्वा ईषत्स्वानिर्वाहः । विकसितैरिति । अथेति । स्मितानन्तरं संक्रमणकाल इत्यर्थः । तदिति, स्मितमेव संक्रान्तं सदेवंरूपतामेतीत्यर्थः ॥

---

1 ज - ईषद्व्यवसितै ड - ईषद्विहासितै 2 न - नेत्रं यत् 3 न - विहसितैरथ 4 म - तत्प्रकीर्तितम् 5 द - मध्यमानाम् 6 न - स्यात्सस्वरं मधुरं च यत् 7 ज - द - कलागतं 8 म स्मृतम् ॥

1 हसविशेषः ।

उत्फुल्लनासिकं यत्तु [1]जिह्मदृष्टिनिरीक्षितम् ।[2]
[3]निकुञ्चितांसकशिरस्तच्चोपहसितं भवेत् ॥ ६९ ॥

[अधमानाम्][4]

अस्थानहसितं यत्तु[5] साश्रुनेत्रं तथैव च ।
उत्कम्पितांसकशिरस्तच्चापहसितं भवेत् ॥ ७१ ॥
[6]संरब्धसाश्रुनेत्रं च विकृष्टस्वरमुद्धतम् ।[7]
करोपगूढपार्श्वं [8]च तच्चातिहसितं भवेत् ॥ ७२ ॥
[9]हास्यस्थानानि यानि स्युः [10]कार्योत्पन्नानि नाटके ।
उत्तमाधममध्यानामेवं तानि प्रयोजयेत् ॥ ७३ ॥
[11]इत्येष स्वसमुत्थस्तथा परसमुत्थश्च विज्ञेयः ।
द्विविधस्त्रिप्रकृतिगतस्त्र्यवस्थभावो रसो हास्यः ॥

जिह्माख्यया भाविन्या दृष्ट्या निरीक्षणं यत्र काल उचितं तेन संस्थानादौ । अस्थान इत्यकाले शोकाद्यवसरे । विकृष्टं श्रवणकटु । नाटक इति । नाटकशब्दो रूपकमात्रवृत्तिः । स्वसमुत्थ इत्यसंक्रान्तस्मितविहसितापहसितलक्षणः परसमुत्थः संक्रान्तो हसितोपहसितातिहासितरूपः हसितादिरूपसंक्रमणयोत्कृष्टप्रकृतौ स्मितादिरूपः, रतिक्रोधशोकादेस्तु न संक्रमणं भवतीत्युक्तमेव । तत्र हि युगपदेव वा स एव विभावस्ताच्चित्तवृत्तिमयपुरुषो(षे?) विभावतामेति । न तु त एव विभावास्तस्य चित्तवृत्तिं प्रस्तूय संक्रमेयुः । अस्य प्रस्तुवतो हासमिव सर्वेषामात्मस्थपरस्थभेदोपलक्षणमेतदित्यन्ये । एतच्चासत् । अनुभवसिद्धमेव हीदं हासः संक्रामतीति । अन्यस्त्वाह तिसृषु प्रकृतिषु त्र्यवस्थो विभाव-

---

1 ड - यच्च 2 ड - निरीक्षिणम् 3 न - विहञ्चित द - निकुञ्चिताङ्कशिरं 4 द - अथोधमानाम् 5 ड - यत्र न - यच्च 6 द - संरब्धं सास्रनेत्रं 7 ड - विदुष्टास्वन न - विकृष्टस्वन 8 म - पार्श्वं यत् 9 ड - हास 10 म - काव्योत्पन्नानि 11 ड - एवमात्मसमुत्थश्च तथा परसमुत्थितः । द्विविधास्त्रिप्रकृतिकः षड्भेदोऽथ रसः स्मृतः ॥

अथ करुणो नाम[1] शोकस्थायिभावप्रभवः[2]। स च [3]शापक्लेश[4]विनिपतितेष्टजनविप्रयोगविभवनाशवधब-न्ध[5]विद्रवोपघात[6]व्यसनसंयोगादिभिर्विभावैः समुपजायते। [7]तस्याश्रुपातपरिदेवनमुखशोषणवैवर्ण्य[8]स्रस्तगात्रतानिश्श्वासस्मृतिलोपादिभिरनुभावैरभिनयः प्रयोक्तव्यः। व्यभिचारिणश्चास्य निर्वेदग्लानिचिन्तौत्सुक्यावेगभ्रममोहश्रमभयविषाददैन्यव्याधिजडतोन्मादापस्मार-त्रासालस्यमरणस्तम्भवेपथुवैवर्ण्याश्रुस्वरभेदादयः।

अत्रार्ये भवतः।

तारतम्याद् द्विरूपः पुनरात्मपरस्थत्वेनाद्वि[वि]धेति द्वादशभेदोऽयमिति कारिकातात्पर्यमिति। अत्र च पृथग्विभावनमपि भवति। तत्त्वातिप्रसङ्गावहः(हं?) तन्मतमिति नोदाहृतम्।

इति हास्यरसप्रकरणम्

अथ करुणरसप्रकरणम्

इदानीमवसरायातं करुणं लक्षयत्यथ करुणो नामेति। अथेति क्रमे। तत्र चायं क्रमः—सम्भोगेन हास्याङ्गत्वेनापेक्षितो विप्रलम्भेन च समानव्यभिचारिकत्वात्करुण इति टीकाकारः। अस्माभिस्तूद्देशविभाग एव क्रमो दर्शितः। तस्याभिनयः प्रयोज्यो यस्यास्वाद्यमानस्य करुण इति व्यपदेशः। या दया हृदय-(ग)ता हि करुणा लोके प्रसिद्धा सा च लिङ्गैरनुकर्तरि शोकं प्रतीयतां सामाजिकानामिति करुणव्यपदेश इति श्रीशङ्कुकः। एतच्च पूर्वापरविस्मरणविजृम्भितमस्य, यतः शोकं प्रतिकृतिस्तस्य करुणा दया च नाम परित्राणेच्छा सा कथं शोकानुकरणं, किंप्रति च तेषां दयेति न विद्मः। करुण इति। शोकस्य शोकः सर्व-

---

1 द अथ करुणः 2 ढ - स्थायिभावात्मकः 3 म - सापेक्षक्लेश 4 ढ - विनिपातेष्टजनवियोग 5 म - बन्धपरिक्लेश 6 न - व्यसनयोगादिभिः 7 - द - तस्य चाश्रु म - तस्याश्रुपतन 8 म - वैवर्ण्यस्वरभेद।

इष्टवधदर्शनाद्वा विप्रियवचनस्य संश्रवाद्वापि ।[1]
एभिर्भावविशेषैः करुणरसो नाम संभवति ॥ ७६ ॥
[2]सस्वनरुदितैर्मोहागमैश्च[3] परिदेवितैर्विलपितैश्च ।
अभिनेयः करुणरसो देहायासाभिघातैश्च ॥ ७७ ॥

धारणत्वेन प्राग्युक्त्या आस्वाद्यमानस्य संज्ञा, तदर्थमेव नामशब्दः । तत्प्रभवत्वं शृङ्गारवद्व्याख्येयम् । अशक्यप्रतीकारहेतूपलक्षणं शापग्रहणम् । शापक्लेशे पतितस्येष्टजनस्य ये विप्रयोगादयस्तत्र विप्रयोगोऽयं सङ्गमः । विभवनाशनादि प्रसिद्धम् । विद्रवो देशादुच्चाटनम् । तच्च विप्रयोगेऽपीति विशेषः । उपघातोऽग्न्यादिमरणम् । अग्न्यादिकृतो विद्रवः, चोरादिकृत उपघात इति त्वसत्, विभवनाशेन गतत्वात् । व्यसनेन मृगयाक्षादिनानर्थजनकेन संयोगः । विभवनाशादयोऽपि स्वात्मगता नोत्तमप्रकृतेः [1]शोकं कुर्युः, मध्यमाधमप्रकृतीनां तु कुर्युरेवेत्यादिग्रहणम् । परिदेवनमात्मनो दैवस्यान्यस्य चोपालम्भः। निश्वासशब्देन तदनन्तरभावी उच्छ्वासोऽप्यूर्ध्वश्वसनरूपो लक्ष्यते । स्मृतिलोपेन स्तम्भप्रलयौ लक्ष्येते । वैवर्ण्याश्रुस्वरभेदा अत्र बहिरुद्भिन्नस्वभावाश्चित्तवृत्त्यात्मानो गृह्यन्ते । तथा हि वक्तारो भवन्ति (वदन्ति?), "अश्रुणा पूर्णोऽस्य कण्ठो न च नयनजलं दृष्ट"मिति । एते ह्यश्रुप्रभृतयो व्यभिचारित्वाभिनेयत्वोपजीवनायैव मध्ये निर्दिष्टा इत्यवोचाम वक्ष्यामश्च । तेन न पौनरुक्त्यम् । एवमन्यत्रापि । व्याधेरुन्मादापस्मारौ भेदौ वक्ष्यामः । वधशब्दो बन्धादेरप्युपलक्षणम् । विप्रियमिष्टजनवधादि येन वाक्येनोच्यते तस्य श्रवणात् । तेन चेष्टजनस्य विभवनाशादिदृश्यमानं श्रूयमाणं वा कविभिः करुणविभावत्वेनोपनिबन्धनीयमिति तात्पर्यम् । एभिरित्येवं प्रकारैः । भावशब्दोऽत्रार्यायां विभाववाची । अनुभावांस्तद्द्वारेण च व्यभिचारिणोऽप्युपलक्षयितुमार्यान्तरं सस्वनेत्यादि । बहुवचनं प्रकृतिदेशकालदशाहेत्वादिभेदेनानेकप्रकारत्वज्ञापनार्थम् । मोहो जडता । तेनान्ये व्यभिचारिण उपलक्ष्यन्ते ।

---

1 ड - संश्रयाद्वापि 2 प - सस्वर न श्वसन 3 - मोहप्राप्त्या ।

1 प्रोक्तं कुर्युः ।

अथ रौद्रो नाम क्रोधस्थायिभावात्मको रक्षोदानवोद्धतमनुष्यप्रकृतिः[1] संग्रामहेतुकः । स च क्रोधाधर्षणाधिक्षेपावमानानृत[2]वचनोपघातवाक्पारुष्याभिद्रोहमात्सर्यादिभिर्विभावैरुत्पद्यते[3]। तस्य च ताडनपाटनपीडनच्छेदन[4]-

---

देहस्यायासनं पातनवेष्टनादि । अभिघात उरस्ताडनादिः । एते चानुभावाः प्रकृतिभेदेन यथायोगं विभजनीयाः । करुणो रौद्रादित्युक्तम् । स कीदृग्रौद्र इति क्रमं केचिदाहुः ॥

इति करुणरसप्रकरणम् ॥

अथ रौद्ररसप्रकरणम् ॥

अधुना रौद्ररसं लक्षयत्यथ रौद्रो नामेति । आत्मग्रहणस्यायमाशयः । अन्यायकारिताप्राधान्येन क्रोधस्य विषयस्तादृशि च जने सर्वोऽपि मनोरथैरपि रुधिरपानमपि नामाद्रियन्ते । तथा चाह लोकः—तादृशो यदि लभ्यते तत्तदीयं रुधिरमपि पीत्वा न तृप्यते । महाकविना भासेनापि स्वप्रबन्ध उक्तः—

“त्रेतायुगं तद्धि न मैथिली सा
　रामस्य रागपदवी मृदु चास्य चेतः ।
लब्ध्वा जनस्य यदि रावणमस्य कायं
　प्रोत्कृत्य तन्न तिलशो न [1]वितृप्तिगामी ॥” इति ।

तेन हास्यवत्साधारणविभावत्वाच्चर्वणापि क्रोधमय्येवेति तद्रसनाचरणौ (र्वणे?) रौद्रः क्रोधात्मक एव । उद्रिक्तं हन्तृत्वं येषां त उद्धतास्तद्द्वेषधारिणो ये नटास्ते, प्रकृतिश्चर्वणोदयहेतुरस्य । अत्र व्याचक्षते युद्धहेतुकोद्धतमनुष्येषु भीमसेनादिषु रुधिरपानादिलक्षणो, रक्षोदानवास्तु स्वभावरौद्रा इति तदसत् । भीमस्य रुधिरपानं न युद्धहेतुकं अपि तु विपर्ययः उद्धतस्वभावत्वादेव ह्यसौ क्रोधपरवशः सन्ननुचितमपि प्रतिज्ञातवान् । तन्निर्वाहायैव च राक्षसा-

---

1 ड - मनुष्यप्रभवः　2 न - कलह　ड - वचनवाक्पारुष्यद्रोह　3 म - समुपजायते　म - समुत्पद्यते　4 न - छेद्यभेद्यप्रहरणापहरण ।

1 वितृप्तिमेति ।

प्रहरणाहरणशस्त्रसम्पात[1]सम्प्रहार[2]रुधिराकर्षणाद्यानि कर्माणि[3]। पुनश्च रक्तनयन[स्वेद]भ्रुकुटीकरणावष्टम्भदन्तोष्ठपीडनगण्डस्फुरणहस्ताग्रनिष्पेषादिभिरनुभावैरभिनयः प्रयोक्तव्यः ।

धिष्ठानमस्य कविना वेणीसंहारे वर्णितम् । तस्मात्सर्व एवैते स्वभावक्रोधनास्तदनुकारिणि नटे रौद्र आसाद्य इति मनुष्यप्रकृतिः सङ्ग्रामहेतुक इति चायमर्थः—युद्धस्य कविनःप्रदर्श्यमानहेतुकः कुत्सितहेतुर्धी(ति)रोहितस्योचितो हेतुर्न क्रोधः तथा च प्राधान्येन युद्धेन वीर एव व्यपदेक्ष्यते ॥

नन्वेते स्वभावक्रोधना अपि किमुद्दीपनमपेक्षन्ते । ओमित्याह स चेति । क्रोधादिपरकर्तृकमाधर्षणं दारादिखलीकरणमाधिक्षेपो देशजात्यभिजन· विद्याकर्मनिन्दा । अनृतस्य कस्याप्यपसत्यस्य वचनम् । उपघातो ग्रहभूताद्युपमर्दनम् । वाक्पारुष्यं वधाद्युपन्यासेन तर्जनम् । अभिद्रोहो जिघांसा । मात्सर्यं गुणेष्वसूया । आदिग्रहणाद्राज्यापहरणादि । एतैरुत्पद्यते कविना विभावत्वेन वर्ण्यमानैः।अस्य ताडनादीनि कर्माणि रक्तनयनादयोऽनुभावा इति पृथङ्निरूपणं तुल्येऽप्यनुभावत्वे विशेषख्यापनार्थं विशेषस्तु पूर्वेषां वचनमात्रेण व्यावर्णनं रङ्गे प्रत्यक्षतोऽप्रदर्शनीयत्वात्, यद्वक्ष्यते—

"युद्धं राज्यभ्रंशो मरणं नगरोपरोधनं चैव ।
अप्रत्यक्षकृतानि प्रवेशकैः संविधेयानि" ॥ इति ।

रक्तनयनादि रङ्गे प्रत्यक्षेण कृतं, प्रहरणं तु पूर्वत्र प्रमादपठितमिति केचित् । इदं तु पृथगभिधाने तुच्छं प्रयोजनम् । अयं चात्राशयः—रक्षोदानवमनुष्योद्धतादेरुद्दीपनहेतुभिर्विनाऽपि चेष्टितमात्रं यदपि कुर्वते नर्मगोष्ठ्याद्यपि च तत्र ताडनादि प्रधानं, तद्वक्ष्यति—"यच्च किञ्चिदा(तसमा?)रभन्त" (पु ३२३-प२) इत्युद्दीपनसम्भवे ताडनादिग्रस्त एव रक्तनयनादिको भवति । अत एव पुनश्शब्दस्तत्र ताडनं तलाद्यभिघातः, पाटनं द्विधाकरणं, पीडनं मर्दनं, कर्तनं भेदनं परस्परमित्यादिवियोजनं भावे ण्यन्तौ प्रहरणानामासमन्ताद्धरणम् ।

---

1 ढ - संपादन 2 प - रुधिरास्रावणाद्यनि म - रुधिराकर्षणादिभिरनुभावैरभिनयः प्रयोक्तव्यः । पुनश्च 3 ड - कार्याणि ड - गण्डचालनं ।

[1]भावाश्वास्यासम्मोहोत्साहावेगामर्षचपलतौग्र्यगर्व-[विकृतेक्षण] स्वेदवेपथुरोमाञ्चगद्गदादयः ॥

अत्राह - यदभिहितं [2]रक्षोदानवादीनां [3]रौद्रो रसः किमन्येषां [4]नास्ति । उच्यते—[5]अस्त्यन्येषामपि रौद्रो रसः[6]। किन्त्वधिकारोऽत्र गृह्यते । ते हि स्वभावत एव रौद्राः । कस्मात्[7] । बहुबाहवो बहुमुखाः[8] प्रोद्धूतविकीर्ण-

---

शस्त्रस्य सम्पातनमविदारयतोऽपि सम्प्रहरणं विदारयतः पातनं तेन रुधिरस्याकर्षणम् । रक्षःप्रभृतयो हि नर्मणाऽपि प्रहरन्ति, किन्तु रुधिरगमनमात्रफलं न त्वधिकम् । रक्ते च ते नयने, भ्रुवोर्मूलसमुत्क्षेपो भ्रुकुटी । दन्तोष्ठस्य यथायोगं पीडनम् । हस्ताग्रयोरन्योन्यनिष्पेषः सङ्घर्षणम् । भावा इति व्यभिचारिणः । असंमोहः सम्मोहविपरीतः विरोधेन तत्राध्यवृत्तिसङ्गृहीतसम्यग्बोधः । उत्साहोऽत्र व्यभिचारी, क्रोधस्य प्राधान्येन रसनीयत्वात् । स्वेदादयो बाह्याः आभ्यन्तरसात्त्विकाभावेऽपि विषस्पर्शज्वरादिना भवन्ति । ततोऽनैकान्तिका आन्तरा अनुद्रिक्ता व्यञ्जनग्रहणादिभिरुद्रिक्ता बाह्यैः स्वेदादिभिर्व्यक्ता व्यभिचारिरूपाः पठिताः । एष्वेव रौद्ररस इत्याभिप्रायं गृहीत्वा चोदक आह यदभिहितमिति । सिद्धान्ती त्वेषु रौद्रो भवत्येवेत्यभिप्रायेणाहास्त्यन्येषामिति । अन्येषां कविनटाभ्यां प्रयुज्यमानानाम् । सम्बन्धिजन्यत्वेनाधिकारोऽनुवृत्तिः । अत्रेति राक्षसादिषु एतदेव व्यनक्ति ते हीति । स्वभावशब्दानन्तरमेवकारेण भवत्येवेत्ययोगव्यवच्छेद एव सूचितः । स्वयं तेषां भवनं तत्र इत्यर्थः । तेनाङ्गरौद्रोपन्यासोऽप्यविरुद्धोऽन्यथा स्वभावरौद्र एव रक्ताक्षादिभिरभिधेयः स्यान्न बहुबाहुमुखादि । तत्र राक्षसादयोऽपि न परिजने सदा क्रुद्धा इति प्रतीयन्त इत्याशयेनाह कस्मादिति ।

---

1 न - व्यभिचारिणश्चास्य सं द - भावाश्वास्य संमोह 2 ड - राक्षसादीनां - र क्षोदानवानां 3 म - रौद्ररसः सति किमन्यासा प्रकृतीनां नास्तीति । अत्रोच्यते 4 न - मानवप्रकृतीनां नास्तीति 5 म - अस्त्यन्यासामपि किंतु न - अस्त्यो वान्यासां प्रकृतीनां 6 - प रौद्रः 7 न - तस्मात् 8 म - प्रोद्धतविकीर्ण ।

पिङ्गलशिरोजाः रक्तोद्वृत्तविलोचना[1] भीमासितरूपिण- श्चैव । यच्च किञ्चित्समारभन्ते[2] [3]स्वभावेन चेष्टितं वागङ्गा- दिकं तत्सर्वं [4]रौद्रमेवैषाम् । [5]शृङ्गारश्च तैः प्रायशः प्रसभं सेव्यते । तेषां चानुकारिणो ये [7]पुरुषास्तेषामपि सङ्ग्रामसम्प्रहारकृतो रौद्रो रसोऽनुमन्तव्यः ॥ ७८ ॥

अत्रानुवंश्ये आर्ये भवतः—

अत्रोत्तरं बहुबाहव इति । लोकप्रसिद्धाकारविपरीतो हि तेषामाकार- स्तत्र च परविनाशनाभिसन्धिजनितं तपश्चर्यादिकं दृष्टं वा कर्म तेषां व्याप्रि- यते ऽतस्तादृशेषु अदृष्टेषु स एव क्रोधात्मकोऽभिसन्धिर्गम्यत इति सामाजिकानां [1]नान्तर्दृश्यते रौद्रास्वादः । तेन च रागादिव यत्क्रोधकाले दृष्टं तत्सदैव तेषा- मुद्वृत्तं तारकयोः रक्तविलोचनमत एव भीममसितं कृष्णं सदैव रूपं येषाम् । नित्ययोग इनिः । अत एव च न बहुव्रीहिरत्र कृतः । न केवलं कायस्तदीय इत्थं, यावच्चेष्टितमपि तदीयं दृश्यमानं रौद्रास्वादजनकमेवेति दर्शयति यच्चेति । स्वभावेनेति चित्तस्याविकारेऽपि यच्चेष्टितं वाचिकं कायिकं वा तदेषां ताडनादिप्रधानमिति दृश्यमानं काव्ये प्रयोगे च रौद्रास्वादहेतु वागङ्गे आदिकारणे यस्य । मानसं तु चेष्टितमप्रत्यक्षत्वान्नोक्तम् । सर्वमिति यदुक्तं तत्स्फुटयति शृङ्गारश्चेति । शृङ्गारशब्देनात्र तद्विभावः प्रमदोद्यानादिः । सोऽपि तैः प्रसभमिति क्रूराकारतया सेव्यते । यत्रौग्र्यस्य वर्जनमुक्तं किं पुनरन्यदिति चशब्दस्यार्थः । तथा "आः सीते पतिगर्वविभ्रमहरच्त्राम्यद्भ्रु" इत्याद्युदा- हरणम् । तथा(च) "नानादेवाविगाढास्रेडं मलय मरुताः मेखलादाम दत्ते"ति । रौद्ररसत्वेन कदाचिदनुनयेनापीति दर्शयति प्रायश इति ।

---

1 म - विलोचनभीमा असित 2 क - समारम्भे न - समारभते 3 म स्वभावे 4 ड - रौद्रमेवेति 5 प - रौद्रश्च 6 ड - अनुगामिनो 7 न - येऽप्यु- द्धताः पुरुषा उद्धताः ।

---

1 नानादर्शन ।

[1]युद्धप्रहारघातनविकृतच्छेदनविदारणैश्चैव[2] ।
[3]सङ्ग्रामसम्भ्रमाद्यैरेभिः सञ्जायते रौद्रः[4] ॥ ७९ ॥
नानाप्रहरणमोक्षैः[5] शिरःकबन्धभुजकर्तनैश्चैव[6] ।
[7]एभिश्चार्थविशेषैरस्याभिनयः[8] प्रयोक्तव्यः ॥ ८० ॥
इति रौद्ररसो दृष्टो रौद्रवागङ्गचेष्टितः ।
शस्त्रप्रहारभूयिष्ठ उग्रकर्मक्रियात्मकः ॥ ८१ ॥

ननूद्धतमनुष्येषु तर्हि कथं रौद्रादिविकारः, न हि ते बहुबाहुत्वादियुक्ता इत्याशङ्क्याह तेषां चेति राक्षसादीनाम् । अनुकारिण इति तामसप्रकृतितया तत्सदृशा अनुगामित्वेन मन्तव्येऽपि कृत्यर्थः कथमित्याह । सङ्ग्रामसम्प्रहार-ग्रहणेन पूर्वोक्तं ताडनपाटनादि गृह्यते, तेन बहुबाहुत्वाद्यभावेऽप्युद्धतमनुष्या वागङ्गचेष्टितेन क्रोधोचितेन रौद्रप्रकृतय इति लक्ष्यन्ते । एवं रक्षोदानवेत्यादाव-योगव्यवच्छेदो निश्चितः । अन्ये तु वीरप्रधाना अश्वत्थामजामदग्न्यादयस्तेषु कारणमहिम्ना भवत्येव क्रोधो रौद्रास्वादयोग्यः । राक्षसादीनामपि च हास शोकादिः स्वकारणोदितोऽभिभूतक्रोधो हास्यकरुणाद्यश्चेह योगो भवत्येव । तेनैषां न रौद्र एव रसः ।

ननु सामाजिकानां तथाभूतराक्षसादिदर्शने कथं क्रोधात्मक आस्वादः । उच्यते—हृदयसंवाद आस्वादः । क्रोधे च हृदयसंवादस्तामसप्रकृतीनामेव सामाजिकानामिति दानवादिसदृशास्तन्मयीभूता एवान्यायकारिविषयं क्रोध-मास्वादयन्तीति न किञ्चिदवद्यम् । विकृतं यच्छेदनं व्यङ्गादिकरणं युद्धादिति परेण क्रियमाणौचित्यं तेन युद्धाद्यनुमितस्य परक्रोधादेर्विभावत्वमुक्तम् । सङ्ग्रामाय सम्भ्रमः शस्त्राहरणे त्वरा ।

अनुभावानाह नानेति । मरणप्राधान्यं नानाप्रहरणेन दर्शयति शिरः कर्तनादिहृतशरीरस्यापि क्रोधातिशयं सूचयन्वीरोद्भेदमाह । युद्धवीरोपि हि

---

1 ड - सत्त्व 2 ड विच्छेदविदारणैश्चैव द - धिक्कृतछेदनविरणैश्चैव
3 ड - संत्रासम्भ्रमोत्थैः न - संग्रामसंश्रयाद्यैः 4 म - रौद्ररसो नाम संभवति
5 ड - प्रहरणसङ्कुल न - प्रहरणपातैः 6 द - कर्तनं चैव प - प्रबन्धभुजकर्तनंचापि
7 द - एभिस्त्वर्थं 8 म - तस्याभिनयः ।

अथ [1]वीरो नामोत्तमप्रकृतिरुत्साहात्मकः । स चासंमोहाध्यवसायनय[2]बलपराक्रमशक्तिप्रतापप्रभावादिभिर्विभावैरुत्पद्यते । तस्य स्थैर्यधैर्यशौर्यत्याग[3]वैशारद्यादिभिरनुभावैरभिनयः प्रयोक्तव्यः । [4]भावाश्चास्य [5]धृतिमतिगर्वावेगौग्र्यामर्षस्मृति[6]रोमाञ्चप्रतिबोधादयः[7] ॥ ८२॥

[8]अत्रार्ये [रसविचारमुखे]—

तन्नास्ति । इह तु वक्ष्यत उग्रकर्मेति । उग्राण्यौग्र्यप्रधानानि यानि शिरःकर्तनादीनि तेषां या क्रिया अभिनीतिः सा आत्मा प्रधानं यस्येति । भरतमुनिस्त्वेकेन श्लोकेनोपसंहरति, इतिरौद्ररस इति ॥

इति रौद्ररसप्रकरणं समाप्तम् ।

अथ वीररसप्रकरणम् ।

क्रमप्राप्तं वीरं लक्षयति युद्धवीरे हि संग्रामसम्प्रहारयोगो रौद्रेऽपीति वीरे जिघांसेत्यानन्तर्यमथशब्देनाह । उत्तमानां प्रकृतिः स्वभावो यत उत्साहोऽतो वीररसोऽपि तथा, यदि वा काव्ये नाट्ये च प्रयुज्यमान उत्तमा प्रकृतिर्हेतुर्यस्य । उत्तमवर्णानां हि सर्वलोत्साह आस्वाद्यो भवति । अत एव चतुर्ष्वपि नायकेषु वीरत्वमनुयायित्वेन वक्ष्यते धीरोदात्त इत्यादि । तत्र सर्वो जन उत्साहवानेव किन्त्वविषय इत्यनुपदेश्यचरितता । यदीयं तु चरितमुपदेशार्हं तेषामुचितएवावसरे उत्साहोऽभिव्यक्तिरुचितत्वं चावसरस्यासंमोहादिसम्पत्तिरिति सैव विभावत्वेनोपदिष्टा । असंमोहेनाध्यवसायो हि वस्तुतत्त्वनिश्चय इति मन्त्रशक्तिर्दर्शिता । असद्वस्त्वभिनिवेशोऽसंमोहो रावणादिगत उत्साहकारीत्यसत्, अशब्दार्थत्वात् । तत्रापि च पराक्रमनयादिरेव विभावः । सन्ध्यादिगुणानां सम्यक्प्रयोगो नयः । इन्द्रियजयो विनयः । बलं हस्त्यश्वरथपादा-

---

1 म - वीररसो 2 ड बहुल 3 न - वीर्यवैशारद्याक्षेपवाक्यादिभिः । 4 ड - सञ्चारिभावाश्चास्य म - व्यभिचारिणश्च 5 क - धृतिमनि द गतिमति 6 म स्मृतिशौच 7 ड रोमाञ्चादयः 8 अत्रानुवंश्ये आर्ये भवतः । द अत्रार्ये ॥

उत्साहाध्यवसायादविषादित्वादविस्मयामोहात् ।
[1]विविधादर्थविशेषाद्वीररसो नाम सम्भवति ॥ ८३ ॥
[2]स्थितिधैर्यवीर्यगर्वैरुत्साहपराक्रमप्रभावैश्च ।
वाक्यैश्चाक्षेपकृतैर्वीररसः सम्यगभिनेयः ॥ ८४ ॥

तम् । पराक्रमः परकीयमण्डलाद्याक्रमणेनावस्कन्दः । युद्धादिके सामर्थ्यं शक्तिः । प्रतापः शत्रुविषये सन्तापकारिणी प्रसिद्धिः । प्रभावोऽभिजनधनमन्त्रिसम्पत् । आदिग्रहणेन यशःप्रभृति । एते च सम्पूर्णस्वभावा एव विभावा भवन्त्युत्तमस्य कदाचित्कश्चिदधिक इति पृथक्पृथगुदाहरणमसत् । वस्तुतो ह्यत्रोदाहरणं सर्वमेव रामादिचरितम् । सचिवायत्तसिद्धौ च वत्सराजप्राये नायके यथायोगं सचिवगता अप्येते मन्तव्याः । प्रतिनायकगता अपि च ते उत्साहव्यञ्जका इति यथायोगं व्यस्तसमस्तभेदकल्पनं कविना कार्यम्। स्थैर्यमचलनं, गाम्भीर्यकृतं संवरणं,शौर्यं(धैर्य?) युद्धादिक्रिया; त्यागो दानम्, वैशारद्यं सामाद्युपायचतुष्कस्यैकद्वित्रिचतुरादिभेदैर्यथाविषयं नियोजनम् । विविधधर्मादिलक्षणमर्थनीयं विशेषमभिसन्धाय, अविषादित्वादविस्मयादमोहाच्च योऽध्यवसायो निश्चयः स चोत्साहयतीत्युत्साहः । एतदुक्तं भवति—आपद्यङ्कनिमग्नतां स्वल्पेऽसन्तोषं मिथ्याज्ञानं चापास्य यस्तत्त्वनिश्चयः स एवोत्साहहेतुः प्रधानतया, रौद्रे तु तमःप्राधान्यादनुचिताशास्त्रिकवन्धाद्यपीति मोहविस्मयप्राधान्यम् । स्थितिः स्थैर्यम् । वीर्यं शौर्यम् । गर्वपदेन तदनुभावो लक्ष्यते । उत्साहनमुत्साहोऽवलस्य विषण्णप्रायस्योत्तेजनं यथा सेतुबन्धकाव्ये । पराक्रमः पराक्रमणा । इत्थमत्र भवद्भिरासितव्यं योद्धव्यमिति वलस्य व्यापारणादितिकर्तव्यानां भृत्यानां प्रभावना प्रभावसम्पादनम् । आक्षेपो वस्त्वन्तरस्य सूचनं तेन कृतानि तत्प्रधानानि यानि वाक्यानीति गम्भीरदुरवगाहार्थं वाक्यानामित्युक्तम् ।

इति वीररसप्रकरणं समाप्तम् ।

---

1 दविशेषान्वितादसम्मोहात् द दविश्रमान्मोहात् - प दविस्मयामोहात
2 न स्मृतिशौर्यवीर्यधैर्यैरुत्साहपयाक्रमैः ॥

अथ भयानको नाम भयस्थायिभावात्मकः[1]। स च [2]विकृतरससत्त्वदर्शनशिवोलूक[3]त्रासोद्वेगशून्यागारारण्यगमनस्वजनवधबन्धदर्शनश्रुतिकथादिभिर्विभावैरुत्पद्यते। तस्य प्रवेपितकरचरणनयन[4]चपलपुलकमुखवैवर्ण्यस्वरभेदादिभिरनुभावैरभिनयः प्रयोक्तव्यः॥

[5]भावाश्चास्य, स्तम्भस्वेदगद्गदरोमाञ्चवेपथुस्वरभेदवैवर्ण्यशङ्कामोहदैन्यावेगचापलजडतात्रासापस्मारमरणादयः॥ ८५॥

अत्रार्याः--

अथ भयानकरसप्रकरणम्।

वीरस्य भीतावयव(भीताभय?) प्रधा(दा?)नत्वाद्भयानकं लक्षयत्यथेति। विकृतो रसोऽट्टहासादिः। सत्त्वानां पिशाचानां दर्शनं, त्रासोद्वेगौ परगतौ, शून्यागारस्यारण्यस्य च गमनं प्राप्तिः, स्वजनस्य यौ वधबन्धौ तयोर्दर्शनं प्रत्यक्षेण, श्रवणमागमेन, कथा विदा(कदाचिद्?)तिक्रान्तयोरपि पुनरनुसन्धानेन स्मरणम्। वेपितुं प्रवृत्तं यत्करचरणं आदिकर्मैव भयव्यञ्जकं, व्याध्यादिवैलक्षण्यसूचनात् पुलको रोमकूपोन्नतिः। स्वरस्य भेदस्य भावविपर्ययः गुरुनृपयोरित्ययमाशयः। भयं तावत्स्त्रीनीचबालादिषु वक्ष्यते नोत्तममध्यमप्रकृतिषु। तेऽपि तु गुरुभ्यो राज्ञश्च भयं दर्शयेयुः। तदभावेऽप्येवं सुतरामुत्तमत्वं भवति। अप्रभुत्वं चामात्यानाम्, यथाह "स्वेच्छाचारी भीत एवास्मी †"ति। अनुभावाश्च तथा श्लिष्टास्तत्र क्रियन्ते। लोके येन सत्यत एव भीतोऽयमिति

---

1 न भावप्रभवः 2 द विकृतवेषदर्शनाशिवोलूक, म विकृतरवसत्त्वदर्शनशिवोलूकोल्कात्रासोद्वेगशून्यागारारण्यश्मशानशून्यभवनगमनमरणस्वजनवधबन्धदर्शनश्रवणकथाभिर्विभावैः समुत्पद्यते 3 त्रासोद्वेगारण्यश्मशानशून्यभवनप्रवेशमरण 4 ढ चलनमुखगात्रपुलकमुख द नयनवलनपुलकमुख 5 म व्यभिचारिणश्चास्य शङ्कादैन्यावेगचापलजडतात्रासापस्मारमरणादयः स्तम्भस्वेदरोमाञ्चगद्गदवेपथुस्वरभेदवैवर्ण्यादयः सात्त्विकाश्च। अत्रार्या भवन्ति॥ † (रत्ना-१-७)

विकृतरवसत्त्वदर्शनसंग्रामारण्यशून्यगृहगमनात् ।
गुरुनृपयोरपराधात्कृतकश्च [1]भयानको ज्ञेयः ॥ ८६ ॥
[2]गात्र[3]मुख[4]दृष्टिभेदैरूरु स्तम्भाभिवीक्षणोद्वेगैः ।
सन्नमुखशोष[5]हृदयस्पन्दनरोमोद्गमैश्च भयम् ॥ ८७ ॥
एतत्स्वभावजं [6]स्यात्सत्त्वसमुत्थं तथैव कर्तव्यम् ।
पुनरेभिरेव भावैः [7]कृतकं मृदुचेष्टितैः कार्यम्[8] ॥ ८८ ॥
करचरणवेपथुस्तम्भगात्रसंकोचहृदयकम्पेन[9] ।
शुष्कोष्ठतालुकण्ठैर्भयानको नित्यमभिनेयः ॥ ८९ ॥

गुर्वादीनां प्रतीतिर्भवति । अस्वाभाविकत्वाच्च कृतकत्वं वहुतरकालानुवर्तनेनास्वाद्यत्वाच्च रसत्वं न च व्यभिचारित्वम् । तद्धि तदा स्याद्यदि स्वभावत एव न किञ्चित्काललवमुत्पाद्यते न गात्रादीनां भेदो वर्णकर्मसंस्थानादिविपर्ययो वीक्ष्यमतिक्रम्याति वीक्षणकान्दिशीकत्वेन निर्लक्षचक्षुःकृत उद्वेगः चलनं सादो गात्राणां स्रस्तता । मुखस्य तालुनि शोषः । हृदयस्पन्दनमतिवेगेनेह, भयमित्यभिनेयमिति । वीररस इत्यार्यातः संबध्यते । ता एता ह्यार्या एकप्रघट्टकतया पूर्वाचार्यैर्लक्षणत्वेन पठिताः । मुनिना तु सुखसङ्ग्रहाय यथास्थानं निवेशिताः । सत्त्वसमुत्थमिति । सत्त्वं मनःसमाधानं तज्जन्यकामिति नटस्येयं शिक्षा । सा च सर्वविषयेति टीकाकारः । तदिदमसत् । कविनटशिक्षार्थमेव सर्वमिदं प्रकरणं, लोके विभावानुभावाभिनयादिव्यवहाराभावात् । तस्मादयमत्रार्थः—एतत्तावद्भयं स्वभावजं रजस्तमःप्रकृतीनां नीचानामित्यर्थः, येऽपि च सत्त्वप्रधानास्तेषां सत्त्वसमुत्थं प्रयत्नकृतम् । एभिरेवानुभावैः कार्यम्, किन्तु मृदुचेष्टितैर्यतस्तत्कृतकं । पुनःशब्दो विशेषद्योतकः । ननु च राजादि किमिति गुर्वादिभ्यो भयं कृतं(तकं?)दर्शयति । दर्शयित्वा किमिति मृदून् गात्रकम्पनादीन्प्रदर्शयाति ।

---

1 ढ तथा बुधैर्ज्ञेयः 2 प गोत्र 3 न दृष्टिकम्पै 4 न स्तम्भाति 5 द हृदये 6 न स्यात्सान्त्व 7 प कृतकं मुहुः प स्तम्भादि 8 द चेष्टितैश्च भयम् 9 न वेपनेन स्तम्भेन च गात्रहृदयकम्पेन म करचरणवेपनकृतैर्गात्रस्तम्भैश्च हृदयकम्पेन द गात्रहृदयप्रकम्पेन ॥

अथ बीभत्सो नाम जुगुप्सास्थायिभावात्मकः। स [1]चाहृद्या[प्रशस्ता]प्रियाचोक्ष्यानिष्टश्रवणदर्शनोद्वेजन-[परि]कीर्तनादिभिर्विभावैरुत्पद्यते[2]। तस्य च [3]सर्वाङ्गसंहार-मुखविकूणनोल्लेखन[4] निष्ठीवनोद्वेजनादिभिरनुभावैरभि-नयः प्रयोक्तव्यः। [5]भावाश्चास्यापस्मारोद्वेगावेगमोहव्या-धिमरणादयः[6]। अत्रानुवंश्ये आर्ये भवतः[7]—

किमिति च भयानक एव कृतकत्वमुक्तम्। सर्वस्य हि कृतकत्वमुक्तं भवति। यथा वेश्या धनार्थी (र्थिनी?)ति कृतकां रतिमादर्शयतीत्याशङ्क्य साधारण-मुत्तरमाह-तथैव कार्यमिति। भये हि प्रदर्शिते गुरुर्विनीतं जानाति। मृदुचेष्टि-ततया चाधमप्रकृतिमेनं गणयति। कृतकशृङ्गाराद् वेश्योपदिष्टानां न काचित्पुरु-षार्थसिद्धिः। तेनैव ह्युक्तेन प्रकारेण कार्यः पुरुषार्थविशेषो लभ्यते। यत्र तु राजा न कृतकं परानुग्रहाय क्रोधविस्मयादीन्दर्शयति तत्र व्यभिचारितैव तेषां न स्थायितेत्येतदर्थसूचितामेव गुरुवंशान्तरप्रसिद्धामार्यां पठति करचरणे-ति। नित्यमिति कृतकत्वेऽकृतकत्वे च॥

इति भयानकरसप्रकरणम्॥

अथ बीभत्सरसप्रकरणम्॥

अवसरप्राप्तं बीभत्सरसं लक्षयत्यथेति। हृदयस्यापि किञ्चित्कस्य-चिन्निसर्गतोऽप्रयतं लशुनमिव द्विजानाम्। अप्रियं धात्वादिदोषाद्यथा श्लेष्मोप-हतस्य क्षीरमचोक्षं स्वरूपेणादुष्टमपि तु मलाद्युपहतमनिष्टं यत्रानिशं भुक्तत्वेने-च्छा निवृत्ता,संहारः पिण्डीकारणं,मुखस्येति तदङ्गानां सङ्कोचनं,उल्लेखनमुल्लापः।

---

1 ड - चाहृद्याप्रियापेक्षानि 2 म - समुत्पद्यते 3 म - सर्वाङ्गसंप्रहार ज - सर्वाङ्गसङ्कोच 4 - म - हृल्लेखन 5 ज - व्यभिचारिणश्चास्य ड - व्यभि चारिभावाश्चास्मापस्मारग्रहचेष्टितावेग 6 ज - मरणाकम्पादयः 7 ढ - अत्रार्ये भवतः।

[1]अनभिमतदर्शनेन च [2]गन्धरसस्पर्शशब्ददोषैश्च ।
[3]उद्वेजनैश्च बहुभिर्बीभत्सरसः समुद्भवति ॥ ९२ ॥
मुखनेत्रविकूणनया नासाप्रच्छादनावनमितास्यैः[4] ।
अव्यक्तपादपतनैर्बीभत्सः सम्यगभिनेयः[5] ॥ ९३ ॥

अथाद्भुतो नाम विस्मयस्थायिभावात्मकः । स च [6]दिव्यजनदर्शनेप्सितमनोरथावाप्त्युपवनदेवकुलादिगमनसभाविमानमायेन्द्रजाल[7]सम्भावनादिभिर्विभावैरुत्पद्यते[8] । तस्य नयनविस्तारानिमेषप्रेक्षण[9]रोमाञ्चाश्रुस्वेदहर्षसाधुवाददानप्रबन्धहाहाकारबाहुवदनचेलांगुलि[10]भ्रमणादिभिरनुभावैरभिनयः प्रयोक्तव्यः । [11]भावाश्चास्य

निष्ठीवनं कफनिरासनम् । उद्वेजनं गात्रोद्धूननम् । नासाप्रच्छादनं दुर्गन्धप्राये दृष्टम् । प्रतिघातादव्यक्तानि पादयोः पतनानि । यदि वास्थिकङ्कालाद्याकुले पितृवने सञ्चरतोऽस्फुटितानि पादपतनानि क्वचिद्दीर्घाणि, अन्यत्रादीर्घाणीति ॥

इति बीभत्सरसप्रकरणम् ॥

—:o:—

अथाद्भुतरसप्रकरणम् ॥

सर्वत्वान्तेऽद्भुत इत्युक्तं (पुट २६९) लक्षयितुमाहाथेति । दिव्या गन्धर्वादयः । ईप्सितः शक्यप्राप्तिरर्थोऽन्यो मनोरथस्तयोः प्राप्तिरुपचयनम् । देवकुले च

1 न - अनभिहित 2 ड - रसगन्ध 3 - उद्वेजने च 4 म - ग्रच्छादनादवनतास्यैः 5 म - पतनैरस्याभिनयः प्रयोक्तव्यः ड - पतनैः सम्यगभिनयः प्रयोक्तव्यः 6 ड - दिव्यदर्शनेप्सित 7 म साधनादिभि, ज - साधनकर्मातिशयादिभि ड - विस्तारानिमिष... 8 म - समुत्पद्यते 9 न - रोमहर्षणाश्रुप्रस्वेदसाधुवाद 10 ड - करचरणाङ्गुलि 11 ड - व्यभिचारिभावाश्चास्य ।

स्तम्भाश्रुस्वेदगद्गदरोमाञ्चावेगसम्भ्रमप्रहर्षचपलतोन्मादधृति[1] जडताप्रलयादयः । अत्रानुवंश्ये आर्ये भवतः—

[2]यस्त्वतिशयार्थयुक्तं वाक्यं [3]शिल्पं च कर्मरूपं वा[4] ।
[5]तत्सर्वमद्भुतरसे विभावरूपं हि विज्ञेयम् ॥ ९५ ॥
[6]स्पर्शग्रहोल्लुकसनैर्हाहाकारैश्च साधुवादैश्च ।
वेपथुगद्गदवचनैः [7]स्वेदाद्यैरभिनयस्तस्य[8] ॥ ९६ ॥

गमनं तस्याद्भुतविभावो येन तत्रत्यं सरसं निवेशादि न क्वचिद्दृष्टम् । सभा गृहविशेषः। विमानादीनि दिव्यरथाः। माया रूपपरिवर्तनादिका। इन्द्रजालं मन्त्रद्रव्यवस्तुयुक्त्यादिना असम्भवद्वस्तुप्रदर्शनम्। तस्येत्यद्भुतस्य । हर्षशब्देनात्र तदनुभावाः। साध्वितिवदनं साधुवादः। दानं धनादेः। प्रबन्धं सततं कृत्वा हाहाशब्दस्य करणम्। चेलस्याङ्गुलेश्च भ्रमणम्। अतिशेत इत्यतिशयोऽन्यापेक्षया योऽर्थ उत्कृष्टस्तेन वाच्यभूतेन युक्तं यद्वाक्यं यच्च शिल्पं कर्मरूपं कर्मात्मकं, "प्रशंसायां रूपम्"। सर्वमित्येवंप्रकारमिति यावत् । स्पर्शग्रहशब्देन तद्विभावतयाऽभिनयो लक्ष्यमाणो लक्ष्यते ॥

"किञ्चिदाकुञ्चिते नेत्रे कृत्वा भ्रूक्षेपमेव च ।
तथांसगण्डयोः स्पर्शात्स्पर्शमेवं विनिक्षिपेत्" (२२-८०) इति ।

गात्रस्योर्ध्वं साह्लादं धूननमुल्लुकसनम्। बहुवचनं प्रकृतिभेदेन प्रकारवैचित्र्यं सूचयति ॥

इत्यद्भुतरसप्रकरणं समाप्तम् ।

---

1 म - जडतामोहमरणादयः 2 न - यस्त्वति 3 ड - शीलं च 4 ड - रूपं च 5 ड - एभिस्त्वर्थविशेषै रसोऽद्भुतो नाम विज्ञेयः। (न - नाम संभवति) ज - तत्संवद्धैः सर्वै रसोऽद्भुतो नाम 6 म - स्पर्शग्रहोग्रहसनै 7 ड - वचनखेदा 8 म - नयश्चास्य ।

शृङ्गारं [1]त्रिविधं [2]विद्याद्वाङ्नेपथ्यक्रियात्मकम् ।
अङ्गनेपथ्यवाक्यैश्च हास्यरौद्रौ [3]त्रिधा स्मृतौ ॥ ९७ ॥
धर्मोपघातजश्चैव [4]तथार्थापचयोद्भवः ।
तथा [5]शोककृतश्चैव करुणस्त्रिविधः स्मृतः ॥ ९८ ॥
दानवीरं धर्मवीरं [6]युद्धवीरं तथैव च ।
रसं वीरमपि [7]प्राह ब्रह्मा त्रिविधमेव हि ॥ ९९ ॥
[8]व्याजाच्चैवापराद्धाच्च वित्रासितकमेव [9]च ।

अथ प्रधानभूतविभावानुगुणभावप्रतिपादनं भेदप्रदर्शनव्याजेन करोति शृङ्गारमित्यादिना । वाक्यरौद्रो हि तत्र स्वभावरौद्र इति व्यवहरिष्यते, स्वभावानुसारित्वाद्वाक्यस्य,- धर्मोपघातज उत्तमानामपि शोभनहेतुत्वात् । शोकशब्देन स्वजनादिनासौ चैते त्रयो विभावाः । धर्मशब्देनाग्निष्टोमादि-क्रिया । अत एतद्यजनादीनि नियमानुभावात्मकं प्रतिनायकगतं तु विभाव-रूपमपि । व्याजादिति कृतक इत्यर्थः । अनेनानुभावमार्दवं दर्शितम् । अपरा-ध्यन्तीत्यपराद्धाश्चोरादयः । यत्तु स्वभावत्रस्तहृदयानां स्त्रीबालादीनां तृणेऽपि कम्पमाने भयं तद्वित्रासितकम् । विशेषेण त्रास्यत इति वित्रासितो बालादिः । तत्प्रकृतित्वाद्भयानकं तथोक्तं ततः संज्ञायां कन् । गुर्वाद्यपराधात्पर-मार्थतोऽप्युत्तमानां भयावेग इति त्वसत् । भयं हि विनाशशङ्कात्मकं नोत्त-मेषु संभवति, तथा च भयं नाम स्त्रीनीचप्रकृतिकमिति सामान्येन लक्ष्यते । रुधिरान्त्रादिदर्शनाद्यो बीभत्सः क्षोभणत्वाच्छुद्धः । यस्तु विष्ठादिभ्यः स उद्वेगी हृदयं चलयति, सोऽशुद्धः, अशुद्धविभावकत्वात् । उपाध्यायस्त्वाह-बीभत्सस्ता-वद्विभावविशेषाद् यत्र तु संसारनाट्यनायकरागप्रतिपक्षतया मोक्षसाधनत्वा-च्छुद्धः, यदाहुः—"शौचात्स्वाङ्गे जुगुप्सते"ति । तथा "वितर्कबाधने प्रतिपक्ष-भावन"*मिति । तेन सोऽपि परमार्थतस्त्रिविध एव । द्वितीयक इत्यनेन तस्य दुर्ल-भत्वेनाप्राचुर्यं सूचयति । दिव्य इति यत्र सभाविमानादयोऽनुभावाः । आनन्द-

1 द्विविधं 2 विद्याद्भ्रूनेपथ्य 3 तथा स्मृतौ 4 तथात्वप 5 योगकृत 6 युद्धवीरमपि त्रिधा 7 प्राह तथा 8 व्याजात्तथाप 9 हि । * योगसू (२-३३)

पुनर्भयानकं चैव विद्यात्त्रिविधमेव हि ॥ १०० ॥
बीभत्सः क्षोभणः शुद्ध उद्वेगी [1]स्याद्द्वितीयकः ।
[2]विष्ठाक्रिमिभिरुद्वेगी क्षोभणो रुधिरादिजः ॥ १०१ ॥
दिव्यश्चानन्दजश्चैव द्विधा ख्यातोऽद्भुतो रसः ।
दिव्यदर्शनतो दिव्यो हर्षादादन्दजः स्मृतः ॥ १०२ ॥

[3]अथ शान्तो नाम शमस्थायिभावात्मको मोक्षप्रवर्तकः । स तु तत्त्वज्ञानवैराग्याशयशुध्यादिभिर्विभावैः समुत्पद्यते । तस्य यमनियमाध्यात्मध्यानधारणोपासनसर्वभूतदयालिङ्गग्रहणादिभिरनुभावैरभिनयः प्रयोक्तव्यः ।

यन्ती(ती?) त्यानन्दो मनोरथावाप्त्यादिः । स एव हर्षयतीति हर्षः । एषु च शृङ्गारमित्यादिषु श्लोकेषु चकाराद्विभावानुभावान्तरनिरासशङ्कां पराकर्तुमेवकारः । इयन्त एव तेषां मुख्यत्वेन सङ्गता इति दर्शनार्थाः तथाशब्दा अनुक्तविभावाद्यूहनार्था इति यथायोगं योज्यम् ।

इत्यद्भुतरसप्रकरणं समाप्तम् ॥

अथ शान्तरसविचारः ॥

ये पुनर्नव रसा इति पठन्ति तन्मते शान्तस्वरूपमभिधीयते । तत्र केचिदाहुः—शान्तः शमस्थायिभावात्मकस्तपस्यायोगिसम्पर्कादिभिः विभावैरुत्पद्यते । तस्य कामक्रोधाद्यभावरूपैरनुभावैरभिनयः । व्यभिचारी धृतिमतिप्रभृतिः (इति) ॥

एतदपरे न सहन्ते, शमशान्तयोः पर्यायत्वादेकान्न पञ्चाशद्भावा इति सङ्ख्यात्यागात् । किञ्च विभावा ऋतुमाल्यादयस्तत्समनन्तरभाविनि शृङ्गारादावनुसन्धीयन्ते इत्युक्तम् । तपोऽध्ययनादयस्तु न शान्तस्य, शमनस्य

---

1 स्यात्तृतीयकः 2 विष्ठानुकृतिरुद्वेगी 3 न - शान्तमिदानीं व्याख्यास्यामः । तत्र—

व्यभिचारिणश्चास्य निर्वेदस्मृतिधृतिसर्वाश्रमशौचस्तम्भ-रोमाञ्चादयः। अत्रार्याः श्लोकाश्च भवन्ति—

मोक्षाध्यात्म[1]समुत्थस्तत्त्वज्ञानार्थहेतुसंयुक्तः।
नैःश्रेयसोपदिष्टः[2]शान्तरसो नाम सम्भवति[3]॥ १०४॥

[ये]हेतवः, (ते) तत्त्वज्ञानस्यानन्तरहेतव इति चेत्पूर्वोदिततत्त्वज्ञानेऽपि तर्हि प्रयोज्यतेति तपोऽध्ययनादीनां विभावतायुक्ता स्यात्। कामाद्यभावोऽपि नानुभावः, शान्ताद्विपक्षादव्यावृत्तेः, अगमकत्वात्प्रयोगासमवायित्वाच्च। न हि चेष्टाव्युपरमः प्रयोगयोग्यः। सुप्तमोहादयोऽपि हि निःश्वासोच्छ्वासपतनभूशयनादिभिश्चेष्टाभिरेवानुभाव्यन्ते। धृतिप्रभृतिरपि प्राप्तविषयोपभोगः कथं शान्ते स्यात्। न चाकिञ्चित्करत्वमात्रेण तत्त्वज्ञानोपायो व्युत्पाद्यते। विनेये चैते परदुःखदुःखितमनसो दृश्यन्ते। सम्यग्दर्शनसमावस्थां प्राप्ता अपि तु संसारे। तन्न शान्तो रस इति॥

अत्रोच्यते—यथा इह तावद्धर्मादित्रितयमेवं मोक्षोऽपि पुरुषार्थः, शास्त्रेषु स्मृतीतिहासादिषु च प्राधान्येनोपायतो व्युत्पाद्यत इति सुप्रसिद्धम्। यथा च कामादिषु समुचिताश्चित्तवृत्तयो रत्यादिशब्दवाच्याः कविनटव्यापारेणास्वादयोग्यताप्रापणद्वारेण तथाविधहृदयसंवादवतः सामाजिकान्प्रति रसत्वं शृङ्गारादितया नीयन्ते, तथा मोक्षाभिधानपरमपुरुषार्थोचिता चित्तवृत्तिः किमिति रसत्वं नानीयत इति वक्तव्यम्। या चासौ तथाभूता चित्तवृत्तिः सैवात्र स्थायिभावः। एतत्तु चिन्त्यम्, किं नामासौ—तत्त्वज्ञानोत्थितो निर्वेद इति केचित्। तथा हि—दारिद्र्यादिप्रभवो यो निर्वेदस्ततोऽन्य एव, हेतोस्तत्त्वज्ञानस्य वैलक्षण्यात्। स्थायिसञ्चारिमध्ये चैतदर्थमेवायं पठितोऽन्यथा माङ्गलिको मुनिस्तथा न पठेत्' जुगुप्सां च व्यभिचारित्वेन शृङ्गारे निषेधन्मुनिर्भावानां सर्वेषामेव स्थायित्वसञ्चारित्वचिन्तनात्तावत्त्वानुभावस्थत्वाभियोग्यतोपनिपातितां निश्शब्दार्थबलाकृष्टां वा नानुजानाति। तत्त्वज्ञानजश्च निर्वेदः स्थाय्यन्तरोपमर्दकः भाववैचित्र्यसाहिष्णुभ्यो रत्यादिभ्यो यः परमस्थायिशीलः स एव हि स्थाय्यन्तराणामुपमर्दकः।

---

1 म - निमित्तः 2 म - निःश्रेयससंयुक्तः 3 म - नाम विज्ञेयः।

बुद्धीन्द्रियकर्मेन्द्रियसंरोधाध्यात्मसंस्थितोपेतः[1] ।
[2]सर्वप्राणिसुखहितः शान्तरसो नाम विज्ञेयः[3] ॥
न यत्र दुःखं न सुखं न द्वेषो नापि मत्सरः ।
समः सर्वेषु भूतेषु स शान्तः प्रथितो रसः ॥ १०६ ॥
भावा विकारा रत्याद्याः शान्तस्तु प्रकृतिर्मतः ।

इदमपि पर्यनुयुञ्जते—तत्त्वज्ञानजो निर्वेदो [व्यत्र]स्थायीति वदता तत्त्वज्ञानमेवात्र विभावत्वेनोक्तं स्यात् । वैराग्यबीजादिषु कथं [1]विभावत्वं, तदुपायत्वादिति चेत्कारणकारणेऽयं विभाववाव्यवहारः, स चातिप्रसङ्गावहः । किञ्च निर्वेदो नाम सर्वत्रानुपादेयताप्रत्ययो वैराग्यलक्षणस्य च तत्त्वज्ञानस्य प्रत्युक्तोपयोगी । विरक्तो हि तथा प्रयतते यथाऽस्य तत्त्वज्ञानमुत्पद्यते । तत्त्वज्ञानाद्धि मोक्षो, न तु [2]तत्त्वं ज्ञात्वा निर्विद्यते निर्वेदाच्च मोक्ष इति, वैराग्यात्प्रकृतिलय इति हि तत्र भवन्तः ॥

ननु तत्त्वज्ञानिनः सर्वत्र दृढतरं वैराग्यं दृष्टम् । तत्र भ(ग)वद्भिरप्युक्तं—"तत्परं पुरुषख्यातेर्गुणवैतृष्ण्य"मिति * । भवत्येवं, "तादृशं तु वैराग्य ज्ञानस्यैव परा काष्ठे"ति भुजङ्गविभुनैव भगवताऽभ्यधायि । ततश्च तत्त्वज्ञानमेवेदं तत्त्वज्ञानमालया परिपोष्यमाणमिति न निर्वेदः स्थायी, किन्तु तत्त्वज्ञानमेव स्थायीति भवेत् । यत्तु व्यभिचारिव्याख्यानावसरे वक्ष्यते तच्चिरकालविभ्रमविप्रलब्धस्योपादेयत्वनिवृत्तये यत्सम्यग्ज्ञानम् ।
यथा—

"वृथा दुग्धोऽनड्वांस्स्तनभरनता गौरिति परं
परिष्वक्तः षण्डो युवतिरिति लावण्यरहितः ।

---

1 म - निरोधतोऽध्यात्मसंश्रितश्चैव 2 म - सर्वप्राणिहितः खलु 3 ड - विज्ञेयः । भवति चात्र श्लोकः—

वागङ्गमुखरागैश्च सत्त्वेनाभिनयेन च ।
कवेरन्तर्गतं भावं भावयन्भाव उच्यते ॥

1 उपायं 2 तं । *योगसू (१-१६)

विकारः प्रकृतेर्जातः पुनस्तत्रैव लीयते ॥ १०७ ॥
स्वं स्वं निमित्तमासाद्य शान्ताद्भावः प्रवर्तते ।
पुनर्निमित्तापाये च शान्त एवोपलीयते ॥ १०८ ॥
एवं नवरसा दृष्टा नाट्यज्ञैर्लक्षणान्विताः ।

कृता वैडूर्याशा विकचकिरणे काचशकले
मया मूढेन त्वां कृपणमगुणज्ञं प्रणमता" ॥ इति

तन्निर्वेदस्य खेदरूपस्य विभावत्वेनैतच्च तत्रैव वक्ष्यामः ॥

ननु मिथ्याज्ञानमूलो विषयगन्धस्तत्त्वज्ञानात्प्रशाम्यतीति *दुःखजन्म-सूत्रेणाक्षपादपादैर्भगवद्भिर्मिथ्याज्ञानापचयकारणतत्त्वज्ञानं वैराग्यस्य दोषापायलक्षणस्य कारणमुक्तम् । ननु ततः किम् । ननु वैराग्यं निर्वेदः । क एवमाह। निर्वेदो हि शोकप्रवाहप्रसररूपश्चित्तवृत्तिविशेषः। वैराग्यं तु रागादीनां प्रध्वंसः । भवतु वा वैराग्यमेव निर्वेदः तथापि तस्य स्वकारणवशान्मध्यभाविनोऽपि न मोक्षे साध्ये सूत्रस्थानीयतात्पपादाचारीव (?) । किञ्च तत्त्वज्ञानोत्थितो निर्वेद इति शमस्यैवेदं निर्वेदनामकृतं स्यात्। शमशान्तयोः पर्यायत्वं तु हासहास्याभ्यां व्याख्यातं सिद्धं साध्यते, यदलौकिकत्वेन साधारणासाधारणतया च वैलक्षण्यं शमशान्तयोरपि सुलभमेव । तस्मान्न निर्वेदः स्थायीति ॥

अन्ये मन्यन्ते रत्यादय एवाष्टौ चित्तवृत्तिविशेषा उक्तास्त एव कथित-विभावविविक्तश्रुताद्यलौकिकविभावविशेषसंश्रया विचित्रा एव तावत्। ततश्च तन्मध्यादेवान्यतमोऽत्र स्थायी, तत्रानाहतानन्दमयस्वात्मविषया रतिरेव मोक्ष-साधनमिति सैव शास्त्रे स्थायिनीति, यथोक्तं—

"यश्चात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते" ॥ इति (गीता ३-१७)।

एवं समस्तविषयं वैकृतं पश्यतो विश्वं च शोच्यं विलोकयतः सांसारिकं च वृत्तान्तमपकारित्वेन पश्यतः सातिशयमसम्मोहप्रधानं विनयमाश्रितवतः

---

*दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः (१-१-२)

सर्वस्माद्विषयसार्थाद्व्यावृत्तः सर्वलोकस्पृहणीयादपि प्रमदादेर्जुगुप्समानस्य पूर्वस्वात्मातिशयलाभाद्विस्मयमानस्य मोक्षसिद्धिरिति हासादीनां विस्मयान्तानामन्यतमस्य स्थायित्वं निरूपणीयम्। न चैतन्मुनेर्न सम्मतम्। यावदेव हि विशिष्टान्विभावान्परिगणयत्यादिशब्देन च तत्प्रकारानेवान्यान्गृह्णीते, तावदेव तद्व्यतिरिक्तालौकिकहेतूपनतानां रत्यादीनामनुजानात्येवापवर्गविषयत्वम्। एवंवादिनां तु परस्परमेव विचारयतामेकस्य स्थायित्वं विशीर्यत एव। तदुपायभेदात्तस्य तस्य स्थायित्वमित्यप्युच्यमानं प्रगुणमेव। स्थायिभेदेन प्रतिपुरुषं रसस्याप्यानन्त्यापत्तौ मोक्षैकफलत्वादेको रस इति चेत्, क्षामैकफलत्वे वीररौद्रयोरप्येकत्वं स्यात्।

अन्ये तु पानकरसवदविभागं प्राप्ताः सर्व एव रत्यादयोऽत्र स्थायिन इत्याहुः। चित्तवृत्तीनामयुगपद्भावात्, अन्योन्यं च विरोधादेतदपि न मनोज्ञम्। कस्तर्ह्यत्र स्थायी। उच्यते—इह तत्त्वज्ञानमेव तावन्मोक्षसाधनमिति तस्यैव मोक्षे स्थायिता युक्ता। तत्त्वज्ञानं च नामात्मज्ञानमेव। आत्मनश्च व्यतिरिक्त इन्द्रियस्यैव ज्ञानं परो ह्येवमात्मनात्मैव स्यात्। विपश्चितं चैतदस्मद्गुरुभिः। अस्माभिश्चान्यत्र* वितन्यत इतीह नातिनिर्बन्धः कृतः। तेनात्मैव ज्ञानानन्दादिविशुद्धधर्मयोगी परिकल्पितविषयोपभोगरहितोऽत्र स्थायी। न चास्य स्थायितया स्थायित्वं वचनीयम्। रत्यादयो हि तत्तत्कारणान्तरोदयप्रलयोत्पद्यमाननिरुध्यमानवृत्तयः कंचित्कालमापेक्षिकतया स्थायिरूपात्मभित्तिसंश्रयाः [षट्]स्थायिन इत्युच्यन्ते। तत्त्वज्ञानं तु सकलभावान्तरभित्तिस्थानीयं सर्वस्थायिभ्यः स्थायितमं सर्वा रत्यादिकाश्चित्तवृत्तीर्व्यभिचारीभावयन्निसर्गत एव सिद्धस्थायिभावमिति [1]तन्त्रवचनेन। अत एव पृथगस्य गणना न युक्ता। न हि खण्डमुण्डयोर्मध्ये तृतीयं गोत्वमिति गण्यते। तेनैकान्न पञ्चाशद्भावा इत्यव्याहतमेव। अस्यापि कथं पृथग्गणनेति चेत् पृथगास्वादयोगादिति ब्रूमहे। न हि रत्यादय इतरेतरासंपृक्तेन वपुषा तथाविधमात्मरूपं लौकिकप्रतीतिगोचरं, स्वगतमप्यविकल्परूपं[2] व्युत्थानावसरेऽनुसंधीयमानं चित्तवृत्त्यन्तरकलुषमेवावभाति। भासतां वा लोके तथा। तथापि न सम्भवन्मात्रस्थायिनां गणनं रसेषूक्तेष्वनुपयोगात्। अपि तु व्यभिचारिलक्षणीयत्वं विज्ञायते नेति, तथाह्येकान्नपञ्चाशता भावैरित्येतत्प्रघट्टकोपपत्तिः। न चास्यात्मस्वभावस्य व्यभिचारित्वसम्भवादवैचित्र्यावहत्वादनौचित्याच्च स(श?)मात्मस्वभावस्य दम-

1 तत्प्रपञ्चनेन 2 विकलरूपं *भगवद्गीताव्याख्यायाम्।

शब्देन मुनिर्व्यपदिष्टः(?) । यदि तु स एव शमशब्देन व्यपदिश्यते निर्वेदशब्देन वा तन्न कश्चिद्भावः केवलं शमश्चित्तवृत्त्यन्तं, निर्वेदोऽपि दारिद्र्यादिविभावान्तरोत्थितनिर्वेदतुल्यजातीयो न भवति । तज्जातीय एव हेतुभेदेऽपि तद्व्यपदेश्यो रतिभयादिभिरेव । तदिदमात्मस्वरूपमेव तत्त्वज्ञानं शमता च, यत्कालुष्योपरागविशेषा एवात्मनो रत्यादयस्तदनुगमेऽपि विशुद्धमस्य रूपमव्यवधानसमाधिबलादधिशय्य व्युत्थानेऽपि प्रशान्तिता भवन्ति, यथोक्तं "(तस्य) प्रशान्तवाहितासंस्कारा"*दिति । तत्त्वज्ञानलक्षणस्य च स्थायिनः [1]समस्तोऽयं लौकिकालौकिकचित्तवृत्तिकलापो व्यभिचारितामभ्येति । तदनुभावा एव च यमनियमाद्यनुकृता अनुभावा उपाङ्गाभिनयस्य (आङ्गिका)ध्यायत्रये च ये स्वभावाभिनया वक्ष्यन्ते । अत एत एतद्विषया एव । अयमेव हि स्वभावः । विभावा अपि कथमीश्वरानुग्रहप्रभृतयः. प्रक्षयोन्मुखाश्च रत्यादयोऽत्रास्वाद्याः । केवलं यथा विप्रलम्भे औत्सुक्यं संभोगेऽपि वा "प्रेमासमाप्तोत्सव"†मिति, यथा च रौद्रे औग्र्यं यथा च करुणवीरभयानकाद्भुतेषु निर्वेदधृतित्रासहर्षा व्यभिचारिणोऽपि प्राधान्येनावभासन्ते, तथा न जुगुप्सायां सर्वथैव रागप्रतिपक्षत्वात् । तथा हि—महाव्रतेन कपालादिधारणमधुभार्यादिसमुदयादिविस्तारसंक्षेपातिकर्मीकृतिर्हि धर्मे जुगुप्साहेतुत्वेनैव, निजाभ्यर्हणं च, देवरात्पुत्रजन्माद्युपदिष्टम् । स्वात्मनि च कृतकृत्यस्य परार्थघटनायामेवोद्यम इत्युत्साहोऽस्य परोपकारविषयेच्छाप्रयत्नरूपो दयापरपर्यायोऽभ्यधिकोऽन्तरङ्गः । अत एव तत्केचिद्दयावीरत्वेन व्यपदिशन्ति, अन्ये धर्मवीरत्वेन ।

ननूत्साहोऽहङ्कारप्राणः शान्तस्त्वहङ्कारशैथिल्याद् द्वैविध्यात्मकः । व्यभिचारित्वं हि विरुद्धस्यापि नानुचितं, रताविव निर्वेदादेः—

"शय्या शाद्वलमासनं शुचिशिला सद्म द्रुमाणामधः
शीतं निर्झरवारि पानमशनं कन्दाः सहाया मृगाः ।
इत्यप्रार्थितसर्वलभ्यविभवे दोषोऽयमेको वने
दुष्प्रापार्थिनि यत्परार्थघटनावन्ध्यैर्वृथा स्थीयते" ॥(नागा-४-२)

इत्यादौ हि परोपकारकरणे ह्युत्साहस्यैव प्रकर्षो लक्ष्यते । न तूत्साहशून्या काचिदप्यवस्था, इच्छाप्रयत्नव्यतिरेकेण पाषाणतापत्तेः, यत एव परिदृष्टपरम्परत्वेन स्वात्मोद्देशेन कर्तव्यान्तरं नावशिष्यते । अत एव शान्तहृदयानां परोपकाराय शरीरसर्वस्वादिदानं न शान्तविरोधि । "आत्मानं गोपाये"-

---

1 समन्ततोऽयं । * योगसूत्रम् (३—१०) † तापसवत्सराजे(१—१७)

दित्यादिना ह्यकृतकृत्यविषयं [1]शरीरलक्षणमुपदिश्यते, सन्न्यासिनां तद्रक्षादितात्पर्याभावात्। तथा हि—

"धर्मार्थकाममोक्षाणां प्राणाः संस्थितिहेतवः।
तान्निघ्नता किन्न हतं रक्षता किं न रक्षितम्" ॥ इति

सुप्रसिद्धचतुर्वर्गसाधकत्वमेव देहरक्षायां निदानं दर्शितम्। कृतकृत्यस्य "जलेऽग्नौ श्वभ्रे वा पते"दिति सन्यासित्वे श्रवणात्। तद्यथाकथञ्चित्त्याज्यं शरीरम्। यदि परार्थं [न] त्यज्यते तत्किमिव न सम्पादितं भवति। जीमूतवाहनादीनां नयतत्त्वमिति चेत् किं तेन, नस्तत्त्वज्ञानित्वं तावदवश्यमस्ति। अन्यथा देहात्ममानिनां देह एव सर्वस्वभूते धर्माद्यनुद्देशेन परार्थे त्यागस्यासम्भवात्।[2]युद्धेऽपि हि न शरीरस्य त्यागायोद्यमः परपराजयोद्देशेनैव प्रवृत्तेः। भृगुपतनादावपि शुभतरदेहान्तरसम्पिपादयिषैवाधिकं विजृम्भते। तत्स्वार्थानुद्देशेन परार्थसम्पत्त्यै यद्यच्चेष्टितं देहत्यागपर्यन्तमुपदेशदानादि तत्तदलब्धात्मतत्त्वज्ञानानामसम्भाव्यमेवेति। "तेऽपि तत्त्वज्ञानिनः, (तत्त्व)ज्ञानिनां सर्वेष्वाश्रमेषु मुक्ति"रिति स्मार्तेषु। श्रुतौ च, यथोक्तम्—

"देवार्चनरतस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः।
[3]श्राद्धं कृत्वा ददद्द्रव्यं गृहस्थोऽपि हि मुच्यते" इति

केवलं परार्थाभिसन्धिजाद्धर्मात्परोपकारात्मकफलत्वेनैवाभिसंहितात् पुनरपि देहस्य तदुचितस्यैव प्रादुर्भावो वोधिसत्त्वादीनां, तत्त्वज्ञानिनामपि (दृष्टः। अङ्गेष्वपि) विश्रान्तिलाभः स्वभावौचित्यात्, यथा रामस्य वीराङ्गं पितुराज्ञां पालयतः। एवं शृङ्गाराद्यङ्गेष्वपि मन्तव्यम्। अत एव शान्तस्य स्थायित्वेऽप्यप्राधान्यम्। जीमूतवाहने त्रिवर्गसम्पत्तेरेव परोपकृतिप्रधानायाः फलत्वात्। अनेनैवाशयेन नाटकलक्षणे वक्ष्यते"ऋद्धिविलासादिभिर्गुणै"(१८-११)रित्यनेन हि ऋद्धिविशाल(विलास?)प्रधानमर्थकामोत्तरं सर्वं चरितं सकललोकहृदयसंवादसुन्दरप्रयोजनं नाटके निवेशयितव्यमित्युक्तम्। एतच्च तत्रैव वर्णयिष्यामः। अनेनैव चाशयेन न शान्ते कश्चन मुनिना जात्यङ्को विनियोक्ष्यते। तेन जात्यङ्कविनियोगाभावात्तदसत्त्वमिति प्रत्युक्तम् ॥

अन्ये तु जीमूतवाहनः, "कस्ते पुत्र त्राता भविष्यती"ति (नागा ४-९) शरणार्थिनीं वृद्धामेव त्रातवान्। शक्तिश्चास्य न काचित्। परहिंसाच न काचिदित्येवमाहुः। तच्चानुमतमेव न हि वोधिसत्त्वानां पुनरप्युत्थानात्मकजीवित-

---

1 शरीरभूततामुप 2 युद्धेऽपि हीन 3 श्रद्धी चरेद्विद्यावित्।

मभिसन्धानानुप्रविष्टं शक्तिश्चेदिति । न च काकतालीयवृत्त्या शास्त्रमुपदिशति । तत्सिद्धं दयालक्षणो ह्युत्साहोऽत्र प्रधानम् । अन्ये तु व्यभिचारिणो यथायोगं भवन्तीति । यथोक्तं "तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः" (योगसू-४-२७) इति । अत एव निश्चेष्टत्वादनुभावाभाव इति प्रत्युक्तम् । यदा तु पर्यन्तभूमिकालाभे तु भावाभावस्तदास्याप्रयोज्यत्वं, रतिशोकादावपि पर्यन्तदशायामप्रयोगस्यैव युक्तत्वात् । हृदयसंवादोऽपि तथाविधतत्त्वज्ञानबीजसंस्कारभावितानां भवत्येव, यद्वक्ष्यति "मोक्षे चापि विरागिण" इति । सर्वस्य त्वित्यत्र हृदयसंवादं (दो?) भयानके वीरप्रकृतेरभावात् ।

ननु तादृशि प्रयोगे वीरस्य क आस्वादः! उच्यते—यत्रेयं (दं?) निबध्यते तत्रावश्यं पुरुषार्थोपयोगिनि शृङ्गारवीराद्यन्यतममस्त्येव । तन्निष्ठस्तेषामास्वादः। यत्रापि प्रहसनादौ हास्यादेः प्रधानता तत्राप्यनुनिष्पादि(त)रसान्तरनिष्ठ *एवास्वादभिन्नादिकार्यम् ... धिकादोऽप्युद्देशे दैव?रूपकभेदचिन्तनं निमित्तमिति केचित् । तस्मादस्ति शान्तो रसः । तथा च चिरन्तनपुस्तकेषु स्थायिभावान्रसत्वमुपनेष्याम (पु-३००) इत्यनन्तरं शान्तो नाम शमस्थायिभावात्मक इत्यादिशान्तलक्षणं पठ्यते । तत्र सर्वरसानां शान्तप्राय एवास्वादो न विषयेभ्यो विपरिवृत्त्या । तन्मुख्यतालाभात्केवलं वासनान्तरोपहित[1]इत्यत्र सर्वप्रकृतित्वाभिधानाय पूर्वमभिधानम् । लोके च पृथक्पृथक्सामान्यस्य न गणनमिति स्थाय्यस्य पृथग्युक्त(ङ्नोक्तः?)सामान्यमपि तु विवेचकेन पृथगेव गणनीयमिति विवेचकाभिमतसामाजिकास्वादलक्षणप्रतीतिविषयतया स पृथग्भूत एव । इतिहासपुराणाभिधानकोशादौ च नव रसाः श्रूयन्ते, श्रीमत्सिद्धान्तशास्त्रेष्वपि । तथाचोक्तं—

"अष्टानामिह देवानां शृङ्गारादीन् [2]प्रदर्शयेत् ।
मध्ये च देवदेवस्य शान्तं रूपं प्रकल्पयेत्" ॥

तस्य च वैराग्यसंसारभीरुतादयो विभावाः । स हि तैरुप[3]निबद्धैर्विज्ञायते । मोक्षशास्त्रचिन्तादयोऽनुभावाः । निर्वेदमतिस्मृतिधृत्यादयो व्यभिचारिणः । अत एवेश्वरप्रणिधानविषये भक्तिश्रद्धे स्मृतिमतिधृत्युत्साहाद्यनुप्रविष्टेभ्योऽन्यथैवाङ्गमिति न तयोः पृथग्रसत्वेन गणनम् । अत्र सङ्ग्रहकारिका—

1 इत्यस्य 2 प्रचारयेत् 3 निबन्धैः ।

* एवास्वादो भिन्नाधिकारिणः । एतदप्युद्देशेनैव रूपक इति स्यात् ।

मोक्षाध्यात्मनिमित्तस्तत्त्वज्ञानार्थहेतुसंयुक्तः ।
निःश्रेयसधर्मयुतः शान्तरसो नाम विज्ञेयः ॥
विभावस्थाय्यनुभावयोगः क्रमाद्विशेषणत्रयेण दर्शितः ।
स्वं स्वं निमित्तमासाद्य शान्ताद्भावः प्रवर्तते ।
पुनर्निमित्तापाये तु शान्त एव प्रलीयते ॥

इत्यादिना रसान्तरप्रकृतित्वमुपसंहृतम् ।

यत्तु डिमे हास्यशृङ्गारपरिहारेण षड्रसत्वं च वक्ष्यते, तत्रायं भावो- "दीप्तरसकाव्ययोनि" (१८-८३) रिति भाविना लक्षणेन रौद्रप्रधाने तावड्डिमे तद्विरुद्धस्य शान्तस्य सम्भावनैव न, किं निषेधेन । शान्तासम्भवे तु दीप्तरसकाव्ययोनिरित्येतेन किं व्यवच्छेद्यं " शृङ्गारहास्यवर्ज, षड्रसयुक्त " (१८-८२) इति ह्युक्ते तत्र प्रसङ्गः ।

ननु करुणबीभत्सभयानकप्राधान्यमनेन पादेन व्यवच्छेद्यते । नैतत्, सात्त्वत्यारभटीवृत्तिसम्पन्नेनैव तन्निरासात् । शान्ते तु सात्त्वत्येव वृत्तिरिति तद्व्यवच्छेदकमेवैतत् । तेन डिमलक्षणं प्रत्युत शान्तरसस्य सद्भावे लिङ्गम् । शृङ्गारस्तु प्रसभसेव्यमानः सम्भाव्य एव । तदङ्गं च हास्य इति तयोरेव प्रतिषेधः कृतः, प्राप्तत्वात्सर्वसाम्याच्च । विशेषतो वर्णदेवताभिधानमनुचितमप्यस्य तत्कल्पितमिति ज्ञेयम् । उपपत्तिस्तु शान्तस्यापि दर्शितैव । सत्त्वाभावो हि हास्यः सहाविभावित्वेन चास्य वीरबीभत्सौ । अत एवास्य रसस्य यमनियमेश्वरप्रणिधानाद्युपदेशेऽनुपयोगितया महाफलत्वं सर्वप्राधान्यमितिवृत्तव्यापकत्वं चोपपन्नमित्यलमतिप्रसङ्गेन ।

तत्त्वास्वादोऽस्य कीदृशः । उच्यते—उपरागदायिभिरुत्साहरत्यादिभिरुपरक्तं यदात्मस्वरूपं तदेव विरलोम्भितरत्नान्तरालनिर्भासमानसिततर-[1]सूत्रवदाभात्स्वरूपं सकलेषु रत्यादिषूपरञ्जकेषु तथाभावेनापि सकृद्विभातोऽयमात्मेति न्यायेन भासमानं परोन्मुखतात्मकसकलदुःखजालहीनं परमानन्दलाभसंविदेकत्वेन काव्यप्रयोगप्रबन्धाभ्यां साधारणतया निर्भासमानमन्तर्मुखावस्थाभेदेन लोकोत्तरानन्दानयनं तथाविधहृदयं विधत्त इति ।

एवं ते नव रसाः पुमर्थोपयोगित्वेन रञ्जनाधिक्येन वेयतामेवोपदेश्यत्वात् । तेन रसान्तरसंभवेऽपि पार्षत[ः]प्रसिध्द्या सङ्ख्यानियम इति यदन्यैरुक्तं तत्प्रत्युक्तम् । भावाध्यायेऽपि चैतद्वक्ष्यते । आर्द्रतास्थायिकः स्नेहो रस इति त्वसत् ।

---

1 सूत्रं यदाह तत्स्वरूपं ।

एवमेते रसा [1]ज्ञेया नव लक्षणलक्षिताः ।
अत ऊर्ध्वं [2]प्रवक्ष्यामि भावानामपि लक्षणम् ॥

इति श्रीभारतीये नाट्यशास्त्रे रसाध्यायः षष्ठः

स्नेहो ह्यभिषङ्गः। स च सर्वो रत्युत्साहादावेव पर्यवस्यति। तथा हि—बालस्य मातापित्रादौ स्नेहोदये विश्रान्तो, यूनोर्मित्रजने, रतौ, लक्ष्मणादौ भ्रातरि स्नेहो धर्मविरम एव । एवं वृद्धस्य पुत्रादाविति द्रष्टव्यम्। एषैव गन्धस्थायिकस्य लौल्यरसस्य प्रत्याख्याने सरणिर्मन्तव्या, हासे वा रतौ वान्यत्र पर्यवसानात्। एवं भक्तावपि वाच्यमिति ।

अध्यायार्थमुपसंहरन् भाविनोऽवकाशं ददत्सङ्गतिं प्रकटीकर्तुमाह—एवमेते रसा ज्ञेया नवेति। रसवद्गीत(त्पीत?)मित्यादिव्यपदेशात् स्तूयते। समूला एवोपचारा इति दर्शयति लक्षणलक्षणानीति । भवनादिलक्षणं रसलक्षणमेव पूर्यते, रतिस्थायिभावप्रभवः ऋतुमाल्यादिविभावको नयनचातुर्याद्यनुभावक इत्युक्तमपि साकाङ्क्षमेव। कीदृशी हि रतिः कश्च विभावः, कश्चानुभावः। तेन यद्यप्यापाततो भावानां लक्षणमिदं प्रतिभाति महाचार्या (वाक्यात्?) तथापि वाक्यैकवाक्यतया रसलक्षणमेवेदमित्यापिशब्दस्यार्थ इति शिवम् ।

इ(र?)त्यादिशक्त्यष्टकमध्यवृत्ति-
र्यस्य स्वहृन्मण्डलसम्प्रयोज्या (ज्यः?)।
स्थायी शिवश्चेतसि तेन वृत्तिः
कृता रसाध्याय इह क्रमेण ॥

इति श्रीमहामाहेश्वराभिनवगुप्तविरचितायां
नाट्यवेदविवृतावभिनवभारत्यां
रसाध्यायः षष्ठः
समाप्तः

---

1 ज्ञेयास्त्वष्टौ 2 प्रवक्ष्यामो

1 वेदवृत्तौ ।

श्री

नाट्यशास्त्रम्

अथ सप्तमोऽध्यायः

भावानिदानीं व्याख्यास्यामः[1]। अत्राह—भावा[2] इति कस्मात्, किं भवन्तीति भावाः,[3] किं वा भावयन्तीति भावाः[4]। [5]उच्यते—वागङ्गसत्त्वोपेतान्काव्यार्थान्भावयन्तीति भावा इति[6]।

अथ सप्तमोऽध्यायः

स्थायी प्रबुद्धहृदये व्यभिचारिभूतः
 कामाकुलासु जनतासु महानुभावः।
अन्तर्विभावविषयो रसमात्रमूर्तिः
 श्रीमान्प्रसन्न हृदयोऽस्तु मम त्रिणेत्रः॥

भावानिदानीमिति। नन्वध्यायान्त एवैतदासूत्रितमिति किमनेन पुनरुक्तेन। "भावाश्चापि कथं प्रोक्ताः" (अ ६-३) इत्यत्रैव प्रश्ने कृते पुनरिहाध्याये किं भवन्तीत्यादि च किमर्थमुच्यते।

अत्र केचिदाहुः—भावाश्चापीत्यध्यायादौ भावानामपि लक्षणमित्यध्यायान्ते च विभावादीनां सर्वे साधारण्येन प्रश्नप्रतिज्ञादि। अधुना तु विभावादिषु वक्तव्येषु प्रथमं तावत्प्राधान्याच्चित्तवृत्तिरूपाः स्थायिव्यभिचारिणो लक्षणीया इति तद्विषयैवेयं प्रतिज्ञा प्रश्नश्च।

वयं तु ब्रूमः—भावशब्देन तावच्चित्तवृत्तिविशेषा एव विवक्षिताः। तथा च एकोनपञ्चाशता भावैरित्यादौ तानेवोपसंहरिष्यामि। तेषां तु योग्यतावशाद्यथायोगं स्थायिसंचारिविभावानुरूपता संभवति। ये त्वेते ऋतुमाल्यादयो विभावा बाह्याश्च बाष्पप्रभृतयोऽनुभावास्ते न भावशब्दव्यपदेश्याः।

---

1 कचद - वक्ष्यामः 2 ड - भाव 3 ड - किं भवतीति भावः 4 ड किं वा भावयतीति भावः ख - किं भावयन्तीति वा 5 न - अत्रोच्यते 6 न - भावयतीति भावः। भवति चात्र श्लोकः। वागङ्गमुखरागैश्च सत्त्वेनाभिनयेन च। कवेरन्तर्गतं भावं भावयन्भाव उच्यते॥ भू इति करणे धातुः।

ननु (ते) संवित्स्वभावे निमज्जनादत एव उन्मज्जनाच्च तेऽपि संविदात्मकाः। एवं तर्हि विश्वमेव भावमयं स्यादुपचारात्, विज्ञानवादाश्रयाद्वेति अभिनयधर्म्यादीनां पृथक्तानुपपत्तिः। तस्मात्स्थायिव्यभिचारिसात्त्विका एव भावाः। विभावानुभावानां च प्रासङ्गिकं लक्षणमेतच्च वक्ष्यामः।

यच्च पौनरुक्त्यं चोदितं तदसत्। तथा हि—रसाध्यायप्रारम्भे चोदितमङ्गमध्ये भावा अनुद्दिष्टा एव कथं तत्र तत्रोदीरिता इति तन्निराकरणार्थमाह भावानिति। यतोऽतीताध्यायान्ते भावानां लक्षणं रसलक्षणमेव, अत इदानीमपि गतचोद्यांशकेऽवसरे भावान्वक्ष्यामो रसानामङ्गमध्ये पठितत्वादिति।

ननु चित्तवृत्त्यात्मान एव चेद्भावास्तर्ह्येतेषु व्युत्पत्तिद्वयमपि संभाव्यते। तथा हि भवति रतिभूतप्रादुर्भावे प्रकर्षगतिश्च पुनरभिधानात्तेन येन तरतमपूर्वतयैव प्रादुर्भवति न तु क्षणं व्यवतिष्ठते। तेभ्यो भावाच्चित्तवृत्त्यात्मानुभावज्ञानस्य परिमितकालभावित्वात्, यदि वा भावयन्ति आस्वादनं कुर्वन्ति हृदयं व्याप्नुवन्तीति[1] ततश्च व्युत्पत्तिद्वयसंभावनात्कथं भवन्तीति पक्षमनाशङ्क्यैव किं वा ते भावयन्तीति प्रश्नो युक्त इत्यभिप्रायेणानुद्भिन्नमर्थं प्रश्नस्योद्भेदयत्प्रश्नार्थमेवानुभाषते [2]किं भवतीत्यादि। किं भवन्ति भावयन्ति वा, भवन्ति च किमेतत्कुर्वन्ति व्याप्नुवन्ति वा, तत्र च द्वयेऽपि किं कर्म।

एवं प्रश्नार्थमनुभाष्योत्तरमाह वागङ्गसत्त्वोपेतानित्यादि। कोः कवतेर्वा कवनीयं काव्यं तत्र च पदार्थवाक्यार्थौ रसेष्वेव पर्यवस्यत इत्यसाधारण्यात्प्राधान्याच्च काव्यस्यार्थाः रसाः। अर्थ्यन्ते प्राधान्येनेत्यर्थाः। न त्वर्थशब्दोऽभिधेयवाची। स्वशब्दानाभिधेयत्वं हि रसादीनां ध्वनिकारादिभिर्दर्शितम्। तच्च मदीयादेव तद्विवरणात्सहृदयालोकलोचनादवधारणीयमिह तु यथावसरं वक्ष्यत एव।

एवं काव्यार्थान्रसान्भावयन्ति कुर्वते स्थायिव्यभिचारिकलापेनैव ह्यास्वाद्यो लौकिकार्थो निवर्तते। पूर्वं हि स्थाय्यादिकमागच्छतीतः सर्वसाधारणतयास्वादयन्ति। तेन पूर्वावगमगोचरीभूतः सन्नुत्तरे भूमिकभागिनः आस्वाद्यस्य भावको निष्पादक उच्यते। तेन भावयन्तीति करणे दर्शयतिवागङ्गेति। वागादयस्तत्कर्मसु वर्तन्ते तेन वर्णनात्मना वाचिकेन संनिवेशवलनादीनां गीतेनान्तर्बहिरात्मना (अङ्गेन) सात्त्विकेन करणभूतेनोपेतान् संबद्धान् करणं

1 व्याप्यानुभवन्तीति 2 किं भवतीत्यादि।

भू इति करणे धातुस्तथा च भावितं वासितं कृत-मित्यनर्थान्तरम्[1] । [2]लोकेऽपि च प्रसिद्धमहो ह्यनेन

हि कर्मणि कर्तरि च यद्यपि संवध्यते तथापि हास्यप्राधान्यात्संबन्धदृशि करणत्वमेव दर्शयितुं तृतीयादि निर्दिश्यते[1] वागङ्गमुखरागेणेति । अत आहा-र्ये तु यद्यपि नयत्कलताध्रुवयातोरङ्गमत् (यद्यभिनयकलना ध्रुवपातयोरङ्गवत्?) तथापि तदनन्तरं चित्तवृत्त्यपगतौ वाचिकादीनामेवान्तरङ्गता । तथा हि काव्यादपि रसास्वादा भवन्तीत्युक्तम् । तत्र च न पूर्णताहार्यस्य तेनास्य नोपादानम् । एतदुक्तं भवति—चित्तवृत्तय एवालौकिकाः । वाचिकाद्यभि-नयप्रक्रियारूढतया स्वात्मानं लौकिकदशायामनास्वाद्यं कुर्वन्तीत्यतस्त एव भावाः । भवतेर्हि ण्यन्तः प्राकृतं करोत्यर्थमाहेति दर्शयति भू इतीति । तकार उच्चारणार्थः । णिचा संबन्धेनेति इति इकारे प्रत्यये सति भूधातुः करोत्यर्थे वर्तते । एतदेवोपसंहरति भावमिति (भावितमिति ?) । अनर्थान्तरमिति एकोऽर्थ इति यावत् ।

नन्वास्वाद्यान्तरान्तर्भावे भार्ये (कार्ये?) वाचिकादौ करण इतिकर्तव्यतांशे वक्तव्य इत्याशङ्क्य तन्त्रेण व्युत्पत्त्यन्तरं दर्शयन् तमाह लोकेऽपि वे(च?)ति । न केवलं भावितं कृतमिति लोके प्रसिद्धम् । यावद्व्या-प्तमित्यपि एतदपि चेत्यनेनोक्तम् । सर्वमित्येतद्गन्धरसमपि ।

ननु तत्रापि कृतमित्येवार्थोऽस्त्वित्याशङ्क्याह तच्च व्याप्त्यर्थमिति । न हि कस्तूरिकागन्धेन प्रस्तुतं तद्गन्धं क्रियते गुणस्यासंक्रान्तेः, न च तत्सदृ-शगुणान्तरोत्पत्तिः । यावद्द्रव्यभावित्वाद्गन्धादीनां वस्त्रादौ च विनाशप्रतिपत्तेः केवलं कस्तूरिकाद्रव्यमेव तावद्रूपदेशचैतन्याक्रमणस्वभावं वस्त्रादिकेऽपि तथा प्रतिपत्तिमाधत्ते । तद्वत्प्रकृतेऽपि । त एव वाचिकाद्या अभिनयाः प्रमुखदशायां देशकालविशेषगतत्वेन यद्यपि भान्ति, तथापि नटस्य निर्गुणादिह न तत्त्वात् रामादेः परमार्थसत्त्वाद् भ्रान्तिज्ञानाभावाच्च नियततां विजहतः साधारणी-

---

1 ड - भाव इति कारणसाधनं यथा भावितः वासितः कृत इत्यर्थान्तरम् त - भाव इति व्याप्तमर्थान्तरम् 2 ख - लोकेऽपि च सिद्धं ड - लोकेऽपि सिद्धं न - लोकेऽपि च दृष्टं ।

1 दीनि दृश्यन्ते ।

[1]गन्धेन रसेन वा [2]सर्वमेव भावितमिति [3]तच्च व्याप्त्यर्थम् । श्लोकाश्चात्र—

विभावैराहृतो योऽर्थो ह्यनुभावैस्तु [4]गम्यते ।
वागङ्गसत्त्वाभिनयैः स भाव इति संज्ञितः ॥ २ ॥

भावमनुप्राप्ताः सामाजिकजनमपि मृगमदामोददिशा व्याप्नुवन्ति । स्वचित्तवृत्तिव्यापनाद्वारेण तेन भावयन्ति सामाजिकात्मानमिति भावाः ।

अथ व्युत्पत्त्यन्तरमपि दर्शयितुं प्राक्तनीं च व्युत्पत्तिं संग्रहीतुमाह श्लोका श्चात्रेति। विभावो विषयस्तेन यः आहृतो निष्पादितस्तेन विभावापेक्षया भाव्यते क्रियत इति भावः ।

अनुभावानेभ्यो निरूपयति वागङ्गेति । अन्ये तु वागङ्गसत्त्वाद्यभिनया येषामिति तद्गुणसंविज्ञानेन बहुव्रीहिणा स्वाभिनयसंहिता व्यभिचारिणो गृहीताः, तैरिति व्यभिचारिभिश्च भाव्यते मिश्रीक्रियत इति व्यभिचारिणामपि च व्यभिचारिणो भवन्ति।यथा निर्वेदस्य चिन्ता श्रमस्य निर्वेद इत्यादि निरूपयन्ति । तच्चासत् । स्थायिनो हि व्यभिचारिता भवति, न तु व्यभिचारिणां स्थायिता । एवं हि सति तदास्वादे रसान्तरमपि स्यात् । यत्रापि व्यभिचारिणि व्यभिचार्यन्तरं संभाव्यते, तद्यथा—पुरूरवस उन्मादेऽपि तर्कचिन्तादि, तत्रापि रतिस्थायिभावस्यैव व्यभिचार्यन्तरयोगः । स केवलममात्यस्थानीयेनोन्मादेन कृतोपरागः । एतच्च यथा नरेन्द्र (अ-७-२२) इत्यत्र वक्ष्यामः ।

एवं लोकानुसारेण कविनटशिक्षोपयोगिना व्युत्पत्त्यन्तरमभिधाय सामाजिकाभिप्रायेण यो व्युत्पत्तिद्वयनिरूपितोऽर्थः, तत्संग्रहाय श्लोकद्वयमाह वागङ्गमुखरागेणेति । वागङ्गमुखरागात्मनाभिनयेन सत्त्वलक्षणेन चाभिनयेन करणेन कवेः साधारणं तदापि वर्णनानिपुणस्य यः अन्तर्गतोऽनादिप्राक्तनसंस्कारप्रतिभानमयो, न तु लौकिकविषयजः, रागान्त एव देशकालादिभेदाभावात्सर्वसाधारणीभावेनास्वादयोग्यस्तं, भावयन् आस्वादयोग्यीकुर्वन् ।

---

1 न - रसेन गन्धेन 2 म - सर्वं 5 न तच्च व्याप्त्यर्थे उ - अपि च व्याप्त्यर्थम् 3 म - अत्र श्लोका भवन्ति -- 4 ड - विभावेनाहृतो योऽर्थस्त्वनुभावेन, च - विभावेनोद्धृतो योऽर्थस्त्वनुभागैश्च ।

वागङ्गमुखरागेण[1] सत्त्वेनाभिनयेन च ।
कवेरन्तर्गतं भावं भावयन्भाव उच्यते ॥ ३॥
नानाभिनयसंबद्धा[2]न्भावयन्ति रसानिमान् ।
यस्मात्तस्मादमी भावा विज्ञेया नाट्ययोक्तृभिः ॥ ४

[3]अथ विभाव इति कस्मात् । उच्यते—विभावो नाम विज्ञानार्थः[4] । विभावः[5] कारणं निमित्तं हेतुरिति पर्यायाः[6] । [7]विभाव्यतेऽनेन वागङ्गसत्त्वाभिनय इति विभावः[8] । यथा विभावितं विज्ञातमित्यनर्थान्तरम्[9] ।

भावश्चित्तवृत्तिलक्षण एवोच्यते । सत्त्वं चित्तैकाग्र्यं तज्जनितं च कृतकं बाष्पादिप्राप्त्यवस्थात्मकं व्यभिचारिपरातिशयप्राप्त्यतिशयात्मकं चेति यथायोगं मन्तव्यम् । तदन्तर्भूतोऽपि वैवर्ण्यात्मा मुखरागः प्राधान्यात्पुनरुक्तः, यद्वक्ष्यति—

"शाखाङ्गोपाङ्गसंयुक्तः कृतोऽप्यभिनयः शुभः ।
मुखरागविहीनस्तु नैव शोभान्वितो भवेत् ॥" इति ।

अथेति कर्तव्यतां निरूपयितुं संग्रहश्लोकमाह नानाभिनयेति । रसनयोग्यान् चित्तवृत्तिविशेषान् भावयन्ति गमयन्ति बोधयन्ति बुद्धिविषयान् प्रापयन्ति इमान् सामाजिकान् भावयन्ति । बुद्ध्यर्थत्वाद् द्विकर्मकः । अभिनयसंहितानित्यभिनया अपि बुद्धिगोचरं नीयन्ते । इयमेव चासौ अधिवासनात्मा भावना तथा तथा रसान् रसनयोग्यान्निजेन योग्येन रूपेण भावयति । यथा निर्वेदोपरक्ता रतिरौत्सुक्योपरक्तेति तथा रसानलौकिकास्वादविषयान् स्थायिनोऽधिवासयन्ति । लौकिकरतिवासनानुविद्धो हि शृङ्गाररस इत्यादिविभावेनाहृत इत्युक्तम् ।

---

1 म - मुखरागेण. 2 ड - संबन्धाब् 3 न - अत्राह. 4 न - विज्ञातार्थः 5 - ड - विभावो विज्ञानार्थः 6 न - करणं निमित्तहेतुरिति. 7 ड - पर्यायः विभाव्यन्ते...नया इति. 8 च - इत्यतो 9 ड - विज्ञातमित्यर्थान्तरम् ।

[1]अत्र श्लोकः—

बह्वोऽर्था विभाव्यन्ते वागङ्गाभिनयाश्रयाः[2] ।
अनेन यस्मात्तेनायं विभाव इति संज्ञितः ॥ ६ ॥

अथानुभाव इति कस्मात् । उच्यते—

[3]अनुभाव्यतेऽनेन वागङ्गसत्त्वकृतोऽभिनय इति ।

अत्र श्लोकः—

[4]वागङ्गाभिनयेनेह [5]यतस्त्वर्थोऽनुभाव्यते ।
[6]शाखाङ्गोपाङ्गसंयुक्तस्त्वनुभावस्ततः स्मृतः[7] ॥ ७ ॥

तत्र यद्यपि प्रकरणाच्चित्तवृत्त्युद्भवहेतुर्विषयो विभावशब्दस्यार्थ इति ज्ञातं तथापि तत्र प्रवृत्तिनिमित्तं जिज्ञास्यमानः तदेव प्रश्नयति विभाव इतीति तस्माद्दतुमाल्यादयोऽत्र विभावशब्देन किमिति व्यपदिष्टा इति भावः।

अत्रोत्तरं विभाव्यन्त इत्यादि। वागादयोऽभिनया येषां स्थायिव्यभिचारिणां ते वागाद्यभिनयसहिता विभाव्यन्ते विशिष्टतया ज्ञायन्ते यैस्ते विभावाः। अभिनयानामनेकहेतुजत्वम् । तद्यथा—हर्षादिभ्यो हासः घर्मधूमरोगादिभ्यो बाष्पः तद्बाष्पार्तिक प्रतीयन्तां विभावात्तु झडित्येव निश्चयः। अत एव ...*

---

1 ४ न - भवति चात्र 2 म - नयोद्भवाः- ड - नयाश्रिताः 3 न - यदयमनुभावयंति नानार्थनिष्पन्नान्वागङ्गसत्त्वकृताभिनयानिति च - यदयमनुभावयति नानार्थाभिनिष्पन्नो वागङ्गसत्त्वकृतोऽभिनय इति 4 च - वागङ्गसत्त्वाभिनयैर्यस्मादर्थो विभाव्यते 5 म - यतः स्वार्थो 6 च -वागङ्गोपाङ्ग 7 ड - संयुक्तिस्त्वनुभावस्ततः स्मृतः।

---

*एतस्मात्प्रभृति नवमाध्यायपर्यन्तं व्याख्या पतिता, महता प्रयासेनापि नोपलब्धा। यदि लब्धभागस्य ग्रन्थान्तं मुद्रणावस्थायामन्वहं प्रयतमाणानामस्माकं त्रुटितो व्याख्याभागो नोपलभेत तदा महाग्रन्थसूत्रविच्छेदामङ्गल्यपरिहरणाय सुकुमारजनमनःपरिबोधनाय चास्माभिरेव रचितां व्याख्यां सर्वथानुचितमप्यस्मिन्नेव ग्रन्थान्तमनु योजयिष्यामः।

[1]एवं ते विभावानुभावसंयुक्ता भावा इति व्याख्याताः[2]। अतो ह्येषां[3]भावानां सिद्धिर्भवति [4]तस्मादेषां भावानां विभावानुभावसंयुक्तानां लक्षणनिदर्शनान्यभिव्याख्यास्यामः। तत्र विभावानुभावौ लोकप्रसिद्धौ[5] [6]लोकस्वभावानुगतत्वाच्च [7]तयोर्लक्षणं नोच्यतेऽतिप्रसङ्गनिवृत्त्यर्थम्[8]।

[9]भवति चात्र श्लोकः—

लोकस्वभावसंसिद्धा लोकयात्रानुगामिनः। [10]
[11]अनुभावा विभावाश्च ज्ञेयास्त्वभिनये बुधैः[12]॥ ९॥

तत्राष्टौ भावाः स्थायिनस्त्रयस्त्रिंशद्व्यभिचारिणः [13]अष्टौ सात्विका इति त्रिभेदाः[14]। एवमेते काव्यरसाभिव्यक्तिहेतव [15]एकोनपञ्चाशद्भावाः प्रत्यवगन्तव्याः[16]। एभ्यश्च सामान्यगुणयोगेन रसा निष्पद्यन्ते[17]।

[18]अत्र श्लोकः—

योऽर्थो हृदयसंवादी तस्य भावो रसोद्भवः।
शरीरं व्याप्यते[19]तेन [20]शुष्कं काष्ठमिवाग्निना ॥१०॥

---

1 ड - एवमेते 2 ड - इत्यवगन्तव्याः न - इत्यभिव्याख्याताः 3 ड - अतश्चैषां 4 ड - तस्मादेतेषां 5 ड - लोके प्रसिद्धावेव द - विभावानुभावा लोकप्रसिद्धावेव 6 ड - लोकस्वभावोपगताच्चैषां द - लोकः स्वभावानुगत इत्येषां 7 च - अनयोः प - एतयोः 8 ड - निवृत्त्यर्थं च 9 च - अत्र 10 ड - यायिनः 11 म - अनुभाव द - विभावाश्चानुभावाश्च 12 ड - अभिनयैर्बुधैः 13 ढ - अष्टौ च 41 ड - इति भेदाः 15 त - पञ्चाशद्भावा 16 त - इत्यवगन्तव्याः 17 द - निर्वर्त्यन्ते ढ - निष्पाद्यन्ते. 18 द - भवति चात्र 19 न - वाप्यते 20 च - शुष्ककाष्ठ ॥

अत्राह—यदि काव्यार्थ[1]संश्रितैर्विभावानुभावव्यञ्जितैरेकोनपञ्चाशद्भावैः[2] सामान्यगुणयोगेनाभिनिष्पद्यन्ते[3] रसास्तत्कथं [4]स्थायिन एव भावा रसत्वमाप्नुवन्ति[5]। [6]उच्यते—यथा हि [7]समानलक्षणास्तुल्यपाणि[8]पादोदरशरीराः समानाङ्गप्रत्यङ्गा[9] अपि पुरुषाः कुलशीलविद्याकर्मशिल्प[10]विचक्षणत्वाद्राजत्वमाप्नुवन्ति तत्रैव चान्येऽल्पबुद्धयस्तेषामेवानुचरा भवन्ति,[11] तथा विभावानुभावव्यभिचारिणः स्थायिभावानुपाश्रिता[12] भवन्ति। [13]बह्वाश्रयत्वात्स्वामिभूताः स्थायिनो भावाः[14] तद्वत्स्थानीयपुरुषगुणभूता अन्ये भावास्तान्गुणतया श्रयन्ते[15] [स्थायिभावा रसत्वमाप्नुवन्ति] परिजनभूता व्यभिचारिणो भावाः। [16]अत्राह को दृष्टान्त इति।[17]यथा नरेन्द्रो बहुजनपरिवारोऽपि सन्स एव नाम लभते नान्यः [18]सुमहानपि पुरुषः।[19]तथा विभावानुभावव्यभिचारिपरिवृतः[20] स्थायी भावो[21]रसनाम लभते।

---

1 द - सम्मिश्रैः न - संज्ञितैः ड - यदान्येनार्थसंश्रितैः च - यदान्योऽन्यार्थसम्भूतैः 2 द - पञ्चाशता भावैः 3 द - निष्पाद्यन्ते 4 ड - कथमिदानीमेषां स्थायिनोऽष्टौ भावाः 5 ड आप्नुवन्ति 6 न - अत्रोच्यते ड उच्यते एवमेतदिति। कस्मात् 7 न - समानलक्षणं 8 द - पादशरीरोदराः ड - पादोदरसमानाः 9 द - प्रत्यङ्गिनः ड - समानप्रत्यङ्गाः 10 द - विचक्षणाः ड - विचक्षणत्वयुक्ताः 11 ढ - अनुचरन्तो भवन्तीति 12 द - स्थायिभावानामनुसंश्रिता ड - भावानुसृता 13 द - निराश्रयत्वात् ड - इत्याश्रयत्वात्स्वामिभूताश्च 14 म - तद्वत्स्थायिनीव द - तद्वत्स्थायिनि वपुषि च - तत्स्थानीय 15 द - भावास्तानुपाश्रयन्ते ड - गुणवत्तयाश्रयन्ते 16 म - संज्ञकादर्शे 'अत्राह को दृष्टान्त इति' इति नास्ति 17 न - यथा हि 18 द - प्रमहानपि 19 द - तथा च बहुषु गच्छत्सु कश्चित्कचित्पृच्छति कोऽयमिति (ड - को यातीति) स च तमाह राजेति। एवं हि (ड - एवं तु) 20 - वृतः च - परिष्कृतः 21 न - रसत्वं लभते नरेन्द्रवत्।

भवति चात्र श्लोकः—

यथा नराणां नृपतिः शिष्याणां च यथागुरुः[1] ।
एवं हि सर्वभावानां भावः स्थायी महानिह ॥१२॥

लक्षणं खलु पूर्वमभिहितमेषां[2] रस[3]संज्ञकानां निदर्शनं तु । इदानीं भावसामान्यलक्षणमभिधास्यामः[4] ।

[5]तत्र स्थायिभावान्वक्ष्यामः[6]—

[7]रतिर्नाम [8]प्रमोदात्मिका [9]ऋतुमाल्यानुलेपनाभरणभोजनवरभवनानुभवनाप्रातिकूल्यादिभिर्विभावैः समुत्पद्यते[10] । [11]तामभिनयेत्स्मितवदनमधुरकथन[12]भ्रूक्षेपकटाक्षादिभिरनुभावैः ।

[13]अत्र श्लोकः—

इष्टार्थविषयप्राप्त्या रतिः समुपजायते[14] ।
[15]सौम्यत्वादभिनेया सा वाङ्माधुर्याङ्गचेष्टितैः[16] ॥१४॥

[17]हासो नाम—[18]परचेष्टानुकरणकुहकासम्बद्धप्रलाप[19]पौरोभाग्यमौर्ख्यादिभिर्विभावैः [20]समुत्पद्यते । तमभिनयेत्पूर्वोक्तैर्हसितादिभिरनुभावैः ।

---

1 द - गुरवो यथा 2 द - हितमेतेषां 3 द - संज्ञानामिदानीं 4 न - अभिव्याख्यास्यामः 5 ड - तत्रादौ 6 न - भावानेव तावद्वक्ष्यामः 7 ड - तत्र रतिर्नाम न - तत्राह रतिर्नाम 8 ड - आमोदात्मको भावः स द - आत्मानात्मिको भावः स च 9 ड - ऋतुमाल्यानुलेपनाभरणप्रियजनवरभवनानु 10 न - भावैरुत्पद्यते च - विभावैरुत्पद्यते 11 ड - तमभिनयेत् 12 ड - मधुरवचन 13 ड -भवति चात्र 14 ड - रतिरित्युपजायते 15 न - सौम्यत्वात्साभिनेतव्य· ड - सौम्यत्वादभिनेयोऽसौ 16 द - माधुर्याङ्गविचेष्टितैः 17 द - तत्राह ड - अथ हासो 18 ड - परचेष्टानुकरणासम्बन्ध द - परचेष्टानुकरणसमुत्थप्रलापपौरोभाग्यमौग्ध्यादिभिः 19 म - दौर्भाग्य 20 द - उत्पद्यते ।

भवति चात्र श्लोकः—

परचेष्टानुकुरणाद्धासः समुपजायते ।
[1]स्मितहासातिहसितैरभिनेयः स पण्डितैः ॥ १८ ॥

[2]शोको नाम—इष्टजनवियोगविभवनाश[3]वधबन्ध-[4]दुःखानुभवनादिभिर्विभावैः समुत्पद्यते[5] । [6]तस्यास्रपात-[7]परिदेवितविलपितवैवर्ण्यस्वरभेदस्रस्तगात्रता[8]भूमिपतनसस्वनरुदिताक्रन्दितदीर्घनिःश्वसितजडतोन्मादमोहमरणादिभिरनुभावैरभिनयः प्रयोक्तव्यः । रुदितमत्र त्रिविधं—आनन्दजमार्तिजमीर्ष्यासमुद्भवं चेति[9] ।

[10]भवन्ति चात्रार्याः—

[11][आनन्देर्ष्यार्तिकृतं त्रिविधं रुदितं सदा बुधैर्ज्ञेयम् ।
तस्य त्वभिनययोगान्विभावगतितः प्रवक्ष्यामि ॥]
हर्षोत्फुल्लकपोलं सानुस्मरणा[12]दपाङ्गविसृतास्रम्[13] ।
[14]रोमाञ्चगात्रमानिभृतमानन्दसमुद्भवं भवति ॥ १९ ॥
पर्याप्तविमुक्तास्रं[15] सस्वनमस्वस्थगात्रगतिचेष्टम्[16] ।
[17]भूमिनिपातनिवर्तितविलपितामित्यार्तिजं भवति ॥ २० ॥

1 द - स्मितहासादि 2 क च न द ख - संज्ञकेष्वादर्शेषु हासलक्षणात्परमेव रतिलक्षणमुक्तम् 3 म - वधबन्धन 4 च - दुःखानुभावादिभिः 5 च - उत्पद्यते 6 ढ - तस्याश्रुपात 7 च - विलपितपरिदेवित 8 न - भूमिपाताक्रन्दितविचेष्टितदीर्घ ट - भूमिपाताक्रन्दितविवेष्टितदीर्घ 9 च कृतं चेति 10 च - तत्र ड - तत्रार्याः ढ - तत्रार्या भवन्ति 11 म - संज्ञकादर्श एव वर्तते 12 ड - सानुस्मरणं च वागनिभृतास्रम् 13 न - निभृतास्रम् 14 ग - रोमाञ्चपुलकसंकुलं ड - रोमाञ्चितगण्डं रोदनमानन्दजं 15 न - विमुक्ताश्रु 16 च - मतिचेष्टम् ट - गतिचेष्टाः 17 ग - भूमिपातविवर्तित न - भूमिपतनविवर्तन ढ - भूमिनिपातितचेष्टित ।

प्रस्फुरितोष्ठकपोलं सशिरःकम्पं [1]तथा सनिःश्वासम्[2]।
भ्रुकुटीकटाक्षकुटिलं स्त्रीणामीर्ष्याकृतं भवति ॥२१॥
स्त्रीनीच[3]प्रकृतिष्वेष शोको व्यसनसम्भवः ।
धैर्येणोत्तममध्यानां नीचानां रुदितेन च[4] ॥ २२ ॥

क्रोधो नाम—[5]आधर्षणाक्रुष्टकलहविवादप्रतिकूलादिभिर्विभावैः [6]समुत्पद्यते। [7]अस्य विकृष्टनासापुटोद्वृत्तनयनसन्दष्टोष्ठपुट[8]गण्डस्फुरणादिभिरनुभावैरभिनयः प्रयोक्तव्यः ।

रिपुजो गुरुजश्चैव प्रणयिप्रभवस्तथा ।
भृत्यजः कृतकश्चेति क्रोधः पञ्चविधः स्मृतः ॥ २४ ॥

[9]अत्रार्या भवन्ति—

भ्रुकुटीकुटिलोत्कटमुखसन्दष्टोष्ठः[10]स्पृशन्करेण करम् ।
[11]क्रुद्धः स्वभुजप्रेक्षी शत्रौ निर्यन्त्रणं रुष्येत् ॥ २६ ॥
किञ्चिद्वाङ्मुखदृष्टिः [12]सास्रः स्वेदापमार्जनपरश्च ।
[13]अव्यक्तोल्बणचेष्टो [14]गुरौ विनययन्त्रितो रुष्येत् ॥२७॥

---

1 ड - तथा च 2 प - निश्वानम् 3 ड - प्रकृतिष्वेष म - प्रकृतिरयं 4 न - रुदितेन च । आर्या च--

कारणमवेक्षमाणः प्रायेणायासलिङ्गसंयुक्तः ।
वीररसोत्तरचारी कार्यः कृतको भवति शोकः ॥

5 य - आधर्षणक्रुष्ट च - आधर्षणात्कलह 6 ड - उत्पद्यते 7 ढ - तमभिनयेत्फुल्लनासा ..रनुभावैः. न - तमुत्फुल्लनासा....स्फुरणादिभिरनुभावैरभिनयेत् 8 च - गल्लस्फुरणादिभिः 9 ड - आर्या भवन्ति 10 च - मुखसन्दष्टौष्ठः 11 ड - स्पृष्टभुजशिखरवक्षाः शत्रोर्विनियन्त्रणं कुप्येत् 12 न - क्रुद्धः स्वभुजापेक्षी च - धृष्टः स्वभुजप्रेक्षी शत्रोर्निर्यन्त्रणं प - क्रुद्धः स्वभुजाक्षेपी 12 ड - किञ्चित्स्वेदापमार्जनपरश्च 13 न - नातिव्याकुलचेष्टो 14 ड - गुरोर्निर्यन्त्रणं रुष्येत् प - गुरोर्विनययन्त्रिणं रुष्येत् च - गुरोर्विनययन्त्रितं रुष्येत् ।

[1]अल्पतरप्रविचारो [2]विकिरन्नश्रूण्यपाङ्गविक्षेपैः ।
सभ्रुकुटीस्फुरितोष्ठः[3] [4]प्रणयोपगतां प्रियां रुष्येत् ॥
[5]अथ परिजने तु रोषस्तर्जननिर्भर्त्सनाक्षिविस्तारैः[6] ।
विप्रेक्षणैश्च विविधैरभिनेयः क्रूरतारहितः[7] ॥ २९ ॥
कारणमवेक्षमाणः प्रायेणायासलिङ्गसंयुक्तः ।
[8]वीररसान्तरचारी कार्यः कृतको भवति कोपः[9] ॥ ३० ॥

उत्साहो नाम—उत्तमप्रकृतिः । [10]स चाविषाद-शक्ति[11]धैर्यशौर्यादिभिर्विभावैरुत्पद्यते[12] । [13]तस्य स्थैर्यधैर्या-स्यागवैशारद्यादिभिरनुभावैरभिनयः प्रयोक्तव्यः ।

[14]अत्र श्लोकः—

[15]असम्मोहादिभिर्व्यक्तो व्यवसायनयात्मकः ।
उत्साहस्त्वभिनेयः स्यादप्रमादोत्थितादिभिः[16] ॥ ३२ ॥

भयं नाम—स्त्रीनीचप्रकृतिकं गुरुराजापराधश्वापद-शून्यागाराटवी[17]पर्वतगहन[18]गजाहिदर्शननिर्भर्त्सनका-न्तारदुर्दिननिशान्धकारोलूक[19]नक्तञ्चरारावश्रवणादिभिर्वि-भावैः समुत्पद्यते[20] । तस्य[21] प्रकम्पितकरचरणहृदयकम्पन-

---

1 न - अल्पकरव्यभिचारो 2 ग - विहरन् च - विरहन् 3 ड - स्फुरदोष्ठः 4 न - प्रणयोपगताश्रयं ड - प्रणयाभिगतां 5 ढ - यः परिजने तु 6 ढ - निर्भर्त्स-नाक्षिविक्षारैः 7 ट - क्रूरतारकितः ढ विविधैस्तस्याभिनयः प्रयोक्तव्यः 8 ढ - उभयरसान्तर, च द्विरसान्तरसंचारी 9 ढ रोषः च - कृतको भवेत्कोपः 10 न - स चासंमोहोत्साहशक्तित्यागशौर्यादिभिः 11 ड - धैर्यशौर्यत्यागादिभिः 12 ट - समुत्पद्यते 13 न - तस्य धैर्यत्यागारम्भवैशारद्यपराक्रमादिभिः 14 ट - तत्र 15 ड - असंमोहादिनिर्वृत्तो 16 ढ - अभिनेयोऽसौ विप्रमादोत्थितादिभिः 17 ड - पर्यटनपर्वत. 18 न - गजादिदर्शन 19 च - काकोलूक 20 ढ - उत्प-द्यते 21 ढ - प्रवेपित'।

स्तम्भमुखशोष[1]जिह्वापरिलेहनस्वेदवेपथुत्रासपरित्राणा -न्वेषणं[2]धावनोत्क्रुष्टादिभिरनुभावैरभिनयः प्रयोक्तव्यः ।

[3]अत्र श्लोकाः—

[4]गुरुराजापराधेन रौद्राणां चापि दर्शनात् ।
श्रवणादपि घोराणां भयं मोहेन जायते ॥ ३४ ॥
गात्रकम्पनवित्रासैर्वक्त्रशोषणसम्भ्रमैः ।
[5]विस्फारितेक्षणैः कार्यमभिनेयक्रियागुणैः ॥ ३५ ॥
सत्त्ववित्रासनोद्भूतं भयमुत्पद्यते नृणाम् ।
[6]त्रस्ताङ्गाक्षिनिमेषै[7]स्तदभिनेयं तु नर्तकैः ॥ ३६ ॥

अत्रार्या भवति--

[8]करचरणहृदयकम्पैर्मुखशोषणवदनलेहनस्तम्भैः ।
सम्भ्रान्तवदनवेपथुसन्त्रासकृतैरभिनयोऽस्य ॥ ३७ ॥

जुगुप्सा नाम—स्त्रीनीचप्रकृतिका । सा चाहृद्य-दर्शनश्रवणपरिकीर्तनादिभिर्विभावैः समुत्पद्यते । तस्याः सर्वाङ्गसङ्कोच[9]निष्ठीवनमुखविकूणनहृल्लेखादिभिरनुभावैर-भिनयः प्रयोक्तव्यः ।

---

1 ढ - शोषण 2 ढ - धावनाक्रुष्टादिभिः 3 प - तत्र 4 एतौ श्लोकौ न संज्ञकादर्शे न स्तः 5 ढ - विष्फारित 6 न - त्रस्त 7 ड - निमेषैश्च ह्यभिनेयं तु य - निमेषैश्चाप्यभिनेयन्त 8 ड - करचरणहृदयकम्पैः स्तम्भनजिह्वोपलेहमुखशोषैः । त्रस्तसुविषण्णगात्रैस्तस्याभिनयः सवित्रासैः (न - मुखशोभैः तस्याभिनयः प्रयो-क्तव्यः—ट - सविषण्ण) 9 ढ - संकोचन ।

[1]भवति चात्र श्लोकः—

नासाप्रच्छादनेनेह[2] गात्रसङ्कोचनेन च ।
[3]उद्वेजनैः सहल्लेखैर्जुगुप्सामभिनिर्दिशेत्[4] ॥ ४० ॥

विस्मयो नाम—[5]मायेन्द्रजालमानुष्यकर्मातिशय-[6]चित्रपुस्त[7]शिल्पविद्याशयादिभिर्विभावैः समुत्पद्यते । तस्य नयनविस्तारानिमेष[8]प्रेक्षितभ्रूक्षेपरोमहर्षणशिरःकम्पसाधुवादादिभिरनुभावैरभिनयः प्रयोक्तव्यः ।

[9]भवति चात्र श्लोकः—

कर्मातिशयनिर्वृत्तो[10] विस्मयो हर्षसम्भवः ।
सिद्धिस्थाने त्वसौ [11]साध्यः प्रहर्षपुलकादिभिः ॥४२॥

[12]एवमेते [13]स्थायिनो भावा रससंज्ञाः प्रत्यवगन्तव्याः । व्यभिचारिण इदानीं व्याख्यास्यामः[14]। अत्राह—व्यभिचारिण इति कस्मात् । [15]उच्यते—वि अभि इत्येतावुपसर्गौ, [16]चर इति गत्यर्थो धातुः [17]विविधमाभिमुख्येन रसेषु चरन्तीति व्यभिचारिणः । वागङ्गसत्त्वोपे-

---

1 ढ - भवत्यत्रापि च श्लोकः च - पठत्यपि च 2 ढ - प्रच्छादनेनापि 3 ढ- उद्वेजनैश्च हल्लखैः 4 ढ - जुगुप्सामपि निर्दिशेत् 5 न - माहेन्द्रजालमानुष 6 ड - विचित्रपुस्त प - पुस्तकचित्रशिल्प 7 ड - शिल्पातिशयाद्यैर्विभावैरुत्पद्यते 8 ढ - अनिमिषप्रेक्षणभ्रूविक्षेपणरोमहर्षस्वेदसाधुवाद 9 ड - अत्र श्लोकः 10 न - निर्वृत्तौ 11 ड - साध्यो हर्षाश्रुप्रलयादिभिः न - साध्यो रोमाञ्चप्रहर्षाद्भिः प - साध्यो हर्षाश्रुपुलकादिभिः 12 प - एवमेतैः 13 ड - स्थायिभावा ग - एवमप्येते स्थायिभावा 14 ड - वक्ष्यामः 15 न - अत्रोच्यते ड - कस्मादुच्यन्ते 16 ड - चर गतौ धातुः 17 न - वागङ्गसत्त्वोपेतान्प्रयोगे विविधानां रसानामाभिमुख्येन चरन्तीति व्यभिचारिणः ड - धात्वर्थे वागङ्गसत्त्वोपेतान्विविधमभिमुखेन रसान्प्रति चरन्तीति व्यभिचारिणः तांश्च नयन्तीत्यर्थः । कथमिति चेदत्रोच्यते ।

तान्प्रयोगे रसान्नयन्तीति व्यभिचारिणः[1] । अत्राह— कथं नयन्तीति । [2]उच्यते— लोकसिद्धान्त एषः यथा सूर्य [3]इदं दिनं नक्षत्रं वा नयतीति । [4]न च तेन बाहुभ्यां स्कन्धेन वा[5] नीयते । किं तु लोकप्रसिद्धमेतत्[6] यथेदं सूर्यो नक्षत्रं दिनं वा नयतीति । एवमेते प्रयोगं नयन्तीति व्यभिचारिण इत्यवगन्तव्या नाम । त इह सङ्ग्रहाभिहितास्त्रयस्त्रिंशद्व्यभिचारिणो भावाः तान्वर्तयिष्यामः ।

[7]तत्र निर्वेदो नाम— [8]दारिद्र्यव्याध्यवमानाधिक्षेपाक्रुष्टक्रोधताडनेष्टजनवियोगतत्त्वज्ञानादिभिर्विभावैः समुत्पद्यते[9] । [10]स्त्रीनीचकुसत्त्वानां रुदितनिःश्वसितोच्छ्वसित[11]सम्प्रधारणादिभिरनुभावैस्तमभिनयेत् ।

[12]अत्र श्लोकः—

दारिद्र्येष्टवियोगाद्यै[13]र्निर्वेदो नाम जायते ।
[14]सम्प्रधारणनिःश्वासैस्तस्य त्वभिनयो भवेत् ॥ ४४ ॥

[15]अत्रानुवंश्ये आर्ये भवतः—

[16]इष्टजनस्य वियोगाद्दारिद्र्याद्व्याधितस्तथा दुःखात् ।
[17]ऋद्धिं परस्य दृष्ट्वा निर्वेदो नाम सम्भवति ॥

---

1 ग - चरन्ति नयन्तीत्यर्थः 2 न - अत्रोच्यते 3 न - इदं नक्षत्रममुं मासं नयतीति च - इदं नक्षत्रममुं वासरं नयतीति 4 प - तेन बाहुना 5 प - वात्र 6 प - प्रसिद्धिं गमयतीति 7 ड - अत्र 8 ड - दारिद्र्योपगमाधिक्षेप 9 ड - विभावैरुत्पद्यते 10 ड - स्त्रीनीचप्रकृतीनां तमभिनयेद्रुदित 11 ड - प्रसारण प - प्रधारणा 12 ड - भवति चात्र श्लोकः 13 च - वियोगेषु ड - वियोगैश्च भ - विनाशेन ट - वियोगैस्तु 14 न - संप्रसारण 15 न - अत्रार्ये भवतः 16 च - इष्टजनविप्रयोगात 17 ड - परर्द्धिं वा दृष्ट्वा ।

बाष्पपरिप्लुतनयनः पुनश्च निःश्वासदीनमुखनेत्रः[1] ।
योगीव ध्यानपरो[2] भवति हि निर्वेदवान्पुरुषः ॥४७॥

ग्लानिर्नाम — वान्तविरिक्तव्याधितपोनियमोपवास[3]मनस्तापातिशयमदनमद्यसेवनातिव्यायामाध्व[4]गमनक्षुत्पिपासानिद्राच्छेदादिभिर्विभावैः समुत्पद्यते[5] । तस्याः क्षामवाक्यनयन[6]कपोलोदरमन्दपदोत्क्षेपण[7]वेपनानुत्साहतनुगात्र[8]वैवर्ण्यस्वरभेदादिभिरनुभावैरभिनयः प्रयोक्तव्यः ।

अत्रार्ये भवतः —

वान्तविरिक्तव्याधिषु तपसा जरसा[9] च जायते ग्लानिः ।
कार्श्येन साभिनेया मन्दभ्रमणेन कम्पने[10] ॥ ४९ ॥
गदितैः क्षामक्षामैर्नेत्रविकारैश्च दीनसञ्चारैः ।
[11]श्लथभावेनाङ्गानां मुहुर्मुहुर्निर्दिशेद्ग्लानिम्[12] ॥ ५० ॥

शङ्का नाम—सन्देहात्मिका स्त्रीनीचप्रभवा । [13]चौर्याभिग्रहणनृपापराधपापकर्म[14]करणादिभिर्विभावैः समुत्पद्यते[15] । [16]तस्या मुहुर्मुहुरवलोकनावकुण्ठन[17]मुखशोषण-

1 न - पुनः पुनः श्वासदीनमुखवर्णः ड - दीर्घमुखनेत्रः च - पुनः पुनः श्वासदीनमुखनेत्रः 2 च - ध्यानरतो 3 च - मनस्तापातिपानमदनसेवना... 4 न - गत 5 द - उत्पद्यते 6 ड - कपोलमन्द न - कपोलोदरमन्दपादोत्क्षेप 7 ग - कम्पना 8 ड - वैवर्ण्यादिभिः 9 न - जरया 10 ड - क्रमणानुकम्पेन च - क्रमणेन कम्पेन 11 श्लथभावाच्चाङ्गानां 12 ड - निर्विशेद्ग्लानिम् 13 च - चौर्याभिग्रहनृप ड - चौर्याद्यभिगर्हण 14 ड - मरणादि 15 न - उत्पद्यते । सन्देहात्मिका स्त्रीनीचानाम् । 16 च - सा च. न - तस्यां 17 च - अगुवण्ठन ।

जिह्वापरिलेहन[1]मुखवैवर्ण्यस्वरभेदवेपथुशुष्कोष्ठ[2]कण्ठायाससाधर्म्यादिभिरनुभावैरभिनयः प्रयोक्तव्यः[3]।

चौर्यादिजनिता शङ्का प्रायः कार्या भयानके।
प्रियव्यलीकजनिता तथा शृङ्गारिणी मता॥ ५२॥

[4]अत्राकारसंवरमभीच्छन्तीति कोचित्। तच्च [5]कुशलैरुपाधिभिरिङ्गितैश्चोपलक्ष्यम्।

[6]अत्रार्ये भवतः—

द्विविधा शङ्का कार्या ह्यात्मसमुत्था च परसमुत्था च।
या [7]तत्रात्मसमुत्था सा ज्ञेया दृष्टिचेष्टाभिः॥ ५४॥
किञ्चित्प्रवेपिताङ्गस्त्वधोमुखो वीक्षते[8] च पार्श्वानि।
गुरुसज्जमानजिह्वः [9]श्यावास्यः शङ्कितः पुरुषः॥५५॥

असूया नाम—[10]नानापराधद्वेषपरैश्वर्यसौभाग्यमेधाविद्यालीलादिभिर्विभावैः समुत्पद्यते। तस्याश्च [11]परिषदि दोषप्रख्यापन[12]गुणोपघातेर्ष्याचक्षुःप्रदानाधोमुखभ्रुकुटीक्रियावज्ञानकुत्सनादिभिरनुभावैरभिनयः प्रयोक्तव्यः।

---

1 च - मुखवर्णभेदवेपथु - ड - मुखवैवर्ण्यवेपन 2 ड - कण्ठावसादादिभिरनुभावैरभिनीयते च - कण्ठवायससाधर्म्यादिभिः न - कण्ठायाससधर्म्यादिभिः 3 च - अभिनीयते ड - अभिनीयते। अत्र श्लोकः— 4 च - अत्राकारसंवरणमपि कोचिदिच्छन्ति 5 ड - कुले रूपादिभिः 6 च - अत्रार्ये— 7 च - तत्र परसमुत्था 8 न - प्रवेपिताङ्गो मुहुर्मुहुर्वीक्षिते च च - तथोन्मुखो वीक्षते 9 च - श्यामास्यः 10 ड - नानापराधान्वेषणपरैश्वर्यसौभाग्यलीलाविद्यादिभिर्विभावैरुत्पद्यते 11 ड - पर्षदि 12 च - गुणोपघातचक्षुःप्रधान।

[1]अत्रार्ये भवतः—

परसौभाग्यैश्वरतामेधालीलासमुच्छ्रयान्दृष्ट्वा[2] ।
[3]उत्पद्यते ह्यसूया कृतापराधो भवेद्यश्च[4] ॥ ५७ ॥
[5]भ्रुकुटिकुटिलोत्कटमुखैः सेर्ष्याक्रोधपरिवृत्तनेत्रैश्च[6] ।
गुणनाशनविद्वेषैस्तत्राभिनयः प्रयोक्तव्यः[7] ॥ ५८ ॥

[8]मदो नाम—मद्योपयोगादुत्पद्यते । स च त्रिविधः [9]पञ्चविभावश्च ।

अत्रार्या भवन्ति—

[10]ज्ञेयस्तु मदस्त्रिविधस्तरुणो मध्यस्तथावकृष्टश्च ।
करणं पञ्चविधं स्यात्तस्याभिनयः प्रयोक्तव्यः[11] ॥ ६० ॥
कश्चिन्मत्तो गायति रोदिति कश्चित्तथा हसति कश्चित्[12] ।
[13]परुषवचनाभिधायी कश्चित्कश्चित्तथा स्वपिति ॥ ६१ ॥
उत्तमसत्त्वः शेते हसति च गायति च मध्यमप्रकृतिः ।
परुषवचनाभिधायी रोदित्यपि चाधमप्रकृतिः ॥ ६२ ॥
[14]स्मितवदनमधुररागो हृष्टतनुः[15] किञ्चिदाकुलितवाक्यः ।
[16]सुकुमाराविद्धगतिस्तरुणमदस्तूत्तमप्रकृतिः ॥ ६३ ॥
स्खलिताघूर्णितनयनः स्रस्तव्याकुलितबाहुविक्षेपः[17] ।
कुटिलव्याविद्धगतिर्भवति मदो मध्यमप्रकृतिः ॥ ६४ ॥

---

1 न - तत्रार्ये— 2 ङ - समुच्छ्रूयं 3 च - अभिनेतव्यासूया 4 च - भवेद्यस्तु 5 न - भ्रुकुटीकुटिलोत्कटमुखसेर्ष्या 6 न - क्रोधपरिवर्तिभिश्चित्रैः ङ - परिवृत्तवक्राद्यैः ग - परिवर्तनैश्चित्रैः 7 च - तस्याः कार्यः सदाभिनयः 8 ङ - अथ मदो 9 च - पञ्चविधभावश्च ङ - पञ्चविधभावश्च त्रिप्रकृतिः । तत्रार्याः— 10 ट - त्रिविधस्तु मदः कार्यः 11 ग - तस्याभिनये प्रयोक्तव्यम् द तस्याभिनये प्रयोगविदाम् 12 न - तथा हसति किञ्चित् 13 न - पुरुष 14 छ - स्मितवचन 15 न - हृष्टतरः 16 च - सुकुमारो विद्ध द - सम्रवारात्रिद्ध 17 द - गात्रविक्षेपः ।

नष्टस्मृतिर्हतगतिश्छर्दितहिक्काकफैः सुबीभत्सः[1] ।
[2]गुरुसज्जमानजिह्वो निष्ठीवति चाधमप्रकृतिः ॥ ६५

रङ्गे पिबतः[3] कार्यो मदवृद्धिर्नाट्ययोगमासाद्य ।
कार्यो मदक्षयो वै यः खलु पीत्वा प्रविष्टः स्यात् ॥

सन्त्रासाच्छोकाद्वा [4]भयात्प्रहर्षाच्च कारणोपगतः ।
[5]उत्क्रम्यापि हि कार्यो [6]मदप्रणाशः क्रमात्तज्ज्ञैः ॥ ६७

एभिर्भावविशेषैर्मदो द्रुतं सम्प्रणाशमुपयाति ।
[7]अभ्युदयसुखैर्वाक्यैर्यथैव शोकाः क्षयं यान्ति[8] ॥ ६८

श्रमो नाम—[9]अध्वव्यायाम[10]सेवनादिभिर्विभावैः समुत्पद्यते। [11]तस्य [12]गात्रपरिमर्दनसंवाहननिःश्वसितविजृम्भितमन्दपदोत्क्षेपण[13]नयनवदनविकूणनसीत्कारादिभिरनुभावैरभिनयः प्रयोक्तव्यः।

अत्रार्या—

[14]नृत्ताध्वव्यायामान्नरस्य सञ्जायते श्रमो नाम ।
[15]निःश्वासखेदगमनैस्तस्याभिनयः प्रयोक्तव्यः ॥ ७०

---

1 ड - हिक्कागतैः स बीभत्सः द - हिक्कादिकैः सुबीभत्सः 2 न - उरु 3 ड - रङ्गेऽपि वहिः 4 द - भयाच्च हर्षाच्च ड - भयात्प्रकर्षाच्च 5 च - उत्क्रान्त्यापि हि ड - उद्यम्यापि हि 6 द - मदः प्रयोगः 7 च - अभ्युदयंमुखैः द - अभ्युदयपरैश्च 8 द - तथैव शोकः क्षयं समुपयाति न - तथैव शोकः क्षयं याति 9 न - अध्वगति 10 द - रोदनादिभिः ड - सेवादिभिः 11 ट - तत्रास्य 12 च - गात्रसंवाहननिः श्वसितमुखविकूणनविजृम्भणाङ्गमर्दमन्दमन्दपादोत्क्षेपणादिभिः द - गात्रपरिमर्दनसंवाहनमुखविजृम्भणाङ्गमर्दनमन्दपादोत्क्षेपणादिभिः ड - गात्रसंवाहननिःश्वसितमुखविकूणनजृम्भणाङ्गमर्दनमन्दपदोत्क्षेपणनयनाविकूणनसीत्कारादिभिः 13 भ - नयनानिकुञ्चन 14 ड - अध्वगतिव्यायामैः छ - अध्वगतेर्व्यायामान्नरस्य 15 द - निःश्वासदर्शनखेदैः।

आलस्यं नाम—[1]खेदव्याधिगर्भस्वभावश्रमसौहित्यादिभिर्विभावैः समुत्पद्यते स्त्रीनीचानाम्। तदभिनये-[2]त्सर्वकर्मानभिलाषशयनासन[3]निद्रातन्द्रीसेवनादिभिरनुभावैः।

अत्रार्या—

आलस्यं त्वभिनेयं खेदोपगतं स्वभावजं चापि।
आहारवर्जितानामारम्भाणामनारम्भात्॥ ७२

दैन्यं नाम—दौर्गत्य[4]मनस्तापादिभिर्विभावैः समुत्पद्यते[5]। [6]तस्याधृतिशिरोरोगगात्रगौरवान्यमनस्कतामृजा[7]परिवर्जनादिभिरनुभावैरभिनयः प्रयोक्तव्यः।

अत्रार्या—

[8]चिन्तौत्सुक्यसमुत्था दुःखाद्या भवति दीनता पुंसाम्।
[9]सर्वमृजापरिमार्जनजैर्विविधैरभिनयस्तस्य॥ ७४

---

1 ङ - स्वभावखेदश्रमव्याधिसौहित्यगर्भादिभिः द - स्वभावखेदश्रमव्याधिसौहित्यगद्गदादिभिः 2 न - सर्वकर्मप्रद्वेषण. च - सर्वकर्मविद्वेष 3 च - तन्द्रानिद्रा न - तन्द्रीनिद्रा 4 ङ - मनस्सन्तापादिभिः 5 न - उत्पद्यते 6 च - तस्यावृत्तिशिरोगात्रगौरवमृजापरिभावनादिभिरनुभावैरभिनेतव्यम् ङ - तस्याधृतिशिरोरोगगात्रस्तम्भनमृजापरिमार्जनादिभिः द - तस्य धूतशिरोगात्रगौरवमृजापरिमार्जनादिभिर्विभावैरभिनेतव्यम्। 7 न - परिमार्जनादिभिः 8 द - चित्तोद्रेकसमुत्थात् ङ - चिन्तौत्सुक्यसमुत्थाद्दुःखाद्वा दीनता भवति पुंसाम्। 9 द - सर्वमृजापरिहारैर्विविधोऽभिनयो भवेत्तस्याः (ङ - भवेत्तस्य) च - सर्वमृजानां परिमार्जनैश्च विविधैरभिनयोऽस्य न - सर्वमृजापरिवर्जान्तैश्च विविधैरभिनेयोऽस्य छ - सर्वमृजापरिहारैर्नानाभिनयो भवेत्तद्धि॥

चिन्ता नाम—ऐश्वर्यभ्रंशेष्टद्रव्यापहारदारिद्र्यादिभिर्विभावैरुत्पद्यते । तमभिनयेन्[1]निःश्वसितोच्छ्वसितसन्तापध्यानाधोमुख[2]चिन्तनकार्श्यादिभिरनुभावैः ।

[3]अत्रार्ये भवतः—

[4]ऐश्वर्यभ्रंशेष्टद्रव्यक्षयजा बहुप्रकारा तु ।
हृदयवितर्कोपगता चिन्ता नृणां समुद्भवति ॥ ७६
[5]सोच्छ्वासैर्निःश्वसितैः सन्तापैश्चैव हृदयशून्यतया[6] ।
अभिनेतव्या चिन्ता मृजाविहीनैरधृत्या च ॥ ७७

मोहो नाम—दैवोपघात[7]व्यसनाभिघातव्याधिभयावेगपूर्ववैरानुस्मरणादिभिर्विभावैः समुत्पद्यते । तस्य [8]निश्चैतन्यभ्रमणपतनाघूर्णनादर्शनादिभिरनुभावैरभिनयः प्रयोक्तव्यः ।

[9]अत्र श्लोकस्तावदार्या च—

अस्थाने तस्करान्दृष्ट्वा त्रासनैर्विविधैरपि[10] ।
तत्प्रतीकारशून्यस्य मोहः समुपजायते ॥ ७९

---

1 च - निःश्वसितसन्ताप 2 ङ - विचिन्तनतनुकार्श्यादिभिः द - चिन्तनतत्त्वकार्श्यादिभिः 3 च - अत्रार्ये—

4 ङ - ऐश्वर्येष्टद्रव्यापहारजानितबहुप्रकारा तु (ट - प्रकाराद्धि)।
हृदयौत्सुक्यापगता चिन्ता तु नृणां समुद्भवति ॥

5 च - सोच्छ्वसितैः 6 द - शून्यहृदयतया 7 च - व्यसनाभिघातभयावेग॰ ङ - व्यसनव्याधिभयावेगपूर्ववैरस्मरणादिभिः 8 ङ - निश्चेष्टिताङ्गभ्रमण न - निश्चेष्टताभ्रमण॰ प - निश्चेष्टताहृदयभ्रमण 9 च - भवत्यपि च॰ ङ - अत्र श्लोक आर्या च॰ न - अत्र श्लोकौ द - भवतश्चात्र— 10 च - त्रासनैर्वा पृथग्विधैः ।

[1]व्यसनाभिघातभयपूर्ववैरसंस्मरणरोगजो मोहः ।
सर्वेन्द्रियसम्मोहात्तस्याभिनयः प्रयोक्तव्यः ॥ ८०

स्मृतिर्नाम——सुखदुःखकृतानां भावानामनुस्मरणम्[2] । [3]सा च स्वास्थ्यजघन्यरात्रिनिद्राच्छेदसमानदर्शनोदाहरणचिन्ताभ्यासादिभिर्विभावैः समुत्पद्यते । तमभिनयेच्छिरःकम्पनावलोकन[4]भ्रूसमुन्नमनादिभिरनुभावैः ।
[5]अत्रार्ये भवतः—

सुखदुःखमतिक्रान्तं तथा मतिविभावितं यथावृत्तम् ।
चिरविस्मृतं स्मरति यः स्मृतिमानिति वेदितव्योऽसौ ॥
स्वास्थ्याभ्यासससमुत्था श्रुतिदर्शनसम्भवा स्मृतिर्निपुणैः
शिरउद्वाहनकम्पैर्भ्रूक्षेपैश्चाभिनेतव्या ॥ ८३

धृतिर्नाम——[6]शौर्यविज्ञानश्रुतिविभवशौचाचारगुरु[7]भक्त्यधिकमनोरथार्थलाभक्रीडादिभिर्विभावैः समुत्पद्यते । [8]तमभिनयेत्प्राप्तानां विषयाणामुपभोगाद[9]प्राप्तातीतोपहतविनष्टानामननुशोचनादिभिरनुभावैः ।

---

1 च - अत्रार्या —. द - व्यसनाभिघातपूर्ववैरस्मरणजो भवति मोहः 2 द - अनुस्मरणास्वस्थ.... 3 न - स चास्वस्थ्य. ङ - स्वस्थ्य 4 ङ - भ्रूसमुन्नमनप्रहर्षादिभिः न - कम्पनालोकनभ्रूसमुन्नमनप्रकर्षादिभिः 5 ङ - अत्र श्लोकार्ये भवतः—

सुखदुःखामतिक्रान्तं तथा मतिविभावितम् ।
विस्मृतं च यथा वृत्तं स्मरेद्यः स्मृतिमानसौ ॥

ग - अत्रार्ये द - अत्र श्लोकार्ये —

अन्यतत्त्वमतिक्रान्तं तथा मातिविभावितम् ।
विस्मृतं च यथा वृत्तं स्मरेद्यः प्रीतिमानसौ ॥

6 च - विज्ञानश्रुति 7 न भक्त्यधिकतया नानार्थलाभजलक्रीडाभिः ङ - भक्त्यधिकार्थलाभविविधक्रीडादिभिः 8 न - तमभिनयेत् 9 न - अप्राप्तोपगतविनष्टानामनुशोचनादिभिः ।

अत्रार्ये भवतः—

विज्ञानशौचविभवश्रुतिशक्तिसमुद्भवा धृतिः सद्भिः[1] ।
भयशोकविषादाद्यै रहिता तु सदा प्रयोक्तव्या ॥ ८५
प्राप्तानामुपभोगः [2]शब्दस्पर्शरूपरसगन्धानाम् ।
[3]अप्राप्तैश्च न शोको यस्यां हि भवेद्धृतिः सा तु ॥ ८६

व्रीडा नाम—अकार्यकरणात्मिका । [4]सा च गुरुव्यतिक्रमणावज्ञानप्रतिज्ञानिर्वहण[5]पश्चात्तापादिभिर्विभावादिभिः समुत्पद्यते[6] । [7]तां निगूढवदनाधोमुख[8]विचिन्तनोर्वीलेखनवस्त्राङ्गुलीयकस्पर्शननख[9]निकृन्तनादिभिरनुभावैरभिनयेत् ।

[10]अत्रार्ये भवतः—

किञ्चिदकार्यं [11]कुर्वन्नेवं यो दृश्यते शुचिभिरन्यैः ।
पश्चात्तापेन युतो व्रीडित इति वेदितव्योऽसौ ॥ ८८
[12]लज्जानिगूढवदनो[13] भूमिं विलिखन्नखांश्च विनिकृन्तन् ।
वस्त्राङ्गुलीयकानां संस्पर्शं व्रीडितः कुर्यात् ॥ ८९

---

1 न - श्रुतिभक्तसमुद्भवा धृतिः सिद्धिः । 2 द - शब्दरसस्पर्शरूपगन्धानाम् । अप्राप्तानामनुशोचनं च न भवेद्धृतिः सा तु ॥ 3 ड - अप्राप्ते न हि शोको. प - अप्राप्तौ हि न 4 न - गुरुप्रातिक्रमण 5 ड - कृतप्रत्यादिष्टपश्चात्तापादिभिः 6 ड - उत्पद्यते 7 द - तां च निगूढवदनाधोमुखविचिन्तनवस्त्राभरणमार्गणनखविस्फोटनादिभिः, म - तां निगूढवचन 8 न - चिन्तनोल्लेहनवस्त्राङ्गुलीयकसंस्पर्शन 9 च - निस्तोदनादिभिः 10 च - अत्रार्ये— 11 द - कुर्वाण एव. ड - कुर्वन्यो हि नरो दृश्यते 12 द - लज्जाधोमूढमुखो भूमिं च लिखन्नखांश्च 13 ड - वचनो ।

चपलता नाम—रागद्वेष[1]मात्सर्यामर्षेर्ष्याप्रतिकूलादिभिर्विभावैः समुत्पद्यते। तस्याश्च वाक्पारुष्यनिर्भर्त्सन[2]वधबन्धसम्प्रहारताडनादिभिरनुभावैरभिनयः प्रयोक्तव्यः।

[3]अत्रार्या भवति—

[4]अविमृश्य तु यः कार्यं पुरुषो [5]वधताडनं समारभते।
[6]अविनिश्चितकारित्वात्स तु खलु चपलो विबोद्धव्यः॥

हर्षो नाम—मनोरथ[7]लाभेष्टजन[8]समागमनमनःपरितोषदेवगुरुराजभर्तृप्रसाद[9]भोजनाच्छादनलाभोपभोगादिभिर्विभावैः समुत्पद्यते। तमभिनयेन्नयनवदनप्रसादप्रियभाषणालिङ्गनकण्टकितपुलकितास्रस्वेदादिभिरनुभावैः[10]।

[11]अत्रार्ये भवतः—

[12]अप्राप्ये प्राप्ये वा लब्धेऽर्थे प्रियसमागमे वाऽपि।
हृदयमनोरथलाभे हर्षः सञ्जायते पुंसाम्[13]॥ ९३
नयनवदनप्रसादप्रियभाषालिङ्गनैश्च रोमाञ्चैः।
ललितैश्चाङ्गविहारैः[14] स्वेदाद्यैरभिनयस्तस्य॥ ९४

---

1 न - मात्सर्यमायेर्ष्या, द - मात्सर्यैर्ष्याप्रतिकृतादिभिः 2 द - सम्प्रहारवधबन्धनादिभिः ङ - सम्प्रहारवधबन्धनताडनज्ञापनादिभिः 3 प - अत्रार्या— 4 न - अविमृश्य तु यत्कार्यं. द - अविमृष्टं यः कार्यं पुरुषोऽज्ञानात्समाचरति 5 ङ - वधबन्धनादिकं 6 च - अविनिश्चितकार्यत्वात्स हि खलु चपलो बुधैर्ज्ञेयः 7 च - लाभेप्सितावाप्तीष्ट 8 न समागमनपरितोषण 9 म - प्रसादन 10 न - स्वेदोत्कृष्टकरताडनादिभिरनुभावैः द - प्रसादकण्टकितपुलकिताश्रुस्वेदालिङ्गनोत्पुष्पलिततताडनादिभिरनुभावैः 11 च - अत्रार्या— 12 द - प्राप्ये वाऽप्राप्ये वा 13 द - नृणाम् 14 न - विकारैः।

आवेगो नाम—उत्पातवात[1] वर्षाग्निकुञ्जरोद्भ्रमण-प्रियाप्रियश्रवणप्रकृतिव्यसनाभिघातादिभिर्विभावैः समुत्पद्यते[2]। तत्रोत्पातकृतो नाम विद्युदुल्कानिर्घातप्रपतन-चन्द्रसूर्योपरागकेतुदर्शनकृतः[3]। तमभिनयेत्सर्वाङ्ग[4]स्रस्ततावैमनस्यमुखवैवर्ण्यविषादविस्मयादिभिः। वातकृतं पुनरव[5]कुण्ठनाक्षिपरिमार्जनवस्त्रसङ्ग्रहणत्वरितगमनादिभिः। वर्षकृतं [6]पुनः सर्वाङ्गसम्पीडनप्रधावनच्छन्नाश्रय-मार्गणादिभिः[7]। अग्निकृतं [8]नाम धूमाकुलनेत्रताङ्गसङ्कोचनविधूननातिक्रान्तापक्रान्तादिभिः। कुञ्जरोद्भ्रमण-[9]कृतं नाम त्वरितापसर्पणचञ्चलगमनभयस्तम्भवेपथ-पश्चादवलोकनविस्मयादिभिः। प्रियश्रवण[10]कृतं नामाभ्युत्थानालिङ्गनवस्त्राभरणप्रदानाश्रुपुलकितादिभिः। अप्रियश्रवण[11]कृतं नाम भूमिपतनविषमविवर्तनपरिधावन-विलापनाक्रन्दनादिभिः। [12]प्रकृतिव्यसनकृतं नाम सह-

---

1 द - वर्षकुञ्जरोद्भ्रमण 2 ड - उत्पद्यते, 3 ड - दर्शनादिभिर्विभावैरुत्पद्यते 4 ड - स्रस्तसविषण्णवैमनस्य 5 द - कुण्ठनाक्षिमर्दनवस्त्रसङ्ग्रहन 6 न - नाम सर्वाङ्गसम्पिण्डन 7 च - छन्नाश्रयणादिभिः 8 द - तु धूमाकुलनेत्रताङ्गसंवेशन-ड - तु धूमाकुलनेत्रसङ्कुञ्चनाङ्गसंवेग 9 न - कृतमपि त्वरितापसर्पणचपलगमन 10 प - कृतमपि प्रत्युत्थानालिङ्गन 11 न - कृतमप्युर्वीपतनपरिदेवनविषमपरिवर्तितधावितविलापरोदनादिभिः. च - कृतमप्युर्वीपतनवलनपरिवर्तितपरिधावित-विलापाक्रन्दादिभिः द - कृतं तु भूमिपतनपरिदेवितपरिवर्तितपरिधावितविलापाक्रन्दितादिभिः ड - कृतो नाम भूमिपतनपरिदेवनविषमपरिवर्तितधावितविलापरुदितादिभिः 12 ड - व्यसनाभिघातकृतं तु, सहसापक्रमणशस्त्रवर्म।

सापसर्पण[1] शस्त्रचर्मवर्मधारणगजतुरगरथारोहणसम्प्र-
धारणादिभिः[2] ।

[3]एवमष्टविकल्पोऽयमावेगः सम्भ्रमात्मकः ।
स्थैर्येणोत्तममध्यानां नीचानां चापसर्पणैः[4] ॥ ९६

[5]अत्रार्ये भवतः—

अप्रियनिवेदनाद्वा सहसा ह्यभिधारितारिवचनेन[6] ।
[7]शस्त्राक्षेपात्त्रासादावेगो नाम सम्भवति ॥ ९८
अप्रियनिवेदनाद्यो विषादभावाश्रयोऽनुभावोऽस्य ।
[8]सहसारिदर्शनाच्चेत्प्रहरणपरिघट्टनैः कार्यः[9] ॥ ९९

जडता नाम—सर्वकार्याप्रतिपत्तिः । इष्टानिष्टश्रवणदर्शनव्याध्यादिभिर्विभावैः समुत्पद्यते । तामभिनयेद्कथनाभिभाषण[10]तूष्णीम्भावानिमेषनिरीक्षणपरवशत्वादिभिरनुभावैः ।

[11]अत्रार्या भवति—

इष्टं वाऽनिष्टं वा [12]सुखदुःखे वा न वेत्ति यो मोहात् ।
तूष्णीकः परवशगो भवति[13] स जडसंज्ञितः पुरुषः ॥

---

1 च - शस्त्रधर्मधारणस्फुरणवेपनगज 2 ड - सम्प्रहरणादिभिः 3 प - इत्येषोऽष्टविधो ज्ञेय आवेगः 4 ड - नीचानां चापसर्पणात् ट - नीचानामपसर्पणैः 5 च - अत्रार्ये— 6 ड - निवेदनादिश्रवणादवधारितवचनस्य. न - निवेदनाद्वा प्रायोऽभ्यवतारितादिवचनस्य द - निवेदनाद्वा श्रवणादवधारितारिवचनस्य 7 प - शस्त्राक्षेपत्रासात् 8 ड - सहसा निदर्शनं चेत् न - सहसा निदर्शनाद्यैः प्रहरणपरिघट्टनं कार्यम् । 9 ट - घट्टनः कार्यः 10 न - अकथनावभाषण. प - अकथनाभाषणतूष्णीम्भावप्रतिभानिमेष 11 न - अत्रार्या— 12 ड - सुखदुःखं 13 ड - परवशगः स भवति जडसंज्ञकः पुरुषः. ट - भवति हि ।

गर्वो नाम—ऐश्वर्यकुलरूपयौवनविद्या[1]बलधनलाभादिभिर्विभावैः समुत्पद्यते । तस्यासूयावज्ञा[2]धर्षणानुत्तरदानासम्भाषणाङ्गावलोकनविभ्रमापहसनवाक्पारुष्य[3]गुरुव्यतिक्रमणाधिक्षेपवचनविच्छेदादिभिरनुभावैरभिनयः प्रयोक्तव्यः[4] ।

[5]अत्रार्या भवति—

[6]विद्यावाप्ते रूपादैश्वर्यादथ वा धनागमाद्वापि ।
गर्वः [7]खलु नीचानां दृष्टयङ्गविचालनैः कार्यः ॥१०३

विषादो नाम—[8]कार्यानिस्तरणदैवव्यापत्तिसमुत्थः । तमभिनयेत्सहायान्वेषणोपाय[9]चिन्तनोत्साहविघातवैमनस्यनिःश्वसितादिभिरनुभावैरुत्तममध्यमानाम् । अधमानां तु [10]परिधावनालोकनमुखशोषण[11]सृक्वपरिलेहननिद्रा[12]निःश्वसितध्यानादिभिरनुभावैः ।

[13]अत्रार्याश्लोकौ—

[14]कार्यानिस्तरणाद्वा चौर्याभिग्रहणराजदोषाद्वा[15] ।
[16]दैवादर्थविवर्तैर्भवति विषादः सदा पुंसाम् ॥ १०५॥

---

1 च - बलादिभिर्विभावैः समुत्पद्यते । तमसूया 2 न - धर्षणोत्तरादानासम्भाषण 3 ड - गुर्वधिक्रमणाधिक्षपादिभिः 4 च - अनुभावैरभिनयेत् 5 च - भवति चात्रार्या -- 6 ड - विद्यायौवनरूपात् 7 प - स च 8 ड - कार्यारम्भानिस्तरण 9 न - चिन्तानुत्साहवैमनस्य 10 प - विपरिधावनावलोकन 11 म - सृक्कणी 12 ड - निःश्वसित 13 प - अत्रार्या श्लोकश्च - 14 च - कार्यानिस्तरणकृतः 15 च - दोषाद्यैः 16 च - दैवादिष्टो योऽर्थस्तदसम्प्राप्तौ विषादः स्यात्, न - दैवादर्थविपत्तेः ।

[1]वैचित्योपायचिन्ताभ्यां [2]कार्यमुत्तममध्ययोः ।
निद्रा[3]निःश्वसितध्यानैरधमानां तु योजयेत् ॥१०६॥

औत्सुक्यं नाम—इष्टजनवियोगानु[4]स्मरणोद्यानदर्शनादिभिर्विभावैः समुत्पद्यते[5] । [6]तस्य दीर्घनिःश्वसिताधोमुखविचिन्तननिद्रा[7]तन्द्रीशयनाभिलाषादिभिरनुभावैरभिनयः प्रयोक्तव्यः ।

[8]अत्रार्या भवति—

[9]इष्टजनस्य वियोगादौत्सुक्यं जायते ह्यनुस्मृत्या ।
चिन्तानिद्रातन्द्रीगात्रगुरुत्वैरभिनयोऽस्य ॥ १०८ ॥

निद्रा नाम—[10]दौर्बल्यश्रमक्लममदालस्यचिन्ताऽत्याहारस्वभावादिभिर्विभावैः समुत्पद्यते[11] । तामभिनयेद्वदन[12]गौरवशरीरावलोकननेत्र[13]घूर्णनगात्रविजृम्भणमान्द्योच्छ्वसितसन्नगात्रताक्षिनिमीलनादिभिरनुभावैः ।

अत्रार्ये भवतः—

आलस्याद्दौर्बल्यात्क्लमाच्छ्रमाच्चिन्तनात्स्वभावाच्च ।
रात्रौ जागरणादपि निद्रा पुरुषस्य सम्भवति ॥

---

1 च - वैचित्र्योपाय ड - विचित्रोपाय 2 न - कार्यं उत्तम 3 च - निःश्वसितैर्ध्यानैरधमानां तु दर्शयेत् 4 च - स्मरणादिभिः 5 ड - उत्पद्यते 6 च - तद्दीर्घं 7 च - तन्द्राशयनादिभिरभिनयेत् 8 प - भवत्यपिच 9 ड - इष्टजनादि 10 न - श्रमक्लम 11 च - उत्पद्यते 12 ड - गौरवगात्रपरिलोलननेत्रविघूर्णनजृम्भणगात्रपरिमर्दनोच्छ्वसितनिःश्वसितसन्नतगात्रताक्षिनिमीलनसंमोहनादिभिरनुभावैः 13 न - घूर्णनजृम्भणगात्रपरिमर्दनोच्छ्वसितसन्नगात्रताक्षिनिमीलनादिभिः च - घूर्णनविजृम्भणगात्रमर्दोच्छ्वसितनिःश्वसितसन्नगात्रताक्षिनिमीलनसर्वक्रियासंमोहादिभिः ।

तां मुखगौरवगात्रप्रतिलोलननयनमीलनजडत्वैः[1] ।
जृम्भणगात्रविमर्दैरनुभावैरभिनयेत्प्राज्ञः[2] ॥ १११ ॥

अपस्मारो नाम—देव[3]यक्षनागब्रह्मराक्षस[4]भूतप्रेतपिशाचग्रहणानुस्मरणोच्छिष्टशून्यागारसेवनाशुचि[5]कालान्तरापरिपतनव्याध्यादिभिर्विभावैः समुत्पद्यते । तस्य [6]स्फुरितनिःश्वसितोत्कम्पितधावनपतनस्वेदस्तम्भनवदनफेन[7]जिह्वापरिलेहनादिभिरनुभावैरभिनयः प्रयोक्तव्यः ।

[8]अत्रार्ये भवतः—

भूतपिशाचग्रहणानुस्मरणोच्छिष्टशून्यगृहगमनात् ।
कालान्तरातिपातादशुचेश्च[9] भवत्यपस्मारः ॥ ११३ ॥
सहसा भूमौ पतनं प्रवेपनं[10] वदनफेनमोक्षश्च ।
[11]निःसंज्ञस्योत्थानं रूपाण्येतान्यपस्मारे ॥ ११४ ॥

सुप्तं नाम—निद्राभिभवः; इन्द्रियविषयोपगमनमोहनक्षितितलशयनप्रसारणानुकर्षणादिभिर्विभावैः समुत्प-

---

1 च - गात्रपरिलोलनयनमीलनजडत्वैः छ. गात्रपरिलोलनिमीलनाक्षिविनिमेषैः ङ - गात्रैर्नयननिमीलनविघूर्णजडत्वैः 2 ङ - अभिनयेत्प्रयोगज्ञः 3 च - नागयक्ष 4 च - भूतपिशाचादीनां ग्रहणानुस्मरणोच्छिष्ट ङ - राक्षसपिशाचादीनां ग्रहणादनुस्मरणादुच्छिष्ट न - भूतप्रेतपिशाचादीनां ग्रहणमनुस्मरणसोच्छिष्ट 5 च - कालान्तरापातधातुवैषम्यादिभिः ङ - कान्तारातिपातधातुवैषम्यादिभिः न - कालान्तरावपातधातुवैषम्यादिभिः 6 ङ - स्फुरितकम्पितनिःश्वसितधावनस्वेदवदनफेनहिक्कापरिलेहनादिभिः च - स्फुरितकम्पितनिःश्वसितधावन 7 न - फेनता 8 च - भवति (तः!) चात्र 9 च - शुचिषु च 10 च - प्रकम्पितं 11 ङ - निस्संज्ञाभ्युत्थानं ।

द्यते । निद्रासमुत्थं तदुच्छ्वसित[1]सन्नगात्राक्षिनिमीलन-सर्वेन्द्रिय[2]सम्मोहनोत्स्वप्नायितादिभिरनुभावैरभिनयेत् ।

[3]अत्रार्ये भवतः—

निद्राभिभवेन्द्रियोपरमणमोहनैर्भवेत्सुप्तम् ।
अक्षिनिमीलोच्छ्वसनैः स्वप्नायितजल्पितैः कार्यः ॥
[4]सोच्छ्वासैर्निःश्वासैर्मन्दाक्षिनिमीलनेन निश्चेष्टः ।
सर्वेन्द्रियसम्मोहात्सुप्तं स्वप्नैश्च युञ्जीत[5] ॥ ११७॥

विबोधो नाम—[6]आहारपरिणामनिद्राच्छेद[7]स्वप्नान्ततीव्रशब्द[8]स्पर्शश्रवणादिभिर्विभावैः समुत्पद्यते। [9]तमभिनयेज्जृम्भणाक्षिपरिमर्दनशयनमोक्षणादिभिरनुभावैः ।

[10]अत्रार्या भवति—

[11]आहारविपरिणामाच्छब्दस्पर्शादिभिश्च सम्भूतः ।
प्रतिबोधस्त्वभिनेयो जृम्भणवदनाक्षिपरिमर्दैः[12] ॥

अमर्षो नाम—[13]विद्यैश्वर्यबलाधिकैराधिक्षिप्तस्यावमानितस्य वा समुत्पद्यते । [14]तमभिनयेच्छिरःकम्पन-

---

1 च - निःश्वसित 2 च - संमोहस्वप्नायतादिभिः ड - संमोहात्स्वप्नादिभिः 3 च - अत्रार्या 4 प - निःश्वासैः सोच्छ्वासैः 5 ड - स्वप्ने प्रयुञ्जीत 6 च - निद्राच्छेदाहारपरिणाम 7 ड - दुःस्वप्नतीव्रशब्दस्पर्शरूपादिभिः 8 न - स्पर्शादिभिः 9 च - तं जृम्भणाक्षिविमर्दनशयनमोक्षणाङ्गवलन भुजविक्षेपाङ्गुलिस्फोटनादिभिरनुभावैरभिनयेत् (ड . . . . क्षिमर्दन . . . मोक्षाङ्गवदन भुजविक्षेपण . . . येत्) 10 प - अत्रार्या 11 न - शयनपरिणामयोगाच्छब्द ड - आकार 12 ड - वलनाक्षिपरिमर्दैः 13 ड - विद्यैश्वर्यधनबलाधिकैरधिक्षिप्तस्यावमानितस्य च - विद्यैश्वर्यधनबलाधिकैरधिक्षिप्तस्यापमानितस्य वा 14 ड - तस्य शिरःकम्पनस्वेदाधोमुखविचिन्तनाध्यवसायोपायान्वेषणादिभिरभिनयः प्रयोक्तव्यः प - तं शिरःकम्पनप्रस्वेदाधोमुखविचिन्तनोत्साहाध्यवसायस्थानोपायान्वेषणादिभिरभिनयेत् ।

प्रस्वेदनाधोमुखचिन्तनध्यानाध्यवसायोपायसहायान्वेष-णादिभिरनुभावैः ।

[1]अत्र श्लोकौ—

आक्षिप्तानां सभामध्ये विद्याशौर्यबलाधिकैः[2] ।
नृणामुत्साहसंयोगादमर्षो[3] नाम जायते ॥ १२१ ॥
उत्साहाध्यवसायाभ्यामधोमुखविचिन्तनैः[4] ।
शिरःप्रकम्पस्वेदाद्यैस्तं प्रयुञ्जीत पण्डितः[5] ॥ १२२ ॥

अवहित्थं नाम—आकारप्रच्छादनात्मकम्[6] । [7]तच्च लज्जाभयापजयगौरवजैह्म्यादिभिर्विभावैः समुत्पद्यते । [8]तस्यान्यथाकथनावलोकितकथाभङ्गकृतकधैर्यादिभिरनु-भावैरभिनयः प्रयोक्तव्यः ।

[9]अत्र श्लोको भवति—

धाष्ट्र्यजैह्म्यादिसम्भूतमवहित्थं भयात्मकम् ।
[10]तच्चागणनया कार्यं नातिचोत्तरभाषणात्[11] ॥ १२४ ॥

---

1 द - भवतश्चात्र श्लोकौ न - भवति चात्र श्लोक आर्या च त - तत्र श्लोकौ- च - भवति चात्र 2 च - विद्यैश्वर्यबलाधिकैः 3 ड - नृणामुत्साहसंपन्नो ह्यमर्षो 4 प - अधोमुखविलोकनैः च - विचिन्तितैः 5 न - नाट्यवित् ड - तत्प्रयुञ्जीत पण्डितः 6 ड - प्रच्छादनम् द - अवहित्था नाम आकारप्रच्छादनात्मिका भ - आकारप्रच्छन्नात्मकम् । 7 प - तच्च लज्जाभयगौरवलेह्यादिभिः द - सा च लज्जा भयगौरव भ - तच्च लज्जाभयगौरवजेर्ष्यादिभिः 8 द - तस्या अन्यथाकथनाविलो- कित प - तस्यान्यथाकथनविलोकितकथाप्रसङ्ग ढ - तस्यान्यथाकथनाविलोकिकथा भङ्गकृतैरनुभावैः 9 प - भवति श्लोकः च - भवति चात्र ड - अत्र श्लोकः— 10 द - तच्चाकारितैः कार्यं 11 त - न नीचोत्तरभाषणैः न - भाषणैः ।

[1]उग्रता नाम—[2]चौर्याभिग्रहणनृपापराधासत्प्रलापादिभिर्विभावैः[3] समुत्पद्यते । [4]तां च वधबन्धनताडननिर्भर्त्सनादिभिरनुभावैरभिनयेत् ।

[5]अत्रार्या भवति—

[6]चौर्याभिग्रहणवशान्नृपापराधाद्‌थोग्रता भवति ।
वधबन्धताडनादिभिरनुभावैरभिनयस्तस्याः ॥ १२६॥

मतिर्नाम—[7]नानाशास्त्रविचिन्तनोहापोहादिभिर्विभावैः समुत्पद्यते । तामभिनयेच्छिष्योपदेशार्थविकल्पन-[8]संशयच्छेदादिभिरनुभावैः ।

[9]भवति चात्र श्लोकः—

[10]नानाशास्त्रार्थबोधेन मतिः संजायते नृणाम् ।
[11]शिष्योपदेशार्थकृतस्तस्यास्त्वभिनयो भवेत् ॥१२८॥

व्याधिर्नाम—वातपित्तकफसंनिपातप्रभवः । तस्य ज्वरादयो[12]विशेषाः । [13]ज्वरस्तु द्विविधः सशीतः सदाहश्च । [14]तत्र सशीतो नाम—प्रवेपितसर्वाङ्गोत्कम्पन[15]निकुञ्चनाग्न्याभिलाषरोमाञ्चहनुवलननासाविकूणनमुखशोषणप -

---

1 प - अथोग्रता नाम 2 न - चौर्यादिग्रहण 3 म - नृपापराधादिभिर्विभावैः 4 त - तां वधबन्धनताडनभर्त्सनादिभिः द - तां वधबन्धताडन 5 च - भवति चात्र प - भवति चात्र श्लोकः ज - अत्रार्या 6 ज - चौर्याभिग्रहयोगात् - न - चौर्यादिग्रहणवशात् त - चौर्यग्रहणनिरोधात् 7 प - नानाशास्त्रार्थचिन्तन 8 ड - संशयच्छेदनादिभिः 9 ड - अत्र श्लोकः 10 च - नानाशास्त्रविनिष्पन्ना न - नानाशास्त्रार्थनिष्पन्ना 11 द - शिष्योपदेशाच्च ततस्तस्या अभिनयो भवेत् । 12 न - ज्वरादयोऽभिनयविशेषाः 13 म - ज्वरस्तु खलु 14 ड - सशीतस्तावत् द - तत्र सशीतः 15 द - उत्कम्पितहनुचलनास्यविकूणन ड - कुञ्चितहनुविचलननासाविकूणनमुखशोषणरोमाञ्चानेकपरिदेवितादिभिः ।

रिदेवितादिभिरनुभावैरभिनयेत् । [1]सदाहो नाम विक्षिप्ताङ्गकरचरणभूम्यभिलाषानुलेपनशीतलाभिलाषपरिदेवनमुखशोषोत्क्रुष्टादिभि[2]रनुभावैः । ये चान्ये[3] व्याधयस्तेऽपि खलु [4]मुखविकूण[5]गात्रस्तम्भस्रस्ताक्षिनिःश्वसनस्तनितोत्क्रुष्टवेपनादिभि[6]रनुभावैरभिनेयाः ।

[7]अत्र श्लोको भवति—

[8]सामान्यतस्तु व्याधीनां कर्तव्योऽभिनयो बुधैः ।
स्रस्ताङ्गगात्रविक्षेपैस्तथा [9]मुखविकूणनैः ॥ १३० ॥

उन्मादो नाम—इष्टजनवियोगविभव[10]नाशाभिघातवातपित्तश्लेष्म[11]प्रकोपादिभिर्विभावैरुत्पद्यते[12] । [13]तमपनिमित्तहसितरुदितोत्क्रुष्टा[14]सम्बद्धप्रलाप[15]शयितोपविष्टोत्थितप्रधावितनृत्तगीतपठितभस्म[16]पांस्ववधूलन[17]तृणनिर्माल्यकुचेलचीरघटकपालशरावाभरणधारणोपभोगैरनेकैश्चानवस्थितैश्चेष्टानुकरणादिभिरनुभावै[18]रभिनयेत् ।

---

1 ड - सदाहः पुनर्विक्षिप्तवस्त्रकर . . , 2 न - लेपनसशीतलाभिलाषपरिदेवितोत्क्रुष्टादिभिः भ - लाषपरिदेवितोत्कृष्टवेपनादिभिः न - मुखशोषणोत्कृष्टादिभिः 3 ड - ये चान्येऽपि 4 न - मुखविकूणन 5 ड - गात्रस्तम्भनिःश्वासनिस्तनितोत्क्रुष्टानुलेपन परिदेवितादिभिरनुभावैरभिनेयाः 6 द - अनुवेपनादिभिः । भवति चात्र—उत्क्रुष्टानुलेपन परिदेवनादिभिरनुभावैरभिनयेत् 7 न - अत्र श्लोकः 8 प - समासतस्तु 9 द - रुजा प - कूजन्मुख 10 न - विनाशव्यसनाभिघात च - इष्टजनविभववियोग 11 म - कोपादि 12 ड - समुत्पद्यते 13 ड - तमनिमित्त 14 प - उत्क्रुष्टाबद्ध 15 ड - शयनोपरि 16 न - पांसूद्धूलन. 17 द - पांस्वतिधूलननिर्माल्यचीरघटचक्रशरावाभरणस्पर्शनोपभोगैरन्यैश्चानवस्थितचेष्टाकरणादिभिः 18 च - अन्यैश्चाव्यवस्थितचेष्टाकरणादिभिः ड - अनेकैरव्यवहितचेष्टादिभिः ।

[1]अत्रार्ये भवतः—

इष्टजनविभवनाशादभिघाताद्वातपित्तकफकोपात् ।
विविधाच्चित्तविकारादुन्मादो नाम सम्भवति ॥
[2]अनिमित्तरुदितहसितोपविष्टगीतप्रधावितोत्क्रुष्टैः ।
[3]अन्यैश्च विकारकृतैरुन्मादं सम्प्रयुञ्जीत ॥ १२३ ॥

मरणं नाम—[4]व्याधिजमभिघातजं च । [5]तत्रान्त्रयकृच्छूलदोषवैषम्यगण्डपिटकज्वर[6]विषूचिकादिभिर्यदुत्पद्यते[7] तद्व्याधिप्रभवम् । अभिघातजं तु[8] शस्त्राहिदंश[9]विषपानश्वापदगजतुरगरथ[10]पशुयानपातविनाशप्रभवम् । [11]एतयोरभिनयविशेषान्वक्ष्यामः[12]—तत्र [13]व्याधिजं नाम विषण्णगात्र[14]व्यायताङ्गविचेष्टित[15]निमीलितनयनं हिक्का[16]श्वासोपेतमनवेक्षित[17]परिजनमव्यक्ताक्षरकथनादिभिरनुभावैरभिनयेत् ।

---

1 च - भवति चात्र - 2 ङ - अनिमित्तहसितरुदितोपविष्ट 3 म - अन्योन्यविकारकृतैः 4 प - तद्द्विविधं—. 5 ङ - तत्र यदान्त्रयकृच्छूल. न - तत्र यच्छूलदोष. च - तत्र यद्दोषवैषम्य. द - तत्र यद्दोषवैषम्यात् 5 च - विचर्चिकादिभिः. द - विसूचिकाविषविकारादिभिः न - विष्कपिकादिभिः 7 ङ - आदिभिरुत्पद्यते. न - आदिभिः समुत्पद्यते 8 म - च 9 द - विषपात..... तुरगरथानुपातविनाश 10 ङ - रथयानपतन — म - रथयानपातन - भ - रथयानपातादिप्रभवम्. 11 च - एतेष्विदानीमभिनय 12 ङ - विशेषं वक्ष्यामि 13 ङ - व्याधिजं विषण्णगात्रमप्यायताङ्ग द - व्याधिप्रभवं 14 प - व्यायताङ्गुलिचेष्टित द - गात्रमव्यायताङ्ग न - गात्रमध्यायताङ्ग 15 ङ - चेष्टितं 16 ङ - कासश्वासोपेतं 17 द - अनपेक्षित ।

[1]अत्र श्लोको भवति—

[2]व्याधीनामेकभावो हि मरणाभिनयः स्मृतः ।
[3]विषण्णगात्रैर्निश्चेष्टैरिन्द्रियैश्च विवर्जितः[4] ॥ १३५ ॥

[5]अभिघातजे तु नानाप्रकारा अभिनयविशेषाः[6] । [7]शस्त्रक्षताहिदष्टविषपीतगजादिपतितश्वापदहताः । यथा—तत्र शस्त्रक्षते तावत्सहसाभूमिपतन[8]वेपनस्फुरणादिभिरभिनयः प्रयोक्तव्यः । [9]अहिदष्टविषपीतयोर्विषवेगो यथा—काश्र्यवेपथु[10]विदाहहिक्काफेनस्कन्ध[11]भङ्गजडतामरणानीत्यष्टौ विषवेगाः ।

[12]अत्र श्लोकौ भवतः—

काश्र्यं तु प्रथमे वेगे द्वितीये वेपथुर्भवेत्[13] ।
[14]दाहं तृतीये हिक्कां च चतुर्थे सम्प्रयोजयेत् ॥ १३७ ॥
फेनं च पञ्चमे कुर्यात्षष्ठे स्कन्धस्य भञ्जनम्[15] ।
जडतां सप्तमे कुर्यादष्टमे मरणं भवेत्[16] ॥ १३८ ॥

---

1 ड - अत्र श्लोकः— द - भवति चात्र 2 ड - व्याधिजोषकभावो 3 म - निषण्णगात्रैः 4 ड - विवर्जितैः 5 न - अभिघातजं तु 6 द - नानाऽभिनयविशेषाः यथा संप्रवक्ष्यन्ते तावत् म - प्रकाराभिनयविशेषाः 7 न - यथा शस्त्रक्षतं तावत् च - यथा शस्त्रकृते तावत् 8 न - स्फुरणादिभिरनुभावैरभिनयेत् च - विकम्पनस्फुरणादिभिः 9 ड - विषदष्टेतु विषपीते वा विषवेगे यथा च - अहिदष्टे विषपीते नानाविषवेगैर्यथा प - अहिदष्टे विषपीते वा नानाविषवेगैः 10 ड - दाह 11 न - भञ्जन. 12 ड - अत्रानुवंश्यौ 13 ड - वेपथुस्तथा 14 म - दाहस्तृतीये हिक्का च 15 च - स्याच्छष्ठे स्कन्धभञ्जनम् ड - षष्ठे तु स्कन्धभञ्जनम् 16 ड - तथा—

अत्रार्या भवति—

श्वापदगजतुरगरथोद्भवं तु पशुयानपतनजं वाऽपि[1]।
[2]शस्त्रक्षतवत्कुर्यादनवेक्षित[3]गात्रसञ्चारम् ॥ १३९ ॥
इत्येव मरणं ज्ञेयं नानावस्थान्तरात्मकम्।
प्रयोक्तव्यं बुधैः सम्यग्यथा भावा चेष्टितैः[4] ॥

त्रासो नाम—विद्युदुल्काशनिनिपात[5]निर्घाताम्बुधरमहासत्त्वपशुरवादिभिर्विभावैरुत्पद्यते। [6]तमभिनयेत्संक्षिप्ताङ्गोत्कम्पनवेपथुस्तम्भ[7]रोमाञ्चगद्गदप्रलापादिभिरनुभावैः।

[8]अत्र श्लोको भवति—

महाभैरवनादाद्यैस्त्रासः समुपजायते।
[9]स्रस्ताङ्गाक्षिनिमेषैश्च तस्य त्वभिनयो भवेत् ॥ १४२ ॥

वितर्को नाम—सन्देहविमर्श[10]विप्रतिपत्त्यादिभिर्विभावैरुत्पद्यते। तमभिनये[11]द्विविधविचारित[12]प्रश्नसम्प्रधारणमन्त्र[13]संगूहनादिभिरनुभावैः।

---

1 ड - चापि 2 न - शस्त्रक्षतं च प - शस्त्रक्षतजं 3 च - अनपेक्षित 4 प - भाषाङ्गचेष्टितैः ड वागङ्गचेष्टितैः भ - वागङ्गचेष्टितम् 5 ड - निर्घाताम्बुदरवसत्त्वदर्शनपश्वारवादिभिः न - अशनिपातनिर्घाताम्बुधररसनवातमहासत्त्वदर्शन 6 ड - संक्षिप्ता .... अनुभावैराभिनयेत् प - तमभिनयेत्संक्षिप्ताङ्गानुत्कम्पन— 7 न - रोमोद्गमप्रलयादिभिः 8 ड - अत्र श्लोकः— च - भवति चात्र 9 ड - स्रस्तताङ्गार्धनिमेषाद्यैः 10 च - विप्रत्ययादिभिः ड - प्रत्ययादिभिः 11 न - विवृत. प - विहित 12 ड - संज्ञासंप्रधारण प - प्रज्ञासंप्रधारण ज - प्रज्ञानप्रधारणमन्त्रसंग्रहादिभिः 13 न संग्रहणादिभिः।

[1]अत्र श्लोको भवति—

विचारणादिसम्भूतः सन्देहातिशयात्मकः[2]।
[3]वितर्कः सोऽभिनेयस्तु शिरोभ्रूक्षेपकम्पनैः[4] ॥ १४४॥

एवमेते त्रयस्त्रिंशद्व्यभिचारिणो भावा [5]देशकालावस्थानुरूप्येणात्मगतपरगतमध्यस्था उत्तममध्यमाधमैः स्त्रीपुंसैः स्वप्रयोगवशादुपपाद्या इति।

अत्र श्लोकः—

त्रयस्त्रिंशदिमे भावा विज्ञेया व्यभिचारिणः[6]।
[7]सात्त्विकांस्तु पुनर्भावान्प्रवक्ष्याम्यनुपूर्वशः[8] ॥१४६॥

अत्राह—किमन्ये भावाः [9]सत्त्वेन विनाऽभिनीयन्ते यस्मादुच्यन्ते एते सात्त्विका इति। अत्रोच्यते—एवमेतत्। कस्मात्।

[10]इह हि सत्त्वं नाम मनःप्रभवम्। तच्च समाहितमनस्त्वादुच्यते[11] मनसः समाधौ सत्त्वनिष्पत्ति-

---

1 ड - अत्र श्लोकः च - भवति चात्र 2 ज - संदेहजनकात्मजः च - ससंदेहोभयात्मकः द - संदेहजननात्मजः 3 ड - वितर्कस्त्वभिनेयस्तु ड - वितर्कस्त्वभिनेयः स्याच्छिरोभ्रूपक्ष 4 न - शिरसोत्क्षेपविभ्रमैः 5 ड - देशकालावस्थानुगतमध्यमाधमोत्तमैः स्त्रीनपुंसकैः पुरुषप्रयोगवशादुत्पाद्या इति (प - स्त्रीनपुंसकपुरुष) न - देशकालावस्थात्मगतपरगतमध्याः उत्तममध्याधमैः स्त्रीपुंसैः प्रयोग .... 6 प - संविज्ञेयाः प्रयोक्तृभिः 7 न - सात्त्विकांश्च 8 ड - व्याख्यास्याम्यनुपूर्वशः 9 ड - सत्त्वेन विनाभिधीयन्ते यत एते सात्विका इत्युच्यन्ते (न - यतः सात्त्विका) प - सत्त्वेन नाभिनीयन्ते येनैते सात्त्विका इत्युच्यन्ते (च - सात्त्विका उच्यन्ते) 10 ड - इह सत्त्वं 11 ड - मनस्त्वादुत्पद्यते न - मनस्त्वमुच्यते।

र्भवतीति[1]। तस्य च योऽसौ [2]स्वभावो रोमाञ्चाश्रुवैवर्ण्यादिलक्षणो यथाभावोपगतः स न शक्योऽन्यमनसा कर्तुमिति। लोकस्वभावानुकरणाच्च[3] नाट्यस्य सत्त्वमीप्सितम्। [4]को दृष्टान्तः—इह हि [5]नाट्यधर्मीप्रवृत्ताः सुखदुःखकृता भावास्तथा सत्त्वविशुद्धाः कार्याः यथास्वरूपा भवन्ति[6]। [7]दुःखं नाम [8]रोदनात्मकं तत्कथमदुःखितेन [9]सुखं च [10]प्रहर्षात्मक[11]मसुखितेनाभिनयेत्। एतदेवास्य

---

1 प समाधानाच्च सत्त्वनिर्वृतिरिति ड - मनः समाधानाच्च सत्त्वनिर्वृतिर्भवति न - मनः समाधानेन च तन्निष्पत्तिर्भवतीति च - मनः समाधानाच्च सद्योनिर्वृतिरिति 2 ड - स्वभावः स्तम्भस्वेदरोमाञ्चास्रवैवर्ण्यादिकः न शक्यते मनसा कर्तुमिति प - स्वभावो रोमाञ्चास्रादिकृतः स न शक्यतेऽन्यमनसा न - स्वभावो रोमाञ्चाश्रुवैवर्ण्यादिभिः कृतः स न शक्यतेऽन्यमनसा कर्तुम्। लोक .... च - स्वभावो रोमाञ्चादिकृतः 3 प - कारणत्वाच्च नान्यस्य च - करणाच्च 4 ड - अत्राह को दृष्टान्त इति चेदुच्यते न - अत्राह - को दृष्टान्त इति। उच्यते 5 ड - नाट्यः सर्वः सर्वः प्रवृत्तः सुखदुःखकृतो भावः तथा सत्त्वविशुद्ध्यधिष्ठितः कार्यो यथा स्वरूपो भवति 6 न - नाट्यधर्मीप्रवृत्तौ ..स्वरूपो भवति प - नाट्यधर्मप्रवृत्ताः ..सरूपा भवन्ति 7 न - तत्र दुःखं 8 द - रुदितात्मकं तत्कथमदुःखितेन दुःखं दुःखप्रहर्षात्मकं च सुखितेनाभिनेतुं शक्यत इति सत्त्वमीप्सितमिति सात्त्विका भावा इत्यभिव्याख्याताः। तथा स्तम्भः .... 9 न - अश्रुहर्षान्वितेन वाभिनेय इति कृत्वा सात्त्विका भावा इति व्याख्याताः। अत्रोच्यते—इह शोको नाम यथा स्वभावसत्त्वयोगो भवति तदस्यास्रादयः सत्त्वयोगात्प्रवर्तन्ते यथा हर्षास्ररोमाञ्चगद्गदादयः लोकस्वाभावानुकरणाच्च नाट्यस्य सर्वं समीहितम्। इह नाट्यधर्मीप्रवृत्ताः सुखदुःखकृता भावास्तथा सत्त्वाधिष्ठितैः कार्याः यथा स्वरूपो भवति। दुःखं नाम रोदनात्मकं कथमदुःखितेन हर्षान्वितेनाभिनेयमिति कृत्वा सात्त्विकाभावा इति व्याख्याताः। एतदेव ह्यस्य सर्वं यद्दुःखितेन वा प्रहृष्टेन वा प्रहर्षरोमाञ्चौ दर्शयितव्यौ। तथाभ्यवहितः सत्त्वयुक्तो भवति। तथाहि वक्ष्यते—

सत्त्वातिरिक्तोऽभिनयो ज्येष्ठ इत्यभिधीयते।
समसत्त्वो भवेन्मध्यः सत्त्वहीनोऽधमः स्मृतः॥

तस्मात्सात्त्विका इमे भावा इत्यवगन्तव्याः। तत्र—इमे स्तम्भस्वेदवेपथुरोमाञ्चाश्रुस्वरभेदवैवर्ण्यप्रलय इत्यष्टौ सात्त्विका भावाः। तत्र क्रोधभय ..... 10 म - अभिविख्याताः 11 च - तत्कथमसुखितेन।

[सर्वे] दुःखितेन प्रहृष्टेन वाऽस्त्ररोमाञ्चौ प्रदर्शयितव्याविति कृत्वा सात्त्विका भावा इत्यभिव्याख्याताः[1] ।

तत्र इमे[2]—

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभेदो[3]ऽथ वेपथुः ।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विका मताः ॥ १४८ ॥

[4]अत्रार्याः । तत्र—

क्रोधभयहर्षलज्जादुःखश्रमरोगतापघातेभ्यः ।
[5]व्यायामक्लमघर्मैः[6] स्वेदः सम्पीडनाच्चैव ॥ १४९ ॥
हर्षभयरोगविस्मयविषादरोषादिसम्भवः[6] स्तम्भः ।
शीतभयहर्ष[7]रोषस्पर्शजरासम्भवः कम्पः ॥ १५० ॥
आनन्दामर्षाभ्यां धूमाञ्जनजृम्भणाद्भयाच्छोकात्[8] ।
अनिमेषप्रेक्षणतः शीताद्रोगाद्भवेदास्रम्[9] ॥ १५१ ॥
शीतक्रोधभयश्रमरोगक्लमतापजं च वैवर्ण्यम्[10] ।
स्पर्शभयशीतहर्षैः क्रोधाद्रोगाच्च[11] रोमाञ्चः ॥ १५२ ॥
[12]स्वरभेदो भयहर्षक्रोधजरारौक्ष्यरोगमदजनितः[13] ।
श्रममूर्छामदनिद्राभिघात[14]मोहादिभिः प्रलयः ॥

---

1 म - अभिविख्याताः 2 च - तत्र । क्रोध . . . 3 ग - स्वरसादो 4 द - तत्र 5 प - व्यायामात्क्रम 6 ड - मदरोषसंभवः च - रोगवशसंभवः 7 न - रोम 8 ड - जृम्भणभयाच्च शोकात् म - जृम्भणैर्भयाच्छोकात् 9 च - अश्रु द - अस्रम् 10 न - शीतभयश्रमरोगैस्तापात्क्रामाच्च वैवर्ण्यम् 11 ड - वातहर्षात् द - गीतहर्षात् 12 न - रोमाच्च 13 ड - स्वरसादो जयहर्षक्रोधमदजनितः ध - मोहमदजनितः 14 न - निघात ।

एवमेते बुधैर्ज्ञेया भावा ह्यष्टौ तु सात्त्विकाः ।
कर्म चैषां प्रवक्ष्यामि रसभावानुभावकम्[1] ॥ १५४ ॥
[2]निःसंज्ञो निष्प्रकम्पश्च स्थितः शून्यजडाकृतिः[3] ।
[4]स्कन्नगात्रतया चैव स्तम्भं त्वभिनयेद्बुधः ॥ १५५ ॥
[5]व्यजनग्रहणाच्चापि स्वेदापनयनेन च ।
[6]स्वेद एवाभिनेतव्यस्तथा वाताभिलाषतः[7] ॥ १५६ ॥
मुहुः कण्टकितत्वेन तथोल्लुकसनेन च[8] ।
[9]पुलकेन च रोमाञ्चं गात्रस्पर्शेन दर्शयेत् ॥
स्वरभेदोऽभिनेतव्यो[10] भिन्नगद्गदनिस्वनैः[11] ।
वेपनात्स्फुरणात्कम्पाद्वेपथुं सम्प्रदर्शयेत्[12] ॥
मुखवर्णपरावृत्त्या नाडीपीडनयोगतः ।
वैवर्ण्यमभिनेतव्यं प्रयत्नात्तद्धि दुष्करम्[13] ॥
[14]बाष्पाम्बुप्लुतनेत्रत्वान्नेत्रसम्मार्जनेन च ।
मुहुरश्रुकणापातैरास्रं त्वभिनयेद्बुधः ॥ १६० ॥

---

1 प - ह्यनुभावानुभावकम् । ह्यनुभावानुभावनम् द - महाभावानुभावकम 2 ड निश्चेष्टो 3 द - स्थितशून्यजडाकृतिः 4 ड - निः संज्ञः स्तब्धगात्रश्च 5 ड - व्यञ्जन 6 ड - स्वेदस्याभिनयो योज्यः 7 ड - लाषकः 8 ध - तथोल्मुकसनेन च प - तथोल्लुकशनेन च — न - तथोल्लुकसनेन च द - तथा काकुस्वनेन च 9 ड - रोमाञ्चस्त्वभिनेयोऽसौ गात्रसंस्पर्शनेन च (न - अभिनेयो वै) 10 ड - स्वरभेदस्तथा चैव 11 प - स्वरभेदं तथाचैव....विस्वरैः 12 न - संप्रयोजयेत् 13 ड - प्रयत्नादङ्गसंश्रयम् 14 न - नेत्रसंमार्जनैर्वाष्पैरास्रं चाभिनयेद्बुधः 15 द - रश्रुचाभिनयेत् प - अस्रं चाभिनयेत् ड - आस्रं त्वभिनयेत् ।

[1]निश्चेष्टो निष्प्रकम्पत्वादव्यक्तश्वसितादपि ।
[2]महीनिपातनाच्चापि प्रलयाभिनयो भवेत् ॥
एकोनपञ्चाशदिमे[3] यथाव-
[4]द्भावास्त्र्यवस्था ह्युदिता मयेह ।
[5]भूयश्च ये यत्र रसे नियोज्या-
स्तांश्छ्रोतुमर्हन्ति तु[6] विप्रमुख्याः ॥ १६२ ॥

अत्र श्लोकाः—

शङ्काव्याधिस्तथाग्लानिश्चिन्तासूया भयं तथा ।
विस्मयश्च वितर्कश्च स्तम्भश्चपलता तथा ॥
[7]रोमाञ्चहर्षौ निद्रा च तथोन्मादमदावपि ।
स्वेदश्चैवावहित्थं च प्रलयो वेपथुस्तथा ॥ १६५ ॥
विषादश्रमनिर्वेदा गर्वावेगौ धृतिः स्मृतिः ।
मतिर्मोहो विबोधश्च सुप्तमौत्सुक्यलज्जिते ॥ १६६ ॥
क्रोधामर्षौ च हासश्च शोकोऽपस्मार एव च ।
दैन्यं च मरणं चैव रतिरुत्साहसंयुता ॥ १६७ ॥
त्रासवैवर्ण्यरुदितैः स्वरभेदः शमोऽपि च ।
जडता च तथा षट् च चत्वारिंशत्प्रकीर्तिताः ॥

---

1 प - निश्चेष्टो निष्प्रकम्पश्च स्थिरः शून्यजडाकृतिः न - निश्चेष्टो निष्प्रकम्पश्च अव्यक्तोच्छ्वसितादपि 2 ड - मेदिनीपतनाच्चापि द - महीनिपतनाद्वापि च - महीनिःपतनं चापि 3 च - पञ्चादशमी ड 4 - भावव्यवस्था गदिता मयावः द - भावास्त्र्यवस्था गदिता मयावः 5 च - एषां च ये ड - येषां च षे 6 ड - च 7 ड - ... ग्लानिः शङ्काह्यसूया च श्रमश्चपलता तथा । सुप्तं निद्रावहित्थंच शृङ्गारे वेपथुस्तथा न - सुप्तनिद्रावहित्थाश्च) ।

आलस्यौग्र्यजुगुप्साख्यैरेवं भावैस्तुवर्जिताः[1] ।
[2]उद्भावयन्ति शृङ्गारं सर्वे भावाः स्वसंज्ञया ॥१६९॥
यथाऽवसरमेते हि स्थायिसञ्चारिसत्त्वजाः ।
उद्दीपयन्ति शृङ्गारं रसमासाद्य संज्ञितम् ॥
ग्लानिः श । ह्यसूया च श्रमश्चपलता तथा ।
सुप्तं निद्रावहित्थं च हास्ये भावाः प्रकीर्तिताः ॥
निर्वेदश्चैव चिन्ता च दैन्यं ग्लान्यास्रमेव च[3] ।
जडता मरणं चैव व्याधिश्च करुणे स्मृताः[4] ॥
गर्वोऽसूया[5] मदोत्साहावावेगोऽमर्ष एव च ।
क्रोधश्चपलतौग्र्यं च विज्ञेया रौद्रसम्भवाः ॥
असम्मोहस्तथोत्साह आवेगो हर्ष एव च ।
[6]मतिश्चैव तथोग्रत्वममर्षो मद एव च[7] ॥ १७४ ॥
रोमाञ्चः [8]स्वरभेदश्च[9] क्रोधोऽसूया धृतिस्तथा ।
गर्वश्चैव वितर्कश्च वीरे भावा भवन्ति हि ॥
वेपथुः स्वरभेदश्च रोमाञ्चो गद्गदस्तथा ।
स्तम्भश्च मरणं स्वेदो वैवर्ण्यं च भयानके ॥
अपस्मारस्तथोन्मादो विषादो मद एव च ।
[10]मृत्युर्व्याधिर्भयं चैव भावा बीभत्ससंश्रयाः[11] ॥

---

1 द - जुगुप्साभिर्भावैस्तु परिवर्जिताः 2 द - तद्भासयन्ति ते सर्वे रसं शृङ्गार-संज्ञकम् 3 च - ग्लान्यस्रमेवच 4 ड - रसे 5 ड - तथोत्साह आवेगोमद एव च । क्रोधश्चपलताहर्षे रौद्रेतूग्रत्वमेव च (न - चौग्र्यं रौद्रे भावा भवन्त्यमी द - क्रोधश्च) जडता हर्षो रौद्रे तूग्रत्वमेव च 6 द - रोमाञ्चः प्रतिबोधश्च क्रोधोऽसूया धृतिस्तथा । गर्वश्चैव वितर्कश्च मतिश्चैव तथोग्रता । अमर्षोऽथ मदश्चैव वीरे भावा भवन्ति हि 7 ड - उग्रत्वहर्षउन्माद एव च 8 न - प्रतिबोधश्च 9 ड - क्रोधासूये 10 ड - मतिर्व्याधिः न - स्मृतिः 11 ड - चैवाद्भुताश्रयाः ।

स्तम्भः स्वेदश्च मोहश्च रोमाञ्चो विस्मयस्तथा ।
आवेगो जडता हर्षो मूर्छा चैवाद्भुते रसे[1] ॥ १७८ ॥
[2]ये चान्ये सात्त्विकाभावा नानाभिनयसंश्रिताः[3] ।
[4]रसेष्वेतेषु सर्वेषु ते ज्ञेया नाट्ययोक्तृभिः ॥ १७९ ॥
न ह्येकरसजं काव्यं किंचिदस्ति प्रयोगतः[5] ।
भावो वापि रसो वापि प्रवृत्तिर्वृत्तिरेव वा ॥
[6]बहूनां समवेतानां रूपं यस्य भवेद्बहु ।
स मन्तव्यो रसः स्थायी शेषाः संचारिणो मताः ॥
दीपयन्तः प्रवर्तन्ते ये पुनः स्थायिनं रसम्[7] ।
ते तु संचारिणो ज्ञेयास्ते हि[8] स्थायित्वमागताः ॥
विभावानुभावयुक्तो ह्यङ्गवस्तुसमाश्रयः ।
संचारिभिस्तु संयुक्तः स्थाय्येव तु रसो भवेत् ॥
स्थायी सत्त्वातिरेकेण प्रयोक्तव्यः प्रयोक्तृभिः ।
संचार्याकारमात्रेण स्थायी यस्माद्व्यवस्थितः[9] ॥ १८४ ॥
[ये त्वेते सात्त्विका भावा नानाभिनययोजिताः ।
रसेष्वेतेषु सर्वेषु ते ज्ञेया नाट्यकोविदैः[10] ॥] १८५ ॥
न ह्येकरसजं काव्यं नैकभावैकवृत्तिकम् ।
विमर्दे रागमायाति प्रयुक्तं हि प्रयत्नतः ॥ १८६ ॥

---

1 ड - चैवाद्भुताश्रयाः 2 न - ये त्वेते 3 न - संश्रयाः द - नानाभावसमाश्रयः 4 द - रसेषु तेषु सर्वे ते विज्ञेया 5 च - प्रयोगजम् 6 ड - सर्वेषां 7 न - स्थायिनो रसाः 8 न - ते तु प - तेऽपि 9 ड - व्यवस्थितः ।

चित्राणि न विरज्यन्ते लोके चित्रं हि दुर्लभम् ।
विमर्दो रागमायाति प्रयुक्तमपि यत्नतः ॥

10 म - संङ्गकादर्शे षष्ठाध्यायस्य "शृङ्गारं त्रिविधं" इत्यादि चत्वारः श्लोकाः सन्ति ।

भावा वापि रसा वापि प्रवृत्तिर्वृत्तिरेव वा ।
*बीभत्साद्भुतशान्तानां त्रैविध्यं नात्र कथ्यते ॥
षण्णां रसानां त्रैविध्यं नानाभावरसान्वितम् ।
सत्त्वप्रयोजितो ह्यर्थः प्रयोगोऽत्र विराजते ॥
विदित्वा हि विराजन्ते लोके चित्रं हि दुर्लभम् ।
[1]नानाभावार्थसंपन्नाः स्थायिसत्त्वाभिचारिणः[2] ॥
[3]पुष्पावकीर्णाः कर्तव्याः काव्येषु हि रसा बुधैः[4] ।
[5]एवं रसानां भावानां व्यवस्थानमिह स्मृतम् ॥
य एवमेताञ्जानाति स गच्छेत्सिद्धिमुत्तमाम् ॥ १९०॥

इति श्रीभारतीये नाट्यशास्त्रे भावविकल्पो नाम[6]

सप्तमोऽध्यायः ॥

---

1 ड - नानार्थाभावनिष्पन्ना न - नानार्थभावनिष्पन्ना 2 ड - विचारिणः प - स्थायिभावा विचारिणः 3 ड - पुंसानुकीर्णाः न - पुष्णानु 4 ड - काव्ये सत्त्वरसाश्रयाः न - काव्येषु हि रसाश्रयाः 5 द - एवं रसाश्च भावाश्च व्यवस्था नाटके स्मृताः (ड - व्यवस्था) 6 न - भावव्यञ्जकः ।

*मसंज्ञकादर्श एवायम् ।

Ananda Press, Madras.

व्याख्यानोदाहृतश्लोकभागानां स्थलनिर्देशः परिपूरणं वा ॥

पु प

३ २४ "कामजो दशको गणः" (मनुस्मृतिः—७-४७)

मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियो मदः ।
तौर्यत्रिकं वृथाट्या च कामजो दशको गणः ॥

३ २४ "याज्ञवल्क्यस्मृति...."

यथावधानेन पुमान् साम गायत्यविच्युतम् ।
सावधानस्तथाभ्यासात्परं ब्रह्माधिगच्छति ॥
अपरान्तकमुल्लोप्यं मद्रकं प्रकरीं तथा ।
ओवेणकं सरोबिन्दमुत्तरं गीतकानि तु ॥
ऋग्गाथा पाणिका दक्षविहिता ब्रह्मगीतिका ।
गेयमेतत्तदभ्यासकारणाच्चोक्तसंज्ञकम् ॥
वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः ।
तालज्ञश्चाप्रयासेन योगमार्गं निगच्छति ॥ (प्राय-१०२...१०५)

२२ १३ अस्य शाखा च नृत्तं च वस्तून्यभिनयस्य च । (नाट्य-८-१५)

४२ १३ "शमव्यायामाभ्यां प्रतिविहिततन्त्रस्य नृपतेः
परं प्रत्यावापः फलति कृतसेकस्तरुरिव ।
बहुव्याजं राज्यं न सुकरमराजप्रणिधिभि-
र्दुराराधा लक्ष्मीरनवहितचित्तं छलयति ॥ (सूक्तिमुक्तावलिः)
(बालरामा-१-२४)

४२ "आत्मारामा"... वेणीसंहारः (१-२३)

"आत्मारामा विहितरतयो निर्विकल्पे समाधौ
ज्ञानोत्सेकाद्विघटिततमोग्रन्थयः सत्त्वनिष्ठाः ।
यं वीक्षन्ते कमपि तमसां ज्योतिषां वा परस्ता-
त्तं मोहान्धः कथमयममुं वेत्ति देवं पुराणम् ॥

पृ पं

४२ "व्यक्तिर्व्यञ्जनधातुना दशविधेनाप्यत्र लब्धाधुना
विस्पष्टो द्रुतमध्यलम्बितपरिच्छिन्नस्त्रिधायं लयः ।
गोपुच्छप्रमुखाः क्रमेण यतयस्तिस्रोऽपि सम्पादिता-
स्तत्त्वौघानुगताश्च वाद्यविधयः सम्यक्त्रयो दर्शिताः ॥ (नागा-
नन्दम् १-१)

४२ आविलपयोधराग्रं लवलीदलपाण्डुराननच्छायम् ।
३०७ कतिचिदहानि वपुरभूत्केवलमलसेक्षणं तस्याः॥ विक्रमो (५-८)

९८ पादाग्रस्थितया मुहुःस्तनभरेणानीतया नम्रतां
शम्भोः सस्पृहलोचनत्रयपथं यान्त्या तदाराधने ।
ह्रीमत्या शिरसीहितः स पुलकस्वेदोद्गमोत्कम्पया
विश्लिष्यन्कुसुमाञ्जलिर्गिरिजया क्षिप्तोऽन्तरे पातु वः ॥
रत्ना-(१-१)

१७४ १० "ग्रन्थिकरिकल्पित"—"ग्रन्थिकपरिकल्पित" स्यात्। ग्रन्थिक-
शब्दस्य प्रयोगः—"ग्रन्थिकेषु कथम्" इति महाभाष्यम्।
(३-१-२६)

१७९ १८ प्रमदा सैवानुकार्यात्र (१७३-४)

१७९ २४ "यानि वाक्यैस्तु न ब्रूयात्" (नाट्य-३२-३७०)

१८८ १८ तदेव हि पुनर्वस्तु भूयो नृत्तेन योजयेत् (नाट्य-४-२९१)

२३९ १३ "पूर्वरङ्गे तु षाडवः"
मुखे तु मध्यमग्रामः षड्जः प्रतिमुखे तथा ।
गर्भे साधारितश्चैव ह्यवमर्शे तु पञ्चमः ॥
संहारे कैशिकः प्रोक्तः पूर्वरङ्गे तु षाडवः ।

२६९ १९ पर्यन्ते कर्तव्यो नित्यं रसोऽद्भुतः (नाट्य १८-४४)

२७५ १७ "मणिप्रदीप ··· प्रति"—धर्मकीर्तेः.

२८० ग्रीवाभङ्गाभिरामं मुहुरनुपतितस्यन्दने बद्धदृष्टिः
पश्चार्धेनप्रविष्टः शरपतनभिया भूयसा पूर्वकायम् ।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥
शाकु (१-७)

पृ प

२७० उमापि नीलालकमध्यशोभि विस्रंसयन्ती नवकर्णिकारम् ।
चकार कर्णच्युतपल्लवेन मूर्ध्ना प्रणामं वृषभध्वजस्य ॥
कुमा (३-६२)

२७० हरस्तु किञ्चित्परिवृत्तधैर्य-
श्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे विम्बफलाधरोष्ठे
व्यापारयामास विलोचनानि ॥

२८३ - ३ "दृश्यं श्रव्यं च"—(नाट्य १ - ११)

२९२ - १० नाट्यस्यैषा तनूरिति—(नाट्य १४ - २)

२९५ - ३३ "शृङ्गारीचेत्कविः" काव्ये जातं रसमयं जगत् ।
न चेत्कविर्वीतरागो नीरसं व्यक्तमेव तत् ॥ (आग्नेयपुराणम्)
(३३९ - ११)

२९८ - १६ "स पातु वो..." चन्द्रकस्येति वल्लभदेवः

२९८ - २० "दोर्दण्डाञ्चित..." महावीरचरिते (२ - ५४)

२९८ निर्वाणवैरदहनाः प्रशमादरीणां
नन्दन्तु पाण्डुतनयाः सह माधवेन ।
रक्तप्रसाधितभुवः क्षतविग्रहाश्च
स्वस्था भवन्तु कुरुराजसुताः सभृत्याः ॥ वेणी (१ - ७)

२९८ "कर्णस्य..."

दायादा न ययोर्बलेन गणितास्तौ द्रोणभीष्मौ हतौ
कर्णस्यात्मजमग्रतः शमयतो भीतं जगत्फाल्गुनात् ।
वत्सानां निधनेन मे त्वयि रिपुः शेषप्रतिज्ञोऽधुना
मानं वैरिषु मुञ्च तात पितरावन्धाविमौ पालय ॥ (वेणी ५-५)

२९९ दृशः पृथुतरीकृता जितनिजातपत्रत्विष-
श्चतुर्भिरपि साधुसाध्विति मुखैः समं व्याहृतम् ।
शिरांसि चलितानि विस्मयवशाद्ध्रुवं वेधसो
विधाय ललनां जगत्त्रयललामभूतामिमाम् ॥ रत्ना (१-१५)

पु प

३०५ राज्यं निर्जितशत्रु योग्यसचिवे न्यस्तः समस्तो भरः
सम्यक्पालनलालिताः प्रशमिताशेषोपसर्गाः प्रजाः ।
प्रद्योतस्य सुता वसन्तसमयस्त्वं चेति नाम्ना धृतिं
कामः काममुपैत्वयं मम पुनर्मन्ये महानुत्सवः ॥

३०६ ३ ध्वन्यालोकलोचनस्य तालपत्रादर्शे—
"पल्लुदिसि सिट्ठाळावण्णुज्जलग्गुघारिडोळ्वपइट्टा" (?)

३०७ "वपुरलस ..." वेणी (१-२)

उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा
धृत्वा चान्येन वासो विगलितकबरीभारमंसं वहन्त्याः ।
भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः
शय्यामालिङ्ग्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः पुनातु ॥

३०७ अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥ विक्रमो (१-८)

३०९ ९ "वामो हि कामः"— वात्स्यायनसूत्रम् - (२-७-१)
"वाम एव सुरतेष्वपि कामः"— (किरातार्जुनीयम्—(९-४९);
("ता सुट्ठुक्खु एवं वुच्चदि— 'कामो वामो' त्ति")
मृच्छकटी- (५-९)

३११ "आशाबन्धः.... " मेघसन्देशः (१०)
तां चावश्यं दिवसगणनातत्परामेकपत्नी-
मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम् ।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि ॥

३१२ २० "जंस अहं तादेण दिण्णा" प्रियदर्शिका (२-८ आरण्यकोक्तिः)

३२१ १७ "युद्धं राज्यभ्रंशो ..... नि" नाट्य (१८-२१)

पु प

३२३ १९ आः सीते पतिगर्वविभ्रमभरभ्रान्तभ्रमद्बान्धव-
प्रध्वंसस्मितकान्तिमत्तव तदा जातं यदेतन्मुखम्।
संप्रत्येष हठात्तदेव कुरुते केशोच्चयाकर्षण-
त्रस्तोत्तानितलोललोचनपतद्बाष्पप्लुतं रावणः ॥
(शृङ्गारप्रकाश उदाहृतोऽयं श्लोको मायुराजस्योदात्तराघवा-
दुद्धृत इति मन्यामहे.)

३२३ २० "नानादेवाविगाढा . . . . . दत्त"
पादाघातैः सुरभिरभितः सत्वरं ताडनीयो
गाढाम्रेडं मलयमरुतः शृङ्खलादाम दत्त ।
कारागारे क्षिपत तरसा पञ्चमं रागराजं
चन्द्रं चूर्णीकुरुत च शिलापट्टके पिष्टबिम्बम् ॥ (बालरामा-५-५१)

३३१ १३ "प्रशंसायां रूपम्" (पाणिनेः ५-३-६६)

३३७ १२ "प्रेमासमाप्तोत्सवम्"
तद्वक्त्रेन्दुविलोकनेन दिवसो नीतः प्रदोषस्तथा
तद्गोष्ठ्यैव निशापि मन्मथकृतोत्साहैस्तदङ्गार्पणैः।
तां संप्रत्यपि मार्गदत्तनयनां द्रष्टुं प्रवृत्तस्य मे
बद्धोत्कण्ठमिदं पुनः किमथवा प्रेमासमाप्तोत्सवम् ॥
तापसवत्सराजे (१-१७)

३४० ८ "मोक्षे चापि विरागिणः" — (नाट्य २७ - ५७)

चतुर्थाध्यायस्थकरणलक्षणे श्रीचिदम्बरपुरनटराजदेवालयस्थशिलोट्टङ्कितपाठस्य मुद्रितपाठस्य च भेदसूचिका ॥

पु	प	मुद्रितपाठः	शासनस्थपाठः
९९	४	वलितोरुकमुच्यते	वलितोरु तदुच्यते
१००	२	वक्षःस्थोऽपविद्धं	वक्षःस्थो ह्यपविद्धं
१०१	३	संधितौ	संस्थितौ
१०३	२	निकुट्टनम्	निकुट्टकम्
१०४	१	अश्चितौ	अश्चितो
,,	२	निकुश्चितार्ध	निकुट्टितार्ध
,,	३	कटिश्छिन्ना	कटिच्छिन्ना
१०७	१	विक्षिप्ताक्षिप्त	विक्षिप्तोक्षिप्त
,,	२	सूचिभ्यां	सूचीभ्यां
,,	३	श्लिष्टगतो	श्लिष्टकृतो
१०९	३	च	तु
११०	४	तदञ्चित	तदाञ्चित
,,	५	कटिजानू	कटीजानू
११३	१	खटकामुखौ	खटिकामुखौ
,,	६	तु	च
११४	१	दक्षिणश्चापवर्तितः	दक्षिणश्च विवर्तितः
,,	३	विधायातस्तस्योपरि	विधायाथ तस्योपरि
,,	४	तु	च
११५	३	रेचितौ हस्तपादौ च कटी	रेचितं हस्तपादं च कटि
,,	६	वलनंचैव . . तु तत्	वलनाचैव . . . च तत्
११६	३	दक्षिणो रेचितः	रेचितो दक्षिणः
११८	२	लताख्यस्तु	लताख्यश्च

पृ	प	मुद्रितपाठः	शासनस्थपाठः
११८	३	अलपद्मः···छिन्ना	अलपत्मः···छिन्न
,,	६	करौ वृश्चिकरेचितम्	कुर्याद्वृश्चिकरेचितम्
११९	१	पृष्ठाश्चितस्तथा	पृष्ठाश्चितस्तदा
,,	४	तु	च
१२०	३	तु	च
१२१	३	गात्रेणानतेन	गात्रेण नतेन
,,	६	उरोमण्डलिकौ	उरोमण्डलिनौ
१२२	१	च	तु
१२३	१	पृष्ठतः पार्श्वतो	पार्श्वतः पृष्ठतो
,,	६	तदुच्यते	प्रकीर्तितम्
१२५	६	मण्डलाविद्धं	मण्डलाबद्धं
१२९	४	तत्सूची	तत्सूचि
,,	५	अलपद्मः	अलपत्मः
१३१	१	अपसृतौ पादौ	अपसृतः पादः
,,	६	जङ्घाश्चितोपरि क्षिप्ता तद्विद्यात्	जङ्घाचिता परिक्षिप्ता तद्विन्द्यात्
१३२	२	परिवृत्तत्रिकं	परिवृत्तं त्रिकं
,,	६	वापि	चापि
१३३	५	द्रुतक्रमम्	वृतक्रमम्
,,	६	चापि सिंहविक्रीडिते	चैव सिंहविक्रीडितं
१३४	१	प्रसारितः	प्रसर्पितः
,,	५	चरणश्चैको	चरणः कार्यः
१३५	३	वक्षः	पक्ष
१३६	२	निवेशं करणं तु	निवेशकरणं च
१३७	३	गमनोन्मुखः	गगनोन्मुखः
१३८	२	नितम्ब	नतन्तु
१३९	४	उद्घाटित	उद्घटित

ग्रन्थतत्कर्तृनामसूची ॥

शुद्धिपत्रम्

पृ	प	अशुद्धम्	शुद्धम्
१	८	षट्त्रिंश (षड्विंश)	षड्विंश (षट्त्रिंश?)
२	२	व्यारूया	व्याख्या
२	२६	चेदिह	(चेह)?
३	१	प्रत्यसङ्गत्वात्	प्रत्यसङ्गत्वात्
१०	५	मार्गेऽपि	मार्गेऽपि
१०	२१	श्राव्यं	श्रव्यं
१२	१२	ह्यतया	ह्यतया
१३	१७	इतिरेवमर्थं	इतिरेवमर्थं
१३	१८	निर्देशं	निर्देशं
१५	९	प्राष्टुद	प्राष्टुभ
१७	१	य इम	य इमे
३०	१४	लुगन्ता	लुगन्ता
३२	१६	राच्ये	वाच्ये
,,	१८	विद्यादात	विद्युदिति
३६	९	पस्तवत्	पुस्तवत्
,,	१३	क्रोधायिनतापेत्त	क्रोधायिततापत्ते
,,	२०	काव्येष्कपि	काव्येष्वपि
,,	२२	चित्तवृत्तं	(चित्तवृत्ति ?)
३७	१५	वा(ग नु	वा [ग] नु
३७	१६	विकारण	विकारण (?)
,,	१९	तद्बुध्यैव	तद्बुध्येव
४२	२२	श्रृङ्गारस्य	शृङ्गारस्य
,,	२८	हेज्जलस्य	भेज्जलस्य
५२	१५	अ १७	अ १८
,,	१९	अ १७	अ १८
,,	२१	अ १७	अ १८
	२२	अ १७	अ १८
५३	१९	२४ २	१४ २
६४	९	७२	८२
६७	२१	चतुरख्रे	चतुरथ्रे
७१	१०	गृह्यताम्	गृह्यताम् (?)
९७	४	सौष्ठव	सौष्ठवं
१०४	२६	वात्रपल्लव	वालपल्लव (?)
१०५	२	पार्श्वे	[illegible]

पृ	प	अशुद्धम्	शुद्धम्
११८	४	स्था के ह	स्थानकेनेह
,,	१५	अलपद्य	अलपद्म
१२१	४	विद्धः	विद्धं
१३५	१४	लतारव्यः	लताख्यः
१३९	३	ईदु	ईद
१४८	२३	९० १८३	१० १८३
१५७	१८	द्वात्रिंशत्	द्वात्रिंशति
,,	,,	चत्वारिंशत्	चत्वारिंशति
१६९	१९	जृम्भसि	जृम्भसे
१७४	१०	ग्रन्थिकरिकल्पित	ग्रन्थिक(प)रिकल्पित
,,	,,	सम्पदा	(सम्पदः ?)
१७६	१६	योगोः	योगः
१८१	१२	विचारीणां	विचारीणां (?)
१८२	२०	श्रृङ्गार	शृङ्गार
	२१	,,	,,
१८३	२३	विस्तार	विस्तर
१८५	१८	तद्वघ्यृव	तद्वघ्यैव
१९४	१०	श्रृंखलिका	शृङ्खलिका
,,	२०	,,	,,
१९७	१८	माहा ।तं	माह । वर्तं
१९९	२३	श्रृङ्गार	शृङ्गार
,,	२५	,,	,,
२००	८	,,	,,
२०२	८	,,	,,
२१३	६	विघस्य	विघास्य
,,	१५	कीर्तनाद्धेव	कीर्तनाद्देव
२१४	२१	३८	३४
२१६	९	मैघा	मेघा
२२८	१९	तोद्यावधानं	तोद्यविधाने
२३०	१४	३२	३१
२३६	१६	मट्टद्यार्थे	मद्दद्यार्थे
,,	२०	(तंनं ?)	(तंन ?)
,,	२६	तानाभिज्ञाः	तानाभेज्ञाः
२४५	६	रङ्गसिद्धौ	रङ्गसिद्धौ
२५०	१७	श्रृङ्गार	शृङ्गार
२५३	२२	गन्थ	ग्रन्थ
,,	,,	ञ्जलो	च्छलो

पृ	पं	अशुद्धम्	शुद्धम्
२५४	८	ुपोहनम्	ह्युपोहनम्
२५५	१	प्रक्रीर्तिता	प्रकीर्तिता
२६७	८	धात्वंथ	धात्वर्थ
२६९	११	तद्वक्ष्यन्ते	तद्वक्ष्यते
२७०	१९	संश्रथा	संश्रया
२७२	१६	निरुपणादि	निरूपणादि
,,	२०	रुपत्वादिति	रूपत्वादिति
,,	२१	गानताद्य	गानाताद्य
२७५	६	शाक	शोकः
२७८	२३	खेचित	खोचित
२८०	१७	रुपासंक्रमणा	रूपासंक्रमणा
,,	२१	कापहासित	कापहस्तित
,,	२५	बुध्यन्त	बद्धयन्त
२८७	९	प्रावान्येन	प्राधान्येन
,,	१६	श्रृङ्गारे	शृङ्गारे
२८८	३	निर्वर्तन्ते	निर्वर्त्यन्ते
,,	९	१२	३१
२९८	६	धूमान्वितेन	धूमान्धितेन
३००	१	वणा	वर्णा
,,	७	शृङ्गरो	शृङ्गारो
३०१	१	रसना	रसाना
३०३	१	न्मीयेन	त्मीयेन
३०४	११	दासत	दसित
,,	१५	इयच्छु	इयच्छृ
,,	२२	हिर्ष्या	हीर्ष्या
३०७	१७	वपुरभूत्" "केवलं	वपुरभूत्केवलं
३०८	१५	तोयक	तोय
३१४	५	हसीत	हसति
३२३	२०	नानादेवाविगाढाम्रेढं मलय मरुताः मेखला	गाढाम्रेडं मलयमरुतः शृङ्खला
३२४	२३	क्रोधातिशाय	क्रोधातिशयं
,,	,,	युद्धवीरेपि	युद्धवीरेऽपि
३५२	२	कुरणा	करणा
,,	११	ंादतं	रुदितं
३५७	११	क्रष्ट	क्रुष्ट
३५८	११	कम्पने	कम्पेन
३६०	५	प्रयाक्तव्यः	प्रयोक्तव्यः
,,	१०	विध	विधं

GAEKWAD'S ORIENTAL SERIES.

Published under the Authority of the Government of His Highness the Maharaja Gaekwad of Baroda

AT THE

CENTRAL LIBRARY, BARODA (India).

GENERAL EDITOR:

BENOYTOSH BHATTACHARYYA, M. A., Ph. D.

Select Opinions.

The Series as a whole will bring notable accession to our knowledge of the immense and wonderful Sanskrit Literature. The volumes are excellently printed and edited, and the notes and introductions are scholarly and useful.

(Dr.) F. W. THOMAS, LIBRARIAN, INDIA OFFICE.

The editions have been executed with the greatest care. The prefaces are learned and informing. They are worthy of the State which published them.

(Mahamahopadhyaya Dr.) Haraprasad Shastri, M. A., C. I. E., Hon. D. Litt.

The inclusion of Prakrit works in the series is an excellent idea. Owing to the practical monopoly of Sanskrit in India, the study of the Prakrits has been too much neglected there, though these mediaeval vernaculars as connecting links between Sanskrit and the innumerable dialects of modern India, are of great philological, and to some extent, literary importance...The Maharaja is certainly to be congratulated on his plan of bringing out this series.

—LONDON TIMES, LITERARY SUPPLEMENT.

GAEKWAD'S ORIENTAL SERIES.

CRITICAL EDITIONS OF UNPRINTED SANSKRIT WORKS, EDITED BY COMPETENT SCHOLARS, AND PUBLISHED BY THE CENTRAL LIBRARY, BARODA.

BOOKS PUBLISHED.

1. **Kâvyamîmâṁsâ**: a work on poetics, by Râjaśekhara (880–920 A. D.): edited by C. D. Dalal, and R. Anantakrishna Sastry, 1916. Re-issue. 1924 ... ... Rs. 2–4

This book has been set as a text-book for the Acharya Examination of the Patna University.

The first two numbers are valuable works, and were hitherto quite unknown to me. The Introduction to *Kâvyamîmâṁsâ* is an interesting and an important contribution to our knowledge of ancient India.

(Sir) GEORGE A. GRIERSON.

2. **Naranârâyaṇânanda**: a poem on the Pauranic story of Arjuna and Krishna's rambles on Mount Girnar, by Vastupâla, Minister of King Vîradhavala of Dholka, composed between Samvat 1277 and 1287, i. e. A. D. 1221 and 1231: edited by C. D. Dalal and R. Anantakrishna Sastry. 1916 1–4

3. **Tarkasaṅgraha**: a work on Philosophy (refutation of Vaiśeṣika theory of atomic creation) by Ânandajñâna or Ânandagiri, the famous commentator on S'aṅkarâchârya's Bhâshyas, who flourished in the latter half of the 13th century: edited by T. M. Tripathi, 1917 ... 2–0

4. **Pârthaparâkrama**: a drama describing Arjuna's recovery of the cows of King Virâṭa, by Prahlâdanadeva, the founder of Pâlanpur and the younger brother of the Paramara King of Chandrâvatî, (a state of Mârwâr), and a feudatory of the kings of Guzerat, who was a Yuvarâja in Samvat 1220 or A. D. 1164: edited by C. D. Dalal, 1917 ... 0–6

5. **Râṣṭrauḍhavaṁs'a**: an historical poem (Mahâkâvya) describing the history of the Bagulas of Mayûragiri, from Râshṭrauḍha, king of Kanauj and the originator of the dynasty, to Nârâyaṇa Shah of Mayûragiri by Rudra Kavi composed in S'aka 1518 or A. D. 1596: edited by Pandit Embar Krishnamacharya with Introduction by C. D. Dalal, 1917. 1–12

6. **Liṅgânus'âsana**: on Grammar, by Vâmana, who lived between the last quarter of the 8th century and the first quarter of the 9th century: edited by C. D. Dalal, 1918 0–8

7. **Vasantavilâsa:** an historical poem (Mahâkâvya) describing the life of Vastupâla and the history of Guzerat, by Bâlachandrasûri, (from Modheraka or Modhera in Kadi Prant, Baroda State), contemporary of Vastupâla, composed after his death for his son in Samvat 1296 (A. D. 1240): edited by C. D. Dalal, 1917 1–8

8. **Rûpakaṣaṭkam:** six dramas by Vatsarâja, minister of Paramardideva of Kalinjara, who lived between the 2nd half of the 12th and the 1st quarter of 13th century: edited by C. D. Dalal, 1918 2–4

9. **Mohaparâjaya:** an allegorical drama describing the overcoming of King Moha (Temptation), or the conversion of Kumârapâla, the Chalukya King of Guzerat, to Jainism, by Yas'aḥpâla an officer of King Ajayadeva, son of Kumârapâla, who reigned from A. D. 1229 to 1232: edited by Muni Chaturvijayaji; with Introduction and Appendices by C. D. Dalal, 1918... 2–0

10. **Hammîramadamardana:** a drama glorifying the two brothers Vastupâla and Tejaḥpâla and their King Vîradhavala of Dholka, by Jayasimhasûri, pupil of Vîrasûri, and an Âchârya of the temple of Munisuvrata at Broach, composed between Saṃvat 1276 and 1286 or A. D. 1220 and 1239: edited by C. D. Dalal, 1920 2–0

11. **Udayasundarîkathâ:** a romance (Champû, in prose and poetry) by Soḍḍhala, a contemporary of and patronised by the three brothers Chchittarâja, Nâgârjuna, and Mummuṇirâja, successive rulers of Konkan composed between A. D. 1026 and 1050: edited by C. D. Dalal and Pandit Embar Krishnamacharya. 1920 2–4

12. **Mahâvidyâviḍambana:** a work on Nyâya Philosophy, by Bhaṭṭa Vâdîndra who lived about A. D. 1210 to 1274: edited by M. R. Telang. 1920. 2–4

13. **Prâcînagurjarakâvysaṅgraha:** a collection of old Gujarati poems dating from 12th to 15th centuries A. D: edited by C. D. Dalal. 1920. 2–4

14. **Kumârapâlapratibodha:** a biographical work in Prâkṛta, by Somaprabhâchârya composed in Saṁvat 1241 or A. D. 1195: edited by Muni Jinavijayaji. 1920 7–8

15. **Gaṇakârikâ:** a work on Philosophy (Pâs'upata School) by Bhâsarvajña who lived in the 2nd half of the 10th century: edited by C. D. Dalal. 1921 1–4

16. **Saṅgîtamakaranda:** a work on Music, by Nârada: edited by M. R. Telang. 1920. 2–0

17. **Kavîndrâcârya List:** List of Sanskrit works in the collection of Kavîndrâcârya, a Benares Pandit (1656 A.D): edited by R. Anantakrishna Sastry, with a foreword by Dr. Ganganatha Jha. 1921. 0–12

18. **Vârâhagṛhyasûtra:** Vedic ritual (domestic) of the Yajurveda: edited by Dr. R. Shamasastry. 1920 0–12

19. **Lekhapaddhati:** a collection of models of state and private documents, dating from 8th to 15th centuries A. D.: edited by C. D. Dalal and G. K. Shrigondekar. 1925 ... ... 2—0

Lekhapaddhati opens a new line; we know almost nothing on the art of writing letters in Ancient India. —Sylvain Levi.

This unique work has been edited very ably by the second Editor with an interesting preface, five appendices, a list of important persons and of prominent places, and a full Anglo-Sanskrit glossary. It contains numerous original specimens of all kinds of letters, deeds and documents in Sanskrit, and also quotations from the classical authors. It contains also many vernacular words and phrases, most of which are now obsolete. In order to ascertain the meaning of these obsolete words the learned second Editor had to travel over districts and to mix freely with the villagers. Thanks to his untiring zeal, we have at last been presented with a fairly good glossary which clears up the meaning of most of these terms which have hitherto baffled the endeavours of many an erudite scholar... Like many other works on letter-writing in other languages, it is by no means a dry work, but is interspersed with humorous touches. This had really added to the importance of the book.

—Calcutta Review.

20. **Bhaviṣayattakahâ or Pañcamîkahâ:** a romance in Apabhraṁs'a language by Dhanapâla (*circa* 12th century): edited by C. D. Dalal, and Dr. P. D. Gune, 1923 6–0

A very useful and valuable contribution of that exceedingly important and still imperfectly known stage of linguistic evolution which linked the older Prâkṛts to the modern vernaculars. —J. R. A. S.

21. **A Descriptive Catalogue of the Palm-leaf and Important Paper MSS. in the Bhandars at Jessalmere,** compiled by C. D. Dalal, and edited by L. B. Gandhi. 1924 3–4

The editor has added an introduction of 70 pages on the most important works, together with indices of titles, authors and other points of interest. The book is an important addition to the bibliography of Prâkṛt and Sanskrit.

—J. R. A. S.

22, 23. **Paras'urâmakalpsûtra**: a work on Tantra, with commentary by Râmes'vara and Paddhati by Umânanda: edited by A. Mahadeva Sastry, B. A. 2 vols. 1923. 11–0

24. **Tantrarahasya**: a work on the Prâbhâkara School of Pûrvamîmâṁsâ, by Râmânujâchârya: edited by Dr. R. Shamasastry. 1923. ... 1–8

Throw considerable light upon the arcana of their subject, and are adequately edited with an introduction by Dr. R. Sama Sastry. —J. R. A. S.

25, 32. **Samarâṅgaṇa**: a work on Architecture, town-planning and engineering, by king Bhoja of Dhara (11th century): edited by Mahamahopadhyâya T. Gaṇapati Sastry, Ph. D. 2 vols, 1924–1925.... 10–0

Mahamahopadhyaya T. Gaṇapati Sastri's edition of King Bhoja's rare book on architecture will be highly appreciated by all Sanskrit scholars.

—M. Winternitz.

The work treats in detail of the selection of sites, of the planning of towns and villages, the building of houses, halls and palaces, stables for elephants and horses, the construction of various machines etc.

—Vienna Oriental Journal.

26. **Sâdhanamâlâ**: a Buddhist Tantric text of rituals, dated 1165 A. D. consisting of more than 300 small works composed by distinguished writers: edited by Benoytosh Bhattacharyya, M. A., Ph. D. 2 vols, vol. I. 1925. 5–0

The issue is one of great importance and I feel sure that the edition will be most warmly welcomed. ... This is an important addition to our materials for the study of Buddhist Iconography and that special development of Buddhism which the text illustrates so abundantly.

—Johan Van Manen.

The editor has well accomplished his task and deserves praise. The edition is in no way inferior, if not superior, to many of the European and Asiatic editions of the Buddhist Sanskrit works.

—Indian Historical Quarterly.

The edition evinces painstaking critical care, is a valuable contribution to the Buddhist Iconography and would be welcome also by the specialist.

—JOURNAL OF THE BIHAR & ORISSA RESEARCH SOCIETY.

Iconographic interest apart, the *Sâdhanamâlâ* presents philological and historical problems of great importance. —MODERN REVIEW.

Sâdhanamâlâ is particularly important for any scholar engaged in Buddhist researches. —SYLVAIN LEVI.

The work is in the mixed Sanskrit of the Buddhists similar to that used in *Lalitavistara*, etc. A very vivid picture is thrown in these 170 Sâdhanas on one section of the Buddhist society that had already introduced into itself the prohibited intricacies of idol-worship. It further gives an insight into the development of the Vajrayâna system of Buddhist philosophy, which is so little known to the oriental scholars dealing with Buddhism. Our hearty thanks are due to the publishers for the high class printing and exquisite get-up of the volume. —CALCUTTA REVIEW.

27. **A Descriptive Catalogue of MSS. in the Central Library, Baroda.** Vol. 1 (Veda, Vedalakṣaṇa and Upaniṣads), compiled by G. K. Shrigondekar, M. A. and K. S. Ramaswami Sastry. 1925. ... 6–0

The Catalogue of MSS is particularly welcome. I am looking forward with keen interest to the following parts of the Catalogue. —M. WINTERNITZ.

Describes 543 Vedic works running to 1420 manuscripts, excellently arranged and classified. —MODERN REVIEW.

28. **Mânasollâsa or Abhilaṣitârthacintâmaṇi**; an encyclopædic work divided into one hundred chapters, treating of one hundred different topics by Somes'varadeva, a Chalukya king of the 12th century: edited by G. K. Shrigondekar, M. A., 2 vols. vol. I. 1925. ... 2–8

Mânasollâsa on account of its encyclopædic character ought to be consulted by all scholars. —SYLVAIN LEVI.

A voluminous treatise consists of five sections, each comprising 20 chapters. These are concerned respectively with the means of acquiring the kingdom and preserving the same, and the description of the royal enjoyments, recreations and games. We await the publication of the second volume with great interest. —INDIAN HISTORICAL QUARTERLY.

Stupendous work extending to about 8000 Granthas and divided into 100 chapters...palpably an encyclopædic summary of all the available works on...technical sciences. —MODERN REVIEW.

The work treats of many subjects and gives the maximum information in minimum space. To be brief, we can unhesitatingly designate it as the true Encyclopædia of the Sanskrit language; in fact our author calls it the Jagadâcâryapustaka... The get-up of the book is good. —CALCUTTA REVIEW.

29. **Nalavilâsa**: a drama by Râmchandrasûri, pupil of Hemachandrasûri, describing the Paurâṇik story of Nala and Damayantî: edited by G. K. Shrigondekar and L. B. Gandhi 1626. 2–4

30, 31. **Tattvasaṅgraha**: a Buddhist philosophical work of the 8th century by S'ântarakṣita, a Professor at Nâlandâ with Pañjikâ (commentary) by his disciple Kamalas'îla, also a Professor in Nâlandâ (about 750 A. D.): edited by Pandit Embar Krishnamâchârya with an English Foreword by Dr. B. Bhattacharyya, M. A., Ph. D. 2 vols. 1926.... 24–0

33, 34. **Mirat-i-Ahmadi** with its Khatimae or Supplement: By Ali Mahammad Khan, the last Moghul Dewan of Gujarat: edited in the original Persian by Syed Nawabali, Professor of Persian, Baroda College, 2 vols. (Vol. 1 in the Press), Vol. II. ready about December 1926 ... 12–0

35. **Mânavagṛhyasûtra**: a work on Vedic ritual (domestic) of the Yajurveda with the Bhâshya of Ashṭâvakra: edited by Pandit Ramakrishna Harshaji S'âstrî, with a preface by Prof. B. C. Lele. SHORTLY.

BOOKS IN THE PRESS.

1. **Nyâyapraves'a**: the earliest work on Buddhist logic, by Diṅnâga, with commentaries of Haribhadrasûri and Pârs'vadeva: edited by A. B. Dhruva, M. A., LL. B., Pro-Vice-Chancellor of the Hindu University, Benares and Pandit Vidhusekhara Bhattacharyya.

2. **Sâdnanamâlâ**: Vol. II., edited by Benoytosh Bhattâchâryya, Ph. D. General Editor, Gaekwad's Oriental Series. Illustrated.

3. **Nâtyas'âstra**: on dramaturgy, by Bharata with commentary by Abhinavagupta of Kashmir: edited by M. Ramakrishna Kavi, Illustrated. 4 vols. VOL. I SHORTLY.

4. **Kalpadrumakos'a**: standard work on Sanskrit Lexicography by Kes'ava: edited by Pandit Ramavatara Sarma Sahityacharya of Patna.

5. **Advayavajrasaṅgraha**: consisting of twenty short works on Buddhist philosophy by Advayavajra, a Buddhist savant belonging to the 11th century A. D.: edited by Mahâmahopâdhyâya Dr. Haraprasad Shastri, M. A., C. I. E. Hon. D. Litt.

6. **Apabhraṁs'akâvyatrayî**: consisting of three works, the Carcarî, Upades'arasâyana and Kâlasvarūpakulaka, by Jinadatta Sûri (12th century) with commentaries: edited by L. B. Gandhi.

7. **Mânasollâsa** or Abhilaṣitârthacîntamaṇi, Vol. II., edited by G. K. Shrigondekar, M. A.

8. **A Descriptive Catalogue** of MSS in the Central Library, Baroda Vol. II (S'rauta, Dharma and Gṛhya Sûtras) compiled by the Library staff.

9. **A Descriptive Catalogue of MSS in the Jain Bhandars at Pattan** edited from the notes of the late Mr. C. D. Dalal, by Pandit L. B. Gandhi. 2 vols.

10. **Bhâvaprakâs'ana** of S'âradatanaya: an ancient work on Dramaturgy; edited by Pandit Ramaswami Sastry, Central Library, Baroda and His Holiness Yadugiri Yatiraja Swami, Melkot.

11. **Prajñopâyavinis'cayasiddhi** of Anaṅgavajra and **Jñânasiddhi** of Indrabhûti: two important works belonging to the little known Vajrayâna school of Buddhism (8th century A. D.): edited by Benoytosh Bhattacharyya, Ph. D., General Editor, Gaekwad's Oriental Series.

* * * * * *

The Baroda Library Handbook. By Newton Mohun Dutt, Curator of Libraries, Baroda State. With Introduction by H. E. the Dewan of Baroda. 84 pages royal 8vo. 15 illustrations. Bibliography. 1926 ... ...Re. 1-0

For the British provinces and the Indian States where the library movement is in its infancy, or is non-existent, this *Handbook* will be helpful, suggestive and stimulating.

—*Bombay Chronicle*, 14. 3. 26.